क्रम सं०

प्रवेश सं०

विषय: धर्मशास्त्रीयं

ग्रन्थकार अनन्तदेवः

नाम स्मृतिकौस्तुभः (संस्कार दीधितिः)

पत्र सं० १-२८४, पञ्चपत्राणि अनुक्रमणिकायाः

श्लोक सं०

अक्षर सं० (पंक्तौ) ३७

पंक्ति सं० (पृष्ठे) १२

लिपिः दे.ना.

आधारः अ.

आकारः १३. × ५.७.

सं. १८३०

वि० विवरणम् पू.

अ०. ~~५०४~~ ६४८५

पी० एस० यू० पी०--७७ एस० सी० ई०--१६५१--५० ०००

13710

अनन्तदेवकृताशौच दीधितिरपि

Indira Gandhi National Centre for the Arts

१५८३

॥अथसंस्कारकौस्तुभस्यसूचीपत्राणिलिख्यते॥


१ आद्यमासत्रयेगर्भस्राववालछेदा॰
२ प्रथमऋरिनेअह्निका॰
२ पुरुषवालमरणे
२ कन्यावालमरणे
३ अप्रत्ताधरणे पितृगृहेप्रसवमरणे
३ पक्षिणीपदार्थमारणे
३ प्रतिलोमानं
३ सूतकानां
४ शौचान्नभक्षणे
५ दासाशौचं
५ राज्ञोजननमरणसूतिकाविचार
५ अतिक्रान्ताशौचे
५ देशांतरलक्षणं
६ सपत्नमातृविषया॰
६ यथाशौचसंपात
६ मातुरन्यासेहणे
७ भ्रातुःपक्षिणीमध्ये पितुरेकादशाहक्रा॰
७ शौचापवादः
८ आशौचसंध्या
८ द्रव्येष्वाशौचाभावः
९ दुर्मरणेः
९ सर्वहेतेविशेष
७ अंतहुनादिआरंभे
१० जलप्रवेशेविशेष
११ द्वादशवर्षप्रतीक्षा
११ मासादित्ताना
११ मृत-पुनःआयाति
११ घटस्फोटविधि
११ दाहमध्येदर्शपातः
१२ रजोदर्शनेतस्यारूपनिर्णयं
१२ प्र॰तिथिफलं
१२ पूर्वाह्णिदिफलं
१२ वारनक्षत्रयोगलग्न
१४ लग्नसंस्थग्रहफल्क्षः
१३ प्रथमरजोदर्शनेमास
१४ अ॰वस्त्रफलं
१४ अथस्नानफलं
१४ प्र॰शिष्टाचारः
१४ सर्वर्तुसाधारणनि॰
१५ नैमित्तिकस्नानिर्विद्धि
१६ कालांतरेपुनःरजोदर्शनएकादशदिनोत्तरंस्वदशअष्टादशदिनो॰
१६ रजस्वलाशुद्धप्रवेश
१६ स्नानोत्तरंपरपुरुषस्पर्शेप्रायश्चित्तं
१६ ज्वरितायाःशुद्धिप्रवे
१६ रजस्वलोःपरस्परसंसर्गेप्रायश्चित्तनि॰
१६ शुनीजंबूदृष्टेप्रा॰
१६ दुष्टरजोदर्शनेशा॰
१७ सप्तमृत्तिकास्नात्रिऔष॰
२५ शौनकोक्तरजोदर्शनशांतिः
२६ मदनरत्नोक्तरजोदर्शनशांतिः
२७ बौधायनोक्तरजोदर्शनशांति
२८ घृतसूक्तब्रह्मसूक्तंच


Indira Gandhi National Centre for the Arts

अनु॰
१


२८ अथागर्भाधानं ४५ जातगर्भाधर्नत्रियं ५३ पंचगव्यप्रमाणं ६३ आशौचनिर्णय॰ ७१ ज्यानकर्मप्रयोग
३० पुनसंधानं पुत्तत्स्वस्ति ४७ गर्भीणिपतिधर्मा ५४ विरेश्वरस्तोत्र ६ गर्भीण्यागर्भश्रावहरण ७२ जन्मदेवतापूजनं
३२ पंचपल्लवत्वचा ४७ नारायणवलि॰ ५४ दत्तगेयाह्याग्राह्यवि विधिहरिवंशे ७३ जननाशौचेकरतौ
३३ शोनकोक्तस्वस्तिवा॰ ४१ नागवलि ६० बहूरचपुत्रप्रतिग्र ६४ पुत्रकामेष्टि निर्णमरणाशौचमपि
३४ कर्मदेवता ५० वंध्यात्वहरशुवर्ण हसमयः ६५ पुंसवन काला ७३ जननशांतिगोप्रसव
३५ अथवृद्धिश्राद्धं धेनुदानं ६० यजुर्वेदीनांपुत्रप्र ६६ श्रीमंतोनयनकाला ७६ कन्याजनन १४ शांति
३७ जिवत्तपित्रकस्यनाश्र॰ ५० निग्रहविधि ६१ श्रीमंतभोजनेप्रायश्चि॰ १४ चतुरदश
४० प्रवासेपितासुतसंस्का॰ ५१ कृच्छ्रादिलक्षणमुक्तं ६१ बहूरचशोनकोक्त ६९ सुतकाग्रह ७७ शनिवालिकुहूशं॰
रेपितृकस्तकलादिजन॰ प्राजापत्यचांद्रायणं प्रयोग ७० विधिर्षवनसूक्तं॰ ७९ दरशशांति
४२ वृद्धिश्राद्धेवैश्वदेवनिर्ण॰ ५१ कृच्छ्रादिप्रत्याम्नाय ६२ दत्तकस्यविवाहादि ७० पुत्रजन्मकालेकर्तव्यं ८१ मुलशांति
४३ मातृकापूजनंनांदिश्रा॰ ५२ प्रायश्चित्ताश्निकार्य॰ गोत्रनिर्णयमापिंड ७० ज्यातकर्मजनिनकार्य ८८ आश्लेषाशांतिः
४३ गर्भाधानेअन्वाधानं ५३ स्नानविधिर्दशनायमः निर्णयः ७१ ज्यातकर्मानंतरंकार्य ९० ज्येष्टाशांति

९३ वितिपातवैधृतिसंक्रा शोनप्रविशेनस॰ तिःग्रहकं ९ उल्कापात ११२ दुलारोहणंस्थिरन॰ ११८ अथकर्णवेद्ध
तिशांति ग पत्रमेकुंतु भोवाप्ररोहेतवा॰ काकसर्पसंगमः क्षत्राणि दारुण ११८ रक्षाविधि
ऋगतंदृतिनहाते स्निकंमधुजालंवा ९४ त्रिकप्रसवशांति क्षिप्र॰ साधारण॰ ३॰ ११९ मलनादोरक्षा
९७ ग्रहणेजन्मशांति स्वेदुदकुंभप्रत्य १०५ दंतजननशांति याणि॰ विधि
९८ नक्षत्रगंडांतशांति तनेआसनशयन १०६ षष्टाष्टमेमासि ११२ मृदुनिचराणि ११९ अथद्विजन्मकुंस
९९ तिथ्यादिगंडांतशां॰ पानभंगेग्रह॰ धि १०६ सिंहसंक्रांतिमध्येगो ११३ दुग्धपान वृद्धायनकटिसूत्र
१०० दिनक्षयायशांति काककुलशिसरी प्रसवशांतिः ११३ अन्नभ्रजन निषिद्ध
१०१ दृग्धयोग स्तुपसर्पणेळत्रध १०६ सुखप्रशवेउपाया ११३ स्तिपुलभक्षण ११९ चौलकालनिर्णय
१०१ विषनाडीजननशां जविनाशेस्त्रअन्य १०७ मंत्रोउपाय ११३ सूर्यावलोकन १२० तत्रमातरिगर्भि
१०३ यमलशांति बुउत्पादेपुऐतदे १०७ नामकरणं ११३ निष्क्रमण ण्यांनिर्णया
१०३ ग्रहोउत्पादशांति वप्रायश्चित्तविक्र १११ गर्भाधानादिचुडासंस्कार ११४ उपवेशन १२० तत्रमातरिरजस्व
उलुककपोतग्रधर तिप्रसवयमलोत्पा रत्नोव्याहृतिहोमकर्तव्यः सर्वकपारः ११४ अन्नप्राशन लायांनिर्णय


श्री॰
३

Indira Gandhi National Centre for the Arts

अनु॰ २


१२१ सुतके प्राप्ते विशेषा
१२२ चोलकर्मप्रयोग
१२३ अक्षरस्विकारा
१२४ अनुपनितधर्मा
१२५ बालपितृधर्मा
१२६ उपनयनाधिकारणा
१२६ स्रोत्रयलक्षणंजंकम ष्टे
१२६ उपनेत्रोधिकारिप्रायश्चितं
१२८ अथोउपनयनकाला
१२८ काम्यउपनयनकाला
१२८ गो-गकालाः
१२८ उपनयनेअयनादि निर्णया
१२८ वर्णविशेषेणरुतु विशेषाः
१२९ नजन्ममासनिषेध निर्णय
१३० उपनयनेवासर
१३० उप॰ बृहस्पतिबल
१३१ उपर्गजने
१३२ अहतलक्षणं
१३२ कृष्णाजिनल॰
१३३ उपनितमाह
१३३ उपवितकंठोत्तार
१३३ मेखलामाहदंडमाह
१३३ व्याहृतिहोमपूर्व
१३३ आचमनप्रकार
१३५ अवक्षारणेविधि
१३६ उप॰ पदार्थेषु विशेषा॰
१३७ विनायकशांति
१३९ सर्वऔषधिवस्त्र
१३९ सर्वगंध
१४१ परिशिष्टोक्तयहसुख
१४३ बृहस्पतिशा॰ श्जाम
१४४ अथउपनयने काले
१४५ उपनयनप्रयोग
१४७ उपनयनोउत्तरंअनुप्रवचनातपूर्वश्च तेनस्पृशांति
१४९ नष्टस्योपनयनाग्ने पुनउत्तसनि
१५० अनुप्रवचनिय
१५० मेधाजनन
१५१ मंडपोद्वासनप्र॰
१५२ नांदिश्राद्धोत्तरं मंडपोद्वासनपर्यंतनिषेधपदार्था
१५२ विकलांगविषये
१५२ पुनरूपनयनं
१५३ आचाराद्योत
१५३ प्रायश्चित्ताद्योत
१५३ द्वितियउपनयनप्र
१५३ समयोद्योते
१५५ तत्री प्रकाराउपनयनस्य
१५६ उपनयनेपुनाविशेष॰


श्री॰ २


१५७ और्ध्वदैहिककृन पुनसंस्कारमक॰ बहूचानांपुनाः
१५८ यजुशाखिनांपु॰
१५९ ब्रह्मचारिधर्मा॰
१६० ब्रह्मचारिव्रतलोपप्रायश्चितं
१६० अथअनध्याया
१६१ गरर्जितेविषेया
१६२ अध्येयनधर्मा
१६२ महानाम्नीव्रतं
१६४ महाव्रतं
१६५ उपनिषधव्रतं
१६५ गोदानव्रतं
१६५ समावर्तन॰
१६५ वरलक्षणं
१६७ अश्वप्रतिग्रहदो
१६८ समावर्तनकाला
१६८ समावर्तनप्रयोग
१८२ स्त्रीयासहभोजनं
१८३ स्नातकव्रतवि॰
१८२ समावर्ताच्चानंतरं त्रिरात्रमाशौचं
१८३ अथविवाहेसापिंड निर्णय॰
१९० गोत्रप्रवरनिर्णय॰
१९२ प्रवरलक्षणं
२०४ क्षत्रीवेश्यप्रवरगोत्रनिर्णय॰
२०४ मात्रगोत्रनिर्णय॰
२०४ दत्तकपुत्रप्रवरनि॰
२०५ एकोदरएकदिनेविवाहविषये
२०५ रुतत्रयेस्यमध्येभ्रात्रास्पर्शाः
२०५ यमलोविशेषः
२०५ अथविवाहकालरात्रो विवाहकाल
२०६ मासनिर्णय
२०६ तिथिनिर्णय
२०६ विवाहचतुर्थदिनमध्ये श्राद्धदिनदर्शनि॰
२०८ साहापिंडेषोडशश्राद्धापकरर्षनांदिश्रा॰
२०८ नक्षत्र॰ वारारश्च॰
२०८ क्षयेपक्षः
२०८ क्षयेसंवत्सरा
२०९ नादिश्राद्धात्कन्या नारजस्वलाविचार
२०९ नांदिश्राद्धापकर्षोनुष्ठान
२०९ नादिश्राद्धोत्तर सुतकप्राप्तेविवाहदिकंकार्य
२०९ विवाहेविवाहात् पूर्वकन्यारजोउत्पतिविवाहाप्योगतासिधि
२०९ होमकालेरजोदर्शनेतु
२०९ प्रति कुलसिद्धि मातापितृमरणे


Indira Gandhi National Centre for the Arts

अनु० ३

२१० संकष्टेप्रतिज्ञा २१७ दत्तायामपिहरेत् २१८ वरस्यजन्मकालि २२३ विष्टरलक्षणगौरि २३४ ग्रहप्रवेशनियहो
स्माह २१७ परिवेत्तादिनिर्णय: नग्रहस्थितभार्य हरपूजनविधी २३५ वहुवस्त्रदानपे
२११ सपिंडीकरणंक २१५ देशांतरगतज्येष्ठ तोपरिहारोउपाया: २२३ श्रीमांनेवरपूजनंम रिणिदान
ष्टेनकर्तव्यं प्रतिक्षाविधि २१८ ब्राह्मणस्यविवाह: धुपर्कस्य २३६ द्विभार्याग्निसंयो
२१३ अथविवाहभेदा २१५ कन्याविषयेदोषा २१८ हरिवंशश्रवणविं २२४ गोनिष्क्रमण ब्राह्मण: गप्रयोग
अष्टप्रकारा: अपवादा: २१९ कन्यादानप्रशंसा २२५ आपंस्तंभोक्तमधुप २३७ अथाग्निसंसर्ग:
२१४ धर्मविवाहफ २१५ मंडपादिनिर्णय: २१९ वागदानप्रयोगा: र्क स्त्रा०
२१४ वागदानोत्तरं २१६ कन्याया:जननका २२० विवाहात्पूर्वदिन २२६ अथकन्यादानंप्र २३८ स्थालिपाक
वरमरणं लिनयस्सूचितवे २२१ नांदिश्राद्धविचार प्रयोग २४२ पिंडपितृज्ञं
२१५ शुल्कदानवरमर धव्येपत्न्याआरोपणा: जिवत्पीत्रकस्य २२८ औपासनप्रयोग: २४३ दर्शस्थालिपाक
२१७ अनेकेभ्योदत्ता २१८ तस्यप्रयोगा: २२२ दत्तकपुत्रानांदी कुंडस्थंडिलप्रमाणं प्रयोग
कन्याकस्यदेवा कुंभविवाहा: श्राद्धविधि २४४ संपूर्णग्रंथ

श्री० ३

भूमा ना मर्न [illegible]

[illegible]
९ स्नानविधि:
११ मासादिस्नानं
१२ [illegible]

त्रिवृप्रसव
[illegible]
९६ प्रसवेषष्ठेमासि
९८ प्रसवत्वेकतवा
९९ सिंहस्थेगौतमप्र [illegible]
सुखप्रसवोपाया:
१०१ मैत्रोपाय:
१०७ नामकर्म
गर्भाधानादिचूडान्त
१११ संस्कारलोपव्याहृति
होमप्रर्वकपाद [illegible]
११२ दोलारोहणं
[illegible]
दातृणं छिद्रस्य
धारणं अन्नादि
११२ कृद्धति चराणि
११३ [illegible]
११३ [illegible]

११३ [illegible]
११५ दान
११६ रक्षाविधि
११९ स्खलनादौरक्षाविधि
११९ अर्धहिम [illegible]

१६९ ब्रह्मचारिधर्म
१७० अतिक्रमेप्रायश्चित्त
१७१ अनध्याय:
१७२ स्नातकधर्मा
१७२ महानाम्नीव्रत
१७३ [illegible]
१७४ महाव्रत
१७४ उपनिषद्व्रत
१७५ अथगोदान
१७५ समावर्तन [illegible]
१७५ [illegible]
१७५ [illegible]
१७७ समावर्तनप्रयोग:
१७८ समावर्तनप्रयोग
१७९ कर्तव्यं
१८० विवाहेभार्यासह

Indira Gandhi National Centre for the Arts

[illegible]कार ग्रोस्तुरस्य
सूचीपत्राणि

१ अथ मासनक्षत्र [illegible]
[illegible]
[illegible]

[illegible]

२२ रजोदर्शनेतत्स्व
रूपनिर्णय
२३ प्रथमरजोदर्शनि[illegible]
फले
२३ प्र. तिथिफले
२३ [illegible]
२३ वारन क्षत्र[illegible]
२४ [illegible]
[illegible]

[illegible]
२५ रजस्वला [illegible] परस्पर
[illegible]

[illegible] शतानि
[illegible]
[illegible] जोदर्शनेशो[illegible]
२६ [illegible] कार जोदर्शने
२७ [illegible] जो [illegible]
[illegible]
[illegible]

[illegible]

[illegible] लक्षण [illegible]
[illegible]
[illegible] प्रत्याम्नायः
[illegible] स्वीकार [illegible]
[illegible]

[illegible]
सीमंत भोजने [illegible]
[illegible]
[illegible] प्रयोगः
[illegible]
७७ सिनीवाली कुहू शांतिः
[illegible] शांति
मूल शांति
आश्लेष शांतिः
[illegible] शांतिः
[illegible]

[illegible] शांतिः १०
[illegible]
विषनाडी जननशांति १०
[illegible] शांतिः
[illegible]

[illegible] सूचीप

११८ चौलकालनिर्णयः
१२० तत्रमातृगर्भिण्यां निर्णयः
१२० तत्र मातारजस्वला यो[illegible]
१२१ सूतके प्राप्ते विशेषः
१२१ चौलकर्मप्रयोगः
१२३ अक्षरस्वीकारः
१२४ अनुपनीतधर्माः
१२५ बालपितृधर्माः
१२६ उपनयनाधिकारः
१२८ श्रोत्रियलक्षणं [illegible]
१२९ उपनेत्राधिकार प्रायश्चित्ते
१२७ अथोपनयनकालः
१२७ काम्यउपनयनकालः
१२७ गौणकालः
१२८ उपनयने [illegible] नादि निर्णय
१२८ वर्णविशेषेण [illegible] विशेषः
[illegible] निषेध निर्णयः

१३० उपनयनवासर
१३० उप. बृहस्पतिबले
१३१ उपनयनगर्जने
१३१ अहतलक्षणं
१३२ [illegible]
१३३ उपवीत [illegible]
१३३ उपवीतदेवतार
१३३ मेखलाभाड
१३३ [illegible]
१३३ [illegible] होम [illegible]
१३३ आचमनप्रकार
१३५ अवधारण वि[illegible]
१३६ उप. [illegible] विशे[illegible]
१३७ विनायकशांति
१३९ सर्वोषधि [illegible]
१३९ सर्वौषध
१४१ पारिशेष्ये [illegible]

१५३ बृहस्पति [illegible]
[illegible] अपउप
[illegible] नयन [illegible]
१५५ उपनयन [illegible]
१५६ उपनयनान्तरं
अनुप्रवचनी
[illegible] गर्जित
स्पर्शोनं
१५० नष्टस्यापन
[illegible] पुनरुपन[illegible]
१५ उत्तुप्रवचनीय
१५ [illegible]
१६१ [illegible] पादासनप्र
१६२ नांदी श्राद्ध [illegible]
मंडपोद्वासनपर्यंत
निबंधपरार्थः
१६२ विकलांग विषये
१६३ पुनरुपनयन
१६३ आचाराद्योत
१६३ प्रायश्चित्तानाद्योत

१६२ द्वितीयउपनयनप्रकार:
१६२ समय [illegible]
[illegible] प्रकार: उपनयन
१६५ पुनरुपनयन [illegible]
१६६ [illegible]
१६७ [illegible]
[illegible] करणे
बहुस्वस्त्य [illegible] पुनः
१६८ [illegible] पुनः
१६९ ब्रह्मचारिधर्माः
१७० ब्रह्मचारी [illegible]
१७० अथ [illegible] धायाः
१७१ गर्जित विशेष
१७२ अध्ययनधर्म
१७३ महानाम्नी व्रत
१७४ महाव्रते
१७५ उपनिषद्व्रते
[illegible]

१७५ समावर्तन
१७५ वरलक्षण
१७६ अथ [illegible] प्रातिग[illegible]
१७७ समावर्तन काल:
१७८ समावर्तनप्रयोग
१८२ [illegible]
१८३ स्नातक [illegible]
समावर्तनानंतरं
१८३ [illegible] मा [illegible]
१८८ [illegible] विवाहे [illegible]
पिंडनिर्णयः
१९० गोत्रप्रवरनिर्णय
१९२ प्रवरलक्षण
२०४ क्षत्रियवैश्य
गोत्रनिर्णय
२०४ मातृगोत्रनिर्णय
२०४ दत्तपुत्रप्र[illegible]

Indira Gandhi National
Centre for the Arts

उदोदरे एकस्मिन्दिने विवाहांबे
२०५ स्तनुत्रयस्य मध्ये कन्याद्वय
२०५ यमलयो विशेष:
२०५ अथ विवाहकाल [illegible]
२०६ चारुनिर्णय:
२०६ तिथिनिर्णय:
२०६ विवाह चतुर्थीदिन मध्ये श्राद्धदिन दर्शनिषेध:
२०७ सापिंड्ये षोडशश्राद्धापकर्ष नांदीश्राद्ध
२०७ अथ नक्षत्र था राशि
२०८ अयपक्ष:
२०८ अयसंवत्सर:
२०९ नांदीश्राद्धाकरणा नारज स्वलाविचार:
२०९ नांदीश्राद्धस्य पञ्चैष्ठानं
२०९ नांदीश्राद्धानन्तर तत्र प्राप्त विवाहे [illegible]
[illegible] कन्यारजो [illegible]
२१० प्रतिकूलविधि: माता विद्यमाना
२१० स्त्रीवृद्धप्रवृत्ति प्रकार [illegible]
२११ सप्तपदी प्राग्[illegible]
२१३ अथ विवाहभेद: [illegible]
२१४ धर्म: [illegible]
२१४ वाग्दानोत्तर वरमरणे
२१४ शुल्कदाने वरमरणविषये
२१४ अनंतर योद्वाद कन्याप्रसंग
२१४ दत्ताया अपहरण
२१४ परिवेत्रादि निर्णय:
२१५ देशांतरगत ज्येष्ठ प्रतीक्षावधि:
२१६ कन्याविषये दोषापवाद:
२१६ मंडपादि निर्णय:
२१६ कन्याया: जन्मकालीन ग्रह सूचित वैधव्य परिहार उपाय:
२१७ तस्य प्रयोग: कुम्भविवाह
[illegible] नार्य त्वपारहारोपाय:
२१८ ब्राह्मणस्य विवाह कर्तव्य:
२१८ हरिद्राश्रवण विधि:
२१९ कन्यादानप्रशंसा
२१९ अथ वाग्दानप्रयोग:
२२० विवाहपूर्वदिन कृत्य
२२१ नांदीश्राद्धविचार जीवत्पितृकस्य
२२२ दत्तकपुत्र नांदीश्राद्धवि.
२२२ विष्टर लक्षण [illegible] प्रयोग
२२३ सीमान्तवरपूजन मधुपर्कश्च
२२४ गोनिष्क्रय [illegible]
२२५ आपस्तम्बोक्त मधुपर्क:
२२५ अथ कन्यादानं तत्प्रयोगश्च
कुंडस्थंडिल [illegible]
२३४ गृहप्रवेशनीय होम:
२३४ वधूवरस्य दान [illegible]
२३५ द्विजोपाग्निसंयोगप्रयोग:
२३५ आर्द्रविवाहप्रयोग:
२३५ अथाग्निसंसर्गदोष [illegible]
२३५ अथ स्थालीपाक
२३६ अथ पिंडपितृयज्ञ
२३६ दर्शस्थालीपाकप्रयोग:
२४० संपूर्णग्रंथ


Indira Gandhi National Centre for the Arts

॥श्री॥

ना॰१ ॥श्रीकृष्णं धुंढिराजं च प्रणम्याशौचनिर्णयः॥ क्रीयते जीवदेवेन यथामति समासतः
॥जीर्णान्नवीनांश्चैव ग्रंथानालोक्य सर्वशः॥ संग्रहोत्र कृतः सद्भिः दृष्टव्योयं प्रयत्नतः॥ आशौचं द्विवि
धं॥ कर्मानधिकारलक्षणमस्पृश्यतालक्षणं चेति॥ तदपि प्रत्येकं द्विविधं॥ सूतकं मृतकं च॥ तत्राद्यं पु
त्रसुवः स्नातिकायाः दशाहोर्ध्वं सत्यपि स्पृश्यत्वे विंशतिरात्रपर्यंतं कर्मानधिकारलक्षणं सपिंडानां
च दशाहमध्येपि॥ द्वितीयं तु पुत्रजन्मनि पितुः स्नानात् अस्पृश्यतालक्षणं॥ मृतकमपि दशाहादिविभा
गेन अस्थिसंचयनादूर्ध्वं स्पृश्यत्वे सत्यपि कर्मानधिकारलक्षणं दशाहादि॥ द्वितीयं तु पित्राद्यौर्ध्वदेहि
कं कुर्वतो ब्रह्मचारिणः॥ कर्माधिकारे सत्यप्यस्पृश्यत्वमात्रं॥ एवं मन्वाद्यप्यूह्यं॥ समुच्चितं तु सूतकं
दशाहमध्ये सूतिकायाः॥ मृतकमपि तादृशं अस्थिसंचयनात्पूर्वं॥ कलौ च दशाहादिपर्यंतं॥ अ
स्थिसंचयनादूर्ध्वमंगस्पर्शनमेव चेति कालिवर्ज्येषु पाठात्॥ तत्र सूतकं तावदुच्यते॥ आद्यमा
सत्रये गर्भस्रावे मातुस्त्रिरात्रं सपिंडानां सद्यः शुद्धिः सद्यः पदात्स्नानात्प्रागभाव इति केचित्॥ स्नात्वाशु
द्धिरित्यन्ये चतुर्थादिमासत्रये मातुर्माससमसंख्यं॥ सपिंडानां चतुर्थे सद्यः शुद्धिः॥ पंचमषष्ठयो २
स्त्रिरात्रं॥ इदं चतुर्वर्णसाधारणं॥ मदनपारिजातस्तु आचतुर्थमासं पितुश्च स्नानं॥ नान्यसपिंडा
नां॥ पंचमषष्ठयोस्त्रिरात्रं निर्गुणसपिंडपरं॥ गुणवतामेकाहमित्याह॥ अत्र सर्वत्र मातुरेवास्पृ

विद्यारक्षित

शा॰२
श्यत्वमन्येषां कर्मानधिकारमात्रं॥ सप्तमादिमातुः सपिंडानां च दशाहं ब्राह्मणस्य॥ क्षत्रियस्य द्वा
दशाहं॥ वैश्यस्य पंचदशाहं शूद्रस्य मासं॥ न्यायवर्त्तिनस्त्वर्द्धं॥ माधवस्तु सप्तमाष्टमयोरपि सूतिकाति
रिक्तानां माससमसंख्यं नवमप्रभृति दशाहादीत्याह॥ क्षत्रियादिष्वपि मातुर्दशाहादेवास्पृश्यत्वनि
वृत्तिः॥ पितुः स्नानात्॥ कन्योत्पत्तौ न स्नानमिति केचित्॥ भवतीत्यन्ये॥ सपत्नमातुरपि प्राक्स्नानाद
स्पृश्यत्वमिति केचित्॥ सपिंडानामस्पृश्यत्वं सर्वदा नास्त्येव॥ किंतु कर्मानधिकारमात्रं॥ सप्तमपु
रुषपर्यंतं सपिंडाः॥ ततः सप्त सगोत्राः सोदकानां त्रिरात्रं॥ सगोत्राणां स्नानं॥ प्रयोगपारिजातस्तु
द्रुत्राः ततः सप्त पुंप्रसवे सपिंडानां दशाहादि॥ स्त्र्यपत्ये तु सोदकवत्सपिंडानामपि त्र्यहमित्याह॥ सोदकादीनामपि
सगोत्राः१ कर्मानधिकारमात्रं॥ सूतिकायाः स्वस्ववर्णाशौचानंतरं पुत्रप्रसूतौ विंशतिरात्रं कन्याप्रसूतौ मासं
कर्मानधिकारः॥ पितुः प्रथमषष्ठदशमादिदिनेषु दानादौ वचनादधिकारः॥ अथ मृताशौचं
॥मृतजाते बाले॥ जाते नालच्छेदादूर्ध्वं मृते वा सर्वेषां सद्यः शुद्धिः॥ जननाशौचं तु संपूर्णमस्त्येव
॥जाते नालच्छेदात्पूर्वं मृते मरणनिमित्ता सद्यः शुद्धिः॥ जननाशौचं तु मातुः संपूर्णं॥ सपिंडानां त्रिरा
त्रं॥ दशाहमध्ये मृतशिशोः स्नानमेव॥ नोदकदानादि॥ अलंकरणं तु सर्वत्र भवति॥ दशाहोर्ध्वं
सपिंडानां [illegible] स्नानमेव॥ नामशब्दो न कालोपलक्षणार्थः॥ किंतु स्वा

मातानाः सद्यःशुद्धिः१

Indira Gandhi National Centre for the Arts

र्थपर्व इत्युक्तं निर्णयसिंधौ॥ नामोन्नरं दंतोत्पत्तेः प्राग्दाहखननयोर्विकल्पः॥ दाहे एकाहमाशौ
॥२॥ चमुदकादि च॥ खनने सद्यः शुद्धिर्नोदकादि॥ जातदंतस्य वर्षत्रयात्पूर्वमकृतचूडस्य दाहखनन
योर्विकल्पः॥ पक्षद्वयेप्येकाहमाशौचं॥ दाहे त्र्यहः खननेत्वेकाह इति माधवः॥ स्मृत्यर्थसारस्थ
सदंतजातमृतस्य तु न दाहेकाहादि॥ दशाहमध्ये शौचाशौच निषेधात्॥ वर्षत्रयमध्ये कृतचूड
स्य तु दाहादि त्रिरात्रं चानित्यं॥ वर्षत्रयोर्ध्वमाव्रतादेशाद्दाहादि त्रिरात्रं चानित्यमेव॥ आव्रता
देशाद्दाहोदकदानादितूष्णीमेव॥ कृतचूडस्य पिंडदानमपि मंत्रतोतूष्णीमेव॥ सपिंडीकरणवर्ज्यं
षोडशश्राद्धानीति केचित् त्रिरात्रे दिने त्रयः पिंडाः द्वितीयेत्वारः अस्थिसंचयनं च॥ तृतीये त्रयः
पिंडाः वासः क्षालनं चेति॥ सर्वे त्रिरात्रे चैवमूह्यं॥ अनुगमनं तूनद्व्यब्दस्य कृताकृतं॥ अन्यस्य नि
त्यं॥ पित्रोस्तु दशाहोर्ध्वं यावदुपनयनं त्रिरात्रमेव॥ दशाहमध्ये पीति केचित्॥ ऊनद्व्यब्दे दश
दपक्षो मिताक्षरोक्तः स्मृत्यर्थसारे निराकृतः॥ एतत्सपिंडाशौचमुक्तं पुरुषमृतौ॥ कन्यामृतावाचू
कृ डाकालात्सद्यः शुद्धिः॥ तदूर्ध्वमवाग्दानादेकाहं॥ तदूर्ध्वमाविवाहात्पतिपितृगोत्रयोस्त्रिरात्रं ॥२॥
॥ अथ स्त्रीणां त्रिपुरुषमेव सापिंड्यं॥ साप्तपौरुषमिति गौडाः॥ पित्रोस्तु पूर्ववत्॥ केचित्तु पित्रो
रप्यजातदंतासु कन्यास्वेकाहो ततस्त्र्यहमित्याहुः॥ अत्रोनद्विवर्षे खननं पश्चाद्दहनं पुरुषवद्



ति स्मृत्यर्थसारे॥ अप्रत्तायाः पितृवेश्मनि ऋतुमत्याः मरणे यावज्जीवमाशौचमिति वाचस्पतिमि
श्राः॥ उदकपिंडदाने त्वाविवाहं विकल्पः॥ शूद्रेप्येवं॥ स्त्रीसधर्मत्वात्॥ इदं चैयोवस्थाशौचं सर्वव
र्णसाधारणं॥ सूतकं मृतकं च वयोवस्थाशौचं सपिंडग्रहणान्न सोदकादीनामित्याहुः॥ उपनयनोर्ध्व
मृतस्य पुरुषस्य दशाहादि जात्याशौचं सूतकवत्सर्वेषामूह्यं सोदकादीनां त्रिरात्रादि च॥ इदं चास्पृश्य
त्वलक्षणमपि॥ दशाहादित्रिभागे नास्थिसंचयनोत्तरं स्पृश्यत्वं कलौ वर्ज्यं। पितृमात्राचार्यपत्नीनां
महागुरूणां निपाते द्वादशरात्रं॥ विवाहादूर्ध्वं स्त्रीमरणे भर्तृपक्षे जात्याशौचं॥ न पितृपक्षे तत्र गृहे
प्रसवमरणयोरेकाहत्र्यहे पित्रोः॥ माधवस्तु नयत्र त्र्यहं पित्रोरेकाहो भ्रात्रादिबंधुवर्गस्येत्याहुः॥
भ्रातुः प्रसवे एकाहः॥ मृतौ त्र्यह इति केचित्॥ पक्षिणीत्यन्ये॥ भ्रातृभिन्नानामेकाहः पतिगृहे प्रस
वे तु पित्रादीनां नाशौचं॥ तद्गृहे मरणे पित्रोस्त्रिरात्रं भ्रातुः पक्षिणी॥ माधवस्त्वन्यत्र कन्यामृतौ पित्रोः
पक्षिणीत्याह॥ ग्रामांतरे द्व्यहमिति स्मृत्यर्थसारे॥ पित्रोर्मृतौ ऊढस्त्रीणां दशाहमध्ये त्रिरात्रं॥ ऊर्ध्वं तु
पक्षिणी॥ भ्रातुर्भगिनीगृहे तस्या वा तद्गृहे मृतौ त्रिरात्रं॥ अन्यत्र पक्षिणी॥ पक्षिणीपदार्थमाह हरद
त्तः॥ दिवामरणे तदहः ओतरा रात्रिः परेद्युश्च॥ रात्रौ मरणे सा रात्रिः परेद्युरहो रात्रिश्चेति॥ क्षीरस्वा

Indira Gandhi National Centre for the Arts

भिरपि॥पक्षाविवपक्षोपूर्वोत्तरदिवसौतन्मध्यवर्त्तिनीरात्रिःपक्षिणी॥निशाद्वयमध्यगोदिवसोप्येवमि
॥२॥ ति॥शूद्रस्यापिविवाहोर्ध्वंजातस्याशौचं॥स्त्रीशूद्रयोरुपनयनस्थानीयत्वाद्विवाहस्य॥विवाहाभावेपिषो
डशवर्षादूर्ध्वंजातस्याशौचमितिकेचित्॥अष्टवर्षादूर्ध्वमित्यन्ये॥अनुलोमानामाशौचंकलौनोपयु
क्तं॥प्रतिलोमानांनाशौचं॥मलापकर्षणार्थंस्नानमात्रमितिमिताक्षरायां॥माधवस्तुशूद्रवदाशौ
चमाह॥औरसपुत्रस्यपितृमातृमरणेदेशकालाविशेषेणजात्याशौचं॥दत्तकादीनांत्रिरात्रं॥दत्त
क्रीतादिमृतौचपूर्वापरपित्रोस्त्रिरात्रं॥सवर्णागस्त्रीमृतौप्रसवेचपूर्वापरभर्त्रोः॥उभयत्रसपिंडाना
मेकाहः॥दत्तकादीनांसवर्णगस्त्रीणांचासंनिधिमृतौपितृभर्त्रोरेकाहः॥सपिंडानांस्नानं॥हीनवर्ण
गानांत्वाशौचाभावः॥दत्तकस्यपुत्रपौत्राणांजननेमरणेवासपिंडानामेकाहः॥सपिंडेतुपुत्रीकृतेद
शाहएव॥एकस्यांपूर्वापरभर्तृत्पन्नयोःभ्रात्रोःप्रसवेएकाहः॥मरणेत्रिरात्रं॥दौहित्रभागिनेययो
रुपनीतयोस्त्रिरात्रं॥अनुपनीतयोःपक्षिणी॥मातुलेमातुलान्यांसन्निधौपक्षिणी॥असंन्निधावेका
हः॥आचार्येत्रिरात्रं॥तत्पुत्रपत्न्योरेकाहः॥श्रोत्रियेस्वगृहेत्रिरात्रं॥एकग्रामीणत्वेकाहः॥ऋत्विक्षुब २
हुकालयाजकेषुत्रिरात्रं॥अल्पकालयाजकेष्वेकाहः॥शिष्येस्वोपनीतेत्र्यहः॥परोपनीतेपक्षिणी॥आत्म

॥२॥शावनिर्हरणेतूच्यते॥स्नेहेनासवर्णनिर्हारे॥१

पितृष्वसृमातृष्वसृमातुलपुत्राःआत्मबांधवाः॥पितुःपितृष्वसृमातृष्वसृमातुलपुत्राःपितृबांधवाः॥
मातुःपितृष्वसृमातृष्वसृमातुलपुत्राःमातृबांधवाः॥अत्रबंधुत्रयेपक्षिणी॥पितृष्वस्रादिकन्यानामूढा
नांत्वेकाहः॥श्वश्रूश्वशुरयोःसान्निधौत्रिरात्रं॥असन्निधौपक्षिणी॥देशांतरेएकरात्रं॥जामातृमित्रशा
लकतत्सुतानांस्नानं॥शालकेत्वेकाहइतिकेचित्॥मातामह्याउभयोस्त्रिरात्रं॥ग्रामांतरेपक्षिणी॥माता
मह्यांपितृष्वसरिचपक्षिणी॥एषुविषयेषुपक्षिण्येकाहादिगुरुलघुकल्पाःस्मृत्यंतरोक्ताःएवमेवस
न्निधिविदेशादिभिर्व्यवस्थाप्याः॥सर्वत्रमूल्याभावेक्रियाकर्तुरसगोत्रस्यापिदशाहः॥स्वसपिंडेषु
वानप्रस्थयतिषंढेषुमृतेषुस्नानं॥योषिद्गोविप्रगुप्त्यैमृतेदिनं॥युद्धमृद्धनिमृतस्यस्नानं॥पुत्रहतेन
कालांतरमृतस्यैकाहः॥आसप्ताहात्त्रिरात्रमूर्ध्वंदशरात्रमितिकेचित्॥असान्निध्येस्नानमितिमाध
वः॥पुत्रहतस्यश्राद्धादिनिषेधइतिकेचित्॥अन्येदशपिंडनिषेधमाहुर्यतिवत्॥दिवाशवस्पर्शेनक्ष
दर्शनाच्छुद्धिः॥रात्रौचेत्सूर्यदर्शनात्॥शवस्पृशस्तदन्नाशनेतद्गृहवासेयावत्तेषामाशौचंतावदाशौचं
॥एवंयस्यसंसर्गादाशौचंपततिनतस्यकर्माधिकारः॥किंत्वस्पृश्यत्वमात्रंतद्ब्राह्मणांचव्याधितानां
शौचसंबंधः॥गृहवासेत्र्यहोणेवैकाहः॥इतिगृहेणनिर्हारेतदन्नाशनेतद्गृहवासेचदशाहः
॥तदन्नानशनेतद्गृहवासेत्र्यहः॥दाहेचतज्जात्याशौचं॥विजातीयनिर्हारेशवजातीयमाशौचं॥

Indira Gandhi National Centre for the Arts

अत्र मृतिग्रहे द्विगुणं॥ आपद्येकगुणं॥ सोदकानि द्वौ रेदशाह इति माधवः॥ असपिंडालंकरणे ज्ञानतः
४ कृते कृच्छ्रपादः॥ अज्ञानादुपवासः॥ अशक्तौ स्नानं॥ धर्मार्थमनाथसवर्णहरणे क्रियाकरणे चाधि
जस्नानं तत्फलं॥ स्नानं प्राणायामो ग्निसंस्पर्शश्चेति माधवीये॥ अग्निदेव्येवं॥ मातुलत्वादिसंबंधे त्रिरा
त्रं॥ अनुगमने तु सापिंडेन दोषः॥ असपिंडे तु॥ समोत्कृष्टवर्णानुयास्नौ स्नात्वाग्निं स्पृष्ट्वा सर्पिः प्राश्य ने
पुनः स्नात्वा प्राणायामैः शुद्धिः॥ हीनवर्णे तु॥ क्षत्रिये हः॥ वैश्ये पक्षिणी शूद्रे त्रिरात्रं॥ क्षत्रस्य वैश्ये हः॥
शूद्रे पक्षिणी॥ वैश्यस्य शूद्रेहः॥ माधवस्तु विप्रस्य वैश्ये त्र्यहः॥ क्षत्रस्य शूद्रे प्येवं शेषं प्राग्वत्॥ स्नानाग्नि
स्पर्शनघृतप्राशनानि सर्वत्रेत्याह॥ परेषां सवर्णानामौर्ध्वदेहिककरणे कृच्छ्रत्रयाच्छुद्धिः॥ हीनौर्ध्वदेहिक
करणे तु लै द्विगुणं चातुर्गुण्यं च ह्युह्यं॥ रोदने तु समोत्र सवर्णयोः संचयनात्पूर्वं सचेलस्नानं॥ ऊर्ध्वमा
चमनं॥ हीनवर्णेषु संचयात्प्राक् सचेलं॥ ऊर्ध्वं स्नानमात्रं॥ रोदनमात्रएकाहइत्युक्तं मिताक्षरायां॥ अ
प्याशौचमन्नभक्षणे॥ मत्यासकृद्भक्षणे यस्मिन्दिने भुक्तं ततः यावत्तेषामाशौचं तावदाशौचं कृत्वांते
प्रायश्चित्तं कुर्यात्॥ तच्च सर्वेषां शौचे त्रिरघमर्षणं गायत्र्यष्टसहस्रं च॥ क्षत्रियाशौचे उपवासश्च॥
वैश्याशौचे त्रिरात्रोपवासश्च॥ शूद्राशौचे कृच्छ्रः॥ क्षत्रवैश्ययोः पंचशतमष्टशतं गायत्रीजप उत्तमे॥ ५
षु॥ शूद्रस्य सर्वत्र स्नानं॥ इदमापदि॥ अमत्यासकृद्भक्षणे विप्रस्य वर्णक्रमेण काहत्र्यहपंचाहसप्ताहोप

वासाः॥ दशविंशतिः षष्टिः शतं च प्राणायामाः॥ पंचगव्याशनं च॥ अभ्यासे द्विगुणं॥ आपदि तु प्राणाया
मशतं॥ पंचशतं अष्टसहस्रं गायत्रीजपश्च॥ मत्यानापदि विप्रस्य वर्णेषु सांतपनकृच्छ्रमहासांतपनचां
द्रायणानि॥ अभ्यासे मासिकद्वैमासिकत्रैमासिकषाण्मासिकानीत्यादि माधवीयादौ ज्ञेयं॥ अथ दासाशौ
चं॥ तत्र दासः पंचदशविधः॥ गृहजातक्रीतलब्धदायोपागतान्नाकालभृतस्वाम्याहितसंकटमो
क्षितमहदृणमोक्षितयुद्धप्राप्तपणजिततवाहमित्युपगतप्रव्रज्यावसितभक्तदासवडवाहृतात्म
विक्रेतार इति॥ वडवादासी॥ तयाहृतः॥ तत्र गर्भदासभक्तदासयोः स्वसपिंडमृतौ मासं स्वकर्मान
धिकारः॥ स्वामिकार्ये तु गर्भदासस्य स्नानमात्रेण स्पृश्यता॥ भक्तदासस्य त्र्यहोर्ध्वं॥ एवं दास्या म
पि सूतिकायास्तस्याः अस्पृश्यत्वमपि मासमात्रं॥ अन्येषां दत्तदासादीनां स्वसपिंडमृते स्वाम्याशौच
समसंख्यादिनोर्ध्वं स्वामिकार्ये स्पृश्यता स्वकर्मानधिकारस्तु मासमेव॥ दास्याः पूर्ववत्॥ स्वामितत्स
पिंडमृतौ तु दासानां स्वामितुल्यमाशौचं॥ इदं चानुलोम्येन दासानां॥ प्रातिलोम्येन दासत्वं गतानां त्वाशौ
चाभावः॥ तादृशदासत्वस्य निषिद्धत्वात्॥ अथ रात्रौ जननमरणयोः रात्रिं त्रिभागीकृत्वा घभागद्वये
पूर्वं दिनं अंत्ये तूत्तरं॥ प्राग्वार्द्धरात्रात्पूर्वं॥ ऊर्ध्वमुत्तरं॥ प्राग्वासूर्योदयात्पूर्वं॥ ऊर्ध्वमुत्तरमिति॥ इदं
चाशौचमाहिताग्नेर्दाहादिनादनाहिताग्नेर्मरणादिनादारभ्य कार्यं॥ चूर्त्तस्वामिराभांडारौ तु आदि

Indira Gandhi National
Centre for the Arts

तु:॥आहिताग्नेरपि मरणाद्येव दशरात्रं॥दशाहं शाव मांशौचमिति मरणनिमित्तत्वात्तस्य॥यत्तु दाहा
॥५॥ दाशौचं तस्योक्तं तत्संस्कारनिमित्ताशौचं पृथगेव॥तेन गृह्याग्निसंस्कारा गत्रिरात्रं॥श्रौताग्नेस्तु दशा
त्रमिति॥अथातिक्रांताशौचं॥तत्राशौचमध्ये जननादौ जाते पुत्रादीनां सर्वेषां शेषेणैव शुद्धिरिति
स्मृत्यर्थसारादय:दशाहादूर्ध्वं ज्ञाते मरणे मासत्रयपर्यंतं त्रिरात्रं॥षण्मासपर्यंतं पक्षिणी॥नवमपर्यंत
मह:॥ऊर्ध्वं स्नानं॥जनने त्वतिक्रांताशौचं नास्त्येव पितु: स्नानं तत्रापि भवति॥मृतकमप्यनुपनीतादि
निमित्तकमतिक्रांतं नास्ति॥किंतूपनीतनिमित्तकं ज्ञात्वाशौचमेव॥माधवस्तु आत्रिपक्षात्त्रिरात्रं॥आ
षण्मासात्पक्षिणी॥आ वर्षादेकाह:॥ऊर्ध्वं स्नानमित्याह॥तत्रापदनापद्विषयत्वेन व्यवस्था॥इदं चैक
देशे॥देशांतरे तु स्नानमात्रं॥माधवस्तु अर्वाक्त्रिपक्षात्त्रिनिशं षण्मासाच्चदिवानिशं॥अह:संवत्स
यस्मिन्देशे मृति: तत्रागतस्य ६ रादर्वाग्देशांतरमृतेष्वपीति विष्णूक्ते: स्नानं वत्सरात इत्याह॥इदं सपिंडानां॥देशांतरे स्नानं सोदका
नामिति युक्तमिति निर्णयसिंधौ॥देशांतरलक्षणं॥दशाहमध्ये यद्देशस्थेन मृतवार्त्ताश्रवणमशक्यं
तत्॥केचित्तु प्रत्यहं योजनद्वयं गच्छन्पुरुष: यत्र मृतस्य वार्त्तामाशौचकालमध्ये प्राप्यितुं न शक्नोति
तत्॥तथा च विप्रस्य दशाहाशौचिन: विंशतियोजनैर्देशांतरं॥क्षत्रस्य द्वादशाहाशौचिनश्चतुर्विंशति ॥५॥
योजनैरित्याद्यूह्यमित्याहु:॥महानद्यंतरादिकं च प्रसिद्धं॥एतन्मातापितृभिन्ने॥मातापितृमरणे दूरदे

शेपि संवत्सरोर्ध्वमपि पुत्रो दशाहादि पूर्णमाशौचं कुर्यात्॥स्त्रीपुंसयो: परस्परं सवर्णोत्तमपत्नीषु चैव
मिति स्मृत्यर्थसारे॥सपत्नमातुस्तु दक्ष: पितृपत्न्यामपेतायां मातृवर्ज्यं द्विजोत्तम:॥संवत्सरे व्यतीतेपि त्रिरा
त्रमशुचिर्भवेदिति॥हीनवर्णमातृषु सपत्नीषु चैवमिति स्मृत्यर्थ:॥केचित्पितु: पत्न्यां प्रमीतायामौरसे
तनये तथेति श्लोके औरसेपीदमाहु:॥षडशीतावप्येवं॥एतदतिक्रांताशौचं सर्ववर्णसाधारणं॥
अथाशौचसंपाते॥एकादिने द्वयो: शावयोर्वा समयोर्न्यूनाधिकयोर्वा संपाते तंत्रेणान्यसिद्धि:॥द्वितीया
दिदिनेषु सजातीयस्य समस्य न्यूनस्य वा संपाते पूर्वाशौचेन शुद्धि:॥अधिकस्य तु न॥विजातीयस्य तु शा
वे जननस्य समस्य न्यूनस्य वा संपाते पूर्वेण शुद्धि:॥अधिकस्य तु न॥अस्यापि पूर्वेण शुद्धिरिति शुद्धि
विवेक:॥जनने समन्यूनाधिकशावसंपाते न पूर्वेण शुद्धि:॥केचित्तु दशाहाशौचयो: संपाते पूर्वेण शु
द्धि:॥त्र्यहाद्याशौचयो: संपाते तु नेत्याहु:॥तन्मिताक्षरापरार्कादिविरोधात्॥अन्ये तु पूर्वप्रवृत्तमाशौ
चमुत्तराशौचकालादवधिककालं स्यात्तदा पूर्वेणैवोत्तरशुद्धि:॥यथा गर्भपातनिमित्तषडहमध्ये दशा
हपाते पूर्वेण शुद्धिरित्याहु:॥तन्नाद्रियंते वृद्धा: अघवृद्धिमदाशौचं पश्चिमेन समापयेदित्यादिनिषेधात्
॥पूर्वाशौचोत्तरं तन्मध्योत्पन्ने ज्ञाते तूत्तरमेव कार्यं॥यथोक्तं शुद्धितत्त्वे॥पूर्वाशौचांतरुत्पन्नं समानं लघु
वा निमित्तं तत्कालादुपरिश्रुतं स्वाशौचहेतुरेवेति॥दशमदिनरात्रौ तु पूर्वनिवर्त्यदशाहांतरसंपातेपि न

Indira Gandhi National
Centre for the Arts

॥६॥

पूर्वेणैव निवृत्तिः ॥ किंतु त्र्यहमधिकं कार्यं ॥ तत्रापि चतुर्थयामे तत्संपाते त्रिरात्रमधिकं ॥ माधवस्तु दशमा
होरात्रे तत्संपाते त्र्यहवृद्धिमाह ॥ देवदत्तस्तु पूर्वस्मिन्नाशौचे रात्रिशेषे यद्यन्यदापतेत्तदा द्वाभ्यां शुद्धिः ॥ स
रात्रिः परेद्युः प्रभाते स्यर्थः ॥ प्रभातेति स्मृतिरिति अथ दशाहादौ व्यतीते परेद्युः प्रभाते संगवे यद्यन्यदापतेत्तदा ति
स्रभिरित्याह ॥ दशमदिनरात्रितच्चतुर्थयामयोस्त्र्यहादिसंपाते तु पूर्वेण शुद्धिः ॥ केचित्तु तत्रापि द्वित्रिदिनवृद्धि
माहुः ॥ तन्न ॥ दशमे ह्रियते यस्याहर्द्वयात्स विशुद्ध्यति ॥ प्रभाते तु त्रिरात्रेण दशरात्रे ष्वयं विधिरिति देवलादिस्मृ
तिषु दशाहविषयायामेव द्वित्रिदिनवृद्धेरुक्तत्वात् ॥ पक्षिण्यादिपाते पि त्र्यहादिवृद्ध्यापत्तेश्च ॥ अत एव त्र्यहाद्याशौ
चानां परस्परं रात्रिशेषे संपाते पि पूर्वेण शुद्धिर्न त्र्यहादिवृद्धिरित्याहुः ॥ वर्द्धितद्वित्रिदिनमध्ये त्वाशौचांतरसं
पाते ॥ न पूर्वेण शुद्धिः ॥ नागंतुकैरघाहोभिराशौचमपनुद्यत इति आस्थात् ॥ केचित्तु तत्रापि तदधिकाशौचसं
पाते नैव निवृत्तिः ॥ तत्समन्यूनयोस्तु निवृत्तिरित्याहुः ॥ सपिंडाशौचेन मातृपितृभर्तृणामाशौचं नापै
ति ॥ मातापित्रोस्तु मध्ये मातर्यग्रे प्रमीतायां मशुद्धौ म्रियते पिता पितुः शेषेण पितृमरणनिमित्तपूर्णाशौ
चेन शुद्धिर्न पूर्वेणेति मिताक्षरायां पित्राशौचमध्ये मातृमरणे तु पित्राशौचं समाप्य पक्षिणीमधिकां कु
र्यात् ॥ दशमरात्रितद्यामयोर्मातृमरणे त्र्यहं त्र्यहसमुच्चितापक्षिणीति कश्चित् ॥ गुरुणा लघु शुध्येदितु ॥६॥
क्तेर्न पृथक्पक्षिणीत्यन्ये ॥ मातुरन्वारोहणे तु न पक्षिणी ॥ यदा नारी विशेदग्निं ध्रियस्पत्रियवांछया ॥ तदाशौ

चं विधातव्यं मन्त्रैशौचक्रमेण हीति पृथ्वीचंद्रोदये लघुहारीतोक्तेः ॥ षडशीतिमते पि ॥ मृतं पतिमनुव्रजे
पत्नी वेदनतं गता ॥ न तत्र पक्षिणी कार्या येन कादेव शुध्यति ॥ पुत्रो वान्योग्निदस्तस्यास्तावदेवाशुचिस्तयोः
नवश्राद्धं च पिंडं च युगपत्तु समापयेदिति ॥ यत्त्वपरार्के ब्राह्मे नरग्वेदवादात्साध्वी स्त्री न नवेदाग्रघातिनी
॥ त्र्यहाशौचे तु निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रवदिति ॥ तन्मत्रैशौचोत्तरमन्वारोहणे त्रिरात्राशौचपरमिति
पृथ्वीचंद्रः ॥ तद्ब्राह्मणादेः क्षत्रियादिस्त्रीभिरनुगमने त्र्याशौचपरमित्यपरार्कः ॥ पूर्वशेषेण शुद्धेरप
वादांतरं षडशीत्यां ॥ पूर्वाशौचेनयाशुद्धिः सूतके मृतके च सा ॥ सूतिकामग्निदं हित्वा प्रेतस्य च सुतान
पि ॥ जनने शावसंपाते ॥ न पिंडदानादि घातिबंधः ॥ शावे जननसंपाते ॥ न जातकर्मादि घातिबंधः ॥ स्मृत्य
र्थसारस्तु तदानीं वा शावानंतरं वा जातकर्मादीति विकल्पमाह ॥ एवं द्वयोः शावयोर्जननयोर्वा संपाते
द्रष्टव्यं ॥ मातुः पक्षिणीमध्ये पितुरेकादशाहं च कुर्यात् ॥ आद्यश्राद्धमशुद्धोपि कुर्यादेकादशेहनीति स्मृतेः
॥ अथाशौचापवादः ॥ ब्रह्मचारिणः सपिंडमरणे ॥ नाशौचं ॥ नास्य कर्मण्यधिकारः ॥ तत्करणे पुनः सं
स्कारः कृच्छ्रश्च ॥ पितृमातृगुरूपाध्यायाचार्यमातामहानामंत्यकर्म कार्यमेव ॥ तत्र दशाहमस्पृश्यत्व
लक्षणमाशौचं ॥ संध्याग्निकार्यादिकमधिकारस्त्वस्त्येव ॥ माधवस्त्वत्रैकाहमाशौचमाह ॥ पित्राद्याशौचे
पि नाशौचि नाम मन्त्रं मक्षयेत् ॥ मक्षणे पुनरुपनयनमाशौचं च ॥ न च तैः सह संवसेत् ॥ दिवोदासीये तु

Indira Gandhi National Centre for the Arts

कादमशुचिर्भूत्वाद्वितीयेह्नि शुध्यतीति त्रिकांडमंडनोक्तेः प्रथमेह्नि संध्यादिलोपः॥ द्वितीयादौ पिंडदानकालएवास्य
॥७॥ स्पृश्यत्वमात्रं॥ ब्रह्मचारी यदा कुर्यात्पिंडनिर्वपणं पितुः॥ तावत्कालमशौचं स्यात्पुनः स्नात्वा विशुध्यतीति प्रजाप
तिवचनादित्युक्तं॥ अंत्यकर्माकरणे तु पित्रादिमरणेपि नाशौचं॥ केचित्तु समावर्तनोत्तरं पूर्वमृतानां त्र्यहा
४ ब्रह्मचारी शौचं कार्यं॥ आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात्॥ समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेदिति मनू
क्तेरित्याहुः॥ अन्ये त्वस्य विकल्पमाहुः॥ तथाकृतजीवच्छ्राद्धेनापि मृत्यौ अशौचं न कार्यमिति हेमाद्रिः॥ वनस्थय
तिपतितानां नाशौचं॥ अन्नसत्रप्रवृत्तानामन्नसत्रे नाशौचं॥ तेषामामान्नस्यौदनादिव्यतिरिक्तभक्ष्यस्य
वास्वयंग्रहेन दोषः॥ औदनादिग्रहणे तु त्रिरात्रं पयःपानं॥ अनंतव्रतादिनियमवतां तत्संकल्पानंतर
माशौचेपि व्रते नाशौचं॥ संकल्पात्प्रागाशौचे त्वन्येन कारयेत्॥ संप्रारब्धेषु दानोपनयनयजनश्राद्धयुद्ध
प्रतिष्ठाचूडातीर्थयात्राजपपरिणयाद्युत्सवेषु नाशौचदोषः॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः
॥ नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया॥ तुलादानादेः प्रारंभो नांदीमुखं संकल्पो वा॥ यजनं तर्ईगोत्स
र्गकोटिहोमादि॥ पाकस्य परिसमंतात्क्रिया पाकप्रोक्षणमिति शुद्धिप्रदीपः॥ तीर्थयात्रायां प्रारब्धायां अपू
र्वतीर्थप्राप्तावाशौचेपि तीर्थश्राद्धे नाशौचं॥ जपः पुरश्चरणादिः॥ एवं देवयज्ञादावपि दीक्षावतां नाशौचमि ॥७॥
त्यागमयंथेषूक्तं उत्सवो रथयात्रादिषु॥ प्रारब्धप्रायश्चित्तव्रतानां तत्र नाशौचं॥ आतुरस्य व्याधिनाशौषधे

नादौ नाशौचं॥ राज्ञां व्यवहारदर्शनादौ न॥ तद्भृत्यानां तत्कार्ये न॥ सूपकाराः दिकारूणां स्वका पाककर्ता१
रजक२ र्येन॥ निर्णेजकादिशिल्पिनां स्वकार्ये न॥ भिषजां चिकित्सायां न॥ वृद्धवेदपावकानां तत्स्ववनेन॥
एवं येयत्रयत्रानन्यगतिकत्वं तत्र तत्राशौचाभावो ज्ञेयः॥ स्वदेशभंगे शास्त्रापदि वाशौचाभावः॥ मरण
समयेपि नाशौचं॥ स्वस्वकाले त्विदं सर्वं सूतकं परिकीर्तितं॥ आपद्गतस्य सर्वस्य सूतकेपि न सूतक
मिति दक्षस्मृतेः॥ अतः सति वैराग्ये सन्यासोप्यातुरस्य भवतीत्याहुः॥ शूलपाणिस्तूपसर्गमृते चैवं सद्यः
रो६ शौचं विधीयत इति पराशरोक्तेर्मारिकाद्युपसर्गमृतस्याप्याशौचं सपिंडानां न स्यादिति॥ दीक्षितानां दीक्षो
त्तर्भमवभृथात्प्रागाशौचाभावः॥ तदादित्वाशौचमस्त्येव॥ प्रागवभृथात्करोति स्नातायामवभृथ इति
सि५ पत्न्या रजोविशेषोक्तेः॥ उभयत्राशौचस्य तुल्यत्वात्॥ तेन वैतानत्वेप्यवभृथादिनमवत्येव॥ यथोक्तं
माधवीये ब्राह्मे॥ तद्वद्दीतदीक्षस्य त्रैविद्यस्य महामखे॥ स्नानं त्ववभृथे यावत्तावत्तस्य न सूतकमिति
॥ ऋत्विजां च वरणोत्तरं नाशौचं॥ केचित्तु मधुपर्कसहितेवरणे नाशौचं॥ वरणमात्रे त्वस्तीत्याहुः॥ अ
थाशौचे श्रौते कर्मणि स्नातस्य त्यागमात्रे प्रधानातिरिक्तेष्वन्यस्य कर्तृत्वं॥ औपासनहोमस्य श्रौतत्वादय
मेव न्याय इति मिताक्षरायां॥ स्मार्तेषु तु पिंडयज्ञश्रवणाकर्मस्थालीपाकादिषु स्नानं विना प्रधानमात्रेधि
कारः प्रधानातिरिक्तेष्वन्यस्येवेति मिताक्षरायां॥ श्रौते केइति पैठीनसिस्मृतेः स्मार्ताधिकारविक
केचित्तु शाला१

स्प
॥८॥

ल्यमाहुः॥ अपरार्कादयस्तु श्रौतं सर्वं स्वयं कर्त्तव्यं॥ स्मार्त्तं तु त्यागमात्रं॥ अन्यत्रान्यस्य कर्तृत्वमित्याहुः॥
वैश्वदेवस्य त्वग्निसाध्यत्वेपि विप्रो दशाहमासीत वैश्वदेवविवर्जित इति वचनात् निवृत्तिः॥ दरदत्तस्तु
वह्नौ वैश्वदेवः कार्यः॥ तस्य ह्याहवनीयो यदात्मा स्त्रिवर्य देश इति ब्रह्म यज्ञस्येवाशौचे विशिष्यानिषेधा
दित्याह॥ संध्या वैत्यं कार्या॥ अमंत्रकं प्राणायामं कृत्वा मार्जनादि मंत्रान्मनसोच्चार्य मार्जनादि कृत्वा सावि
त्रीं वाचोच्चार्य सूर्यायार्घ्यांजलिं वेदयेत्॥ उपस्थानं नास्ति॥ मार्जनेपि विकल्पः॥ केचिदेकार्घ्यमाहुः॥ ग्रहणे
स्मार्त्ते दानादावपि नाशौचं॥ अथ द्रव्येष्वाशौचाभावः॥ नाशौचं शाककाष्ठाजिनलवणतृणक्षीरनीरा
मिषेषु पुष्पमूले फले चौषधिमधुदधिषु स्यान्निले ह्यामभोज्य इति॥ क्रमे तु सर्वस्मिन्न दोषः॥ पक्वाग्रह
णे त्वेतन्सत्रे प्रागुक्तं॥ विवाहादौ तु पूर्वसंकल्पितं परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः॥ यदा तु पूर्वसंकल्पि
तान्नाद्येर्भुज्ञाने षु विप्रेषु अंतराशौचज्ञानं दातृभोक्त्रोरन्यतरस्य भवति तदा तथैव यासम्यक्ज्ञात्युगेद
दकाचांताः शुद्धाः उभाभ्यामपरिज्ञाते तु न दोषः॥ संसर्ग्यशौचिनोर्ध्याद राशौचाभावः प्रागुक्तः॥ शुद्धिं तच्छ
द्ध्येदित्यनुवृत्तौ विष्णुः प्रोक्षणे न पुस्तकमिति॥ अथ मृतदोषाशौचाभावः॥ चंडालपतितजलसर्पनृप
गोपब्राह्मणवैद्युतदंष्ट्रिश्रृंगिनखिविषोद्बंधनवह्निप्रायोनाशकशस्त्रप्रपतनचौरादिहतानां कुरीनाना ॥८॥
मित्यादि दुर्मरणमृतानां नाशौचोर्ध्वदेहिकादिकार्यं॥ तत्करणे प्रायश्चित्तं भवदकृतांत्येष्टिपद्धतौ तुष्टं॥ अ
र
ग्निनाशनवृत्तेर

दिताग्नेर्दुर्मरणे वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे॥ पात्राणि तु दहेदग्नावितिशरीरलाभे गंगायामन्यमहा
नद्यां वा प्रक्षिपेत्॥ वत्सरांते प्रायश्चित्तनारायणबलिकरणानंतरं श्राद्धं कार्यं॥ इदं पुत्राद्यभावे॥ तत्सत्वे
तु स्मृत्यर्थसारे॥ अथ तेषां भक्ताः पुत्रादयः प्रायश्चित्तसमर्थाः संति चेत् आदौ प्रायश्चित्तं कृत्वा तदेव कालां
तरे संवत्सराद्वर्वाक् दहनादिकं कृत्वा श्राद्धादिकं कुर्युः॥ अनित्यत्वादायुष इति॥ अत्र नारायणबलिरस्येव
कि५
॥माघवस्तु लौकाग्नौ दग्ध्वा मंत्रवर्जितं॥ अस्थीनि स्थापयेत्॥ वत्सरांते प्रायश्चित्तनारायणबल्यादीन्कृत्वा
स्थीनि क्षीरेण क्षालयित्वा विधिना दहेदित्याह॥ हेमाद्रौ तु दाहयित्वा शवं तेषां पूर्णौरविधिपूर्वकमस
कं॥ प्रायश्चित्तनारायणबली भट्टकृतांत्येष्टिपद्धतौ ज्ञेयौ॥ केचित्तु नारायणबलौ कृते प्यं त्यकर्म सपिंडन
वर्जं कार्यं॥ गोब्राह्मणहतानां च पतितानां तथैव च॥ ऊर्ध्वं मासाच्च प्रमीतानां नैव कार्या सपिंडतेति वचनादि
त्याहुः॥ गयाश्राद्धमपि तेषां कार्यं॥ ब्रह्महा च कृतघ्नश्च गोघाती पंचपातकी॥ सर्वे ते निष्कृतिं यांति गयायां
पिंडपातनादित्यग्निपुराणोक्तेः॥ आत्मघातिनिमित्तं च नज्ञातिवधप्रायश्चित्तेन समुचितं कार्यमिति सि
ंधौ॥ प्रायश्चित्तानर्हपतितानां तु ज्ञातिभिरुदकं कार्यं॥ तद्यथा हेमाद्रौ ब्राह्मे॥ पतितस्य तु कारुण्याद्य
स्तु पिंडं कर्तुमिच्छति॥ स हि दासीसमाहूय सर्वगां दत्तवेतनां॥ अशुद्धघटहस्तां तां यथा वृत्तं ब्रवीत्यपि॥ हे
दासि गच्छ मूल्येन तिलानानय सत्वरं॥ तोयपूर्णं घटं चेमं सतिलं दक्षिणामुखी॥ उपविष्टा तु वामेन चरणे
न ततः क्षिप कीर्त्तयेः पातकिन्संज्ञां त्वं विवेति मुहुर्वद॥ निशम्य तस्य वाक्यं सा लब्धमूल्या करोति तत्॥ य

Indira Gandhi National
Centre for the Arts

॥६॥

वं कृते नवेत्यपि: पतितानां नचान्यथेति॥ इदं च मृतादेः कार्यं॥ इदमात्मत्यागिविषयमिति गौडाः॥ एषामपि नारायणबलिर्गयाश्राद्धं च युक्तमिति निर्णयसिंधौ॥ पतितोदकविधिस्तु पित्राद्यतिरिक्तविषय इति केचित्॥ सर्पदंशे तु विशेषः॥ सर्पबलिपूर्वकं नारायणबलिं कुर्यात्॥ अपरार्के स्मृत्यंतरे॥ तदैव स्थास्यति प्रेतो नारायणबलौ कृते॥ योददाति क्रियापिंडं तस्मै प्रेताय वै सुतः॥ तस्यैवाशौचमुद्दिष्टं त्र्यहमेव न संशयः॥ विष्णुश्राद्धसमाप्तौ तु त्रयोदश्यां दिनत्रयं॥ आशौचं पिंडदः कुर्यान्न तु तद्बंधुगोत्रजा इति॥ अपुत्रस्यापि पतितस्य नक्तिमद्भिः पत्न्याद्यैर्नारायणबलिः कार्य इत्याहुर्देवयाज्ञिकाः इदं सर्वं बुद्धिपूर्वं मृतानां पाखंड्यादीनां च ज्ञेयं॥ प्रमादमरणे त्वाशौचादिकं नवस्येव॥ अथ कश्चित्प्रमादेन म्रियेता[illegible]दकादिभिः॥ तस्याशौचं विधातव्यं कर्तव्या चोदकक्रियेत्यंगिरस्मरणात्॥ अत्र त्रिरात्रमाशौचमिति गौडाः॥ दशाहादीति दाक्षिणात्याः॥ अत्रापि नारायणबलिं केचिदाहुः॥ स्मृत्यर्थसारे तु प्रायश्चित्तं कृत्वा विधिना दहनाशौचोदकं सर्वं कार्यमेवेत्युक्तं॥ न हृकृतांत्येष्टिपद्धता वप्येवं॥ प्रायश्चित्तं तत्रैव ह्युक्तं॥ प्रमादेन सर्पतो मृते सर्पबलिः कार्य एव॥ तथा वैधमरणेपि न दोषः॥ वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः॥ आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनांबुभिः॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः॥ तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेदिति॥ इदं जीर्णवानप्रस्थस्येति विज्ञानेश्वरदेवयाज्ञिकादयः॥ तेन यत्यादेर्नाधिकार इति केचित्॥ स्मृत्यर्थसारादौ तु सर्वाचिकित्स्यव्याधिपीडितविषयत्वमुक्तं॥ जलप्रवेशे विशेषः॥ प्रयागातिरिक्ते अचिकित्स्यव्या

गृ ९

प्रयागादिस्थले

॥ध॥

धिपीडितानामेवाधिकारः॥ नान्येषां॥ प्रयागे त्वरोगिणां रोगिणां च॥ एतच्च वृद्धादिमरणं कलौ निषिद्धं॥ भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथेति माधवेन कलिवर्ज्येषूक्तेः॥ प्रयागे तु भवत्येव लोकवचनान्नान्नवेदवचनादपि॥ मतिरुत्क्रमणीया ते प्रयागमरणं प्रतीति मात्स्यादिषूक्तेरिति वृद्धाः॥ काश्यामपि मरणं मुक्तं मात्स्यादौ अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः॥ प्रविशंति मुखं ते मे निःसंदिग्धं वरानने॥ तीर्थमात्रे मरणं मुक्तं हेमाद्रौ विवस्वता॥ सर्वेंद्रियविमुक्तस्य स्वस्थस्याप्याराक्षमस्य च॥ प्रायश्चित्तमनुज्ञातमग्निपातो महापथः॥ धर्मार्जनासमर्थस्य कर्तुः पापां क्लिलस्य च॥ ब्राह्मणस्याप्यनुज्ञातं तीर्थप्राणविमोक्षणमिति॥ अत्र दशाहमाशौचं त्रिरात्रस्य प्रायः कालगोचरं॥ चा[illegible]मिति भट्टाः॥ त्रिरात्रमिति निर्णयसिंधौ॥ एवं मरणं तत्प्रायश्चित्तेष्वपि ह्यं॥ अथ विधिनादाशौचं भावः॥ यतिमरणे सपिंडानां नाशौचं॥ तत्संस्कारस्त्वन्यत्रोक्तः॥ एकादशेऽहनि पार्वणं कुर्यात्॥ नैकोद्दिष्टं॥ बौधायनः॥ नारायणबलिश्चास्य कर्तव्यो द्वादशेऽहनि॥ अस्य पार्वणेन समुद्धयः॥ शौनकस्तु शौनकोऽहं प्रवक्ष्यामि नारायणबलिं परं॥ चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि॥ दंष्ट्रिभ्यश्च पशुभ्यश्च तु शास्त्रविषाग्न्यभिः॥ देशांतरमृतानां वा स्वसाधनैः॥ जीवच्छ्राद्धमृतानां च कनिष्ठानां तथैव च॥ यतीनां योगिनां पुंसामन्येषां मोक्षकांक्षिणां॥ पुण्यपापाद्यक्षयार्थं

पञ्चतानीर

यद्वा दशेऽह्नि कारयेत्॥ द्वादशांश्चाप्यशौचांते पंचम्यां पर्वणोऽस्तु वेति॥ दत्तात्रेयः॥ एकोद्दिष्टं जलं पि
॥१०॥ ण्डमाशौचं प्रेतसत्क्रियां॥ न कुर्याद्वार्षिकादन्यद्ब्रह्मीभूताय भिक्षवे॥ वार्षिकादिति पूर्वमाविमासिका
दिनिषेधो न तु दर्शादेः॥ सन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधीति वायवीयोक्तेः॥ इदं वार्षिका
दिविधानं त्रिदंडिनामेव॥ एकदंडिपरमहंसादीनां न किमपि कार्यमिति शूलपाण्यादयो गौडाः॥
सर्वेषामेवेति दाक्षिणात्याः॥ युद्धमृतस्याप्याशौचाभावः प्रागुक्तः॥ कृतजीवच्छ्राद्धमरणे सपिंडे
नाशौचं कार्यं न वा॥ तदुक्तं हेमाद्रौ लैंगे॥ मृते कुर्यान्न कुर्याद्वा जीवन्मुक्तो यतः स्वयं॥ कालं गते द्वि
जश्रेष्ठ मोक्षनेद्वापि दहेत वा॥ पुत्रः कृत्स्नमशौचं च कृत्वा देहे न विद्यते॥ जीवत्यपि विशेषस्तेनैवोक्तः॥
नित्यं नैमित्तिकं यत्तु कुर्याद्वा संत्यजेत वा॥ बांधवेऽपि मृते तस्य नैवाशौचं [illegible] विधीयते॥ सू
तकं च न संदेहः स्नानमात्रेण शुध्यति॥ तथाऽहिताग्नेः प्रोषितमृते तद्दाहात्पूर्वं पुत्रादीनामाशौचं
संध्यादिकर्मलोपश्च नास्ति॥ एतत्प्रागुक्तं॥ अत्र देहस्यैव संभवे दाहः॥ तदभावे छंदोगपरिशिष्ट॥
विदेशमरणेऽस्थीनि आहृत्याभ्यज्य सर्पिषा॥ दाहयेदूर्णयाच्छाद्य पात्रन्यासादि पूर्ववत्॥ अस्थ्नामभा ॥१०॥
वे पर्णानि शकलान्युक्तया वृता॥ दाहयेदस्थिसंख्यानि ततः प्रभृति सूतकमिति॥ हेमाद्रौ॥ कुर्याद
र्भमयं प्रेतं दर्भैस्त्रिशतषष्टिभिः॥ पालाशीभिः सामिद्भिर्वा संख्या चैवं प्रकीर्तितेति॥ इदं निरग्नेरपि

॥ मदनरत्ने रुद्रमनुः॥ प्रोषितस्य तथा कालो गतश्चेद्द्वादशाब्दिकः॥ प्राप्ते त्रयोदशे वर्षे प्रेतकार्या
णि कारयेत्॥ भविष्ये तु पितरि प्रोषिते यस्य न वार्ता नैव चागमः॥ ऊर्ध्वं पंचदशाद्वर्षात्कृत्वा तत्प्र
तिरूपकं॥ कुर्यात्तस्य तु संस्कारं यथोक्तविधिना ततः॥ तदीयान्येव सर्वाणि प्रेतकार्याणि कारये
त्॥ द्वादशाब्दप्रतीक्षा पितृविषयेति मदनरत्ने उक्तं॥ गर्भस्थकारिकायां नष्टस्य पूर्ववयस्कस्य विं ल
शत्यब्दोर्ध्वतः क्रिया॥ ऊर्ध्वं पंचदशाद्वाऽनु मध्यमे वयसि स्मृता॥ द्वादशाद्वत्सरादूर्ध्वमुत्तरे वयसि
स्मृता॥ चांद्रायणत्रयं कृत्वा त्रिंशत्कृच्छ्राणि वा सुते॥ कुशैः प्रतिकृतिं दग्ध्वा कार्याः शावाशिकाः क्रि
याः॥ तिथ्यज्ञाने पराशरः॥ देशांतरगतो नष्टस्तिथिर्न ज्ञायते यदि॥ कृष्णाष्टमी ह्यमावास्या कृष्णा
वैकादशी च या॥ उदकं पिंडदानं च तत्र श्राद्धं च कारयेत्॥ तत्राहिताग्नेः पूर्णाशौचं सर्वेषां॥ अना
हिताग्नेस्तु त्रिरात्रं॥ अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना स्वयं॥ तदलाभे पलाशानां वृंतैः कार्यः पुमा
नपि॥ वेष्टितव्यस्तथा पत्नी कृष्णसारस्य चर्मणा॥ ऊर्णासूत्रेण बध्वा तु प्रलेपश्चाप्यो यवैस्तथा॥ सुपि
ष्टैर्जलसंमिश्रैर्दग्धव्यश्च तथाग्निना॥ असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा सबांधवैः॥ एवं पर्णशरं
दग्ध्वा त्रिरात्रमशुचिर्भवेदिति ब्राह्मोक्तेः॥ इदं त्रिरात्रं न दशाहमध्ये दाहे॥ तत्र शेषशुद्धेरुक्तत्वात्॥ कि
न्तु तदूर्ध्वं॥ अनाहिताग्नेर्विधिर्न ह्या दाहाभावे तदानीमाशौचं यद्दशाहं वैकल्पिकं तत्र पत्नीपुत्रयोः पूर्वम

गृहीताशौचयोर्दशाहाद्येव॥गृहीताशौचयोस्तु त्रिरात्रं॥पत्नीभर्तोर्भर्तुश्चैवं॥सपत्न्योश्चैवमि
॥११॥ तिस्मृत्यर्थसारे॥अन्यसपिंडानां तु सर्वत्र पर्णशरदाहे त्रिरात्रं॥तदाहांगिराः॥दशांतरमृतं श्रुत्वा
नाशौचं चेत्कार्यं च न॥कालात्यये पि कुर्वीत दाहकाले दिनत्रयमिति॥स्मृत्यर्थसारे गृहीताशौचाना
स्नानमात्रमुक्तं॥अथातीतसंस्कारः॥स चेदंतर्दशाहं स्यात्तत्रैव सर्वं समापयेदूर्ध्वमाहिताग्नेर्दाहात्स
र्वमाशौचं कुर्यादन्येषु पत्नीपुत्रयोः पूर्वमगृहीताशौचयोः सर्वमाशौचं गृहीताशौचयोः कर्मांगं त्रि
रात्रमिति॥षडशीतावप्येवं॥विश्वादर्शे तु प्रकृतिदहने त्वग्निदे स्यात्त्रिरात्रमित्युक्तं॥द्वादशवर्षादि
प्रतीक्षोत्तरं दाहे तु पुत्रादीनां सर्वेषां त्रिरात्रमिति कल्पतरुदिवोदासादयः॥प्रेतसंस्कारकालस्तु त्रै
स्थलीपद्धतौ ज्ञेयः॥हेमाद्रौ वृद्धमनुः॥अमृतं मृतमाकर्ण्य कृतं यस्यौर्ध्वदेहिकं॥प्रायश्चित्तमसौ स्ना
त्वं कृत्वाग्नीनादधीत च॥जीवन्यदि समागच्छेत् घृतकुंभे निमज्जितं॥उद्धृत्य स्नापयित्वास्य जातक
र्मादि कारयेत्॥द्वादशाहं व्रतचर्या त्रिरात्रमथवास्य तु॥स्नात्वोद्वहेत तां भार्यामन्यां वा तदभावतः॥अ
ग्नीनाधाय विधिवद्व्रात्यस्तोमेन वा यजेत्॥अथैंद्राग्नेन पशुना गिरिं गत्वा च तत्र तु॥इष्टिमायुष्मतीं ११
कुर्यादीप्सितांश्च क्रतूंस्ततः॥अनाहिताग्नेस्तु चरुः॥मृतवार्तामात्रश्रवणेत्वाश्वलायनः॥सुरभय
एव यस्मिन् जीवे मृतजीवे मृतशब्द इति॥यस्य तु जीवत एव मृतवार्ताश्रुत्वास्त्रिया सहगमनं कृतं

तद्वैधमेवेति केचित्॥तस्यावैधत्वादात्महत्यादोषोस्तीति निर्णयसिंधौ॥तथा सर्पसंस्कारे कृते त्रिरा
त्रमाशौचं सर्पसंस्कारः शौनकादौ ज्ञेयः॥प्रायश्चित्तानिष्ठोः पतितस्य जीवतोपि घटस्फोटे कृते एका
हमाशौचं॥एकादशाहश्राद्धं तानि प्रेतकार्याणि दाहवर्जं कुर्यात्॥उदकदानं च॥एतत्सर्वं तूष्णीं॥घ
टनिनयनेनामग्रहणविधानादिति वृद्धाः॥पिंडोदकश्राद्धानि नाम्नादद्यादित्यपरार्कः॥पतितस्य ज्ञा
तीनां घटस्फोटात्प्राक् धर्माधिकारो नास्तीत्यापिसः॥घटस्फोटविधिस्त्वन्यत्र ज्ञेयः॥कृतप्रायश्चि
त्तस्य घटस्फोटे कृतेपि संग्रहविधिर्मिताक्षरादौ ज्ञेयः॥तेषां जातकर्मादयः संस्काराः कार्या इत्यप
र्कः॥केचित्त्वकृतघटस्फोटस्यापि प्रायश्चित्तकरणानंतरं संग्रहविधिः पुनः संस्काराश्च कार्या इत्या
हुः॥नीचाभिगामिन्यादिस्त्रीणां तु संग्रहेपि वासोगृहांतिके पर्णकुट्यादौ देयः॥अन्नाच्छादनं प्राणधा
रणपर्याप्तं देयं पुरुषांतरेभ्यो रक्षणं च कार्यमित्याद्युक्तं मिताक्षरादौ ज्ञेयं॥अथ दशाहमध्ये दर्शपा
ते निर्णयः॥प्रवृत्ताशौचं तंत्रस्तु यदि दर्शः प्रपद्यते॥समाप्य चोदकं पिंडं स्नानमात्रं समाचरेत्॥ऋष
श्यशृंगः॥आशौचमंतरा दर्शो यदि स्यात्सर्ववर्णिनां॥समाप्तिं प्रेततंत्रस्य कुर्यादित्याह गौतमः॥मा
तापित्रोस्तु श्लोकगौतमः॥अंतर्दशाहे दर्शश्चेत्तत्र सर्वं समापयेत्॥पित्रोस्तु यावदाशौचं दद्यात्पिंडा
न्तांजलीन्॥इदं दशाहमध्ये दर्शपाते तदूर्ध्वं दर्शे तु पित्रोरपि तंत्रं समाप्यमेव॥पित्रोराशौचमध्ये तु प

Indira Gandhi National
Centre for the Arts

दिदर्शः समापतेत्॥ तावदेवोत्तरं तंत्रं पर्यवस्येत् अहास्परमिति गालवोक्तेः॥ अन्येषां अदमध्येपि समाप्ति
॥१२॥ रिति निर्णयामृत माधवयोः॥ मदनपारिजात मदनरत्नयोस्तु गालवीय माधवनौरसपुत्रादि विषयं॥ अर्द्ध
र्धमपि न तंत्र समाप्तिः पित्रोत्क्रमात्॥ अत्र देशाचाराद्व्यवस्थेति निर्णयसिंधौ॥ कृष्णस्यात्र तल वर्त्तिपंडितजनालं
कारचूडामणिगौः दातीरजनिर्गुणोच्चयरवनिर्नाम्नापदेवोजनि॥ येनायं तनूनो रिर्द्धंजीवदेवं कृतिनः सद्धर्म
शास्त्रेकृतावाशौचस्य विनिर्णयो यमभवत्श्रीकृष्णसंतुष्टये॥ इति श्रीमत्सकलभूमंडलमंडनायमानश्री
मविकृद्दयापदेवसुतजीवदेवकृतिकौस्तुभे आशौचदीधितिः समाप्ता॥ पुत्रः पत्नी च वपनं कुर्यादंते यथा
विधि॥ पिंडदानोचितोन्योपि कुर्यादित्यं समापितद्दति व्यासवचनेन पत्याअपि आशौचं[illegible]त वपनवि
धानात्॥ श्रीगणेशायनमः॥ गर्भाधानप्रभवदितानेकसंस्कारषड्भि चित्ताद्दर्शसकलमुनयोयं प्रपश्यंति
देवं॥ चंद्रादित्यानलभतडितां भाप्रवाहेनिदानं वंदे वेद्यैः शिरसि निहितपालकं यांडवानां॥१॥ नत्वाद
रिगरुच्चरणौ वादिरणोच्छेजयप्रदं विदुषां॥ मधुनाशनमोदावदमधुनां संस्कारकौस्तुभं तनुमः॥२॥ अथ
षोडशसंस्काराः॥ तत्रगर्भाधानं प्रथममुच्यते॥ इतरसंस्कारान्प्रति उपजीव्यत्वेन तस्यैव स्मृतिकर्तृभिः गृह्य
सूत्रकारैश्च गर्भाधानं मृताविति उपनिषदि गर्भलंभनमिति च प्रथमनिर्देशात् तदुपयोगितया दुष्ट १२
रजोदर्शनशांतिं वक्तुं प्रथमरजोतिरूपमुक्तं विधानपारिजाते॥ नाभिमूले स्थितं पुष्पं चतुर्द्दलसमन्वितं॥

द्वत्रि

तस्मिन्सर्वाश्च दधते गर्भसंभवकारणं अधोमुखस्थितं स्त्रीणां तद्बाल्ये मुकुलीकृतं बाल्यात्परवयः प्राप्तौ मु
कुलं विकसद्भवेत् उत्फुल्लं कुसुमं स्त्रीणां स्वभावेन स्रवेद्रजः॥ तदा प्रभृति सर्वासां मासि मासि ऋतुर्भवेत्॥ दर्श
नेशुभाशुभसूचकानि कथ्यंते॥ अथ प्रथमरजोदर्शने मासफलं शृणु॥ चैत्रे स्यात् प्रथमं र्त्तौ तु नारी वैधव्य
भागिनी॥ वैशाखे धनपुत्राढ्या ज्येष्ठे रोगान्विता तथा॥ शुचौ मृतप्रजा प्रोक्ताश्रावणे धनधान्यभाक्॥ नभ
स्ये दुर्भगा क्लिष्टाप्याश्विने च पयस्विनी॥ ऊर्जेप्यायुष्मती नारी मार्गशीर्षे बहुप्रजा॥ पौषे तु पुंश्चली नारी
माघे पुत्रसुखान्विता॥ फाल्गुने श्रीमती नारी रजोमासफलं क्रमादिति॥ अथ तिथिफलं॥ श्रीधरीये गुरुः
॥ प्रथमायां पतिं हंति द्वितीयायां सुखं भवेत्॥ तृतीयायां स्त्रिये स्याच्च चतुर्थ्यां दुर्बली भवेत्॥ पंचम्यां पुत्र
लाभश्च षष्ठ्यां चारित्रविक्रया॥ सप्तम्यां पुत्रवृद्धिः स्यात् अष्टम्यां पुत्रनाशनं॥ नवम्यां रुदती नित्यं दश
म्यां धर्मशालिनी॥ एकादश्यां पतिस्निग्धा द्वादश्यां क्रंदिनी भवेत्॥ त्रयोदश्यां मानधनात्त्वपरा बहु
दोषकृत्॥ पर्वण्यपन्यगृहीतास्याद्विंघ्यादेवं तिथेः फलमिति॥ कश्यपोपि॥ अष्टमी षष्ठी मा रिक्ता द्वादशी सं
क्रमेपि च॥ वैधृतौ च व्यतीपाते ग्रहणे चंद्रसूर्ययोः॥ विष्ट्यां संध्यासु निद्रायां दुर्भगा प्रथमार्त्तव इति॥ अ
थ पूर्वाह्लादीनां फलं॥ स्मृतिरत्ने॥ शुभं चैव तु पूर्वाह्णे मध्याह्ने मध्यमं फलं॥ अपराह्णे तु वैधव्यं पूर्वरात्रे
शुभं भवेत्॥ मध्यरात्रे मध्यमं स्यात् परत्रे शुभान्विता इति॥ स्मृतौ॥ प्रातः काले सुतधनासायाह्ने सर्वभोगि

Indira Gandhi National
Centre for the Arts

नी॥मध्याह्ने तु भवेद्वेश्या निशीथे विधवा भवेदिति॥ अथ वारफलं। रुग्णा पतिव्रता दुःखी पुत्रिणी भगभागि
नी॥ पतिप्रिया कुशीला गा सूर्यवारादिषु क्रमात्॥ भानुवारे भवेद्व्याधिः सोमवारे पतिव्रता॥ दुःखिता भौमवा
१२ रे तु बुधे सौभाग्यसंयुता॥ श्रीसंयुता गुरौ वीरपतिभक्ता भृगोर्दिने॥ मंदवारे निराशा स्यात्प्रथमं तौ रजस्वला
इति॥ अथ नक्षत्रफलं॥ गर्गः॥ सुभगा चैव दुःशीला वंध्या पुत्रसमन्विता॥ धर्मयुक्ता व्रतघ्नी च परसंतान
मोदिनी॥ सुपुत्रा चैव दुःपुत्रा पितृवेश्मरता सदा॥ दीना प्रजावती चैव पुत्राघा चित्रकारिणी॥ साध्वी पति
व्रता नित्यं सुपुत्रा कष्टचारिणी॥ स्वकर्मनिरता दिंस्त्रा पुण्या पुत्रादिसंयुता॥ नित्यं धनव्यया सक्ता पुत्रीधान्य
समन्विता॥ मूर्खा चारा पुण्यवती दस्रर्क्षादिः क्रमात्फलं॥ पतिवत्याश्च ३ दैवुत्र प्रथमं स्याद्रजो यदि॰ पसुस्तस्या
भवेन्मृत्युस्त्रिपूर्वादिषु मेषु च॰ मघाश्लेषादिषु दित्य वह्निभेषु च वा भवेत्॰ तत्रापि स्यान्महाशोको दारिद्र्यं चान
ल्पता॰ तद्दोषपरिहारार्थं कुर्याच्छांतिं यथाविधि॰ तेषु येऽत्र पदोमास्यांतत नक्षत्रदेवता॥ आचार्यादीन्समभ्यर्च्य भोज
येच्छक्तितो द्विजान्॰ नं दु ... ते नाशु सर्वारिष्टं विनश्यति॰ इति आश्वलायनस्मृतौ॰॥ अथ लग्नफलं॥ मेषे स
व्यभिचारा स्यात् वृषभे परभोगिनी॥ मिथुने धनभोगाढ्या कर्कटे व्यभिचारिणी॥ पुत्राढ्या सिंहराशौ तु कन्या १३
यां श्रीमती भवेत्॥ विचक्षणा तुलायां तु वृश्चिके तु पतिव्रता॥ दुश्चारिणी धनुःपूर्वे अपरे च पतिव्रता॥ मकरे
त्वन्यदीना तु कुंभे निर्धनयुक्तता॥ मीने विचक्षणा लग्ने ग्रहसंस्था विवाद वदिति॥ अथ योगफलानि॥ देवज्ञ

मनोदरे॥ आद्यात्रौ दुर्भगा नारी विष्कंभे चेद्रजस्वला॥ वंध्या चैवातिगंडे च फलम्फलवती भवेत्॥ गंडे तु पुंश्च
ली नारी व्याघाते चात्मघातिनी वज्रे च स्वैरिणी प्रोक्ता पाते च पतिघातिनी॥ परिघे मृतवंध्या च वैधृतौ पति
मारिणी॥ शेषाः शुभावहा योगा यथा नामफलप्रदाः॥ अन्यत्रापि नृसिंहः॥ परिघस्य तु पूर्वार्द्धे व्यतीपाते च
वैधृतौ॥ संध्या ... पल्लवे विष्टाम शुभं प्रथमार्त्तवं॥ व्याघाते नव शूले तु नाड्यः पंच चतुर्दश इति॥ अत्र स
र्व्वयोर्विकल्पः॥ अथ लग्नसंस्थग्रहफलानि॥ वसिष्ठः॥ वैधव्यमष्टमस्थेऽर्के चंद्रे क्षीणे रुचिर्भवेत्॥
अंगारके भर्तृदीना बुधे चेदनपत्यता॥ दौर्भाग्यमिंद्रसचिवे सापत्न्यं भार्गवे भवेत्॥ प्रव्रज्या सूर्यपुत्रे तु
राहौ तु कलहः सदा॥ अशुभं चैव केतौ स्याज्जामित्रे शुभदाः शुभाः॥ अष्टमस्थ इत्यस्य सप्तम्यंतेषु क्वेत्येकम
नुषंगः॥ जामित्रे सप्तमस्थाने॥ नरसिंहोपि॥ लग्नस्य सप्तमस्थाने सूर्यो वैधव्यकारकः॥ पुत्रहानिकरस्त्व
रो बुधः सत्पुत्रदो भवेत्॥ बृहस्पतिर्धनापुष्ट्यं शुक्रः साफल्यमेव च॥ शनैश्चरे तु वंध्या स्याद्राहौ तु मरणं
ध्रुवं॥ चंद्रे सद्गुणसंयुक्ते देवरात मता लभ्रुर्नमिति॥ अथ वस्त्रफलं॥ गर्गः॥ सुभगा श्वेतवस्त्रा स्याद्दृढवस्त्रा पतिव्रता॥ क्षौम
वस्त्रा क्षितीशा स्यात् नववस्त्रा सुखान्विता॥ दुर्भगा जीर्णवस्त्रा स्याद्रोगिणी रक्तवाससा॥ नीलांबरधरा नारी विधवा प्र
ब्धितात तः॥ मलिनांबरधरा नारी दरिद्रा स्याद्रजस्वला॥ वस्त्रेस्वु विषमा रक्तविंदवः पुत्रमाप्नुयात्॥ समाश्च
कन्यका चेति फलं स्यात्प्रथमार्त्तवे॥ इति॥ अथ स्थानफलं॥ ग्रामाद्बहिः परस्या भेनारी स्याद्व्यभिचारिणी॥ पति

Indira Gandhi National Centre for the Arts

+ इदं च सर्वं शुभाशुभनिरीक्षणं प्रथमर्तौ द्वितीये वा कार्यं तदुक्तं वराहेण प्रथमर्तौ द्वितीये वा शुभाशुभनिरीक्षणं · कर्तव्यं ज्ञाति
भिः सम्यक् धर्मशास्त्रविधानत इति + ७

व्रता पतिस्थाने सुभगा रुद्रमध्यत: ॥ ग्राममध्ये तु वृद्धिः स्याद्विधवा च दिगंबरा ॥ उपरागे च दुःशीला आयुष्यं
जलसंनिधौ ॥ धनमध्ये तु कन्या या धनधान्यसमृद्धिदेति ॥ देवरात: ॥ संमार्जनी काष्ठतृणाग्निशूर्पान् द
१४ दधाना कुलटा तदा स्यात् ॥ तत्योपभोगे तपस्विस्थिता चेद् दृष्टे रजो भाग्यवती तदा स्याद्धि लि ॥ अथ प्रथम र
जोदर्शने शिष्टाचार: ॥ कश्यप: ॥ प्रथमर्तौ तु पुष्पिण्या: पतिपुत्रवती स्त्रिय: ॥ अक्षतै रासनं कुर्युस्त
स्मिंस्तामुपवेशयेत् ॥ हरिद्रा पुष्पगंधादीन् दद्यात्तांबूलकं स्रजं ॥ आशिषो वाचयेयुस्ता: पतिपु
त्रवती भव ॥ दीपे नीराजनं कुर्यात्तद्दीपे वासयेद्गृहे ॥ ता: सर्वा: पूजयेत्पश्चाद्गंधपुष्पाक्षतादिभि: लव
णापूपमुद्गादि दद्यात्ताभ्य: स्वशक्तित इति ॥ अथ सर्वर्तुसाधारणनियमानाह ॥ वसिष्ठ: त्रिरात्रं रजस्व
लाशुचिर्भवेत् ॥ सानांज्यान्नाभ्यंज्यान्नाप्सु स्नायादध: शयीत न दिवा स्वप्यान्नाग्निं स्पृशेन्न रज्जुं सृजेन्न दं = खर्वी वामद स्वधं
तान् धावयेन्न मांसमश्नीयान्न ग्रहान्निरीक्षेत नाश्लीलं किंचिदांचरेत् न खर्वेणापिबेदंजलिना वापि बेल्लो १४
पितलादि तेनायसेन वा विज्ञायत इति ॥ लोहेन ताम्रेण तथा ॥ या नखान्निनिकृंतते तस्ये कुनखीया त्वलिखते तस्यै
खेलतिर्या पर्णेन पिबति तस्या उन्मादुक इति तैत्तिरीयश्रुतौ नखनिकृंतनं भूमौ रेखाकरणं पर्णेन पानं चाभि
हं ॥ बौधायनोपि · अथ यदा मलवद्वासास्यात्तेनैनया सह संवदेत न सहासीत नास्या अन्नमद्याद्ब्रह्महत्या ह्येषा वर्णं प्र
तिमुच्यास्ते यो काल्यांदुं र स्पंजनं वा वा स्त्रिया ॥ अ ॥ अंजनमेव न प्रतिग्राह्यं काममन्यदिति · नैनामुपनयेन्नारण्ये

नपराचीनंनस्नातीतिवाच्यंकेनचतिलिखतेनाच्यंकेनदतोधावनेनरस्नानिनिकृंततेनकूखतिनरज्जुंसृजति
नपर्णेनिपिबतिनखर्वेणेति॥ अनयासंभाषणेप्रतिप्रसवोधर्मप्रश्नः॥ ब्राह्मणोष्यमाणोमलवद्वाससेत्संभाषितुंब्रा
१५ ह्मणेनसंभाष्यतयासंभाषेतसंभाष्यतुब्राह्मणेनैवसंभाष्याद्यपितैवंतस्या॰ प्रजानिःश्रेयसम्॥ प्रजानिःश्रेयसमि
तिवचनाद्द्वियवाभिःसंभाषणेनैतत्कार्यंइतिहरदत्तः॰ शौचगानरोदनहसनपाननारीयुतानुलेपनदिवास्व
प्नदंतधावनमैथुनंकायिकवाचिकमानसिकदेवतार्चननमस्कारंरजस्वलांगनास्पर्शतत्संभाषणरजोवद्वस्त्राणांसंस्प
र्शंचनकुर्यात्॥ इतिविशेषः॥ यद्यपिदक्षेणाञ्जनाभ्यंजनेस्नानंप्रवासंदंतधावनं॥ नकुर्यात्सार्त्तवानारीग्र
हाणांमीक्षणंतथेतिस्नानमात्रंनिषिद्धंतथा॥ प्युपरागादिनिमित्तकस्नानेप्रसक्तेवसिष्ठेनमाप्लुस्नाया
दितिमज्जनंनिषिध्यते॥ अतएवपराशरेणनियमःस्मर्यते॥ स्नानेनैमित्तिकेप्राप्तेनारीयदिरजस्वला
॥ पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेत्॥ सिक्तगात्रानवेदद्भिःसांगोपांगाकथंचनं॥ नवस्त्रपीडनंकु
र्यान्नान्यद्वासश्चधारयेदिति॥ रजस्वलायाःप्रथमदिननिर्णयस्तुपारिजातेचतुर्विंशतिमते॥ पूर्वांश
योस्तुरात्रौचेज्जननंमरणंरजः॥ दृष्टंपूर्वदिनादिस्वेत्तृतीयेतूत्तरेदिनि॥ केचिद्दिनोदितेसूर्येजननंमरणं १५
तथा॥ रजोवादृश्यतेस्त्रीणांयस्याहस्तस्यशर्वरी॥ अपरेत्वर्द्धरात्रात्प्राक्सूतौरजसिसूतके॥ पूर्वमेव
दिनंग्राह्युरूर्ध्वंचेदुत्तरेदनीति॥ अत्रदेशाचारतोव्यवस्था॥ स्नातायाःकालांतरेपुनःरजोदर्शनेत्रि

रात्रव्रतामावेव्यवस्थोक्तातत्रैवसंग्रहे॥ ऋतुस्नाताचयाप्रौढापुनरेवरजस्वला॥ स्नानान्स्नष्टादशाहेचशौ स्नानान्तरेण
चेनैवशुचिर्भवेत्॥ अष्टादशाहेत्वेकाहंद्यहमेकोनविंशतौ॥ विंशत्यामुत्तरेषुत्रिरात्रमशुचिर्भवे
त्॥ एतद्यस्याःकिंचिदूनेपूर्णेवामासिरजोनियमस्तद्विषयं॥ कश्यपस्तु॥ एकादशाहेत्वेकाहंद्विरात्रं
द्वादशेदिनि॥ ऊर्ध्वंत्रिरात्रंविज्ञेयमितिकुंडलिनोदितमिति॥ एतत्पक्षाद्दूर्ध्वंयस्यारजोनियमस्तद्विषयं
॥ अथरजस्वलाशुद्धिप्रकारः॥ स्मृत्यर्थसारे॥ रजस्वलाषष्टिमृत्तिकाभिःशौचंकृत्वामलंप्रक्षाल्यदंत
धावनपूर्वकंसगवेस्नायादिति॥ स्नानोतरंविशेषःस्नात्वान्यंपुरुषंनारीनस्पृशेत्तुरजस्वला॥ यदिस्पृशे
त्तदाप्रायश्चित्तमाहःईक्षमेद्भास्करंदेवंब्रह्मकूर्चंततःपिबेत्॥ केवलंपंचगव्यंचक्षीरंवात्मशुद्धयइतिलेखे
॥ ज्वरितायाःशुद्धिस्तुसंग्रहे॥ आतुराचेदृतुमतीतस्याःस्नानंकथंभवेत्॥ स्पृष्ट्वातुतांपरास्नायाद्दशकृत्वोप्य
नातुरा॥ वासोभिर्दशभिश्चैवपरिधाप्ययथाक्रमं॥ ब्राह्मणान्भोजयित्वाथपुण्याहेनविशुध्यति॥ आ
तुराणांतुसर्वेषामेवंशुद्धिर्विधीयतेइति॥ रजस्वलयोःपरस्परसंसर्गेशुध्युपायःस्मृतिमंजर्यां॥ उदक्ये
द्वितुसंस्पृष्टेसवर्णेचैकभर्तृके॥ तयोःस्नानंमिथःस्पर्शेपंचगव्यंततःपिबेत्॥ सवर्णयोर्भिन्नसंबंधेसगो
त्रेचरजस्वले॥ मिथःस्पृशेदमत्यातुस्नानमात्रेणशुध्यति॥ मत्येकरात्रंनाश्नीयात्पंचगव्यंपिबेत्ततः॥ उद
क्ययोर्यदान्योन्यमसंबंधःसवर्णयोः॥ स्पृशेदमत्यास्नात्वाचतस्मिन्नाह्याशुचिर्भवेत्॥ मत्यातुनाद्याद्रा

Indira Gandhi National Centre for the Arts

द्यर्भुक्त्वा चेत्प्रतिवासरं॥उपोषणं तदा केचिदाहुस्तद्दिनसंख्यया॥उपवासे नशक्ता चेत्तत्समं दानमाचरे
१६ त्॥संभाषेतां स्पृशेतां वा ब्राह्मण्यौ च रजस्वले॥ आस्नानकालान्नाश्नीतां उभे स्यातामिथः क्वचित्॥स्नात्वोपवा
सं कुर्यातां पंचगव्येन शुध्यतः॥एवमन्यासतः शुध्येत् प्रायश्चित्तं समाचरेत्॥मत्यार जस्वलान्योन्यं द्वषली ब्रा
ह्मणी भवेत्॥भवेदिव्यतः पूर्वं स्पृष्टेति शेषः॥ब्राह्मण्याः कृच्छ्रमेकं तु शूद्रीपादेन शुध्यति॥कश्यपः॥रजस्व
लास्पृतिका वा चांडालं यदि संस्पृशेत्॥आस्नानकालान्नाश्नीयादतिकृच्छ्रं समाचरेत्॥ज्ञानतः स्पर्शतः तत्॥
चांडालं सार्त्तवा नारी संस्पृशेद्भोजनांतरे॥वाग्यता वदिरासीत स्नानकालादुपोषणी॥प्राजापत्यं चरेत्स्प्र
त्यं च गव्यं ततः पिबेत्॥विप्रान्द्वादशसंख्याकान्भोजयित्वा तु शुध्यति॥पुष्पिणी संस्पृशेन्मोहादस्तु
वानरं स्पृशेत्॥स्नानादर्वाङ् भुंजीत मुक्त्वा कृच्छ्रं समाचरे॥मोहादज्ञानतः॥स्पृष्ट्वादक्यापंचनखान्धि
शाफैकशफान्पशून्॥अंडजानि च सर्वाणि नाद्यादास्नानवासरात्॥पाराशरः॥रजस्वला यदा दष्टा शु
नाजंबुकरासभैः॥पंचरात्रं निराहारा पंचगव्येन शुध्यति॥ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा॥चतुर्गु
णं स्मृतं मूर्ध्नि दंशेऽन्यत्र व्रती भवेदिति॥दुष्टरजोदर्शननिर्णये शांतिमाह शौनकः॥आर्त्तवानां तु नारी १६
णां शांतिं वक्ष्यामि शौनकः॥अपुत्रादिलाभाय दंपत्योरतिवृद्धये॥पंचमे द्विचतुर्थे द्वि यद्वा तीर्थपुरःस
॥तस्मिन्नहनि कर्त्तव्यः कृतुहोमो विधानतः॥आचार्यं वरयेत्प्राज्ञो भुवनेश्वरितुष्टये॥होमार्थं च जपार्थं

महदूर्माः६

च वरयेदृत्विजो बहून्॥यजमानो द्विजैः सार्द्धं शांतिहोमं समाचरेत्॥गृहादीशानदिग्भागे देवता
पूजनं यच॥द्रोणप्रमाणधान्येन व्रीहिराशित्रयं भवेत्॥कुंभत्रयं न्यसेद्राशौ तंतुवस्त्रादिवेष्टये
त्॥पूरयेत्तीर्थसलिलैः प्रतिकुंभं पृथक्पृथक्॥सूक्तेनाथ नवर्चेन प्रसुव आपइत्यथ॥अरचोयाः
प्रवतस्त्वद्गायत्र्या च ततः क्रमात्॥मध्यकुंभे क्षिपेद्धान्यमौषधानि च हेम च॥ततश्च पंचरत्नानि गं
धपुष्पाक्षतादिकान्॥औषधानि च वक्ष्यंते मुनिभिः शांतिकारणात्॥औदुंबरः कुशा दूर्वा राजीव
चंपकाबिल्वकाः॥विष्णुक्रांता च तुलसी बर्हीषं शंखपुष्पिका॥शतावर्यश्वगंधा च निर्गुंडी सर्षप
द्वयं॥अपामार्गः पालाशश्च पनसो जीवकस्तथा॥प्रियंगवश्च गोधूमा व्रीहयोश्वत्थ एव च॥क्षीरं च
दधिसर्पिश्च अपत्रं तथोत्पलं॥कुरंटकत्रयं मुंजा वचा मदकमुस्तकी इति॥द्वात्रिंशदौषधानीह
यथासंभवमाहरेत्॥गजाश्वरथ्यवल्मीकसंगमाद्ध्रदगोकुलात्॥राजद्वारप्रदेशाच्च मृद मानीय निःक्षि
पेत्॥कुंभस्थापन इत्येतत्तन्मंत्रेण कारयेत्॥मृत्तिकां चौषधादीनि मंत्रेण प्रक्षिपेत्क्रमात्॥कुंभो
परिन्यसेत्पात्रं कांस्यं वा ताम्रमेव वा॥मन्मथं नवपात्रं वा स्वस्वस्य वित्तानुसारतः॥पात्रोपरि न्यसेद्देवं स्वर्ण
तिमां भुवनेश्वरीं॥तन्मूर्त्यं वान्यसेत्तत्र इंद्राणीं च पुरंदरं॥आचार्यः पूजयेद्देवीं मंगाद्या वरणानि

राई ५
पसहूलाः माषा
गा देशप्रमाणः
सारवादुली दि
भा ६

कोगरा भ्रटेलीत्रय ५ । प्रियंगु भागली भाषा ६

निर्गुंडी भाषामां समाल ७

Indira Gandhi National Centre for the Arts

च॥ अन्यो वा पूजनं कुर्याद्गायत्र्या मंत्रसारया॥ इंद्राणीं पूजयेद्देवीं इंद्राणी मासु नारिषु॥ क्रमेण पूजये
दिंद्रमिंद्रं त्वा वृषभं वयं॥ अनेन विधिनाचार्यः पूजयेद्देवतात्रयं॥ आवाहनादिसकलैरुपचारैः पृथ
१७ क्पृथक्॥ तन्मध्यमं स्पृशन्कुंभं मंत्रेण भुवनेश्वरी॥ जपेदाचार्य आ होमं छ्री सूक्तं च जपेत्ततः॥ स्पृ
शन्वै दक्षिणं कुंभं त्र्यंबकेनैव जपेदथ॥ चत्वारि रुद्रसूक्तानि चतुर्भिर्जोत्तराणि चासंस्पृशन्नुत्तरं कुंभं
श्रीरुद्रं रुद्रसंख्यया शन्न इंद्राग्नि सूक्तं च तैवेवं स्पृशन्जपेत्॥ कुंभस्य पश्चिमे देशे शांति होमं समाच
रेत्॥ अन्वाधानं ततः कुर्याद्धोमतंत्रं समाचरेत्॥ कृत्वाज्यभागपर्यंतं हविरुद्वासनादिकं॥ तिस्रभिश्चै
व दूर्वाभिरेकैका चाहुतिर्भवेत्॥ आभिर्मंत्रयुक्ताभिर्गायत्र्या जुहुयात्क्रमात्॥ अष्टोत्तरसहस्रं तु श
मष्टोत्तरं तु वा॥ तिलमिश्रैश्च गोधूमैर्द्वमेणाज्याहुतीर्हुनेत्॥ जुहुयात्पायसेनैव आज्येन चरुणा तत्क्रमात्॥
हविश्चतुष्टये नैव प्रत्येकं सम संख्यया॥ गायत्र्यैव च होतव्यं हविरत्र चतुष्टयं॥ ततः स्विष्टकृतं हुत्वा
र जुह्वहरणं तथा॥ अयाश्चेत्यादिभिर्हुत्वा समुद्रादूर्मिसूक्ततः॥ संततामाज्यधारां तां पूर्णाहुतिमथाच
रेत्॥ परिषेचनपर्यंतं होमशेषं समापयेत्॥ सर्वौषधिस्थितैस्तत्र घातिकुंभस्थितोदकैः॥ अरतु मत्स्यां स्थि १७
तां शांतिं दंपतीभ्यां सुखाय च॥ शांतिराभिषेकः॥ अथाभिषेकमंत्राश्च प्रोच्यंते शौनकादिभिः॥ आपो हिष्ठे

विश्वान् विधिवदभ्यर्च्य गंधपुष्पाक्षतादिभिः॥ धेनुं पयस्विनीं दद्यादाचार्याय च भूषणैः॥ मंत्रेणार्थमीशानं त्वमग्ने रुद्र इत्यथ॥ तमुष्टु सी
ति मंत्रेण भुवनस्पतिरं तथा॥ यातेरुद्र इति मंत्रेण शिवसंकल्प मंत्रतः॥

भिः सूक्तेनच

तिनवै ततः परं॥ इंद्रो अंगत्र चैनैवपावमानैः क्रमेण तु॥ उन्नयं श्रण वच्चनस्वास्ति दा विशण कया॥ अं
बकेन मंत्रेण जातवेदसएकया॥ समुद्रज्येष्ठा इत्यादि चतुर्भिश्च प्रासिद्धकैः॥ आयं तामिति मंत्रेश्च चा
भिश्चाभिर्यथाक्रमं॥ इमा आपस्तच्चेनैवदेवस्यत्वेति मंत्रितः ~~विश्वान् विधिवदभ्यर्च्य गंधपुष्पाक्ष~~
~~तादिभिः॥ धेनुं पयस्विनीं दद्यादाचार्याय च भूषणैः~~॥ ईद्द्त्वा वृषभं वयं मंत्रेश्चैवाभिषेचयेत्॥ सा च व
स्त्रांतरं धृत्वा पुनश्चोपवसेत्सती॥ उपवासोत्र समीपावस्थानं॥ स दक्षिणमनड्वाहं प्रदद्याद्युद्गजापिने॥ अथ
त्विग्भ्यश्चापि सर्वेभ्यो दद्याद्दक्षिणां ततः॥ महाशांतिं प्रजप्याथ विप्राशीर्वाचनं ततः॥ ब्राह्मणान्भोजये
च्छेषाद्भुंजीत स्वजनैः सह॥ स्मृतौ॥ ब्राह्मणान्भोजयित्वा तु देवज्ञं भोजयेत्ततः॥ एवं यः कुरुते शांतिं शौनको
क्तौ प्रकारतः॥ तदनिष्टं तु सकलं सघ्र विनश्यतीति॥ जपेदाचार्य इति अन्वाधानात्मक होमतंत्रा
रंभपर्यंतमित्यर्थः॥ अनेनैवाशयेनान्वाधानं ततः कुर्यादिति श्लोके आचार्यग्रहणं॥ ततश्चाग्निस्थापना
दियद्दपूजांतं यजमानेन कर्त्तुमुचितं॥ अथ येन त्रेति ग्रह सिद्धान्त ग्रहणं आवर्त्यते॥ सावित्रे चरुविश्व तदित्यत्र
तच्छब्देन हविश्चतुष्टयस्याग्र काले सवित्र इति चतुर्थ्यंतेन देवतोद्देशः कार्य इति ज्ञाप्यते॥ लभ्यते चात्र मंत्र सं
वादः॥ पार्वणावितितद्धितविसंवादिनो मंत्रास्तुर्णामासाये रफद्देशांगी क्रियते याज्ञिकैः॥ संवादे तु कैमुतिकन्या

Indira Gandhi National
Centre for the Arts

येनैव तत्सिद्धिः॥ नचैवं भुवनेश्वरी देवत्वहोमानावापत्तिः॥ वाचनिकत्वेन इष्टत्वात्॥ वस्तुतस्तु शुद्धि प्राणिप्र
सवइतिधातोर्व्युत्पन्नः सवितृशब्दः प्रकृत फलदातृत्वेन प्रथमप्रयाजे समिद्ध्यो ग्नेरिवालिंगानादरेण भु
१८ वनेश्वरी प्रतिपादक इति न विरोधः॥ मुख्य दक्षिणाशक्तौ निष्क्रयो दक्षिणा देया॥ तमाह कात्यायनः॥ दशका
र्षापणार्थेनापि इति अष्टावनडुहि स्मृता इति च॥ कार्षापणमाह नारदः॥ कार्षापणो दक्षिणस्यां दिशि रौप्यः प्र
वर्त्तते॥ पणैर्निबद्धः पूर्वस्यां षोडशैव पणाः स्त्विति॥ अथ शांतिप्रयोगः॥ बहुतर दोषदुष्टे प्रथमरजोदर्श
नेद्वितीयादिरजोदर्शनोत्तरं स्वल्प दोषदुष्टे तु तदनंतरमेव गर्भाधानं प्रत्यासन्न दिने सा कार्या स्त्रीपत्न्या स ३६
दकृत स्नानादि नित्यः क्रियः पवित्रपाणिराचम्य प्राणानायम्य देशकालौ संकीर्त्य स्या मम भार्यायाः प्रथम
रजोदर्शने ई दृश दुष्टमासादि सूचित सर्वारिष्ट परिहारा द्वारा श्री परमेश्वर प्रीत्यर्थं सयदमखां शौनकोक्तां
क्तां शांतिं करिष्ये इति संकल्प्य गणपति पूजनादि आचार्यर्त्विग्वरणां तं कुर्यात्॥ आचार्यस्तु यथास्वर्गे श
क्रादीनां बृहस्पतिः॥ तथा त्वं मम यज्ञेस्मिन्नाचार्यो भव सुव्रत त्याचार्यस्य॥ अस्य यागस्य निष्पत्त्यै भवंतो भ्य १८
र्थितो मया॥ सुप्रसन्नैः प्रकर्त्तव्यं शांतिकं विधिपूर्वकमिस्त्यृत्विजां॥ ततो गंध वस्त्रादिभिः यथाशक्ति ते पं
पूजनं॥ ततः आचार्यः पवित्रपाणिः देशकालौ संकीर्त्य यजमानानुज्ञया चार्यकर्म करिष्ये इति संकल्प्य

+६ पंचगुञ्जाधिकं पलपरिमाणं कांचे लेखविंशत्यधिक त्रिशत कृष्णलात्मकं+६

पदत्र संस्थितमिति प्राच्यादिदिक्षु प्रादक्षिण्येन सर्षपान्विकीर्य शुचीवइत्यृचेन पंचगव्येन तथैव प्रोक्ष्या
पोहिष्ठेति तृचेन शुद्धाद्भिः तथैव प्रोक्ष्य कृतांजलिः॥ स्वस्त्ययनं तार्क्ष्यमिति मंत्रद्वयेन देवतां संप्रार्थ्य भुवनेश्व
र्यादि प्रतिमात्रयस्य अग्न्युत्तारणं कुर्यात्॥ अग्निः सप्तिमिति सूक्तस्य वैश्वानरो अग्निस्त्रिष्टुप्॥ अग्न्युत्तारणे वि
ति॥ अग्निपदरहितेनाग्निः सप्तिमिति सूक्तेन अभिषिच्य पुनरग्निपदयुक्तेमतेनैवाभिषिंचेत् इत्यग्न्युत्तारणं
॥ ततो गृहाद्दीशान्यां मध्ये तद्दक्षिणोत्तरयोश्च मही द्यौरिति मंत्रावृत्त्या भूमिं स्पृष्ट्वा ओषधयः समिति द्रोणप्रमाण ─ ६
व्रीह्यादिभिः तेषु देशेषु राशित्रयं कुर्यात्॥ पलं सुवर्णाश्चत्वारः कुडवं प्रस्थमाढकं॥ द्रोणं च खारिका चेति पूर्वपू
र्वाच्चतुर्गुणं॥ इति शोडश प्रस्थात्मको द्रोणः॥ ततः आकलशे क्षितिमध्य दक्षिणोत्तर क्रमेण प्रक्षालित मव्र
णमकालकं कुंभत्रयं सादयेत्॥ प्रसुव आप इत्यस्य सूक्तस्य सिंधुक्षित्प्रैयमेधो नद्यो जगती॥ कलशपूरक पूर
णे विनियोगः॥ याः प्रवत इति ऋक्॥ प्रतिक
ले विनियोगः॥ याः प्रवत इत्यस्य वसिष्ठो नद्यः शक्करी॥ कलश पूरणे विनियोगः॥ याः प्रवत इति ऋक्॥ प्रतिक
लशं पूरणादि मंत्राणामावृत्तिः॥ ततः गंधद्वारामिति गंधं॥ या ओषधीरिति सर्वौषधीः॥ ओषधयः समिति
यवांश्च त्रिषु पूर्वक्रमेण क्षिपेत्॥ हेम पंचरत्न प्रक्षेपोत्तरं वाग्यादि प्रक्षेपः इति वक्ष्यामः॥ ततो मध्यम कुंभे ─ १
गाय आयव व्रीहि तिलमाषकं गुश्यामाकमुद्गान् क्षिप्त्वा तथैव उदुंबर कुशदूर्वा रक्तोत्पल चंपक बिल्व वि
ष्णुक्रांता तुलसी बर्हिः शंखपुष्पी शतावर्यश्वगंधा निर्गुंडी रक्तपीत सर्षपापामार्ग पलाश पनस जीवक क्षि

+२ सप्तद्रव्यप्रक्षेपो न गायत्रेति वृद्धा+२

Indira Gandhi National Centre for the Arts

६ भुवनेश्वरीध्यानं॥ उद्यद्दिनद्युतिमिंदुकिरीटां तुंगकुचां नयनत्रययुक्तां॥ स्मेरमुखीं वरदांकुशपाशाभीतिकरां प्रभजे भुवनेशीं॥ ६

यं गुग्गुलधूमश्रीखंडश्वेतदधिदुग्धघृतपद्मपत्रनीलोत्पलसितरक्तपीतकुरंटकगुंजावचानंदमुस्तकाख्यानि द्रव्याणि
शतौषधानि यथासंभवं वा प्रक्षिप्य त्रिष्वपि कलशेषु हिरण्यरूप इति हिरण्यं सहिरत्नानीति च रत्नानि प्रक्षिप्य
१६ या ओषधीरिति सर्वौषधीः ओषधयः समितियवान्॥ कांडात्कांडादिति दूर्वाः॥ अश्वत्थे व इति पंचपल्लवान्नि
क्षिप्य युवासुवासा इति सूत्रेण वाससा वा वेष्टितान् कलशान् गंधाक्षतपुष्पमालादिभिः कलशान् भूषयेत्॥ ततः
कलशानामुपरि धातुमयं वैणवं मृन्मयं वा पूर्णपात्रत्रयं स्वशक्त्यनुसारेण पूर्णा दर्वीति मंत्रावृत्त्या निधाय त
दुपरि श्वेतवस्त्रत्रयं चंदनादिकृताष्टदलयुक्तं न्यसेत्॥ मध्यमे स्थापितप्रतिमायां भुवनेश्वरीमावाहयेत्॥
गायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री भुवनेश्वरीपूजने॰ भुवनेश्वरीमावाहयामि॥ एवं दक्षिणकलशे इंद्रा
णी वृषाकपिरिंद्राणी पंक्तिः॥ इंद्राणीपू॰ योगः॥ इंद्राणीमासु ऋ॰ऋ॰॥ एवमुत्तरकलशे इंद्रत्वा विश्वामित्र इं
द्रो ग्नीषोमा गायत्री इंद्रपू॰ इंद्रा त्वा ऋ॰ऋ॰॥ ततो मध्यमकलशे ओं गणाद्यावरणदेवताभ्यो नमः॥ ओं गणाद्यावरण
देवताः आवाहयामीत्यावाह्य सप्रणवगायत्र्यंते ओं गणाद्यावरणसहितायै भुवनेश्वर्यै आसनं समर्पयामीत्ये
वं षोडशोपचारैर्भुवनेश्वरीं संपूज्य उक्तमंत्राभ्यां कांडानुसमयेन इंद्राणींद्रयोः षोडशोपचारैः पूजां कुर्यात्॥
अथाग्नौ भुवनेश्वर्यास्सह देवपदार्थानुसमयेन नाममंत्राभ्यां वा तयोः पूजनं॥ ततो मध्यमकुंभं स्पृष्ट्वा आ २६
चार्यः सहस्रं अष्टशतं वा गायत्रीं जप्त्वा श्रीसूक्तं जपेत्॥ हिरण्यवर्णामितिपंचदशर्चस्य सूक्तस्य॥ क

र्दमो नंदचिक्लीतंदिरासुता ऋषयः॥ श्रीर्देवता॥ आद्यास्तिस्रोनुष्टुभः॥ तत एका प्रस्तारपंक्तिः॥ ततो द्वे त्रिष्टुभौ
॥ ततोष्टावनुष्टुभोंत्या प्रस्तारपंक्तिः॥ जपे विनियोगः॥ ओं हिरण्यवर्णामिति सूक्तं॥ तत एको ऋत्विक् दक्षि
णकुंभे रुद्रसूक्तानि जपेत्॥ यथा कद्रुद्रायेति नव र्चस्य घोरः कण्वो वा रुद्रो गायत्री जपे विनियोगः॥ कद्रुद्रा
येति सूक्तं॥ इमा रुद्रायतवसइत्येकादशर्चस्य सूक्तस्य कुत्स आंगिरसो रुद्रस्त्रिष्टुप् जपे वि॰॥ ओं आ ते पितर्म
रुतां सुम्नमेतु इति सूक्तं॥ इमा रुद्राय स्थिरधन्वने गिरः॥ वसिष्ठो रुद्रस्तिस्रो जगत्योंत्या त्रिष्टुप्॥ जपे वि॰॥ इमा रुद्रा
य स्थिरधन्वने॰ ४ आ वो राजानं वामदेवो रुद्रस्त्रिष्टुप् जपे वि॰ आ वो राजानं ऋ॰ऋ॰॥ तमुष्टुहि भौमोत्रो
रुद्रस्त्रिष्टुप् जपे वि॰ तमुष्टुहि यः स्विषुः ऋ॰ऋ॰॥ भुवनस्य पितरं॰ ऋजिश्वा रुद्रस्त्रिष्टुप्॥ जपे वि॰॥ भुव
नस्य पितरं ऋ॰ऋ॰॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्॥ जपे वि॰॥ त्र्यंबकं ऋ॰ऋ॰॥ अन्य ऋत्विगुत्तरकलशं स्पृ
ष्ट्वा एकादशावृत्ति नीरुद्रं जपेत्॥ ततः शन्न इति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप्॥
जपे वि॰ शन्न इंद्राग्नी इति सूक्तं॰ ३ मध्यमकुंभपश्चिमे स्थंडिले अग्निस्थापनाग्निध्याने कृते स्थापितकुं अग्निस्थापन दि॰ यजमान (?)
भेशान्यां नैषधादेन वग्रहाणां तदंगदेवतानां च तत्तन्मंत्रैरावाहनादि कुर्यात्॥ सौकर्यार्थं यद्यक्षीपीनस
५२ ग्रहस्थलीकौ लिख्यते॰ पंचास्त्रैकाविभिडुमजचतुरस्रगार कं अस्तगे राहुं शूर्पमिंते धनुष्पद शानिं केतुं ध्वजाभं तथा॥ दीर्घं कीट
चतुष्टयेसुरगुरुं वाणीं मेचंद्रजं प्राचीतः॥ क्रमतो लिखेद्ग्रहगणं मध्ये रविं वर्तुलं भित्तिः प्रकार्केत्राद्गुरखो ज्ञेयो गुरुस्सौ
म्या बुधस्त्वौ प्रमुखः शनिः सोमः सौषादक्षिणतो मुखाइति मध्यमगुरणे आदित्यादिमुखाः सर्वे साधिप्रत्यधि
देवताः॥ स्थापनीया मुनिश्रेष्ठ नान्तरेणपरांमुखः इति महार्णवेत्युपथाप्र॰

Indira Gandhi National
Centre for the Arts

तद्यथा॥प्रणवस्य परब्रह्मऋषिः॥परमात्मा देवता गायत्री छंदः॥व्याहृतीनां क्रमेण जमदग्निर्भरद्वाज गवत्क्र
२० षयः॥अग्नि वायुः सूर्यो देवता॥दैवीगायत्री दैवीउष्णिक् दैवीबृहत्यः छंदांसि॥ध्यावाहने विनि०॥तत्र ग्रहस्थापने
वस्य वर्त्तुले द्वादशांगुले मंडले प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैः आकृष्णेनेति हिरण्यस्तूपः सविता त्रिष्टुप्॥सूर्यावा
हने विनि० ओं आकृष्णेन० ओं भूर्भुवः स्वः कलिंगदेशोद्भव काश्यपसगोत्र सूर्य इहागच्छ इह तिष्ठ इति स्थापयेत्
॥ततआग्नेये चतुरस्रे चतुर्विंशांगुले प्रत्यङ्मुखं सोमं श्वेतपुष्पाक्षतैः॥आप्यायस्व गोतमः सोमो गायत्री॥सो
मावाहने विनि०॥ओं आप्यायस्व० रुक्॥ओं भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्र सोम इहागच्छ त्वावाह्य
इह तिष्ठ स्थापयेत्॥ततो दक्षिणे त्रिकोणे त्र्यंगुले मंडले दक्षिणामुखं भौमं रक्तपुष्पाक्षतैः अग्निर्मूर्द्धा वि
रूपोंगारको गायत्री अंगारकावाहने० ओं अग्निमूर्धा० त्र्यृक्॥ओं भू० अवंतिसमुद्भव भारद्वाजगोत्र भौ
म इहा०॥ततईशान्ये बाणाकारे चतुरंगुले उदङ्मुखं बुधं पीतपुष्पाक्षतैः उद्बुध्यध्वं बुधः सौम्यो बुधः त्रि
ष्टुप्॥बुधावा० ओं उद्बुध्यध्वं० ओं भू० मगधदेशोद्भव आत्रेयसगोत्र बुध इहा०॥ततः उत्तरे दीर्घचतुरस्रे मं
डले उदङ्मुखं बृहस्पतिं पीतपुष्पाक्षतैः बृहस्पते अतियदर्यो गृत्समदो बृहस्पतिस्त्रिष्टुप्॥बृहस्पत्यावा० बृहस्पते अ
ति यदर्यः॥ओं भू० सिंधुदेशोद्भव आंगिरससगोत्र बृहस्पते इहागच्छ॥ततः पूर्वे पंचकोणे नवांगुले मंडले प्रा
ङ्मुखं शुक्रं शुक्लपुष्पाक्षतैः शुक्रः पराशरः शुक्रो द्विपदाविराट्॥शुक्रावा० ओं शुक्रः शुशुक्वान्० ओं भू० ॥२०
भोजकटदेशोद्भव भार्गवगोत्र शुक्र इहागच्छ॰॥ततः पश्चिमे धनुराकारे द्व्यंगुले मंडले प्रत्यङ्मुखं श



निं कृष्णपुष्पाक्षतैः शमग्निरिरिंबिठिः प्राणिरुष्णिक्॥शन्यावा० ॐ शमग्नि० ॐ भू० सौराष्ट्रदेशोद्भव काश्यप
गोत्र शनैश्चर इहा०॥७॥ततो नैरृत्ये मंडले शूर्पाकारे द्वादशांगुले दक्षिणाभिमुखं राहुं कृष्णपुष्पाक्षतैः क
याना वामदेवो राहुर्गायत्री॥राह्वावा० ओं कया नश्चित्र आ० ओं भू० ठिंबापुरोद्भव पैठीनसिगोत्र राहो
इहा०॥ततो वायव्ये ध्वजाकारे षडंगुले मंडले दक्षिणाभिमुखं धूम्रपुष्पाक्षतैः केतुं मधुच्छंदाः केतुर्गाय
त्री केत्वावाहने० ओं केतुं कृण्वन्न केतवे पेशो० ओं भू० स्वः० अंतर्वेदिसमुद्भव जैमिनिसगोत्र केतो इ
हागच्छ० यथोक्तकुसुमतंडुलाभावे यथालाभोपपन्नैः कुसुमतंडुलैः स्थापयेत्॥त्र्यंबकं वसिष्ठो रु
द्रस्त्रिष्टुप्॥त्र्यंबकं यजामहे० मृतात्॥ओं भू० स्वः ईश्वर इहागच्छ इह तिष्ठ इति सूर्यदक्षिणपार्श्वे ईश्वरं॥
गौरीर्मिमाय दीर्घतमा जगती॥ओं गौरीर्मिमाय स० व्योमन्॥ओं भू० स्वः उमे इहागच्छ त्वावाह्य इह तिष्ठ
इति सोमदक्षिणपार्श्वे उमां॥यदक्रंदो दीर्घतमाः स्कंदस्त्रिष्टुप्॥स्कंदावा॥ॐ यदक्रंदः प्रथमं जायमान० वे
न्॥ओं भू० स्वः स्कंद इहागच्छ इह तिष्ठ इति भौमदक्षिणपार्श्वे स्कंदं॥विष्णोर्नुकं दीर्घतमा नारायणस्त्रिष्टुप्॥ना
रायणा० वा० ओं विष्णोर्नुकं० ॐ भू० स्वः नारायण इहागच्छ त्वावाह्य इह तिष्ठ इति बुधदक्षिणपार्श्वे नारायणं०
ब्रह्मजज्ञानं वामदेवो ब्रह्मा त्रिष्टुप्० ब्रह्मावा० ॐ ब्रह्मजज्ञानं विवः ॐ भूः स्वः ब्रह्मणा ते ब्रह्मयुजे त्यस्य विश्वा
मित्रो ब्रह्मा त्रिष्टुप् ब्रह्मन्निहागच्छ त्वावाह्य इह तिष्ठ इति बृहस्पतिदक्षिणपार्श्वे ब्रह्माणं॥इंद्रं वो मधुच्छंदा
इंद्रो गायत्री॥इंद्रावा० इंद्रं वो वि० वलः ओं भूः स्वः इंद्र इहागच्छ इह तिष्ठ इति शुक्रदक्षिणपार्श्वे इंद्रं॥य

Indira Gandhi National
Centre for the Arts

माय·सोमं यमोनुष्टुप्॥यमाय·यमायसोमे·कृत:॥ओंभूः स्वः यमइहागच्छेहति इहतिष्ठ शनैश्चरदक्षिणपा
र्श्वे यमं॥मोषुणोघोर:कण्व:कालोगायत्री·कलावा०·ओं मोषुण: परापरा·सद्॥ओंभूः स्वःकालइ
२१ हागच्छेहति इहतिष्ठ राहुदक्षिणपार्श्वेकालं॥उषोवाजंप्रस्कण्व:चित्रगुप्तोबृहती॥चित्रगुप्तावाहन·उषो
वाजं·हृय:ॐभूः स्वःचित्रगुप्तइहागच्छेहतिइहतिष्ठ केतुदक्षिणपार्श्वे चित्रगुप्तं॥ततःकुंकुमपुष्पाक्षतै:स
र्वा:प्रत्यधिदेवताःस्थापयेत्॥अग्निंकाण्वोमेधातिथिरग्निर्गायत्रीअग्नेरावा·ॐअग्निंदूतं॥क्रतुॐ
ग्रहमे०८ भूः स्वःइहागच्छेहतिइहतिष्ठ सूर्यवामपार्श्वे अग्निंआवाहयामि॥अप्सुमेमेधातिथिरापोनुष्टुप्आवा·
अप्सुमे·अप्सु·मेखजी॥ओंभूः स्वः आपइहाइहागच्छतइहतिष्ठ तेति सोमवामपार्श्वे अप:स्योनापृथिवी
मेधातिथिर्विष्णुर्गायत्री ॐभूः भुःस्वः विष्णोइहागच्छेहति इहतिष्ठ बुधवामपार्श्वे विष्णुं॥इदंविष्णु·सुरी॥
इन्द्रश्रेष्ठानिगृत्समदइंद्रस्त्रिष्टुप्·इन्द्रश्रेष्ठा·मह्रा॥इंद्रोवो॥ॐभूः स्वः इंद्रइहागच्छेहति इहतिष्ठ गुरुवाम
पार्श्वे इंद्रं इंद्राणीं॥इन्द्राणीमिरिंद्राणीपंक्ति: इंद्राणीमासु उत्तरमं ॐभूः स्वः इंद्राणीइहागच्छेहति इहति
ष्ठ गुरुवामपार्श्वे इंद्राणीं॥प्रजापतेर्हिरण्यगर्भ: प्रजापतिस्त्रिष्टुप्॥प्रजापते नत्वदेतान्यन्य·रयीणां॥
ॐभूः स्वः प्रजापतेइहागच्छेहतिइहतिष्ठ शनिवामपार्श्वे प्रजापतिं॥आयंगौ:सर्पराज्ञि:सर्पागायत्रीसर्पावा
ह·आयंगो:स्व:ॐभूः स्वःसर्पा: इहागच्छतइहति इहतिष्ठ राहुवामपार्श्वेसर्पान्॥ब्रह्मजज्ञानंवामदेवोब्र २१
ह्मात्रिष्टुप्॥ब्रह्मा·ब्रह्मजज्ञानं·विव:ॐभूः ब्रह्मन्निहागच्छेहति इहतिकेतोवामपार्श्वेसर्पान्॥ब्रह्मज

ज्ञानंवामदेवोब्रह्मात्रिष्टुप्॥ब्रह्मा·ब्रह्मजज्ञानं·विव:ॐभूः स्वःब्रह्मन्निहागच्छेहति इहतिकेतोर्वामपार्श्वेब्र
ग्र२ ह्माणं॥ततःकुंकुमपुष्पैर्विनायकादिपंचदेवता:स्थापयेत्॥गणानांत्वागृत्समदोगणपतिर्जगतीवि
नायका·गणानांत्वा·सादनं॥ॐभूः स्वः विनायकइहागच्छेहति इहतिष्ठ राहोरुत्तरतोविनायकं॥जातवेदसे
कश्यपोदुर्गात्रिष्टुप्॥दुर्गावाह:जातवेदसे·त्यग्निः ॐभूः स्वः दुर्गेइहागच्छेहति इहतिष्ठ शनेरुत्तरतोदुर्गां॥तव
वायोव्यश्वांगिरसोवायुर्गायत्रीवायवस्वा·तववायो·ऋणीमहे॥ॐभूः वायोइहागच्छेहति इहतिष्ठ रवेरुत्तरतो
वायुं॥आदित्प्रत्नस्यआकाशोगायत्री॥आदित्प्रत्नस्य·ओंभूः स्वःआकाशइहागच्छहतिइहतिष्ठ राहोर्दक्षिणेआ
काशं॥एषोउषा:प्रस्कण्वोश्विनौगायत्रीएषोउषाअपूर्व्या·ओंभूः अश्विनौइहागच्छतंइहतिकेतोर्दक्षिणे
श्विनौ॥यद्वाविनायकादीन्पंचउत्तरएवस्थापयेत्॥ततोग्रहपीठाद्बहिर्गतयावस्त्रमालादेवता:स्थाप
येत्॥उत्तरेक्षेत्राधिपतिवास्तोष्पतिंआवाहयेदित्येके॥क्षेत्रस्यवामदेव: क्षेत्राधिपतिरनुष्टुप्॥क्षेत्रस्यप
तिना·ओंभूः क्षेत्राधिपतेइहागच्छहति इहतिक्षेत्राधिपतिं॥वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्॥वा
स्तोष्पते॥इहागच्छेहति इहति॥वास्तोष्पतिं॥ततःइंद्रादिलोकपालान्सूर्याभिमुखानावाहयेत्॥तत्रमं
त्रा:॥इंद्रंविश्वाजेतामधुच्छंदइंद्रोनुष्टुप्॥ओंइंद्रविश्वा·इंद्रइहागच्छेत्यादिपूर्ववत्॥एवमुत्तरत्रापि
॥अग्निंकाण्वोमेधातिथिरग्निर्गायत्री॥अग्निंदूतं·यमायसोमंयमोयमोनुष्टुप्॥यमायसोमं॥मोषुणो
घोर:कण्वोनिर्ऋतिर्गायत्री॥तत्वायामिशुन:शेपोवरुण:त्रिष्टुप्तववायोव्यश्वांगिरसोवायुर्गायत्री॥

Indira Gandhi National
Centre for the Arts

सोमो धेनुं गोतम: सोमास्त्रिष्टुप्॥ सोमो धेनुं॥ तमीशानं गौतम ईशानो जगती॥ तमीशानं॥ एवमीशानांता दे
वता आवाह्य तदस्तु मित्रावरुणा॥ गृहा वै प्रतिष्ठा सूक्तमिति प्रतिष्ठाप्य उक्त तत्तन्मंत्रै रादित्यायनम इत्येवमा
२२ दिभिर्नाममंत्रैर्वा षोडशोपचारैः संपूज्य॥ मंत्रहीनं क्रियाहीनमिति क्षमाप्य ग्रहवेदीशानभागे महीद्यौः पृथि
वी च न इत्यादिभिर्विधिना कलशस्थापनं कृत्वा तदुपरि तत्त्वायामि वरुणं संपूज्य तत्र कलशे समुद्रनद्याद्या
वाहनं कुर्यात्॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥ आयांतु यजमानस्य दुरितक्षयकारकाः॥ ततः
कलशाभिमंत्रणं कलशस्य मुखे विष्णुः०॥ समाश्रिताः॥ ततः कलशप्रार्थना॥ देवदानवसंवादे मथ्यमाने म
होदधौ॥ उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः॥ त्वयि ति
ष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः॥ आदित्या वसवो रुद्रा वि
श्वेदेवाः सपैतृकाः॥ त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव॥
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा॥ ततः आचार्योन्वाधानं कुर्यात्॥ तत्र प्रधानकीर्तने विशेषः॥ सूर्यं
सोमं भौमं बुधं बृहस्पतिं शुक्रं शनिं राहुं केतुं एता देवताः एतत्संख्याकाभिः अर्कादिजातीयसमिदा
हुतिभिः तावतीभिश्चर्वाहुतिभि राज्याहुतिभिश्च एतदिष्टेतत्स्थाने अष्टोत्तरशतं अष्टाविंशतिं वा कीर्तयेत्
॥ ईश्वरमुमां स्कंदं नारायणं ब्रह्माणं इंद्रं यमं कालं चित्रगुप्तमग्निमपो भूमिं विष्णुमिंद्रमिंद्राणीं प्रजापतिं सर्पा २२
न् ब्रह्माणमेताः देवताः तत्तत्संख्याकाभिः समिदाद्याहुतिभिः अत्र एतदिष्टस्य स्थाने पूर्वसंख्यान्यूनां अष्टावि

+ कर्तव्यामंत्रणं तस्य च स्वप्रतिदेवतमिति पाजकल्पाद्वचनाद्ग्रहार्थं गृहासिद्धान्नचरुर्ग्राह्य इति केचन गृह्यकारोदनमुद्धरन्ग्रहानुद्दिश्यानुकृतिः तत्र शिष्टाचार+
+ एव प्रमाणमिति मार्हणं॥ तत्रायं प्रयोगः सू[illegible] यत्सोमायानुष्ठेति निर्वपामीति चतुरो मुष्टीन्निरूप्य वर्षों मायं मंगलाय इत्यादिवन्कारेण ग्रहेभ्यश्च चतुरो मुष्टीन्निरूप्य इत+
+ रासीदेवतानां कृते देवेभ्यो जुष्टं निर्वपामीति चतुरो मुष्टीन्निर्वपेत्॥ इत्यपि तत्रैवेति दिक्॥ + ६
शतिसंख्यामष्टसंख्यां कीर्तयेत्॥ विनायकं दुर्गां वायुमाकाशमश्विनौ वास्तोष्पतिं क्षेत्रपालमिंद्रमग्निं यम
निर्ऋतिं वरुणं वायुं सोममीशानमेता देवताः एतत्संख्याकाभिः समिदाद्याहुतिभिः एतदिष्टस्य स्थाने अष्टसं
ख्यां चतुःसंख्यां वा कीर्तयेत्॥ भुवनेश्वरीं अष्टोत्तरसहस्रसंख्याकाभिर्दूर्वाहुतिभिः तिलमिश्रगव्याज्यमाहुति
भिः पायसाहुतिभिराज्याहुतिभिश्च तावतीनामसंज्ञवे अष्टोत्तरशतं वा॥ भुवनेश्वरीमित्येतस्थाने सवि
तारमिति वा॥ इंद्राणीमिंद्रं च एतत्संख्याभिर्दूर्वादिचतुर्विधाहुतिः अत्र एतदिष्टस्य स्थाने पूर्वसंख्यान्यू
नसंख्यां कीर्तयेत्॥ देवताद्वयमुद्दिश्य नान्वाधानं वा॥ शेषेण स्विष्टकृ० दि॥ ततः यात्रासानिकाले स्थाली
द्वयं प्रोक्षणी दर्वी स्रुवमित्यादि॥ युगपदनेककर्तृकाज्यहोमप्रसक्तौ अनेकस्रुवासादनं कार्यं॥ नि
र्वापकाले भुवनेश्वर्यादिदेवतात्रयमुद्दिश्य तूष्णीं निर्वापप्रोक्षणे॥ ततः आज्यसंस्कारः॥ आज्येन सहपा
यसादिहविस्त्रयस्य ग्रहहोमार्थगृहसिद्धान्नस्य च पर्यग्निकरणं॥ दर्वीस्रुवसंमार्गते ग्रहासिद्धान्नमासादि
तस्थाल्यामादाय आज्यावेक्षित्याभिघारणादि बर्हिष्यासादनांतं कुर्यात्॥ ततः पायसमभिघार्य तस्य
बर्हिष्यासादनांतं कुर्यात्॥ अर्कादिसमिधः दूर्वा तिलमिश्रगोघृतं माश्च तत्रैव आसाद्य अस्य चनादिका
उपनागांते॥ यजमानोन्वाधानानुसारेण एतत्संख्याहुतिपर्याप्तं अर्कादिजातीयसमिध बीज्याप्तं कंदवि
स्त्रयं सूर्याय सोमाय नेमम सद्वं त्यागपूर्वकं तदंगदेवताभ्यो पितृभ्यः एतत्संख्याकाहुतिपर्याप्तं दूर्वादिद
विश्चतुष्टयं भुवनेश्वर्यै न ममेति त्यजेत्॥ तथा इंद्राण्यै इंद्राय इमे च भुवनेश्वर्यादित्यस्य स्थाने सवित्र इति

Indira Gandhi National
Centre for the Arts

वा॥इंद्राग्नीइत्योर्होमाभावपक्षेनतद्दुद्देश्यकत्यागः॥एवंत्यागेकृतेसर्त्विगाचार्योक्तादिसमिधोदधिमधुघृताः
२३ चर्वादुतीश्चसंकल्पानुसारिसंख्याकाजुहुयात्॥तांहशसंख्यांएवदूर्वा दिहविश्चतुष्टयादुतीर्जुहुया
त्॥तत्रदधिमधुघृताक्ताभिस्तिस्रभिर्दूर्वाभिरेकैकाहुतिः कार्या॥तन्नूनसंकल्पानुसारिसंख्याचतु
र्विधाहुतीरिंद्राग्नीइमंत्राभ्यांतद्धोमपक्षेहुत्वास्विष्टकृदादिप्रायश्चित्तहोमांतंकृत्वादिक्पालादिभ्यः
सदीपःमाषभक्तबलिंसंकल्प्यजमानद्वारा कारयेत्॥सपत्नीकोयजमानःप्रतिबलिसंकल्पमादा
तजलंत्यजेत्॥तद्यथा॥अन्यायतनस्यसमंताद्दिक्षुमाषभक्तबलीदिक्पालेभ्योदद्यात्॥त्रातारमि
द्रंगर्गइंद्रस्त्रिष्टुप्॥इंद्रप्रीत्यर्थेबलि॰त्रातारमिंद्र॰॥इंद्रायसांगायसपरिवारायसायुधायसशक्तिकाय
एषमाषभक्तबलिर्नमम॥भोइंद्रदिशांरक्षबलिंभुंक्ष्वममयजमानस्यसकुटुंबस्यायुःकर्त्ताक्षेमकर्त्ताशां
तिकर्त्तातुष्टिकर्त्तापुष्टिकर्त्ता॰भवेतिपुष्पाक्षतजलानिपूर्वाभिमुखस्त्यजेत्॥अग्निंकाण्वोमेधातिथिर
ग्निर्गायत्री॥अग्निप्री॰अग्निंदूतंवृणीमहे॰अग्नये॰यमायसोमंयमोयमोनुष्टुप्॥यमायसोमं॰यमाय॰मो
घुणोघोरःकण्वोनिर्ऋतिर्गायत्रीमोषुणःपरापरा॰निर्ऋतये॥तत्वायामित्रुनःशेपोवरुणस्त्रिष्टुप्॥तत्वा
यामिब्रह्मणा॰वरुणाय॥तववायोव्यश्वांगिरसोवायुर्गायत्री॥तववायोःवायवे॰सोमोधेनुंगोतमःसोमस्त्रि
ष्टुप्॥सोमोधेनु॰सोमाय॰तमीशानंगोतमईशानोजगती॥तमीशानं॰ईशानाय॰ततोग्रहबलयोदेयाः॥त २३
त्रपूर्वं॥आकृष्णेनहिरण्यस्तूपःसवितात्रिष्टुप्॥आकृष्णेनरजसा॰आदित्यायसांगायसपरिवारायईश्वरा

ग्निरूपाधिदेवताप्रत्यधिदेवतासहितायइमंसदीपंमाषभक्तबलिंसमर्पयामीतिपुष्पांजलिंक्षिपेत्॥भोआ
दित्यइमंबलिंगृहाणममयजमानस्य॰आप्यायस्वगोतमःसोमोगायत्रीआप्यायस्व॰सोमाय॰उमारूपा
धिदेवताप्रत्यधिदेवताहितायेत्यादि॥अग्निर्मूर्द्धाविरूपोंगारकोगायत्री॥अग्निर्मूर्धादिवः॰भौमायस्कंद
भूमिरूपाधिदेवताप्रत्यधिदेवतासहितायेत्यादि॥उद्बुध्यध्वंबुधःसोम्योबुधस्त्रिष्टुप्॥उद्बुध्यध्वं॰बुधाय
नारायणविष्णुरूपाधिदेवतासहितायेत्यादि॥उद्बुध्यध्वं बृहस्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप्॥बृहस्पतेअति
बृहस्पतये॰ब्रह्मेंद्ररूपाधिदेवतासहितायेत्यादि॥शुक्रःपाराशरःशुक्रोद्विपदाविराट्छंदःशुक्र॰शुक्रोउशनसो
रःशुक्रायेंद्राणीरूपाधिदेवतासहितायेत्यादि॥शमग्निरिरिंबिठिःशनिरुष्णिक्॥शमग्निरग्निभिः॥श
नैश्चरायप्रजापतिरूपाधिदेवतासहितायेत्यादि॥कयानोवामदेवोराहुर्गायत्री॥कयानश्चित्रआ
भुवत्॥राहवेकालसर्परूपाधिदेवताप्रत्यधिदेवतासहितायेत्यादि॥केतुंमधुच्छंदाःकेतुर्गायत्री॥के
तुंकृण्वन्॥केतवेचित्रगुप्तब्रह्मरूपाधिदेवताप्रत्यधिदेवतासहितायेत्यादि॥गणानांत्वागृत्समदोगण
पतिर्जगती॥गणानांत्वा॰गणपतयेसांगायसपरिवारायऋद्धिबुद्धिसहितायेत्यादि॥जातवेदसेकश्यपोदुर्गात्रि
ष्टुप्॥जातवेदसे॥दुर्गायैसांगायैसपरिवारायैसायुधायैसशक्तिकायैइमंबलिं॥भोदुर्गेममयजमानस्यआयुः
कर्त्रीक्षेमकर्त्रीशांतिकर्त्रीपुष्टिकर्त्रीतुष्टिकर्त्रीऋद्धिकर्त्रीभव॥तववायोव्यश्वांगिरसोवायुर्गायत्री॥त
ववायंबृहस्पते॰वायवइत्यादि॥आदिद्वत्सआकाशोगायत्री॥आदिप्रत्नस्य॰॥आकाशेत्यादि॥एवोउषाः

Indira Gandhi National Centre for the Arts

२४ त्रस्कएवो अश्विनौगायत्री॥ एषोउषा॰ अश्विभ्यां साङ्गाभ्यां सपरिवाराभ्यां सायुधाभ्यां सशक्तिभ्यां एष माष
भक्तबलिर्नमम॥ भो अश्विनौ भो गृह्णीतं॰ आयुः कर्त्तारौ भवतं॥ वास्तोष्पते वसिष्ठो वास्तोष्पतिस्त्रिष्टुप्
॥ वास्तोष्पत इत्यादि॥ ततो गायत्र्यो विश्वामित्रो भुवनेश्वरी गायत्री॥ सविता गायत्रीति वा॥ भुवनेश्वर्या इत्या
दि॥ सवित्र इत्यादि वा॥ तत इन्द्राणी इ मंत्राभ्यां क्रमेण तु कुम्भयोर्द्देशे न बलीन्दत्वा क्षेत्रपालाय बलिं दद्यात्
॥ क्षेत्रस्य वामदेवः क्षेत्रपालोनुष्टुप् क्षेत्रस्यपतिं वा॰ क्षेत्रपालाय भूतप्रेतपिशाचराक्षसशाकिनीवेतालपरि
वायुताय इममित्यादि॥ ततः शूद्रादिना तद्बलिनयने कृते शांता पृथिवीति भुवं प्रोक्ष्य यजमान आचार्यः
प्रक्षालितपाणिपाद आचांतः स्रुविद्वादशगृहीतं चतुर्गृहीतं वा आज्यमादाय तदुपरि वस्त्रयुतं चंदनादि
भूषितं फलं निधाय यजमान तदमात्यान्वारब्धास्तिष्ठन्पूर्णाहुतिं जुहुयात्॥ समुद्रादूर्मिरिति सूक्तस्य गौ
तमो वामदेवोग्निस्त्रिष्टुप्॥ पूर्णाहुतिहोमे वि॰ समुद्रादूर्मि॰ सूक्तांते स्वाहा॥ अग्नय इदं॥ ततः पूर्णपात्रनिन
यनं कृत्वा साचार्यो यजमानः संस्थाप्य जनोपस्थाय परिस्तरणविमोकादि पर्युक्षणांतं कुर्यात्॥ ततो घृ
तनवकंचुकीवस्त्रया वामभागस्थया पत्न्या सहितं प्राङ्मुखं यजमानं सर्त्विगुदङ्मुख आचार्यः स्थापितकलशच
तुष्टयाद्भिः पात्रांतरे गृहीताभिः तत्रत्य पंचपल्लवैः सकुशदूर्वैरभिषिंचेत्॥ आपोहिष्ठेति नवर्चा मंत्र ॰ रीषः सिंधुद्वी ॥२४
प आपो गायत्र्यो द्वेनुष्टुभौ॥ पंचमी वर्द्धमाना सप्तमी प्रतिष्ठा॥ अभिषेके वि॰ ओं आपोहिष्ठा॰ इन्द्रो अंगेति तृचस्य गृत्स
मद इन्द्रो गायत्री॥ अभिषेके वि॰॥ इन्द्रो अंग महद्भयं॰ विचर्षणिः॰ त्रिभिष्ट्वं देवेति सप्तर्चस्य सूक्तस्य वसिष्ठ ऋषिः

॥ आद्यानां तिसृणामग्निः चतुर्णां विश्वेदेवा आद्या गायत्री द्वितीयानुष्टुप् प्रतिस्रो गायत्र्यो अंत्ये द्वेनुष्टुभौ॥ अभिषेके
वि॰॥ ओं त्रिभिष्ट्वं देवं झीरं सर्पिर्मधुदकं॥ उभयंशृणवच्चन इति भर्गो इन्द्रो बृहती॥ उभयंशृणवच्चन आगमत्
॥ स्वस्तिदा विशो भारद्वाजः शास इंद्रोनुष्टुप्॥ स्वस्तिदा विशस्पतिः अभयंकरः॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्॥
त्र्यंबकं॰ जातवेदसे कश्यपो दुर्गा त्रिष्टुप्॥ जातवेदसे॰ समुद्रज्येष्ठा इति चतसृणां वसिष्ठ आपस्त्रिष्टुप्॥ आयं
तामिति तिसृणां सप्तऋषय आपो अनुष्टुप् समुद्रज्येष्ठाः॰ ४ आयंतामिद देवाः॰ इमा आप इति तिसृणां सप्त
ऋषय आपो अनुष्टुप्॥ अभिषेके॰ इमा आपः शिवतमा॰ देवस्य त्वा॰ हस्ताभ्यां॰ सरस्वत्यै भैषज्येन वीर्याया
न्नाद्यायाभिषिंचामि अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिंचामि देवस्य त्वा इंद्रस्येंद्रियेणश्रियै यशसे
बलायाभि॰ तमीशानं गौतम ईशानो जगती अभिषेके॰ त्वमग्ने रुद्रो॰॥ भुत्मना॥ तमुष्टुहीति आंगिरसास्ति
रश्मी रुद्रस्त्रिष्टुप्॥ अभिषेके॰ तमुष्टुहि यः स्विषुः॥ दुवस्य॥ भुवनस्यपितरं अराजिश्वा रुद्रस्त्रिष्टुप्॥ अभि॰
भुवनस्यपितरं॰॥ या ते रुद्र इति कश्यपो रुद्रः स्वराडनुष्टुप्॥ या ते रुद्र शिवा तनूः शिवा विश्वाह॰ जीवसे
॥ यज्जाग्रत इति षण्णां प्रजापतिर्मनस्त्रिष्टुप्॥ अभि॰ यज्जाग्रतो॰ येन कर्मा॰ यत्प्रज्ञान॰ येनेदं भूतं॰ यस्मिन्नृचः॰
सुषारथि॰ शिवसंकल्पमस्तु॥ इंद्र त्वा वृषभमिति पंचानां विश्वामित्र इंद्रो गायत्री॥ इंद्र त्वा वृषभं वयं॥ सु
रास्त्वामभिषिंचंत्वित्यादि पुराणमंत्रः॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगन्नाथ॰ तथा संक
र्षणो विभु॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखंडलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा॥ वरुणः पव

Indira Gandhi National Centre for the Arts

२५ नश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा ॥ २ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया
मतिः बुद्धिर्लज्जा वपुः शांतिः कांतिस्तुष्टिश्च मातरः ॥ ४ ॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः ॥ आदित्यश्चंद्रमा भौमो
बुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचंतु राहुकेतुश्च तर्पिताः ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो
गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औ
षधानि च रत्नानि कालस्यावयवाश्च ये ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिंचंतु सर्वकामार्थ
सिद्धये इति ॥ तच्छंयोरावृणीमहे ॥ ततः कलशोदके नान्येन च जलेन तैलाभ्यंग सर्वौषधानुलेपनपूर्वकं सुस्नातौ
दंपती अभिषेककालीनवासांसि परित्यज्यैवाहतशुक्लवासांसि परिधाय श्वेतचंदनपुष्पधारणं कुर्यातां ॥
त्यक्तवासांस्याचार्यस्य ॥ अग्नेः पश्चादुपविशतः दक्षिणतः पत्नी ॥ ततो विभूतिधारणं कृत्वाचार्यादीनां चरणक्षा
लनगंधाक्षतैः पूजनं कृत्वाचार्याय धेनुं दद्यात् ॥ तदभावे उक्तनिष्क्रयं ॥ रुद्रजापिने अनड्वाहं सदक्षिणं उक्तनिष्क्र
यं वा ॥ ऋत्विग्भ्यो यथाशक्ति हेमतन्निष्क्रयं वा दद्यात् ॥ ततो भुवनेश्वर्यादीनां वरुणस्य चाचार्येणोत्तरपूजने कृते
तद्धस्ते नैवोक्तिष्टब्राह्मणस्य तदुत्थाद्विविसर्जने जाते सोपस्कारप्रतिमाः तद्धस्ते प्रतिपाद्याग्निपूजां ते गच्छेत्यग्नि
विसर्ज्य कर्मांगदेवताप्रीत्यर्थं ब्राह्मणभोजनं संकल्प्य भूयसीदक्षिणां च संकल्प्य शांतिसूक्तं पाठं कारयि ॥२५
त्वा कर्म पूर्णमस्त्विति वाचयित्वा परमेश्वरार्पणं कुर्यात् ॥ ॥ इति श्रीमदनंतदेवीये संस्कारकौस्तुभे रजो
दर्शनशांतिः ॥ अयं शौनकोक्तप्रकारो बह्वृचानां ॥ अन्येषां प्रकारांतरं मदनरत्ने ऋषिपुत्रसंहितायां ॥ अथ

मार्त्तवदोषाणां शांतिं कुर्यादनंतरं ॥ तिथिनक्षत्रवारादिदेवानां पूजनं पृथक् ॥ शांतिस्थस्थले प्रकुर्वीत निशि
नादेवनिर्मिते ॥ उद्याने वा नदीतीरे तटाके वाथ चत्वरे ॥ मंडलं कारयेत्तत्र गोमयेनाष्टहस्तकं ॥ स्थंडिलं का
रयेत्तत्र चतुराढकशालिभिः ॥ आढकं तंडुलं चैव आढकौ तिलमाषकौ ॥ उपर्युपरि संस्तीर्णं तन्मध्ये नलिनं
लिखेत् ॥ दर्भैराच्छाद्य तन्मध्ये कर्णिकायां न्यसेद्घटं ॥ ससूत्रं सपिधानं च सकूर्चं वस्त्रवेष्टितं ॥ पुण्योदके
नसंपूर्णमौषधादिसमन्वितं ॥ सहदेव्येकपत्रा च विष्णुक्रांता सनाडिका ॥ विल्वपत्रं सदैतानि चूर्णयित्वा न्य
सेद्घटे ॥ कुष्ठमांसी हरिद्रे द्वे मुराशैलेयचंदनं ॥ वचाचोरमुस्ताख्याः सर्वौषध्यः प्रकीर्त्तिताः ॥ गजाश्वरथ्या
वल्मीकसंगमाद्ध्रदगोकुलात् ॥ राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥ पंचगव्यं च कुमुदं तथाश्वत्थ कूफल
निच ॥ वज्रवैडूर्यमाणिक्यविद्रुमाणि विनिक्षिपेत् ॥ एवं कुंभं समासाद्य गंधपुष्पादिभिः शुभैः ॥ अनुष्ठान
परो विप्रः प्राङ्मुखो वाप्युदङ्मुखः ॥ आसीनः सुप्रसन्नात्मा प्राणसंयमनान्वितः ॥ सावित्रीं च जपेत् कुंभं स्पृष्ट्वा
न्दशशतं द्विजः ॥ एवं प्रदोषकाले तु कारयेदपरेहनि ॥ उदये समनुप्राप्ते स्नातां गंधाद्यलंकृतां ॥ स्नापयेद्वं
तिमन्विच्छन् पूर्वीदक् प्राङ्मुखां स्थितां ॥ अधिवासितकुंभस्य तोयेश्चापि समंत्रकं ॥ पश्चाच्छुद्धोदकेनैव स्नात्वं
दैवं प्रणम्य च ॥ स्वगृह्योक्तविधानेन होमं कुर्यात्प्रयत्नतः ॥ दूर्वाज्येन तिलैर्हुत्वा सावित्र्या चैव मंत्रतः ॥ अष्टो
त्तरसहस्रं वा शतमष्टाधिकं तथा ॥ तत्संख्या त्रिविधा हुत्वा दूर्वाज्येन तिलैः समं ॥ ब्राह्मणान्भोजयित्वा तु दैव
ज्ञं पूजयेत्ततः ॥ अनेन विधिना नारी सर्वदोषात्प्रमुच्यते इति ॥ अनंतरं चतुर्थदिवसे ॥ यदा तिथ्यादीनां प्रश

Indira Gandhi National Centre for the Arts

स्तावदवो दुष्टाश्चाल्पास्तदा चतुर्थदिवसे शांतिकर्म विधाय प्रशस्तकाले संगमं कुर्यादित्युपन्यस्य मदनरत्ने
२६ उक्तं शांत्यपन्यासात्॥ अथ कृ शांतः पूर्वं दैवनिर्मितिं अकृत्रिमे॥ तटाके तत्समीपे उक्तपरिमाणोश्चतुर्भिर्द्रव्यै
रुपर्युपरिसंस्तीर्णस्थंडिलं कृत्वा मध्ये कमलं लिखेत्॥ अग्नेरित्यंते अर्चयेत्कुंभे वरुणमिति शेषः॥ जपार्थं ब्रा
ह्मणवरणं सूचयन्नाह अनुष्ठानेति॥ स्नापयेत्स एव ब्राह्मणाः॥ यजमानं प्रत्याह स्नात्वेति॥ देवं वरुणं॥ होमे संनि
तादेवता॥ ॥ इति मदनं तदेवीयसंस्कारर कौस्तुभे मदनरत्नोक्कारजोदर्शनशांतिः॥ अथ बौधायनोक्तारजोद
र्शनशांतिः॥ अथ बोधायनोक्तारजोदर्शनशांतिः॥ ऋतुशांतिं व्याख्यास्यामः॥ तिथिवारनक्षत्रलग्नदोषशांत्यर्थं द्वि
पंचमे द्विवा शांतिस्नानं प्रकुर्वीत देवालये वा देवाग्रस्थाष्टभिर्धान्यैस्तद्धैस्तंडुलैस्तदर्धैस्तिलैस्थारत्निमात्रं च
तुरस्रं कृत्वा मध्ये नालिनमुल्लिख्य कुशैर्दुर्वाभिः प्रतिष्ठापतास्मिंस्तत्तु वेष्टितं कुंभं निधाय आपो हि ष्ठा वा इदं॥ ओं सर्व
मित्येतेनानुवाकेनाक्षिण्णं निश्च कुंभमुदकैः पूरयित्वा कूर्चमंतर्धाय पंचपल्लवान् पंचत्वचश्च निःक्षिप्य कपि
त्थाश्वत्थपालाशबिल्वोदुंबरं च नवरत्नं च निक्षिप्य नववस्त्रयुग्मेनाच्छाद्य नारिकेलफलेनापिधाय विल्वप
त्रैर्वैश्चाव कीर्य पुरुषं पुंडरीकाक्षं ध्यात्वा गंधधूपदीपैः उदकुंभमभ्यर्च्य श्रोत्रियांश्च वृद्धश्रुतान् षडष्ट चतुरो
वा ब्राह्मणान्वरणपूर्वमभ्यर्च्याचार्यं च तत्कुंभमन्वारभ्य वैष्णवीं गायत्रीं सहस्राष्टकशताष्टकं वा तदंगं गायत्रीं च
वेदादीनापो हि ष्ठा मयोभुव इति तिस्रो हिरण्यवर्णाः शुचयः पावका इत्येतमनुवाकं पवमानः सुवर्जन इत्येतमनु २६
वाकं पुरुषसूक्तमित्येतमनुवाकमृचां प्राचीमित्येतमनुवाकमथालंकृतां पत्नीं गुरुविष्टरे तण आसीनामापो

हि ष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्जन इत्येतेनानुवाकेन प्रत्यृ
चमाशीर्वादपुरःसरं स्नापयेयुस्ततो नारीं पंचगव्यं प्राशयित्वा यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके॥ प्राशनात्पं
चगव्यस्य दहत्वग्निरिवेंधनमिति॥ शुचौ समे देशे स्थंडिलं कल्पयित्वा लौकिकाग्निं प्रतिष्ठाप्य स्वगृह्योक्तविधानेना
ग्निमुखं कृत्वा विष्णुसूक्तेन शताष्टकसंख्याः पलाशसमिधो हुत्वा ब्रह्मसूक्तेनान्नं रुद्रसूक्तेनाज्यं तेषामष्टादश
कृत्वोथायुष्यहोमो घृतसूक्तेनाज्येन हुत्वा ततो नक्षत्रहोमं तत्तन्मंत्रेण तस्य चतुर्दशकृत्वः पूर्वं तत्समिदन्नाज्यैस्त्र्य
म्बकं यजामह इति तिलहोमं शताष्टकाहुतीरुपजुहुयात्स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानादथ दक्षिणां द
द्यादाचार्याय विशेषतः॥ ततः पुण्याहवाचनं कृत्वा ततो नारी दोषात् प्रमुच्यते त्याह भगवान् बौधायनः॥ विष्णु
सूक्तं विष्णोर्नुकं तदस्य प्रियं प्रतद्विष्णुः॥ परो मात्रया॥ विचक्रमे त्रिर्देव इति॥ ब्रह्मसूक्तं ब्रह्मजज्ञानमिति ष
ट्॥ रुद्रसूक्तं॥ परिणो रुद्रस्य हेतिः स्तुहि श्रुतमिति॥ मीढुष्टम॥ अर्हं बिभर्षि त्वमग्ने रुद्रो॥ आ वो राजानमिति
षड्विंशतमष्टकं च शताष्टके अष्टोत्तरशतामित्यर्थः॥ एतत्पूरणार्थमेवैकेकस्य षड्वस्याष्टादशावृत्त्यो विधी
यते॥ घृतसूक्तं॥ यो ब्रह्मा ब्रह्मण उज्जभार प्राणैश्वरः कृत्तिवासाः पिनाकी॥ ईशानो देवः स न आयुर्दधातु तस्मै जु
होमि हविषा घृतेन स्वाहा॥ इदं ब्रह्मणे॥ विभ्राजमानः सरिरस्य मध्याद्रोचमानो घर्मरुचिर्य आगात्॥ मृत्यु
पाशापनुद्य घोरादिहायुषेणो घृतमत्तु देवः स्वाहा इदं देवाय॥ ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भं यमादधात्पुरुरूपं जं
यंतं॥ सुवर्णरंभग्रहमर्कमर्चं तमायुषे वर्धयामो घृतेन स्वाहा॥ इदं अर्काय श्रियलक्ष्मीमौपलामंबिकां गांषष्ठीं

Indira Gandhi National
Centre for the Arts

जयामिंद्रसेनेत्कदाद:॥ तांविद्यांब्रह्मयोनिंसरूपामिहायुषेत्वर्पयामोघृतेनस्वाहा॥ इदंविद्यायै॥ दाक्षायणा: सर्व
योन्य: सयोन्य: सहस्रशोबहुरूपा: ससूनव: सपतय: सयूथ्या आयुषेणोघृतमिदंजुषेतांस्वाहा॥ इदंदाक्षायण
२० भ्य:॥ दिव्यागणाबहुरूपा: पुराणा आयु:छिदो न: प्रवधयतुवीरान्॥ तेभ्योजुहोमिबहुधाघृतेनमामान: प्रजारीतिवे
मोतवीरान्स्वाहा॥ इदंदिव्यगणेभ्य:॥ एक: पुरस्ताघइदंबभूवयतोबभूवभुवनस्यगोपा:॥ यमप्येतिभुव
नंसंसांपरायेसनोहविर्घृतमिहायुषेत्तुदेव: स्वाहा॥ इदंदेवाय॥ वसून्रुद्रानादित्यान्मरुतोथसाध्यान्नृभून्य
क्षानांधर्वांश्चपितृंश्चविश्वान्॥ भृगून्सर्पांश्चांगिरसोथसर्वान्घृतंहुत्वास्वायुष्यामहयामशश्वत्स्वाहा॥ इदं
वस्वादिभ्य:॥ ॥ इतिघृतसूक्तं॥ इत्यनंतदेवीयसंस्कारकौस्तुभेबोधायनोक्तप्रकारेणरजोदर्शनशांति:॥
॥ अथगर्भाधानं॥ कश्यप:॥ षष्ठ्यष्टमीपंचदशीचतुर्थी: चतुर्दशीमप्युभयत्रहित्वा॥ शेषा: शुभा: स्युस्तिथ
योनिषेकेवारा: शशांकार्यसितेंदुजानामिति॥ आर्यो गुरु:॥ सित: शुक्र:॥ इंदुजोबुध:॥ वसिष्ठ:॥ उपप्लवेवैधृ
तिपातयोश्चविष्ट्यांदिवापारिघपूर्वभागे॥ संध्यासुपर्वस्वपिमातृपित्रोर्मृतेऽह्निपत्नीगमनंचवर्ज्यमिति॥ तस्मि
न्ऋतौपर्वणिव्याश्वत्स्थोराश्रीर्वर्जयित्वायुग्मासुसमासुषष्ठीप्रभृतिषुगच्छेत्पुत्रार्थी॥ अयुग्मासुस्त्रीजन्मनयादगम
नंनतुप्रतिषेधात्॥ युग्मास्वपिरात्रावेवोपगमनं नऽहनितथाचाथर्वणीश्रुति:॥ प्राणंवाएतेप्रस्कंदंतियेदिवारत्यासं
युज्यंतेब्रह्मचर्य्यमेवतद्यद्रात्रौरत्यासंयुज्यंतइति॥ शंखलिखितावपिनार्त्तवेदिवामैथुनंव्रजेदिति· पर्ववर्जंव्रजेच्चैनामिति २७
मनु: पर्ववर्जमित्यनेननिषिद्धतिथिनक्षत्राण्युपलक्ष्यन्ते· निषिद्धपर्वचामावास्यापौर्णमासीच॥ तत्रस्त्रीगमनंशुल्क

निषिद्ध· नामावास्यायांपौर्णमास्यांच॥ स्त्रियमुपेयात्यद्युपेयान्निरिंद्रिय: स्यादिति· चतुर्दश्यष्टमीचैवअमावास्याचपू
र्णिमासर्वाण्येतानिराजेंद्ररविसंक्रा — — ॥ तैलस्त्रीमांससंभोगीचसर्वेष्वेतेषुवैपुमान्· विण्मूत्रभोजनंनामप्रयातिनरकंनृप
इतिविष्णुपुराणे· एवंगच्छेत्स्त्रियंक्षामामघामूलंचवर्जयेदिति· क्षामांलघ्वाहारादिनाकृशामित्यर्थ·॥ अतएवबृहस्पति:
स्त्रीपुंसयोराहारविशेषंसनिमित्तमाह:॥ स्त्रिया: शुक्रेऽधिकेस्त्रीस्यात्पुमान्पुंसोऽधिकेभवेत्· तस्माच्छुक्रविवृद्ध्यर्थंस्नि
ग्धंवृष्यंचभक्षयेत्· लघ्वाहारंस्त्रियंकुर्यादेवंसंजनयेत्सुतमिति·॥ यत्तुषोडशर्त्तुर्निशा: स्त्रीणां तस्मिन्युग्मासुसंविशेत्
॥ ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रश्चवर्जयेदित्येतद्व्याख्यावसरेमिताक्षराकारेणोक्तं ऋतौआद्यदिनेपिगच्छतोनब्रह्म
चर्यहानिरिति॥ तच्चोडशादिनेष्वुतादितरकालासंभवविषयं॥ पारिजाते॥ विष्णुप्रजेशरविमित्रसमीरपौष्णमूलोत्त
रावरुणभानिनिषेककाले॥ पूज्यानिपुष्यवसुशीतकराश्विचित्राआदित्यास्चमध्यमफलाविफला: स्युरन्य इति॥ विष्णु:
श्रवण:॥ प्रजेशोरोहिणी॥ रविर्हस्त:॥ मित्रोनुराधा॥ समीर: स्वाती॥ पौष्णं रेवती॥ उत्तरात्रयं॥ वरुण: शतभिष
क्॥ एतानिपूज्यानिवसुर्धनिष्ठा॥ शीतकरोमृग:॥ आदित्य: पुनर्वसु:॥ एतानिमध्यमानि॥ अन्यानिविफलानीत्य
र्थ:॥ विष्णुपुराणे॥ ऋतावुपगम: शस्त: स्वपत्न्यामवनीपते: पुन्नाम्न्यर्क्षेशुभेकालेज्येष्ठयुग्मासुरात्रिषुइति· ज्येष्ठा
सुचतासुरात्रिषु· ज्येष्ठ चउत्तरोत्तरलं·॥ आश्वलायन: गर्भाधानंद्विज: कुर्यात्ऋतौप्रथमएवहि· चतुर्थदिवसस्यू
र्ध्वंपुत्रार्थीदिवसेसमे· ऋक्षद्वारगणमयोक्षंदस्याग्नीचद्विदेवतं· श्राद्धाहश्चैवरिक्ताचहित्वान्यस्मिन्विधीयतइति॥ य
स्मिन्नृतौनवेद्गर्भस्तस्माद्यदशमंभवेत्॥ तत्रायत्यप्रजायेततस्मादेतआयंत्यजेत् इति॥ त्र्यंमघारेवतीज्येष्ठास्वा

Indira Gandhi National
Centre for the Arts

नि॥ आपस्तंबः॥ चतुर्थीप्रभृत्याषोडशीमुत्तरामुत्तरां युग्मां प्रजानिःश्रेयसमुपदिशंति॥ चतुर्थ्यां रात्रौ विधिनि
२८ वृत्तरजस्कायां॥ रात्राविति न केवलमल्पायुः किंत्वन्यदपि तदुक्तं लैंगे॥ कदाचित्जीवति चेत् विद्याहीनं व्रताभ्रष्टं
पतितं पारदारकं दारि— एवमन्नं च तनयं सा प्रसूयत इति॥ चतुर्थ्यां रात्रौ च स्याङ्गम्यते सा एवं प्रसूयत इत्यर्थः॥
व्यासः॥ रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः॥ पंचम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः॥ सप्तम्यामप्रजा
योषिदष्टम्यामीश्वरः सुतः॥ नवम्यां सुभगा नारी दशम्यां चतुरः पुमान्॥ एकादश्यामधर्मा स्त्री द्वादश्यां पुरु
षोत्तमः॥ त्रयोदश्यां सुजा तस्य वर्णसंकरकारिणी॥ धर्मज्ञश्च कृतज्ञश्च आत्मवेदी दृढव्रतः॥ प्रजायते चतुर्दश्यां
गुणोश्च जगतीपतिः॥ राजपत्नी महाभागा राजवंशगता तथा॥ जायते पंचदश्यां तु बहुपुत्रा पतिव्रता॥ विद्या
लक्षणसंपूर्णः सत्यवादी जितेंद्रियः॥ आश्रयः सर्वभूतानां षोडश्यां जायते पुमानिति॥ आश्वलायनः॥ दीक्षि
स्तु महायज्ञैः पित्रोः श्राग्वत्सराद्द्विजः॥ नेयाज्ञार्याप्रयत्नेन कृतावप्यर्थितावुधः॥ आयजीदश नात्पत्नीनया कृत्वा
पतत्यधः व्यर्थीकारेण शुक्रस्य ब्रह्महत्यामवाप्नुयादिति॥ महाभारते॥ ऋतौ गच्छति यो भार्यामनृतौ नैव गच्छ
ति॥ यावज्जीवं ब्रह्मचारी मुनिभिः परिकीर्तितः॥ तथा॥ ऋतुस्नातां तु यो भार्यां सन्निधौ नैव गच्छति॥ घोरायां भ्रूण
हत्यायां युज्यते नात्र संशय इति॥ अस्य वचनस्य जायमानो वै ब्राह्मणस्त्रिभिः ऋणवा जायते यज्ञेन देवेभ्यः प्र
जया पितृभ्यो ब्रह्मचर्येण ऋषिभ्य इति श्रुतिमूलत्वेनोपपन्नेः॥ ऋत्वंतरकल्पनाया आत्यप्यत्वा दज्ञातपुत्रं प्रत्ये २८
व नियमः॥ तथा च मनुः॥ ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः॥ पितृणामनृणश्चैव स तस्मात्सर्वमर्हति॥ यस्मि

न्नृणं संनयति येन चानंत्यमश्नुते॥ स एव धर्मजः पुत्रः कामजानितरान्विदुः इति केचित्॥ अन्ये तु ऋतौ निमित्त
त्वात्प्रतिनिमित्तं नैमित्तिकावृत्तिर्हि विहिता॥ स्मरंति च॥ एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेदितीत्याहुः॥ व्यासः
वृद्धां वंध्यामसद्वृत्तां मृतापत्यामपुष्पिणीं॥ कन्यां सं बहुपुत्रां च वर्जयेन्मुच्यते भयादिति॥ वृद्धासरजस्कापि गर्भ
धारणादावशंक्या न तु गतरजस्का॥ अपुष्पिणीमित्यस्य पौनरुक्त्यापत्तेः॥ अस्यापवादः बौधायनसूत्रानुयायि
पद्धतिकर्त्रा विश्वमंगेनोक्तः॥ त्रिरात्रं व्रतं चरेदित्युपक्रम्य व्रतसमाप्तौ अस्तमिते आदित्ये अन्योन्यमलंकृत्याप आ
चम्यवाप्यतो शय्यां गच्छत इत्युक्तं॥ व्रतमध्येपि सहशयनमुक्तं गोभिलेन॥ एतत्प्रभृति त्रिरात्रमेकरात्रं वा क्षारालवणाशि
नौ ब्रह्मचारिणौ भूमौ सह शयीतामिति॥ अस्मिन् सूत्रे शय्यैक्यापुनरपि मैथुनं प्रयत्नतो वर्ज्यमिति ब्रह्मचारिणा विनि
क्वचन॥ एतत्प्रभृति दिरिवाहप्रभृति इत्यर्थः॥ आश्वलायनोपि अतऊर्ध्वमक्षारालवणाशिनौ ब्रह्मचारिणौ वधःशायि
नौ स्यातां त्रिरात्रं द्वादशरात्रं संवत्सरं वैक ऋषिर्जायत इति चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यादिति॥ व्रतानंतरं सूर्यावि
दे वध्वा॥ उपयमनकाले परिहितं वस्त्रं दपरिहितं वस्त्रं दद्यादिति तृ— वंविद्भिः श्रीमत्प्रयोगरत्नकारैरपि अथ विपा
होत्तरं दंपत्योर्गृहप्रवेशादिनादारभ्य— पक्रम्य ततः शुभेह्नि स्वस्त्यादि वाचयित्वा स्वलंकृतः स्वलंकृतां वधूमुपगच्छेतरा
नाविस्युक्तं॥ धर्मप्रवृत्तौ नारायणभट्टैस्तु— तुभार्यातेत्रयंगादिकं चरेत्॥ अनर्तुमसी भार्यायातु संगमिति केचनेति॥ अत्रके
चनेसु ह्यानगतं न्यमिति निषेधाभावः सूचितः॥ काह्निकायामपि॥ स्वस्त्यादि वाचापि दोषस्त्रियं तामुपगच्छति सुमुहूर्ते शोभने तस्याश्री
— नस्याद्यथा तथेति— व्याताचेयं कारिकाप्यान्नि॥ व्रतसमाप्तिनंतरं मुहूर्ते ब्राह्मणैः स्वस्त्यादि वाचयित्वाग्निमेव वधूपगछे

Indira Gandhi National
Centre for the Arts

शांतिः

शांतिकर्मविधानेन कृत्वान्यस्मिन्शुभे दिने गर्भाधानं॥ ततः कु+ + साध्वी गर्भाधानाद्विविहितैक+ + तस्मिन्नेव दिने रात्रौ गर्भाधानमाभि
र्यात् इत्याचार्योक्तेर्वचः अहत्वा शांतिकं कर्म न कुर्यात्+ + र्भयोग्येत्यर्थ इति माधवः+४ + प्रेत इत्याश्वलायनः+७
धर्मसाधने सर्वेषां शांतिनामैवं विधिरेष प्रदृ इति+८

ति स्पर्शादि संभरीकरोति यथार्थं न महोत्साहस्य ललानचरेत् सुंदरवेषेण रथेनाहितालंकारवस्त्रादिदानेन प्रीतिमु
त्पाद्य लज्जामपनीय परस्पराधिमतं विषयभोगमनुसरति इति विवाहप्रकरणोक्ता त्यायनः॥ त्रिरात्रमसाराल्लवणाशि

२६ नौ स्यात्॥ अधःशायी

॥अथ गर्भाधानहोमः

॥परिशिष्टे॥ अथर्तुमत्याः प्राजापत्यमृतौ प्रथमेनुकूले हनि सुस्नातयान्वारब्ध प्राजापत्यस्य स्थालीपाकस्य हुत्वेता
आज्याहुतीर्जुहुयात्॥ विष्णुर्योनिमिति तिसृभिर्नेजमेषेति तिसृभिः प्रजापतेन त्वदिति एकामिति॥ प्रथमग्रहणाद्द्वितीय
दावृतौ नैतत्स्यर्थापि स्थानांतं॥ अनुकूलग्रहणादुपगमनयत्राहोरात्रे चिकीर्षितं तद्दिन एवेतदिति नियम्य
ते॥ अत एव दिनांतरापेक्षया चतुर्थस्यैवानुकूलत्वे तत्रैवेतत्॥ शांतिरपि तदुपयोगितया तत्रैवपद्यापि
ज्ञानर्तुश्चतुर्थेह्नि स्नानेन स्त्री रजस्वलादेवेकर्माणि पित्र्ये च पंचमेहनि शुध्यतीति मदनपारिजातोदाहृतवच
नेचतुर्थेह्नि दैवकर्मार्हतानति प्रतीयते तुथापि तेने वरजस्युपरते साध्वी स्नानेन स्त्री रजस्वलेति मनुवाक्ये सा

स्त्या॰ ध्वी गर्भाधानादिविहितकर्मयोग्येति व्याख्यानात् प्रधानानुरोधेन तदधिकारसंपत्त्यर्थं शांतावप्यधिकारसिद्धिः
तथाश्वो तेषु दर्शादिष्वपि पदात्रिरात्री णेति वचनाद्रजस्वलायाः स्नानदिवसेपि श्रौतकर्माणि कर्तव्यान्येव न तु पं २६
चमेहनीति आपस्तंबभाष्यकारोक्तेः॥ एवमुदाहृतमदनपारिजातग्रंथे आदिपदं उपनयनाद्यभिप्रायं तत्रापि
वहपमाणश्रीसूक्तहोमपूर्वकाभिषेकेण चतुर्थहनि अधिकारसंभवात् अन्यदिनानुकूलत्वे शांतिपूर्वक
३+ द्विगोरित्यधिकारे रात्राह संवत्सराश्चेति सूत्रेणातिस्त्रो रात्रीर्भूता इत्यर्थे स्वप्रत्ययांत मार्वतंच त्रिरात्री णेति इत्यन्यत्र ह्रष्ट व्यम+३

पुनर्जुहोति तदश्चोषाति तत्पदर्नः समद्य पुनः पातितया अन्यनिधायेत्याप संभग्न ह्यस्त आयेन दर्भस्तु वेणाञ्जलिना वा जुहुति तदसौप्रति त +४
प्यतिव्यत्कार्यमिति सुदर्शनभाष्ये+४

मेतत्तत्रैवेति व्यवस्था बोध्या॥ अयं होमः अनाहिताग्नेरर्धाधानिनश्चाहिताग्नेः सत्योपासने तत्रैव कार्यः॥ तन्नाशे साति
वादशरात्रात्पूर्वं स्थंडिलाद्यग्निप्रतिष्ठापनांतं कृत्वा ऽयाश्चेत्यादुत्सो त्याद्याग्निं तत्र कार्यः॥ तदूर्ध्वं प्रमादाग्नित्यागे प्रत
वे प्राजापत्यः॥ एतावदब्दपर्यंतं गृह्याग्निविच्छेदजनितदोषपरिहारद्वारा परमेश्वरप्रीत्यर्थं एतावतः कृच्छ्रान् तत्प्रत्या
म्नायद्वाराचरिष्य इति संकल्प्य तथैवाचरेत्॥ तत एतावद्दिनेषु गृह्याग्निविच्छेदवशेन लुप्तसायंप्रातरौपासन हो
मादिनित्यकर्मपर्याप्तं होम्यद्रव्यं तन्निष्क्रयं वा दातुमुत्सृज्य इति संकल्प्य पूर्वं कृत्वा पुनः संधानं कुर्यात्॥ तद्यथा
॥देशकालकीर्तनांते श्रीपरमेश्वरप्रीत्यर्थं विच्छिन्नस्य गृह्याग्नेः पुनः संधानं करिष्य इति संकल्प्याग्निप्रतिष्ठापनांतं
कृत्वाग्निध्यानांते ऽन्वाधानं कुर्यात्॥ अस्मिन्नन्वाहिते ग्नावाघारदेवत आज्येनेत्यंते अत्र प्रधानं त्रिरग्निं पवमानं अ
ग्निं प्रजापतिं चाज्येना अर्यमाणमग्निं वरुणमग्निं पूषणमग्निं प्रजापतिं च लाजद्रव्येण चतुर्वारं सूर्यं सावित्री माज्ये
न शेषेण स्विष्टकृतमग्निमित्यादि॥ पात्रासादने प्रोक्षण्यादि षत्सां पत्सं जलेर्मध्ये स्रुवस्यासादनं शूर्पस्य च॥ सर्वेषां
प्रोक्षणांते आज्यसंस्कारः॥ तेन सह लाजानां त्रिः पर्यग्निकरणं॥ आज्यस्योत्पवनमात्रे लाजानां त्रिः प्रोक्षणं
स्रुवांजलिः शूर्पसमार्गीते लाजानामाज्यस्य दक्षिणतो बर्हिष्यासादनं॥ आघारांते अग्न आयूंषीति तिसृणां प्रा
तं वैखानसा ऋषयः॥ अग्निः पवमानो देवता गायत्री छंदः पुनः संधान प्रधानाज्यहोमे वि·तिसृभिर्हुत्वा ऽयं ये प
वमानायेदमिति त्यागः॥ त्वमर्यमा वसुश्रुतोग्निस्त्रिष्टुप् त्वमर्यमा त्वमसि॥ अग्नय इदं॥ प्रजापते हिरण्यगर्भः
प्रजापतिस्त्रिष्टुप् प्रजापते· प्रजापतय इदं॥ ततः ञ्जलिं तं जलौ स्रुवेणोपस्तीर्य स्वयमेव लाजानां द्विरवदाय प्रजा

Indira Gandhi National
Centre for the Arts

२+प्र आपति वन साध्या प्राग्नीहोमेषु सर्वत्राति श्रोतस्त्रेयत्र तस्मीश वृत्रिशिष्टो होमश्चोद्यते तत्र प्रजापतिर्देवता ध्यापितः देवतासाध्यत्वात्रमस्य ध्याः दि नमानस
२ सिद्धे मनोयद्गुणं ॥ शब्दध्यानाधीने नेचतुर्थ्यंतेन प्रजापतिशब्दध्यात्वात दनेतरं स्वाहेत्यपांशूक्त्वा जुहुयात् होमेष्विति बहुवचनादेव प्रकारणादुक्तं सिद्धे सर्वत्रायदसं

मदग्नश्चत्रिरवदाय स्रुवेणाप्पूर्पस्थानवत्तांश्चाभिघार्य स्वयमुपविष्ट एव तिष्ठन्त्या अञ्जलिं दक्षिणेन पाणिना ध

वरुणं३ ३० त्वा स्वाहाकारान्तेंजल्यग्रेण जुहुयात् ॥ नसिचलाजान्प्रजापतिं मनसा ध्यायन् स्वाहाकारेण जुहुयात् ॥ ततः अग्न

र्यमणं पूषणमिति तिसृणां हिरण्यगर्भोर्यमाग्निर्वरुणोग्निः पूषाग्निरनुष्टुप् ॥ पुनःसंधानप्रधानलाजहोमे वि-

अर्यमणं नु॰ अयमणे अग्नये इदं । वरुणं नु॰ वरुणायाग्नय इदं ॥ पूषणं नु॰ पूष्णे अग्नय इदं ॥ पत्न्या वाग्यतः शूर्पको

णेन प्रजामिति चतसृणां सूर्या सावित्री ऋषिः सूर्या सावित्री देवता आद्या जगती द्वितीया त्रिष्टुप् ॥ अंत्ये द्वे अ

नुष्टुभौ ॥ पुनः संयोगः ॥ आ नः प्रजामिति चतसृभिः स्वाहाकारसमकालं स्रुवेणाजुहुयात् ॥ सूर्याये सावित्र्या

इदं ॥ स्रुवगताज्यशेषमनामिकया दायसमंजन्त्विति मंत्रस्य सूर्या सावित्री ऋषिः सूर्या सावित्री देवता अनुष्टुप्

छंदः हृदयांजने विनियोगः ॥ स्वस्य पत्न्याश्च हृदयांजनं कृत्वा हस्ते प्रक्षाल्य स्विष्टकृदादि होमशेषं समाप्य

दक्षिणां नु वा ब्राह्मणान् भोजयेत् ॥ इत्यनंतदेवीये संस्कारकौस्तुभे विच्छिन्नगृह्याग्निपुनःसंधानं ॥ सर्वाधानिनापि एव

मेव पुनःसंधानेनोपासनमुत्पाद्य गर्भाधानपुंसवनादिहोमः कार्यः ॥ तत्र कृच्छ्रसंकल्पो द्रव्यदानसंकल्पश्च न कार्यः

गर्भाधानहोमकर्तुं गृह्यपुनःसंधानं करिष्य इत्येवं संकल्पः ॥ गर्भाधानांते ग्नित्यागः ॥ अर्धाधानिनोपि औपासनहो

माधिकरणपक्षे प्रायश्चित्तमात्रं न द्रव्यदानं ॥ द्विभार्यस्याग्निद्वयसंसर्गात्पूर्वमेकाग्न्यनुगमे प्रायश्चित्तं औ

पासनहोमीयद्रव्यमात्रदानं च कार्यं न तु स्थालीपाकादि द्रव्यदानं ॥ अथ प्रयोगः ॥ कर्ता प्रातरभ्यंगस्नानं कृत्वा

शांतपनादेसर्वैर्ममृत्तिका पंचपल्लवपंचत्वक्सहितैर्नूतनोदककुंभैः पत्नीमपि स्नापयित्वा तया सहोपविश्य दे ३०

नकोषलाजान् प्रजापतिं मनसा ध्यायन् स्वाहाकारेण जुहुयात् ॥ ततः अग्न×१॰

गृह्यकर्मस्वप्राणायामविधिः २

शकालौ संकीर्त्य मम अस्यां भार्यायां संस्कारातिशयद्वारा अस्यां जनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हण

द्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्म करिष्य इति संकल्प तदंगत्वेन गणेशपूजनादि नांदीश्राद्धांतं कुर्यात् ॥ त

त्रतावत् स्वर्वोपयोगित्वेन स्वस्तिवाचनमुच्यते तद्विधिमहाशौनकः ॥ स्वस्तिवाचनमेतत्तु सर्वेषामृद्धिकारणं ॥ आद

वंते च कर्तव्यमिति यज्ञविदां मतमिति ॥ तत्र कलशस्थापनं हारीतेनोक्तं ॥ गोमयेनोपलिप्योर्वीं रंगवल्लिकया स्थ

येत् ॥ अस्य धान्योपरि स्थाप्य पूर्णं हि कलशद्वयं ॥ दक्षिणे चोत्तरे चैव उत्तरे तु निधापयेत् ॥ पात्रमक्षतपूर्णं तु फलपुष्प

समन्वितमिति ॥ तत्र कलशस्य तत्रानिक्षेप्य पंचरत्नानां च लक्षणं विष्णुधर्मोत्तरे हेमराजततास्त्रावाम्रन्नपालक्षणान्वि

ताः ॥ सुवर्णं रजतं मुक्ता राजावर्तः प्रवालकं ॥ पंचरत्नमिति ख्यातमिति ॥ कलशे निक्षेप्य पंचत्वचः पंचपल्लवाश्च

तत्रैवोक्ताः ॥ न्यग्रोधपिप्पलप्लक्षजंबूचूततरूद्भवाः ॥ रुवतिर्भीमद्रुस्त्वाघटे पंचत्वचः क्षिपेत् ॥ अश्वत्थोदुंबरः प्ल

क्षो न्यग्रोधश्चूत एव च ॥ पंचपल्लवमाख्यातं सर्वकर्मसु शोभनमिति ॥ अथ प्रयोगः ॥ सपत्नीको यजमानः कृताभ्यं

गः पवित्रपाणिर्गोमयोपलिप्तरंगवल्लिकायुक्तभूतलस्थ प्रस्थपरिमितधान्योपरि कलशद्वयं सुलक्षणं शुद्धजल

पूरितं सपल्लवं निधाय तत्पश्चिमदेशे युग्मान् ब्राह्मणान् विशुद्धान् प्राङ्मुखान् दक्षिणतो वा उदङ्मुखान् उपवेश्य सोत्तर

च्छदे शुद्धपीठे स्वयमुपविश्य स्वदक्षिणे संस्कार्यमुपवेश्य प्राणानायम्य यथाचारमिष्टदेवतादिनमस्कारपूर्वकं सुर

स्वस्थेत्यादि पठित्वा देशकालौ संकीर्त्य अमुककर्म करिष्ये ॥ तदंगत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्रा

द्धं च करिष्ये तदादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं करिष्य इति संकल्प्य गणानां त्वा ॥ ऋद्धिबुद्धिसहितं गणपति

Indira Gandhi National Centre for the Arts

मावाहयामिगणपतयेनमः॥ आसनं॥ पाद्यमर्घ्यमाचमनीयमित्यादिदक्षिणादानांतंकृत्वा निधुसीदेतिमंत्रेण पु
३१ ष्पांजलिंसमर्प्यवक्रतुंडेतिसंप्रार्थ्यस्वपुरतः मही द्यौः पृथिवी चनइतिमंत्रावृत्यादक्षिणातउत्तरतश्च भूमिं
स्पृशेत्॥ एवमुत्तरक्रियाणां तत्तत्कालानुष्ठाने मंत्रावृत्तिः पूर्वस्थापितकलशयोस्तंत्रेण मंत्रप्रयोगः ओषध
यः समितितथैवतंडुलपुंजौकृत्वा आकलशेष्विति तंडुलपुंजोपरिकलशौनिधायइमंमेगंगेइतितीर्थजलेन
प्रत्येकंपूरयित्वा गंधद्वारामितिगंधंप्रक्षिप्य॥ ओषधयः समितिसर्वौषधीः॥ कांडात्कांडात्प्ररोहंतीरितिदूर्वाः
॥ अश्वत्थेवोनिषदनमितिपंचपल्लवान्॥ रुवतिभीमइतिपंचत्वचः॥ स्योनापृथिवीतिसप्तमृदः याः फलिनीरि
तिफलंसहिरण्यानीतिपंचरत्नानिहिरण्यरूपइतिहिरण्यं युवासुवासाइतिवाससा संवेष्ट्य पूर्णादर्वीतिपूर्णपा
त्रे स्थाप्य तत्वायामिब्रह्मणाशेपोवरुणस्त्रिष्टुप्॥ पूज तत्वायामीति उत्तरकलशे वरुणंगंधादिभिः पूजयित्वा त
त्र कलशे कलशस्य मुखे विष्णुः कंठेरुद्रः समाश्रितः॥ मूलेत्वस्यस्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥ कुक्षौतुसा
गराः सप्तसप्तद्वीपा वसुंधरा॥ ऋग्वेदो यजुर्वेदः सामवेदो ह्यथर्वणः॥ अंगैश्च सहिताः सर्वे कलशंतु समाश्रिताः
अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा॥ आयांतु मम शांत्यर्थं दुरितक्षयकारिकाः॥ सर्वे समुद्राः सरितस्तीर्था
नि जलदानदाः॥ आयांतु मम॥ ततः कलशे विष्ण्वादीन्संपूज्य अक्षताः क्षिपेत्॥ मातृदेवोभव॥ पितृदेव आचा
र्यदेव अतिथिदेव॥ आशिषः प्रार्थयेत एताः सत्या आशिषः संतु अवनिकृतजानुमंडलः कमलमुकुलस ३१
दृशमंजलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्वकलशं धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि वि

ष्णुपदानि च तेनायुः प्रमाणेन पुण्याहं दीर्घमायुरस्तु शिवा आपः संतु सौमनस्यम् अक्षतं चारिष्टं चास्तु गंधाः
पांतु सुमंगल्यं चास्तु॥ अक्षताः पांतु आयुष्यम् पुष्पाणि पांतु सौश्रियम् तांबूलानि पांतु ऐश्वर्यं दक्षिणाः पांतु
बहुधेयं चास्तु॥ अत्र गंधाः पांत्विति दिग्भिर्मंत्रपूर्वोद्यैः युग्मान्ब्राह्मणान् गंधादिना पूजयेत्॥ ते च सुमंगल्यं चा
स्त्वित्यादि मंत्रोत्तरार्धानि प्रतिब्रूयुः॥ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तंते
तमहमोंकारमादिं कृत्वा ऋग्यजुः सामाशीर्वचनं बहुऋषिमतं संविज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयि
ष्ये इत्युक्ते वाच्यतामिति प्रतिब्रूयुः॥ भद्रं कर्णेभिः आयुः॥ द्रविणो द्रविणस्य दीर्घमायुः॥ सविता पश्चात् दीर्घ
मायुः॥ नवो नवो भवति जायमानो दीर्घमायुः तुभ्यं जीवसे यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि॥ सत्वा सिंचामि
धनं च॥ मनः समाधीयतां समाहितमनसः स्मः प्रसीदंतु भवंतः प्रसन्नाः स्मः शांतिरस्तु॥ पुष्टिः तुष्टिः वृद्धिरविघ्नम् आयुष्यम् आरोग्यम् शिवं कर्मास्तु कर्मसमृद्धिः शास्त्रसमृद्धिः धनधान्यसमृद्धिः इष्टसंपदस्तु॥ अरिष्ट वेदस ४९
निरसनमस्तु॥ यत्पापं तत्प्रतिहतमस्तु॥ यच्छ्रेयस्तदस्तु उत्तरे कर्मण्यविघ्नम् उत्तरोत्तरमहरहरभिवृद्धिरुत्तरो
त्तरक्रियाः शुभाः शोभनाः संपद्यंतां॥ तिथिकरणमुहूर्तनक्षत्रसंपदस्तु॥ तिथिकरणमुहूर्तनक्षत्रग्रहलग्ना
धिदेवताः प्रीयंतां तिथिकरणेमुहूर्तनक्षत्रे सग्रहे सदैवते प्रीयेतां दुर्गापांचाल्यौ प्रीयेतां अग्निपुरोगा विश्वेदेवाः प्रीयंतां इंद्रपु
रोगा मरुद्गणाः प्रीयंतां ब्रह्मपुरोगाः सर्वेदेवाः प्रीयंतां माहेश्वरी उमा मातृः प्रीयंतां वसिष्ठपुरोगा ऋषिगणाः प्रीयंतां अरुंधतीपुर
कपत्न्यः प्रीयंतां ऋषयः छंदांस्याचार्या देवा वेदा यज्ञाः प्रीयंतां श्रीसरस्वत्यौ प्रीयेतां श्रद्धामेधे प्रीयेतां भगवती कात्या प्रीयतां भगवमा

Indira Gandhi National Centre for the Arts

देश्वरी प्रीय॰ भग॰ तुष्टिकृ॰ भगव॰ पुष्टि॰ भगव॰ वृद्धि॰ भग॰ ऋद्धि भगवंतो विघ्नविनायकौ प्री॰ भगवान्स्वा
मी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्री॰ हरिहरहिरण्यगर्भाः॰ सर्वाश्च ग्रामदेवताः प्री॰
३२ सर्वाः कुल॰ सर्वा इष्टदेवताः प्री॰ हताश्च ब्रह्मद्विषः ॥ हताः परिपंथिनः ॥ हता अस्य कर्मणो विघ्नकर्तारः शत्रवः प
राभवं यांतु ॥ शाम्यंतु घोराणि ॥ शाम्यंतु पापानि ॥ शाम्यंत्वीतयः ॥ शुभानि वर्द्धंतां ॥ शिवा आपः संतु ॥ शिवा ऋतवः
सं॰ शिवा अतिथयः सं॰ शिवा ओषधय॰ शिवा वनस्प॰ शिवा अग्नयः॰ शिवा आहुतयः सं॰ अहोरात्रे शिवे
स्यातां ॥ निकामे निकामे नः पर्जन्यो वर्षतु ॥ फलवत्यो न ओषधयः पच्यंतां ॥ योगक्षेमो नः कल्पतां ॥ शुक्रांग
रकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरो॰ सर्वे ग्रहाः प्री॰ भगवन्नारायणः प्री॰ भग॰
पर्जन्यः प्री॰ भग॰ स्वामी महासेनः ॥ पुण्याहकालान्वाचयिष्ये वाच्यतां ॥ उद्गातेव शकुने साम गायसि॰ शकुने पु
ण्यमावद ॥ याज्यया यजति संस्कुरुते ॥ यस्तु पुण्यं नक्षत्रे॰ पुण्याह एव कुरुते ॥ महांसद कुटुंबिने महाजनानमस्
र्णाय ॥ आशीर्वचनमपेक्षमाणाय अस्य अमुककर्मणः पुण्याहं भवंतो ब्रुवंतु ओं पुण्याहं त्रिः ॥ स्वस्तये वायुमु
पब्रवाम॰ वंतु नः ॥ आदित्य उदनीयः॰ स्वस्तु घृति ॥ स्वस्ति न इंद्रो॰ दधातु ॥ अष्टौ देवाः स्वस्ति ॥ मह्यं॰ सह॰ अस्य
कर्मणे स्वस्ति॰ अस्मै कर्मणे स्वस्ति इति भवंति वचनं त्रिः॰ ऋध्याम स्तोमं॰ काममस्माः ॥ सर्वामृद्धिं॰ य एवं वेद॰ ३२
ऋध्यास्म हव्यैर्नमसा॰ सवीराः ॥ श्रीणि श्रीणि वै देवाः॰ प्रति तिष्ठति ॥ मह्य मित्या घस्य कर्मणः ॥ ऋद्धिं भवं॰ त्रिः ॥ ऋध्
यतामिति विप्राः त्रिः ॥ ओं श्रिये जातः॰ य एवं वेद ॥ यस्मिन्ब्रह्माभ्यजयत्सर्वं॰ मानं ॥ अहे बुध्निय॰ सतो एते

मंत्रे नीराजनं कारयेत् ॥ मह्य मित्यादि पूर्ववत् ॥ अमुककर्मणः श्रीरस्त्विति भवंतो ब्रुवंत्विति त्रिः ॥ अ
स्तु श्रीरिति प्रतिवचनं त्रिः ॥ वर्षशतं पूर्णमस्तु ॥ शिवं शिवम्॰ गोत्राभिवृद्धि॰ प्रजापतिः प्रीयतां ॥ शुक्रेभिरं
गैरज आततन्वा क्रतुं पुनानः कविभिः पवित्रैः ॥ शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः ॥ तव
प्येष्ठ्लो कोनिर्गतो मरुतः परिवेष्टारो मरुत्तस्या वसन्गृहे ॥ आविक्षितस्य कामप्रे विश्वेदेवाः सभासद इति ॥ तिष्ठत: इतिप्र॰
ततउत्तरकलशं दक्षिणहस्ते दक्षिणकलशं वामहस्ते गृहीत्वा ताभ्यां धाराद्वयं संततं पात्रे निषिंचेदेभिर्मंत्रैः वा
स्तोष्पते प्रतिजानी॰ष्वदे ॥ वास्तोष्पते प्रतरणो॰ जुषस्व ॥ वास्तोष्पते शग्मया॰ सदा नः ॥ अमीवहा वास्तोष्प
ते॰ एधिनः शिवे इत्यतः पत्नी वामतः उपवेश्य ॥ तदुक्तं ॥ सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः स्थिता ॥ विप्र
पादक्षालने तु अभिषेके च वामत इति ॥ ब्राह्मणा अभिषेकं कुर्युः ॥ समुद्रज्येष्ठा॰ भवंतु ॥ या आपो दिव्याः॰ स्ता आ
पो॰ वंतु ॥ यासां राजा॰ वंतु ॥ यासु राजा॰ वंतु ॥ आयंतामिह देवा॰ असत ॥ आपइद्वा उभेषजी ॥ हस्ताभ्यां॰ स्पृश
मासि ॥ इमा आप॰ भृतोमृताः ॥ याभिरिंद्रं॰ राजो भवेह ॥ महीतं त्वा मही॰ जनत् ॥ देवस्य त्वा॰ यशसेन्नाद्याय ॥ ए
र्भुव॰ तच्छंयो॰ मंत्रांते अमृताभिषेकोस्त्विति वदेयुः ॥ ॥ इति स्वस्तिवाचनं ॥ ॥ अथ शौनकाद्युक्तं ॥ शौन
कः ॥ ॥ अर्चिता ब्राह्मणाः सम्यग्गंधमाल्यैः सदक्षिणैः ॥ तिष्ठेयुः प्राङ्मुखा युग्मा वक्ता रोदर्भपाणयः ॥ तिष्ठद्वा
चयिता तेषां दक्षिणस्यामुदङ्मुखः ॥ विप्रत्वं मम पांपूर्णपिहितानन मर्चितां ॥ अथ वाचयितु वीद्रं दक्षिणांतु स
मांश्रिताः ॥ तिष्ठेत्स्क उदङ्मुखाः सम्यक्संस्कार्योस्तत्र तत्रतु ॥ मन इत्यादिकं मंत्रं पूर्वं वाचयिता वदेत् ॥ समाहितेस्य

Indira Gandhi National Centre for the Arts

दोतरे मंत्रं ब्रूयुः समाहिताः॥ प्रसीदंतु भवंत इत्यथ वाचयित्वा वदेत्॥ प्रसन्नाः स्म इति ब्रूयुरर्चिता ब्राह्मणाः पुनः॥ शांति
पुष्ट्यविघ्नाद्याः शब्दाः पंचदशैव तु॥ अस्तु शब्दांतमुभ्भेरन्वाचयित्वा तथापरे॥ आशीर्वादानथान्यांश्च विवि
३३ धानपि वाचयेत्॥ अतो देवा अवंतु नः सूक्तं वेद्मवमुत्तमं। द्रविणोदाः सवितेति नवोनवो भवेति च॥ आव
दंस्त्वमित्युक्त्वा पुण्याहं वाचयेत्ततः॥ वाचयित्वा यथाशक्ति सर्वाणि द्विजसत्तमैः॥ प्रस्तुते देवतायास्तु होमं कुर्याद्वि
चक्षणः॥ तस्या नाम गृहीत्वाथ प्रीयतामिति चोच्यतां॥ पुण्याहं स्वस्ति मृद्धिं च भवंतः ब्रुवंत्विति॥ प्रणवाद्यान्विर
चष्ट्य मवदादि विनापरे॥ पुण्याहादेस्त्रिरभ्यासे मंद्रमध्योत्तमस्वनं॥ आश्रयेरन्निमे सर्वे यथागमपरंपरं॥ प्रयुक्ति
विषयेनेदस्त्वतीयेत्युच्यतामिति॥ वक्तारो ब्रूयुरस्त्वत्येव रतिविस्पष्टमेव च॥ पुण्याहशब्दमुक्त्वा तु स्वस्ति न इत्यृचं ज
पेत्॥ स्वस्ति शब्दं तथोक्त्वा च ऋध्यामेति ऋचं वदेत्॥ ऋद्धिं भवंतो ब्रुवंत्विति ऋध्यतामित्यथो वदेत्॥ आपो हिष्ठेति ति
सृभिः शन्नो देवीरृचैकया॥ ईशाना वार्याणां च क्षयंत्वसृक्चाघमर्षणं॥ तरत्समंदीसूक्तं तु सर्वपापापनोदनं॥ पव
स्व सोममित्यादि ऋग्भिः प्रोक्ष्य समंततः॥ पुण्याहं वाचयित्वैवं सर्वकल्याणवान्भवेत्॥ स्वस्तिवाचनमेवं तु सर्वेषा
मृद्धिकर्मणां॥ आदवंते च कर्तव्यमिति यज्ञविदां मतमिति॥ जपंते नकारे काकारेण अर्चिता इत्यारभ्य तथापरेरि
त्यंतग्रंथमित्थमेव पठित्वा प्रस्तुतदेवताया इत्यारभ्य तु तीयेत्युच्यतामितीत्यंतं पठितं तत आप इत्यादिभिः शांतिं त
तः कुर्युः समाहिता इति पठित्वा स्युः श्लोकाः पूर्ववदुक्ताः॥ परिशिष्टे॥ अथ सर्वसंदस्य शांतिः पुष्टिस्तुष्टिर्वृद्धिरविघ्नमा ३३
युष्यमारोग्यं स्वस्ति शिवं कर्मसिद्धिर्धर्मसमृद्धिः पुत्रसमृद्धिर्वेदसमृद्धिः शास्त्रसमृद्धिर्धनधान्यसमृद्धिरिष्टसंप

दित्येतानि पंचदशांस्त्वेतानि वाक्यान्युक्त्वा तत्तत्प्रा कर्मदेवता प्रीयतामिति ब्रूयुः॥ अथ वा वाचयिता पूर्वं तत्तल्लिं
गान् मंत्रान् पठित्वा त्रिस्त्रिर्मंद्रमंद्रमध्यमोच्चस्वरैः ओं पुण्याहं भवंतो ब्रुवंत्वों स्वस्ति भवंतो ब्रुवंत्वों ऋद्धिं भवं
तो ब्रुवंत्विति ब्रूयात्॥ तेपि तथा प्रत्येकं प्रति ब्रूयुः॥ ओं मध्यतामित्यृद्धो ब्रूयुः॥ अथ प्राङ्मुखमासीनं सामर्थ्यं कर्ता
ब्राह्मणाः सपल्लवदर्भपाणयः शांतिपवित्रलिंगाभिर्ऋग्भिः सिंचेयुः॥ पुरंध्रयो नीराजनादि मंगलं कुर्युरिति
॥ कर्मदेवता आह बोधायनः॥ विवाहस्याग्निरौपासनस्याग्निसूर्यप्रजापतयः स्थालीपाकस्याग्निर्गर्भाधानस्य
ब्रह्मा॥ पुंसवनस्य प्रजापतिः सीमंतस्य धाता॥ विष्णुबलेः सविता जातकर्मणो मृत्युः नामकर्मणः सविता॥ तस्यां ते प्रजा
पतिरूपनिष्क्रमणस्य सविता तस्यां ते चित्रियाणि अन्नप्राशनस्य सविता चौलस्य केशिनस्तस्यां ते प्रजापतिरूप
नयनस्येंद्रः श्रद्धा मेधे अंते विसर्गे सुश्रवाः पुनरुपनयनस्याग्निः॥ अथ यदि ब्रह्मचर्यव्रतमाचरेत्तस्मिन्नपायहो
मे सविता समावर्तनस्य श्रीर्हिरण्यवाश्मूलगवस्येशानः प्रत्यवरोहणस्य सवितो पाकर्मणि व्रतेषु च सविता वास्तुहो
मस्य वास्तोष्पतिरंते प्रजापतिः॥ अद्भुतहोमस्येंद्रो ते प्रजापतिरायुष्यहोमस्याग्निरायुष्मान्॥ नक्षत्रहोमस्य नक्षत्रे
सूक्तं॥ अष्टमी प्रदोषस्येशानः आग्रयणस्याग्रयणदेवताः॥ सर्पबलेः सर्पाएकोदिष्टस्यांते प्रजापतिस्तटाकादीनां वरुणो
यक्षबलेर्यक्षाय दशांतिहोमस्यादित्यादि नवग्रहाः नागारितंत्र होमे ब्रह्मादयः प्रीयतामिति एवमेवान्येषां होमानां
याज्यानुवाक्ययोर्देवता सौ प्रीयतामिति रूपतटाकांते प्रधानोदकांते प्रजापतिः कूष्मांडहोमस्याग्न्यादयश्चेंद्रायण
स्याग्न्यादयो ग्न्याधेयस्याग्न्यादयोऽग्निष्टोमस्येंद्र एवमन्येष्टकर्मसु प्रजापतिरिति॥ पुण्याहवाचनस्त्रे च गंधादिदक्षिणां ता

Indira Gandhi National
Centre for the Arts

नांदीश्राद्धसमये शिवा आपः संत्वित्यादीनां बहुदेयं च नोस्त्विस्यंतानां वाचनमुक्तं बौधायनेन ॥ पारिजातधृतशौनकीये
पि दानसमये शिवाक्यवाचनं विधायोक्तं कर्त्राथ दक्षिणं जानुं पातयित्वा महीतले ॥ उदङ्मुखो जपेत्सूक्तं श्रद्धये त्वे व मा
३५ दिकामिति ॥ ओं पुण्याहमिति वाचनाते चोक्तं ॥ ततः स्वस्ति न इंद्रोति ऋचं ब्रूयुः सदोमये ॥ ततो वाचयिता पूर्वमोंस्व
स्ती त्यभिधायतु ॥ पश्चाद्भवंतं इति चब्रुवंस्त्विति च भाषते ओं स्वस्ती तितथे वान्ये प्रतिब्रूयुरतः परं ॥ प्राशिष्टितं चतुर्थ्यो
त्काकर्म वाचयिता ततः ॥ स्वस्तीत्याद्यं ब्रुवंस्त्वं तं पूर्ववत्समुदीरयेत् ॥ वक्तारश्च चतुर्थ्यंतं तत्कर्मोक्तिपूर्वकं ॥
स्वतीति च प्रतिब्रूयुरिति ॥ ऋद्धिवाचनांते च ततो वाचयिता कुंभजलं संस्कार्यमूर्द्धनि ॥ किंचित्सिंचेत्सदैवान्ये ब्रूयुश्च
विविधाशिष इति ॥ आश्वलायनस्मृतौ ॥ गुरोर्दक्षिणभागे तु कर्त्तासीत तदाज्ञया इति प्रक्रम्य मनः समाधीयतामित्या
दिवाचनं गुरुकर्तृकमेवोक्तं ततः सावित्र्यादिमंत्रैरभिषेकमुक्त्वोक्तं पुण्याहांते चीयेद्विजान् दक्षिणाभिः स्वश
क्तितः ॥ यत्किंचिद्धातृकमुक्त्वा प्रतिगृह्य च वाः शुचिः ॥ अब्राह्मणश्च पुण्याहे नार्हः स्यादिति मे मतिः ॥ पुण्याहवाचनं
शस्तमादौ स्यात्सर्वकर्मसु ॥ नाहत्वैतद्बुधः कुर्यात्सर्वकर्माणि मानव इति अत्र च बहु[illegible]स्यं वा स्वगृह्योक्तं यस्य
त्कर्मनोदितं ॥ तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेदिति स्वगृह्यानुक्तस्यानावश्यकत्वमभिप्रेत्य कारिका
कृता यत्तांशपरिशिष्टमनुसृतं ॥ तत्र च प्रशस्तानिति ब्राह्मणविशेषणं किमाशयमित्याकांक्षा सत्वाश्रमस्थं
श्राद्धभोजनप्रतिग्रहादिरहितं याह्यं ॥ यद्यपि ब्राह्मणपूजनं आरंभे कार्यमिति प्रतीयते तथापि कुंभस्थापना ३५
नंतपूजां विधाय ब्राह्मणपूजनं कार्यं ॥ अथशब्देन बहुक्रमतयापदार्थोक्तिसमये स्व-चैतमिति कुंभविशेष

ण स्यान्यथानुपपत्तेः ॥ ब्राह्मणपूजनं प्रसिद्धमेवेति वाक्यवाचनमपि तास्यामनादृतं ॥ पुण्याहादिवाचने मंत्रादित्रै
विध्यमपि यथागमपरमिति वैकल्पिकत्वेनोक्तं ॥ परिशिष्टे पंचदश प्रतिस्वा पंचदशैतानीत्युक्तिर्न्यूनाधिकोक्तिबा
हुल्यार्थेत्यभिप्रेत्य पंचदशैवेति कारिकादावुक्तं शांति पवित्र लिंगाभिऋग्भिरिति परिशिष्टस्य प्रपंचनं च पारिजातधृत
शौनकीये पवस्व सोममित्यंतानामृचां पाठे नाश्वलायनस्मृतौ च सावित्र्यादिमंत्रपाठे न कृतं न तत्र चोविशेषतस्ता स्ताबि
वक्षिता ॥ पारिजातधृतशौनकीये विशेषपाठाभावात् ॥ उक्तपाठयोः परस्परविसंवादाच्चेत्याशयेनापइत्यादिभिः
शांतिं ततः कुर्यादित्येवोक्तं अतो देवा इत्यादीनां श्रद्धये त्यादिसूक्तस्यैव शौनकीयपाठ एव क्वचिदसत्वात्परिशिष्टाद्या
वपि अविधेरनित्यत्वात् तल्लिंगान्मंत्रान्पठित्वेति परिशिष्टं स्वधृतशौनकीये चोक्ता तेवेति सूचनाम्चां पाठेन तद्विव
रणपाठेन तद्विवरणमालोच्य पारिजाते प्रयोगकाले याज्ययायजत्तीत्यादेराचा प्राप्त वाक्यानामनादरः कृतः ॥ अत
इत्थं प्रयोगः ॥ यथाचारं गणेशवरुणपूजादौ कलशं धारयित्वे त्यंते कृते शिवा आपः संत्वित्यादि वाक्यवचनेन ब्राह्म
पूजने विहिते पूजितायुग्मा ब्राह्मणा दर्भपाणयः प्राङ्मुखास्तिष्ठेयुस्तद्दक्षिणतो वाचयितोदङ्मुखो दर्भपाणिः ॥ स्वर्णि
तं कुंभं सपल्लवं दक्षिणहस्ते दधानस्तिष्ठेत् तद्दक्षिणपार्श्वे पत्नी संस्कार्याश्च तिष्ठेयुः ॥ ततो ब्राह्मणान्प्रति मनः समा
धीयतामिति कर्त्ता समाहितमनसः स्म इति परे ॥ प्रसीदंतु भवंत इति कर्त्ता ॥ प्रसन्नाः स्म इति परे ॥ ततः सर्वे संदत्यपं
चदश वाक्यानि वदेयुः ॥ शांतिरस्तु १ पुष्टिरस्तु २ तुष्टिरस्तु ३ वृद्धिरस्तु ४ अविघ्नमस्तु ॥ ५ ॥ आयुष्यमस्तु ६ आरोग्य
मस्तु ७ स्वस्ति शिवं कर्मास्तु ८ कर्मसिद्धिरस्तु ९ धर्मसमृद्धिरस्तु १० पुत्रसमृद्धिरस्तु ११ वेदसमृद्धिरस्तु ॥ १२ शास्त्रसमृद्धि

Indira Gandhi National
Centre for the Arts

रस्तु १३ धनधान्यसमृद्धिरस्तु १४ इष्टसंपदस्तु ॥ १५ ॥ इत्युक्त्वा कर्मदेवतानामग्रहणपूर्वकं अग्निः प्री
३५ यतामित्येवं वदेयुः ॥ यत्र नामविशेषो नोक्तः तत्र प्रजापतिः प्रीयतामिति ॥ अथावदं स्वमित्यृचं पवित्वा ॐ पु
ण्याहं भवंतो ब्रुवंत्विति वदेत् ॥ ॐ पुण्याहमिति परे ब्रूयुः स्वस्ति नः इंद्र इत्यृचं पवित्वा ॐ स्वस्ति भवंतो ब्रुवंत्विति
वदेत् ॥ ॐ स्वस्ति इति परे ॥ ऋध्याम स्तोम मित्यृचं पवित्वा ॐ ऋद्धिं भवंतो ब्रुवंत्विति वदेत् ॥ ॐ ऋध्यतामिति परे ॥
ततो आपो हि ष्ठेत्यादिभिः समुद्रज्येष्ठा इत्यादिभिर्वाभिषेकः कार्यः ॥ ततः सुवासिन्यो नीराजनाशीः प्रयोगनूतनवस्त्र
स्नानादिमंगलं कुर्युरिति संक्षिप्तः पुण्याहवाचनप्रयोगः ॥ ॥ अथ वृद्धिश्राद्धं ॥ तच्च पार्वणेन त्र्यात्मकं ॥ मातृमः
कल्पयेत्पूर्वं पितृभ्यस्तदनंतरं ॥ ततो मातामहानां च कुर्यात् ॥ श्राद्धं क्रमेण वा इति वसिष्ठोक्तेः ॥ एतदारंभे मा
तृपूजनमवश्यं कार्यं ॥ अकृत्वा मातृयज्ञं तु यः श्राद्धं परिवेषयेत् ॥ तास्तस्य क्रोधसंपन्ना हिंसां कुर्वंति दारुणामिति
हेमाद्रौ भविष्योक्तेः ॥ कर्मांगश्राद्धे तत्कार्यं ॥ कर्मादिषु च सर्वेषु मातरः सगणाधिपाः ॥ पूजनीयाः प्रयत्नेन पूजि
ताः पूजयंति ता इति ॥ शर्मणे तु श्राद्धशेषिकर्मांगत्वस्यापि मातृपूजनप्रतीतेः ॥ अत्र विशेषो हेमाद्रौ चतुर्विंशति
मते ॥ तिस्रः पूज्याः पितुः पक्षे तिस्रः पूज्याश्च मातृके ॥ इत्येता मातरः प्रोक्ताः पितृमातृष्वसाष्टमी ॥ ब्राह्मण्याद्याः स्मृताः
सप्त दुर्गा क्षेत्रगणाधिपाः ॥ वृद्धौ वृद्धौ सदा पूज्याः पश्चान्नांदीमुखान्पितॄन् ॥ गौरी पद्मा शची मेधा सावित्री० मातरः ३५
॥ एतास्त्वभ्युदये पूज्या आत्मदेवतया सहेति ॥ मातृपितामही प्रपितामह्यः मातामही मातुः पितामही मातुः प्रपि दशा २
तामह्यः पितृष्वसा सप्तमी मातृष्वसाष्टमी स्वेष्टो मानुष्यमातरः प्रत्यक्षाः प्रत्यक्षमेव कुंकुमवस्त्राभरणपुष्पादि

॥

भिः पूज्याः परोक्षास्तु वक्ष्यमाणदेवतामातृवदक्षतपुंजादिष्वावाह्य पूजनीया इति हेमाद्रिः ॥ ब्राह्मण्याद्याः सप्त
दुर्गा क्षेत्रपालगणाधिपाश्च षोडशोपचारैः पूजयित्वा नांदीमुखान्पितॄन्पूजयेत् ॥ शास्त्रांतरे महालक्ष्म्या सहा
ष्टौ ब्राह्मण्याद्याः पूज्या इत्युक्तं ॥ तथा गौरी पद्मा० मातरः ॥ धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह ॥ अर्घ्य
र्घ्यं गंधपुष्पं च धूपं दीपं निवेदयेदिति ॥ आत्मदेवता कुलदेवता ॥ अर्घ्यग्रहणेन षोडशोपचारपूजावश्य
केति द्योत्यते ॥ तथा कुड्यलग्ना वसोर्धाराः पंच धारा घृतेन तु ॥ कारयेत्सप्त धारा वा नातिनीचा न चोच्छ्रिताः ॥ आ
युष्याणि च शांत्यर्थं जप्त्वा तत्र समाहित इति ॥ आयुष्याणि ॥ आ नो भद्रा दीनि सूक्तानि ॥ तत्रेति यत्र मातृ
पूजा या वसोर्धारा कृता कात्यायनगृह्याद्यनुसारेण तत्रायमायुष्यसूक्तजपः कार्यः ॥ अनेनैव वसोर्धाराया
अनित्यत्वं ज्ञापितं ॥ ब्रह्मांडे ॥ स्वाहाशब्दं प्रयुंजीत स्वधास्थाने च बुद्धिमान् ॥ वृद्धिश्राद्धे सदा सव्यं यज्ञस
त्रं च कारयेत् ॥ कुशस्थाने च दूर्वाः स्युः मंगलस्याभिवृद्धय इति ॥ आश्वलायनगृह्यपरिशिष्टे तु आभ्युद
यिकेषु ब्राह्मणा अमूला दर्भाः प्रागग्रेभ्य उदगग्रेभ्यो दद्यादुदगग्रेभ्यो वा प्रागग्रेभ्यो द्वौ दर्भौ पवित्र
इति ॥ मंगलात्मकविवाहाद्यारंभे क्रियमाणे नांदीश्राद्धे कुशस्थाने दूर्वाविधिः ॥ यज्ञाद्यारंभे तु क्रिय
माणे ऽमूलदर्भविधिरिति व्यवस्था बोध्या ॥ युग्मत्वे पि नियममाह हेमाद्रौ छागलेयः ॥ एकैकस्य तु वर्गस्य
तु द्वौ द्वौ विप्रौ समर्चयेत् ॥ वैश्वदेवे तथा द्वौ च न प्रसज्जेत विस्तर इति ॥ भविष्ये ॥ सर्वं प्रदक्षिणं कार्यं मातृकाश्राद्ध
पूर्वाह्णे ऽपवीतिनेति ॥ पूर्वाह्णे भोजयेद्विप्रानष्टौ सर्वं प्रदक्षिणं ॥ तथा च नवमं विप्रं चतुरस्रे स्वगोत्रमेति च ॥ वरण
क्संस्था प्राक्संस्था वा पूज्या

Indira Gandhi National Centre for the Arts

२६ ल्लनकालेसमागतातिथिंक्षालनचतुरस्रदेशेभोजयेदित्येतदर्थमेतदितिहेमाद्रिः॥अथक्रमप्रतिपन्नांतरंतत्रैवनं
दीमुखाःसमुद्दिश्यपितॄन्यंचद्विजोत्तमान्भोजयेद्द्विधिवत्श्राद्धेति॥अष्टानांस्थानेचत्वारःएकोतिथिःपूर्ववद्दा
कइत्यर्थः॥वृद्धिश्राद्धेविश्वेदेवाःसत्यवसुसंज्ञकाः॥कर्मांगनांदीश्राद्धेक्रतुदक्षसंज्ञकाः॥इष्टिश्राद्धेक्रतुर्दक्षइतिवच
नात्॥इष्टिश्राद्धंकर्मांगश्राद्धमितिहेमाद्रिणाव्याख्यानात्॥नचयोगानुरोधेनगश्राद्धमित्येवव्याख्योचितेतिशंक्यं सा
॥प्रधानस्यर्द्धिनोंगत्वस्यप्रवेशेनेवोद्देश्यबुद्धिपर्यवसानेसतिइष्टियैदृशस्यपंचावसेयत्वपाकार्येत्वत्रवृपाय
ग्णस्येवाविवक्षितत्वात्॥अतएवनिषेककालेसोमेचसीमंतोन्नयनेतथा॥ज्ञेयंपुंसवनेश्राद्धंकर्मांगंवृद्धिवत्कृतमि
तिवाक्येपिनिषेकादियुदृशमाध्यानामुपलक्षणार्थमितिपरिजातादयः॥सोमशब्दस्तेषामुपलक्षणार्थइतिमदन
रत्नादयः॥अस्मिन्पक्षेपुत्रजन्मादिनिमित्तके प्रधानभूतेनांदीश्राद्धेसत्यवसूनांगणे॥अन्येनिषेकादिशब्दानामुपलक्ष
तु णार्थतामन्यान्यमानानिषेकादिकर्मान्यकर्मांगनांदीश्राद्धेसत्यवसूगणितेषुक्रतुदक्षरसावित्याहुः॥केषांकर्मणा
मारंभेकार्यमित्यपेक्षायामुक्तं॥स्यादाभ्युदयिकंश्राद्धंवृद्धिपूर्तेषुकर्मसु॥गर्भपुंसवसीमंतचौलोपनयनेष्विह
॥विवाहेचानलाधेयप्रजातिश्राद्धकर्मसु॥इदंश्राद्धंप्रकुर्वीतवृद्धिनिमित्तिकं॥अन्येःषोडशसंस्कारप्रावण्यादिष्व
पीष्यते॥वाप्याद्युद्यापनादौतुकुर्युःपूर्तिनिमित्तकमिति॥अन्यैरिक्तसंस्कारेभ्योन्येषुजातकर्मादिषुप्रवणादि
कर्मादिषुचतदनावश्यकमितिज्ञापनार्थं॥कात्यायनिः॥सीमंतोन्नयनेचैवपुत्रादिमुखदर्शने॥नांदीमुखान्पितृ २६
गणान्पूजयेत्प्रयतोगृहीते॥अत्रपुत्रादीत्यादिशब्दस्तोत्रस्यापिसंग्रहइतिनिर्णयामृते॥अत्रविशेषंछंदोगपरि



शिष्टेकात्यायनः॥असकृद्यानिकर्माणिक्रियंतेकर्मकारिभिः॥प्रतिप्रयोगंनैताःस्युःमातरःश्राद्धमेवच॥आध
नेहोमयोश्चैवबैश्वदेवेतथैवच॥बलिकर्मणिदर्शेचपूर्णमासेतथैवच॥नवयज्ञेचयज्ञज्ञावदंत्येवंमनीषिणः॥
एकमेवनवेश्राद्धमेतेषुनपृथक्पृथगिति॥अत्रप्रथमःश्लोकोपराणांश्राधानादीनांकेषांचिदेवाहत्तोपिनांदीश्रा व३
द्धनावर्त्ततइत्येतत्परतयाव्यवस्थाप्यते॥अतएवापस्तंबकल्पानुसारियाज्ञिकानांविच्छिन्नाधानेनांदीश्राद्धाचारश्चि
त्यः॥केषांचित्प्रथमप्रयोगेपिनेतत्कार्यमित्यप्याहुः॥नाष्टकासुभवेश्राद्धंनश्राद्धेश्राद्धमिष्यते॥नसोष्यंतीजातकर्मप्रोषि श्राद्ध१
तागतकर्मस्विति॥अत्रद्वितीयःपादोदैहिकवाग्निगदतयाप्रथमशेषःप्रसवात्पूर्वंविहितंकर्मसोष्यंतीकर्म॥जातक
र्मांगत्वेननिषधस्तुछंदोगमात्रविषयस्तत्परिशिष्टगतत्वादितिसमयोद्योतेतदापिवृद्धिनिमित्तकंपुरुषार्थंततःपृ
र्वंभवत्येव॥वृद्धिश्राद्धंजातकर्मादीनांस्वकालातिपत्तौसद्दैकस्मिन्दिनेचौलादिनासह्क्रियमाणेषुतेषुनांदीश्राद्धं
तंत्रेणकार्यमित्यपितत्रैवपरिशिष्टे॥गणशःक्रियमाणेषुमातृभ्यःपूजनंसकृत्॥सकृदेवभवेच्छ्राद्धमादौनपृथगादि
ष्विति॥अत्रादौयज्जन्मनिमित्तंयत्संस्कारादिषुविहितंतत्सकृदेवकार्यंनपृथगित्यन्वयः॥ततश्चपुत्रजन्मनिमि
त्तंचौलांतसंस्कारांगंचनांदीश्राद्धंतंत्रेणकरिष्यइतिसंकल्पः॥यद्यपिश्राद्धवसिष्ठेननांदीमुखेविवाहेचप्रपित
मह्पूर्वकं॥नामसंकीर्त्तयेद्विद्वानन्यत्रपितृपूर्वकमित्युक्तं॥स्मृत्यर्थसारेपितृदमुखाश्चपितरोवृद्धिश्राद्धेषुभुं
जतइतिनतदाश्वलायनशाखिभिरनुसर्त्तव्यं॥मातापितामहीचैवतथैवप्रपितामही॥पित्रादयस्त्रयश्चैवमातुःपित्रा
दयस्त्रयः॥एतेनवार्चनीयाःस्युःपितरोभ्युदयेद्विजैरित्याश्वलायनस्मृतिवशेनमात्रादीनामनुलोमक्रमप्रतीतेर्वृद्धे

Indira Gandhi National Centre for the Arts

रनादरणीयंतदितिपारिजातोक्तेः॥एवंपितृर्थविप्रेभ्यःप्रदायार्घ्यंयथाविधि॥पितामहार्थविप्रेभ्योदत्वार्घ्यंचयथापुरा
॥प्रपितामहशब्दादिमिदंतेर्घ्यमितीरयेदितिपारिजातोदाहृतगर्गवचनात्तौचार्घ्यदानक्रमप्रतीतेः॥प्रपितामहसं
२७ युक्तंमंत्रमुक्त्वातमेवतु॥तदर्थमुपविष्टेभ्यस्तृतीयंसकृदेवत्वितिकारिकोक्तेश्च॥उक्त्वापितरिदंतेर्घ्यमितिपित्रेर्घ्य
मानयेदित्युक्त्वाशौनकेनएवमेवार्घ्यदानंतुकुर्यादुत्तरयोर्द्वयोरित्युक्तेश्च॥एवमेवत्रयंतोक्तेश्च॥अथजीवत्पितृक
स्यसंस्कार्येतुनांदीश्राद्धनिर्णयः॥तत्रकात्यायनः॥वृद्धौतीर्थेचसंन्यस्तेतातेचपतितेसति॥येभ्यएवपितादद्यात्तेभ्यो
दद्यात्स्वयंसुतइति॥गृह्यपरिशिष्टेतुनांदीश्राद्धंत्र्यहंत्योक्तंमहत्सुपूर्वेद्युस्तदहरेवतुतदिदमेकेमातृणांपृथक्कुर्वं
तिअथपितॄणांअथमातामहानामितित्रितयमिच्छंतितस्माज्जीवपितापिसुतसंस्कारेषुमातामहयोःकुर्यात्तस्यां मात८
जीवंत्यांमातामहस्यैवकुर्यादिति॥महत्सुउपनयनादिषुपृथग्दिनभेदेन॥पूर्वाह्णादिकालभेदेनवा॥त्रि
तयंश्राद्धत्रयंभिन्नंप्रयोगमित्याशयः॥तथाचगार्ग्यः॥मातृश्राद्धंतुपूर्वेद्युःकर्मीदिनेतुपैतृकं॥मातामहंचो
त्तरेद्युर्वृद्धौश्राद्धत्रयंस्मृतमिति॥तथाशातातपः॥पूर्वाह्णेमातृकंश्राद्धमपराह्णेतुपैतृकंतथा॥ततोमातामहानां
चवृद्धौश्राद्धत्रयंस्मृतमिति॥एकेद्दह्नीतिपरिशिष्टोक्त्यासहप्रयोगःस्वाभिमतत्वेनसूचितः॥उक्तंचतु
कल्पत्वेनवृद्धमनुना॥अलाभेभिन्नकालानांनांदीश्राद्धत्रयंबुधः॥पूर्वेद्युर्वैप्रकुर्वीतपूर्वाह्णेमातृपूर्वकमिति
॥एवंजीवत्पितृकस्यपितृतीर्थद्वयश्राद्धत्रयप्राप्तौविषयविशेषेपवादार्थमुच्यतेतस्मादिति॥तत्रपार्वण
द्वयेनैवनांदीश्राद्धफलसिद्धिरित्याशयः॥एवंजीवत्पितृकस्यमातामहश्राद्धेनैवतत्सिद्धिरित्याशयेनोक्तं

प्रत्येषुपुंसवनादिषु१

८२

तस्यामित्यादि॥एतच्चोपलक्षणार्थंजीवत्पितृमातामहस्यमातृपार्वणेनैवतत्सिद्धिरित्यपिबोध्यं॥यद्वर्गाद्यो
जीवतितत्पार्वणातिरिक्तपार्वणानुष्ठानेनांदीश्राद्धफलसिद्धिरित्यत्रतात्पर्यस्यवाक्यभेदभयेनतस्मादि त्यादि
ग्रंथेस्वीकर्तुमुचितत्वात्॥एवंचसतिमृतपितृकजीवन्मातृमातामहस्यापिपितृपार्वणमात्रेणनांदीश्राद्धसिद्धेः
साधकतयासकलदाक्षिणात्यस्वीकृतेनांदीपितृवर्गेमातृवर्गेतथामातामहस्यच॥जीवेत्तुयदिवर्गाद्यस्तंवर्गं
तुपरित्यजेदितिशास्त्रेणसंवादलाभात्॥एवंसतियेभ्यएवपितादद्यादितिशास्त्रेणपितुःपितृपार्वणंप
रिशिष्टवलेनचस्वमात्रादिपार्वणसमुच्चयेनकार्यमित्यत्यंतानुचितंपरिशिष्टस्वरसविरोधात्तस्यांजी
वत्यांमातामहस्यैवकुर्यादितिपारिजाताद्यनेकग्रंथसंमतपाठेवकारनिरोधाच्चनैगेरितिब्रूयादितिवद गिरा१
र्थप्राप्तेतरनिवृत्त्यनुवादतयातत्स्वीकारेणात्रह्येवावपंतीतिवत्श्रौतपरिसंख्यांगीकारगौरवस्याप्यना
पत्तेश्च॥तंवर्गंतुपरित्यजेदितिशास्त्रविरोधाच्च॥येभ्यएवेतिशास्त्रस्यपरिशिष्टस्यचपारिजातोक्तस्य
स्याविरोधापत्तेश्च॥तथाहितत्रोक्तपरिशिष्टमुदाहृत्यतत्संवादितयासपितुःपितृकृत्येषुअधिकारोनविद्य
ते॥नजीवंतमतिक्रम्यकिंचिद्दद्यादितिश्रुतिरितिकात्यायनवचनमुदाहृत्यपितृकृत्येषुपितामहादिसंबंधेषुश्रा
द्धेष्वित्यर्थइतिव्याख्यायकेषुचिदेवतदपवादत्वेनोद्वाहेपुत्रजननेपित्रेष्ट्यांसौमिकेमखे॥तीर्थेब्राह्मणआ
पातेषडेतेजीवतःपितुरितिमैत्रायणीयपरिशिष्टमुदाहृतं॥तदधिकारेचयेभ्यएवपितादद्यादित्येतत्सभा
नार्थाविष्णुस्मृतिरुदाहृतापितरिजीवतियःश्राद्धंकुर्यात्सयेषांपिताकुर्यात्तेषांकुर्यात्पितरिपितामहेचयेषां

Indira Gandhi National Centre for the Arts

त्रिघस्पतुनदतिरि २

पितामह इति॥ ततश्च बह्वृचपरिशिष्टस्य सुतसंस्कारविषयत्वान्न जीवंतमतिक्रम्येत्येतत्तद्विषयं मैत्रायणीय
रिक्त विषयत्वाद्येभ्य एव पिता दद्यादित्येतद्विषयमित्येवं व्यवस्था प्रतीयत इति वार्त्तं घ्नीह द्वन्द्वयोरिव क्षुद्र
सुच्च यासंभवः॥ न च मैत्रपरिशिष्टस्य सुतसंस्कारविषयत्वमस्तीति शंक्यं उद्वाहशब्दस्य कुर्तुर्द्वितीयाविभ
दपरत्वात्॥ नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः॥ अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकमिति व
चनात्॥ न च पुत्रजननिमित्तकमपि संस्कारांगं तीर्थ इव तत्रापि पुरुषार्थस्यैव विधानात्॥ न च जीवद्व
र्गत्रयाद्यस्य सुतसंस्कारेष्वपि येभ्य एव पिता दद्यादित्येतत्स्वीकार आवश्यक इति शंक्यं॥ पितरि पिता
महे प्रपितामहे च जीवति नैव कुर्यादिति विष्णूक्तरीत्यालोपस्योचितत्वप्रतीतेः॥ एतदपवादमप्यनंतरं
मावक्ष्यामः॥ यत्तु पारिजातोक्तव्यवस्थादूषणाय स्मृतिरत्नावल्यामुक्तं बह्वृचपरिशिष्टस्य बह्वृचविषयत्वा
न्मैत्रायणीयस्य तच्छाखिविषयत्वान्न व्यवस्थांतरं कल्पनीयमिति तन्न आश्वलायनपरिशिष्टे सुतसंस्का
रश्चेतिश्रवणात्परिशिष्टांतरे च तद्भिन्नकर्मणामेव श्रवणात्कर्मभेदेन व्यवस्थायाः कल्प्यत्वात्॥ शा
खानारूढ शाखाभेदव्यवस्थाकल्पनस्यैवान्याय्यत्वात्॥ दोलाकाधिकरणन्यायबाधितत्वाच्च॥ यत्तु पारि
जाते न जीवतः पितुः कुर्याच्छ्राद्धमग्निर्ते द्विजः॥ येभ्य एव पिता कुर्यात्तेभ्यः कुर्वीत साग्निकः॥ पितामहे प्येव ३८
मेव कुर्याज्जीवति साग्निकः॥ साग्निकोपि न कुर्वीत जीवति प्रपितामह इति सुमंतुवचनान्मैत्रायणीयप
रिशिष्टोक्तविषयेष्वपि जीवत्पितृकस्य साग्नेरेवाधिकारो न निरग्नेरिति प्रतिपादितं तदुद्वाहपुत्रजनन
५३

५२
निमित्तकनांदीश्राद्धव्यतिरिक्ततीर्थश्राद्धादिविषयं॥ अनग्निकोपि कुर्वीत जन्मादौ वृद्धिकर्मणि॥ येभ्य एव
पिता दद्यान्नैकोद्दिष्टपार्वणमिति॥ आचारमदनरत्नोदाहृतहारीतवचने न सुमंतुवाक्यापवादात्॥ साग्निरत्र श्रौ
ताग्निमान्स्मार्त्ताग्निमांश्च तदितरो निरग्निरित्यपि तत्रैवोक्तं॥ अतश्च निरग्नेर्जीवत्पितृकस्य तीर्थश्राद्धादौ नाधि
कार इति सिद्धं॥ यत्तु तत्रैवोक्तं येभ्य एव पिता दद्यादित्यत्र येभ्य इति पितुः पित्रादय एव परामृश्यंते न तु माता
यो मातामहादयश्च न जीवंतमतिक्रम्य किंचिद्दद्यादित्यादिशास्त्रेण जीवत्पितृपार्वणमेव निषिध्यते तत्रैव
जीवतोतिक्रमसंभवात्॥ प्रमीतस्वमात्रादिके न स्वमात्राद्युद्देशेन श्राद्धकरणे तदभावात्॥ अतिप्रसक्ता
स्य च येभ्य इति शास्त्रस्य निषेधसमानविषयत्वौचित्यात्॥ किंच येभ्य इत्युक्तवाक्ये पितुर्मात्रादिग्रहणेन
समानार्थे विष्णुवाक्ये पितृपदस्यैव तच्छेत्यं पद्यते पितरि जीवति यः श्राद्धं कुर्यात्स येषां पिता कुर्यात्तेषां
पितामहे च जीवति येषां पितामहः पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यात्॥ यस्य पिता प्रेतः
स्यात्स पित्रे पिंडं निधाय पितामहात्परं द्वाभ्यां दद्यात् यस्य पिता पितामहश्च प्रेतौ स्यातां स ताभ्यां पिंडं द
त्वा पितामहपितामहाय दद्यात्॥ यस्य पितामहः प्रेतः स्यात् स तस्मै पिंडं निधाय प्रपितामहात्परं द्वाभ्यां
दद्यात्॥ मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः॥ मंत्रोहेन यथान्यायं शेषाणां मंत्रवर्जितमिति॥ अत्र
च प्रमीतमातृमातामहोपि जीवत्पितृकः पितुः पित्रादीनिव तदीयानेव मात्रादीन्मातामहादीश्चोद्दिश्य
श्राद्धं कुर्यादिति चेन्न प्रथमवाक्ये विवक्षितार्थः स्यात्तदा येषां पितामहः कुर्यात्तेषां कुर्यादिति सानुबंधे द्वि

तीयवाक्ये तथैव विद्वांऽप्यवेतत तश्च स्वीयानां मात्रादीनां मातामहादीनां पितुर्मात्रादीनां मातामहा
दीनां च प्रमीतानां परित्यागेन पितामहस्य मात्रादीन्मातामहादींश्चोद्दिश्य श्राद्धं पुत्रजननादौ जीव
ताम४ त्पितृ पितामहस्य श्राद्धानुष्ठानमापद्येत तथा मातामहानामप्येवमित्यतिदेशाज्जीवन्मातामहस्य स्वीया
नां पैतृकाणां पैतामहानां च मात्रादिमातामहादीनामनादरेण मातामहसंबंधिनो मात्रादीन्मातामहादी
श्चोद्दिश्य तदनुष्ठानं स्यादिति प्रथममेव वाक्यं पितुः पित्रादिपार्वणस्यैव प्रापकमिति स्वीकृत्य जीव
त्पितृकस्तेन सह स्वीयानामेव मात्रादीनां मातामहादीनां च श्राद्धं कुर्यादिति स्वीकर्त्तुमुचितमिति तन्न
यतो येभ्य एव पिता दद्यादित्यादि दृशार्थकानां विष्णुस्मृत्यादिवाक्यानां प्रतिप्रसवत्वं तदैव घटते यदा नजीवं
तमतिक्रम्येत्यादीनां दीनां जीवत्पितृकं प्रति पितुः पित्राद्युद्देश्यकस्य पार्वणनिषेधपरत्वं भवति॥ न चैत
त्॥ प्रतिप्रसवत्वाभिमतवाक्यभिन्नस्य तादृशपार्वणज्ञापकस्य निषेधापेक्षितस्याभावात् तन्न श्राद्धवि
धिषु पित्रादिशब्दानां ससंबंधिकत्वमहिम्ना कर्त्तुः पित्रादीनामेव प्रतीत्या तैस्तादृशपार्वणप्राप्तेरनाशं
क्यत्वात्॥ निषेधस्य च प्रोतेभ्य एव निपृणीयादिति पितृयज्ञप्रकरणस्थाश्वलायनोक्तितुल्यप्रवृत्तिकेनंजी
वमानेन नदेयं स्यादस्याद्वरत सत्तम॥ तस्माज्जीवत्पिता कुर्याद्वाभ्यामेव न संशय इति विष्णुपुराणवचने २६
न प्राप्तस्य मृतद्वंद्वयमाद्देश्यकप्रदानस्य निषेधकतयोपपत्तेः शक्यते च द्वारीतवचनस्यानग्निकं प्रति मात्रा
दिपार्वणविषयेऽपि प्रतिप्रसवत्वं वक्तुमनायासेन॥ तस्यापि ह्रद्वितीयादौ मैत्रायणीयप्राप्तस्य सुमंतुवच

नेन निषिद्धत्वात्॥ यत्तु जीवत्पितृ पितामह मात्राद्युद्देशेन श्राद्धानुष्ठानं स्यादित्युक्तं तन्ननिष्टं पितुर्मात्र
द्युद्देशेन च तदुद्देशेनापि प्रमाणसिद्धस्य तदनुष्ठानस्य स्वीकर्त्तुमुचितत्वात्॥ यत्तु मातामहानामप्येवमि
त्यतिदेशमूलकमनिष्टापादनं तन्न तदर्थाज्ञानविजृंभितं अत्र हि मातामहानां श्राद्धं पितृपार्वणवत्कर्त्तव्यमुदि
तमंत्रोहयुक्तमित्यतिदिश्यते इत्यमतिदेशेन च यथा विसर्जनां तान्यंगान्यतिदिश्यंते तथाऽव्यवहितपूर्वग्रं
थोक्तक्रमेणैकश्चादिजीवननिमित्तायुक्तमरणनिमित्ता च पितृपार्वणगताव्यवस्था पित्र्यंगत्वाविशे
षात्॥ न चैवं मात्रादिश्राद्धं पितृपार्वणं गंधेनातिदिश्येत न चाविष्णुस्मृतिव्याख्यातारो पिमातामहानाम
प्येवमिति वचस्य तरेति कर्त्तव्यतातिदेशपरतामिवोक्तानियद्देवताव्यवस्थातिदेशपरतामन्यमानात्र
पिमातादिपार्वणातिदेशपरतां मन्यंते मन्यंते च सपत्नेषां पिता कुर्याद्येषां पितामहद्वयत्नयोर्मात्रादिमातामहा
दिपार्वणगोचरतामपि युक्तं चैतद्येषामिति यच्छब्देनापितृकर्त्तृकश्राद्धोद्देश्यतायाः पुत्रकर्त्तृकश्राद्धोद्देश्यत्व
व्याप्यत्वप्रतीतेः॥ यत्कृतकं तदनित्यमितिवद्येभ्य एव पिता दद्यादित्ययत्छब्दोपबंद्धौवकारेण व्याप्तिप्रती
तेश्चय मेवधार्त्तराष्ट्र तुभीमसेनोभ्य वेक्षते॥ क्षणमात्रेण तद्दंतिव्या श्रीमल्लगणां यथेति वत् अतो येभ्य एव पि
तादद्यादिदृशशास्त्रानुसारेण नुष्ठानेपितृकश्राद्धोद्देश्यपितृमातृमहाद्युद्देश्यकश्राद्धत्रयस्य कर्त्तव्यत्वान्नपु
त्रेणात्मीयमात्राद्युद्देशेन श्राद्धसंभवः॥ न चाश्वलायनपरिशिष्टानुसारिणुष्ठानेपितुः पित्राद्युद्देशेनतत्संभ

Indira Gandhi National
Centre for the Arts

वइति प्रागेवावेदितं अतस्तत्र उभयार्थसमुच्चयोक्तिः सादसमात्रं ॥ सत्यपि विद्युस्मृतेः सुतसंस्कारसाधार
णे आश्वलायनशाखिभिस्तत्परिशिष्टोक्त एव पक्षः संभवे कर्तुमुचितः ॥ बह्वल्पं वा स्वगृह्योक्तमिति स्मृतेः
॥ कुलपरंपरायातत्वेन यदि तच्छाखिनोपि विद्युस्मृत्युक्तमाचरंति आचरंतु ॥ न तत्र समुच्चयः परंपराया
तोस्ति ॥ एवं च जीवत्पितृमातामहेन यदा मातृपार्वणमात्रेण नांदीश्राद्धसिद्धिरंगीक्रियते न तत्र देवा अपि
॥ श्राद्धद्वयमाद्यं समुदाहृते न नित्यश्राद्धमदैवं स्यात् दैवोद्दिष्टं तथैव च ॥ मातृश्राद्धं तु युग्मैः स्याद्दैवं प्राङ्मु
खैः पृथगिति वचनेन पूर्वाह्णादिकालभेदेन पार्वणत्रयानुष्ठानपक्षे पार्वणांतरासाहित्ये न क्रियमाणे मा
तृश्राद्धं इवोक्तविधमातृश्राद्धं पितादृशे अदैवत्वबोधनात् नांदीश्राद्धमात्रेपि च विश्वेदेवाः कृताकृताः
वैश्वदेवविहीनं तु केचिदिच्छंति मानवाः ॥ युग्मास्तत्र द्विजाः कार्याः स्ते पूज्याश्च प्रदक्षिणमिति तत्रैव मार्कंडेय
वचनादित्यलं ॥ अथ सुतसंस्कारे प्रवासादिना पितृकर्तृकत्वासंभवनिमित्तक कर्त्रंतरं प्रति नांदीश्रा
द्धदेवतानिर्णयः ॥ पारिजाते कात्यायनः ॥ स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु ॥ पिंडानोद्वाहनात्ते
षां तस्याभावे तु तत्क्रमादिति ॥ ओद्वाहनात् अथमविवाहमभिव्याप्य सुतसंस्कारकर्मसु ॥ पिता स्वपितृ
भ्यः पिंडान् दद्यात् तदुपलक्षितं वृद्धिश्राद्धं कुर्यात् तस्य पितुः प्रवासादिनाऽभावे तेष्वेव कर्मसु तन्निमित्तः पि ४०
त्रसांनिध्यनिमित्तो योऽधिकारिक्रमः असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैरिति शास्त्रावगतः ॥ तेन क्र

+समावर्तनस्यापि विवाहात् प्राचीनसुतसंस्कारत्वात् विवसितकसमावर्तने पिता स्वपितृभ्यो दद्यात् ॥+ १

मेण तेषां पूर्वसंस्कृतानां मध्ये ज्येष्ठभ्रात्रादिः कुर्वन् स्वपितृभ्यो दद्यात् ॥ अजीवत्पितृकस्तु पूर्वसंस्कृतभ्रात्र
संभवे स्वयमेव स्वपितृभ्यो दद्यात् ॥ उपनयनेन कर्माधिकारसत्वात् विवाहेप्येवमेव द्रष्टव्यमिति पारिजाते
व्याख्यातं ॥ अत्र च पितुर्जीवत्पितृकस्याजीवत्पितृकस्य च ज्येष्ठभ्रात्रादेश्च तथा द्विविधस्य शास्त्रांतरे श्रा
द्धीयदेवतात्वेन येवगताः ॥ पित्रादयो मात्रादयो मातामहादयश्च तेषामेव स्वपितृभ्य इति निर्देशः ॥ स्वेज्यत्व
स्युष्य थ्यर्थत्वात् ॥ जीवत्पितृकेन स्वजनकाद्युद्देश्यकश्राद्धानुष्ठानस्य बाधितत्वात् ॥ अत एव समावर्तन
स्यमाणवककर्तृकत्वेपि तदंगभूतनांदीश्राद्धे पितुस्तदभावे ज्येष्ठभ्रात्रादेरप्राप्तकर्तृत्वप्रापणादिना वच
नस्यार्थवत्वमित्याशयेन तदुपन्यासइति बोध्यं ॥ अजीवत्पितृकइति वजीवदसंनिहितपितृकस्याप्युपलक्ष
णं स्वपितृभ्य इति च पूर्ववत् ॥ आद्यसेत्याजनकादय एव परस्यापि तु जनकादय एव नत्वा
श्वलायनपरिशिष्टोक्तरीत्या पितृपार्वणत्यागेन मात्रादयः ॥ समावर्तनस्यात्मसंस्कारत्वेन
सुतसंस्कारत्वाभावात् ॥ हेमाद्रिणा त्वत्र शास्त्रमध्याह्नविधिं दर्शयितुं व्याख्यांतरमकारि ॥
सं पित्राभावे अन्योयः कश्चित् संस्कारं कुर्यात् स ततः क्रमात् तं पितरमारभ्य संस्कार्यस्य पितृणां
यः क्रमस्तेन क्रमेण दद्यात् ॥ न तु स्वीयेभ्यः पितृभ्यः तस्मात् पितृव्याचार्यमातुलादयः संस्कार्य
स्योपनेयादेरेव पितृभ्यः श्राद्धं दद्युर्न स्वपितृभ्य इत्यत्र पारमार्थिकः पक्षो विधीयते अन्यथा स्व

Indira Gandhi National
Centre for the Arts

पितृव्यइत्यस्यानुषंगकल्पनायाअन्याय्यत्वात्पित्रादीनामपिपितृवत्स्वपितृव्योदाराविशेषेस्वपि
तृव्यःपितादद्यादित्यस्यानर्थक्यापत्तेः॥पितुःपितृव्यादिषुचेल्लक्षणद्योतकतुशब्दानुपपत्तेः॥उपनेयस्
प्रदेयकन्यायाश्चमुख्याधिकारित्वेनतदीयपित्रादीनामिज्यत्वोविरोधाच्च॥महार्णवोदाहृतेगर्भाष्टमेव
र्षेब्राह्मणआत्मनमुपनाययेदित्यादिबुधस्मृत्यादिवाक्येणिजंतमुपनायनशब्दंव्याचक्षाणैरपराकी
दिभिरुपपादितंचोपनेयकन्ययोरेवउपनयनादौमुख्याधिकारित्वमिति॥अयमेवप्रकारःपितृव्यक
र्तृकविवाहादिबोध्यः॥नचतत्रमात्राभावः॥पित्राभावेनामकरणेकर्त्रंतरप्रापकेशंखस्मृतौअन्योवाकुल
वृद्धइत्यस्यानामकरणप्रभृतिसंस्कारविषयतायाहेमाद्रिणैवोक्तत्वादिति॥अत्रापिपित्रभावोदेशाम
रणेनप्रवासादिनावा॥पितरमात्येत्यपिइज्यत्वेनइज्योपलक्षणत्वेनवासंस्कारस्येतिषष्ठीकर्मनिरूपि
तसंबंधार्थासंस्कार्यप्रतिसमावर्तनादौइज्यदेवताक्रमोयोविहितइत्यर्थः॥अतएवेज्यत्वंउपनेयादेरि
तिषष्ठ्यर्थः॥ततश्चाजीवत्पितृकस्योपनयनंकुर्वन्मातुलादिस्तदीयजनकादीनुद्दिश्यैवकुर्याज्जीवत्पि
तृकस्यजनकादीन्॥नतुपरिशिष्टानुसारेणकेवलान्प्रमीतानपिसंस्कार्यमात्रादीन्॥संस्कार्यप्रतिसं ४१
स्कारसमावर्तनादौकर्तव्यतासामुद्देशोरीत्येज्यत्वाप्राप्तेः॥अतउपनयनेसमावर्तनइवसंस्कार्यस्यैवप्र
धाधिकारःस्यात्तदासंस्कार्यस्यनांदीश्राद्धदेवतायाऔचित्यायातास्ताएवोद्दिश्यमातुलादिर्नांदीश्रा

द्धंकुर्यादितितात्पर्यार्थः॥इतिपितृव्यकर्तृकनांदीश्राद्धेदेवतानिर्णयः॥श्रौतस्मार्ताधानातिरिक्तवि
षयंचनांदीश्राद्धंपूर्वाह्णेकार्यं॥पार्वणंचापराह्णेतुप्रातर्वृद्धिनिमित्तकमितिशातातपोक्तेः॥पूर्वाह्णेवैम
वृद्धिरित्यत्रिवचनाच्च॥आधानांगंत्वपराह्णे॥आमश्राद्धंतुपूर्वाह्णेसिद्धान्नेनतुमध्यतः॥पार्वणंचाप
राह्णेस्याद्वृद्धिश्राद्धंतथाग्निकमितिगालववचनात्॥इदंचाधानपूर्वदिनेबौधायनोक्तनांदीश्राद्धवि
षयं॥आपस्तंबसूत्रानुसारिणांतुयत्सोमाधानस्यशीघ्रतरंभाष्यकारादिभिरुक्तंतत्सूत्रेत्वरपदार्थैर्निब
द्धक्रमत्वान्नपृथक्कालमपेक्षतइतिनतद्विषयं॥पुत्रजन्मनिमित्तकश्राद्धेपिनप्रातःकालनियमः॥नि
यतेषुनिमित्तेषुप्रातर्वृद्धिनिमित्तकं॥तेषामनियतत्वेतुतदानंतर्यमिष्यतइतिलौगाक्षिवचनात्॥अत्रपिंड
दानंकुलधर्मानुसारेणवैकल्पिकं॥पिंडानिर्वपणंकुर्यान्नवाकुर्यान्नराधिप॥वृद्धिश्राद्धेमहाबाहोकुलधर्मा
नवस्त्वितिभविष्योक्तेः॥पिंडदानेविशेषःशाल्यन्नंदधिमध्वक्तंबदराणियवांस्तथेतिप्रकृत्यस्मृत्यंतर
उक्तः॥द्राक्षामलकमूलानियवांश्चविनियोजयेत्॥तान्येवदक्षिणार्थंतुदद्याद्विप्रेषुसर्वदेति॥ब्राह्मणभोज
नसमयेजपविशेषोब्रह्मपुराणे॥पठेच्छकुनिसूक्तंतुस्वस्तिसूक्तंशुभंतथेति॥संग्रहे॥शुभायप्रथमांते
नद्दैवसंकल्पमाचरेदिति॥कारिकायांसंबंधनामगोत्राणिवर्जयेदत्रकर्मणीति॥चंद्रोदयेमाल्यप्रशस्त
प्रश्नावामल्लिकाकुरुयारपि॥केतक्याःपाटलायावादेयामालानलोहिताइति॥सुवेषभूषणौस्त्रसालं

Indira Gandhi National
Centre for the Arts

कारैस्तथा नरैः॥ कुंकुमाद्यनुलिप्तांगैर्गायंतु ब्राह्मणोः सदेति च॥ वृद्धिश्राद्धारंभे श्राद्धीयास्याकांतरेण वैश्वदे
वं सर्वैः कार्यं॥ आदौ वृद्धौ क्षये चांते मध्ये दर्शे तु पार्वणे॥ एकोद्दिष्टे निवृत्तेतु वैश्वदेवो विधीयत इति शांखाय
नपरिशिष्टात्॥ अस्य बह्वृचैः पंचमानस्यापि दोलाकाधिक॰ण न्यायेन सर्वसाधारण्यात्॥ यत्तु श्राद्धहेमाद्रौ
शेषमंत्रमनुज्ञाप्य वैश्वदेवक्रियां ततः॥ श्राद्धाद्धि श्राद्धशेषेण सकालं तु समाचरेदिति चतुर्विंशतिमतादंते वैश्व
देवाचरणमुक्तं॥ तच्छ्राद्धसामान्यविषयत्वाद्विशेषशास्त्रानुरोधेनाशक्तं तस्यानुकल्पभूतपक्षांतरविधायकं
॥ अनेनैवाशयेन श्राद्धसामान्यपुरस्कारेणैव कालहेमाद्रावपीदृशोपन्यासश्च॥ तथा चोक्तं दीपिकायां॥ अग्नि
मानेव तु वैश्वदेविकमनु श्राद्धं चरेत् साग्निकः॥ पश्चाद्भूतमखाद्य नग्निकजनस्तस्याग्नौ कृते वोत्तरं स्वस्यान्ते
विकिरस्य चांततं रुतस्याकांतरेणाचरेत्॥ देवाख्यं मखमततः पितृयज्ञेः स्याद्भूतयज्ञोऽथ ब्राह्मान्ते न तदंत
एव सकलं स्याद्वैश्वदेवादिकमिति॥ अत्र सकलं स्याद्वैश्वदेवादिकमिति॥ अत्र सकलं साग्निककर्तृक
निरग्निककर्तृकं च॥ न च पूर्वोक्तेन सहतुल्यविकल्पः पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः॥ पिंडय
ज्ञं ततः ततः कुर्यात्ततोन्वाहार्यकं बुध इत्याद्यनेकविशेषशास्त्रविरोधात्॥ पितृमात्राद्युद्देशेन नांदीश्रा
द्धे पितुर्माता पितामही वेति पाठः॥ तु पार्वणविषयस्त्रीकैकदेशलोपः केवलमातृपार्वणकरणे ए ४२
तामवंतु मे प्रीता इत्यूहः सक्तवाकव॥ दिष्ट देवतासंस्कार्थत्वाल्लोकपाठस्येति नांदीश्राद्धनिर्णयः॥ अथ

५ मातृकास्तु दर्वसंस्थाप्य [illegible] दर्वसंस्था वा पूजनीयाः॥

मातृकापूजनादि नांदीश्राद्धप्रयोगः॥ गौरी पद्मा शची मेधा सावित्री विजया जया॥ देवसेना स्वधा स्वाहा मा
तरो लोकमातरः॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥
वाराही च तथेंद्राणी चामुंडा सप्तमातरः॥ गौर्यादिषोडशमातृभ्यो ब्राह्म्यादिसप्तमातृभ्यश्च नमः तत्पूजो ब्रावाहयामि॥ ॐ
भूर्भुवः स्वः मातृभ्यो नमः इति नाममंत्रेण ध्यानादिदक्षिणासमर्पणांते पूजां कृत्वा गौरीर्मिमाय मंत्रपुष्पं
समर्पयामि॥ इति मातृकापूजनं॥ अथ नांदीश्राद्धं॥ ॥ सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखाः भूर्भुवः स्व
रिदं वः पाद्यं स्वाहा नमः इयं च वृद्धिः॥ मातृपितामही प्रपितामह्यः नांदीमुखाः भूर्भुवः स्वरिदं वः पाद्यं॥ पि
तापितामह प्रपितामहा नांदीमुखाः भूर्भुवः स्वरिदं वः पाद्यं॥ मातामह मातुः पितामह मातुः प्रपितामहाः
पत्नीसहिता नांदीमुखाः भूर्भुवः स्वरिदं वः पाद्यं॥ ततः पूर्ववत्सत्यवसुसंज्ञका इत्यादि आसनगंधाद्युप
चारकल्पनं स्वाहा नमः इयं च वृद्धिः एवं मातृपितामही पितृपितामह प्रपितामहा एवं मातामह इत्या
दि॥ पुनः सत्यवसुसंज्ञका विश्वेदेवा नांदीमुखाः भूर्भुवः स्वः [illegible] इदं दास्यमानं वो युग्मब्राह्मणभोजनप
र्याप्तमन्नमामं दा यथाशक्ति सोपस्कारं हिरण्यं वा स्वाहा नमः इयं च वृद्धिः॥ मातृपितामही प्रपितामह्यः
नांदीमुखाः भूर्भुवः दास्यमानमित्यादि पितृपितामह प्रपितामहाः नांदी॰ भूर्भुवः स्वः दास्यमानमि
त्यादि इयं च वृद्धिः॥ एवं मातामह॰ सपत्नीका इत्यादि गौर्यादिषोडशमातरः॥ ब्राह्म्यादिसप्तमातरश्च

मारुतसंज्ञकः अग्निः इति द्वयकः त्रोलेनिद्वर्वस्तुकं ५

वः दास्यमानयुग्मब्राह्म· उपासे · मधु · अद्यान्नमीदरी · कृतस्य नांदीश्राद्धस्य पूर्णतासिद्ध्यर्थं ब्राह्मणामलवं
तत्प्रतिनिधित्वेन द्रव्यं वा दक्षिणात्वेन स्वादानम् ॰ इदं च श्राद्धीयान्नादि प्रतिगृहीत्स्योद्देश्यं॥ प्रजापते न
त्वदेतान्यन्य इति मंत्रं जप्त्वा अनेन नांदीश्राद्धेन नांदीमुखदेवताः प्रीयंतां वृद्धिः॥ माता पितामही चैव तथैव प्रपि
तामही॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ माता महस्तत्पिता च प्रमातामहकादयः॥ एते नवं तु मे प्री
ताः यच्छंतु च मंगलं॥ इलामग्ने॰ त्वस्मे॰ इति यथाचारं मुद्रापात्रसंघट्टनेन शब्दं कुर्यात्॥ ततः उत्तिष्ठ ब्रह्मण
अप्यारमिद·र्जन· यांतु देवगणाः यच॥ इत्यादि वैदिकपौराणमंत्रैरावाहित देवताः उत्थापयेत्। विश्वेदे
वा गर्भाधानेदक्षक्रतुसंज्ञकाः॥ ततोग्निध्यानादौ कृते चक्षुषी आज्येनेत्यंते प्रजापतिं चरुणा विष्णुं चरुणा प्र

अन्वारंभणं मौसं प्र·५

जापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि प्रणीतानिधानीते प्रजाप·जुष्टं निर्वपामि प्रोक्षामीति निर्वाप प्रोक्ष
णाद्यर्चनांते कृतेपत्न्यन्वारब्ध इध्माधानाद्याज्यभागांतं कृत्वा चरुमवदानधर्मेणावदायान्वारब्धः सव्य
पाणिऊर्ध्वांगुलिं हृदयेनिधाय प्रजापतयेस्वाहेति॥ आहुतिं हुत्वा प्रजापतय इदमितित्यजेत्॥ ततो विष्णु
र्योनिमितितिसृणां त्वष्टा विष्णुरनुष्टुप्॥ गर्भाधानप्रधानाज्यहो· ॐ विष्णुर्योनिं कल्पयतु ३ स्वाहा॥ विष्णु
व इदं॥ नेजमेष इति तिसृणां त्वष्टा विष्णुरनुष्टुप् गर्भाधानाज्यं॥ नेजमेष परापत· विष्णव इ॰ यद्यप्यनुक्रमण्या ध्रु
नुसारेण विष्णुर्योनिमित्यादिहोमे पुंलिंगोक्तत्वष्ट्रादि देवतानुविताः तथापि धारिजादिग्रंथेः सकलशिष्टे

अथ वेणीदूषण बिल्वेन मादद्र्द्ध+४ अस्मिन् कर्मणि दक्षिणामाहाश्वलायनः॥ वृषभं गां सुवर्णं च दो+६
त्रेदद्यात् दक्षिणां पुत्रवान् धनवांश्चैव च वेत्कर्तीन संशय इति+

श्वानादत्ता इति नमपापिश्रादत्ताः प्रजापते हिरण्यगर्भः प्रजापतिः त्रिष्टुप् त्र्यधानाज्यहो· प्रजापते· अन्वारब्धएवे
वेसह्या ज्याहुती हुत्वा पत्न्या मूर्धानं दक्षिणेन पाणिना पाणिनाभिमृशेत्॥ अपनः शोशुचदघमिति सूक्तस्य कुत्सो अ
ग्निर्गायत्री मूर्धाभिमर्शने वि॰ अपनः शोशुचदघम॰ इति सूक्तांते मूर्ध्नि हस्तं निधाय ततस्तमपसार्य याः फालिनीरिति
जपेत्॥ याः फालिनीरित्यस्याभिषग्गोषधयोनुष्टुप्॥ जपे वि· याः फालिनी· ततोग्नेर्वाप व्यदिशितिष्ठन्नुपतिष्ठते॥ व
धेनदस्युमितिवर्णां वसुश्रुतोग्निस्त्रिष्टुप्॥ अग्न्युपस्थाने वि· वधेनदस्युं प्रहि·वातयः स्व॰ स्वस्ति· अग्निस्तु विश्ववस्तम
मितिद्वयोर्वसूर्यवोग्निरनुष्टुप् उपस्थाने· अग्निस्तु विश्ववस्तम॰ मिति॥ ततः सूर्योपस्थानं कृत्वा स्विष्टकृदादिहोमशे
षं समापयेत् परिशिष्टस्वारसिकप्रतीतेः॥ परिशिष्टान्मूर्धालंभात्पूर्वं वा सूर्योपस्थानं॥ होमशेषं समाप्य सूर्यो
पस्थानमिति वृद्धाः॥ सूर्यो नो दिवस्पात्विति पंचर्चस्य सूक्तस्य चक्षुः सूर्यो गायत्री सूर्योपस्थाने विनियोगः॥ सूर्यो नो दिव
स्पातु॰ न च न समद्दति॥ सपत्नीकः सूर्यमुपस्थाय ब्राह्मणान् शतं दश त्रीन् वा भोजयित्वा तदाशिषो गृहीत्वा मुक्त्वा च कूल
निशायां कृतनित्यक्रियः स्वलंकृतः स्वलंकृतया पत्न्या सह स्वलंकृतं गृहं प्रविशेत्। तत्र पर्यंकारूढः स्तां शुभे मुहू
र्ते पर्यंकमारोप्य शुक्लवस्त्रेण श्वगंधा कल्कं सं वेष्ट्य उदीर्ष्वेति द्वयोः सूर्या सावित्री ऋषिः॥ सूर्या सावित्री
देवता आद्या त्रिष्टुप् अंत्यानुष्टुप् जायायाः नासापुटेश्वगंधारससेचने वि· पत्नांतरेदूर्वारससेचने· इति
विशेषः॥ उदीर्ष्वातः पतिः स्वाहेति स्वाहाकारांता ध्यां मंत्राभ्यां ब्राह्मणः ब्राह्मणः दक्षतः तिष्ठन्नासापुट
+ कश्चिद्विशेषः आनायित्वा श्वगंधाया मूलमालो प्रसूस्नवतः आर्द्रमलोतु+
मंत्रेणाभूलमूलेन वानयेत् कपिलायय कासामिश्रं कांस्यपात्रेगं तं पुत्रदास्यां नासिकायां सिंचेन्मंत्रेणात स्पाति॥+

Indira Gandhi National
Centre for the Arts

योः सिंचेत् ॥ यथा रस उदरपर्यंतं आयाति ॥ उभयोर्नासाबिलयोः निषिंचेति परिशिष्टात् ॥ दक्षिणनासापुट एव
वासिंचेत् ॥ नस्तो दक्षिणतो निःसिंचेदिति परिशिष्टांतरात् ॥ ततस्तामाचमय्य अगंधर्वस्य विश्वावसोर्मुखमसीति
मंत्रेण पूर्वोक्तकर्व्यादिभिर्विष्णुर्योनिमिति तिसृभिर्नेजमेष इति च तसृभिः तिसृभिः अंगुलीभिः योनिमभिमृश्य तां
पूषा न्वेति मंत्रस्य सूर्यासावित्री ऋषिः सूर्यासावित्री देवता त्रिष्टुप् छंदः जपे विनि० तां पूषंछिवतमामेरयस्व० अ
यो गर्भमित्यस्य वसिष्ठः पर्जन्यो गायत्री ॥ जपे विनि० अहं गर्भमित्यस्य प्रजावान् प्राजापत्यो गर्भ इंद्रो नुष्टुप् जपे
वि० अहं गर्भम० पुत्रानिति जपित्वा सकृदुपगच्छेत् रेतःसेककाले प्राणे ते रेता दधाम्यसावित्यनु प्राणेप यथा
भूमिरग्निगर्भा यथा द्यौरिंद्रेण गर्भिणी ॥ वायुर्यथा दिशां गर्भ एवं ते गर्भं दधाम्यसाविति हृदयं मभिमृश्य वा
मेत् ॥ असावित्यस्य स्थाने प्रथमैकवचनांतं स्त्रीयं नाम वाच्यं ॥ संप्रदायानुसारेण क्रमेत त् ॥ परिशिष्टे तु गंध
र्वोसि विश्वावसुर्मुखमसीति उपस्थमभिमृश्य विष्णुर्योनिं कल्पयत्विति द्वाभ्यां विहत्य यो गर्भ ओषधीनामद
गर्भमदधा ओषधीष्विति जपित्वोपगच्छेत् ॥ प्राणे ते रेतो दधाम्यसावित्यनु प्राणेप यथा भूमिरिति हृदयं अ
भिमृशेत् ॥ नैके गमने मंत्रविधिमिच्छंति ॥ नत्वने न किंचित् संस्क्रियत इति तत्रौषधिनिषेकं कृत्वोपगच्छंत
कृतं ॥ परिशिष्टांतरे तु ॥ गंधर्वस्य विश्वावसो मुखमसीत्युपस्थं प्रजनयिष्यमाणो भिमृशेत् विष्णुर्योनिमिति ४४
द्वाभ्यां विदारयेत्तां पूषंछिवतमामेरयस्वेत्यनुप्रहरेत् ॥ समाप्तेर्थे जपेत्प्राणे रेतो दधाम्यसावित्यनु प्राणेपा य

[illegible]

था भूमिरिति रग्निगर्भा यथा द्यौरिंद्रेण गर्भिणी वायुर्यथा दिशां गर्भ एवं गर्भं दधाम्यसाविति चोक्तं ॥ उक्तहोमासंभ
वे पूर्वोक्तस्थालीपाकप्रज्ञा तंत्रसहिताः पंचाज्याहुतयो होतव्याः ॥ अग्नये स्वाहा ॥ इंद्राय स्वाहा ॥ प्रजापत
ये स्वाहा ॥ विश्वेभ्यो देवेभ्यः स्वाहा ॥ ब्रह्मणे स्वाहा ॥ तत्र परिस्तरणमाज्यभागौ ब्राह्मणचेत्यंगानि कृताकृतानि ॥
सर्वथैव होमासंभवे अश्वगंधामूलं पेषयित्वा उदीर्ष्वातः पतिवतीत्येकयैवर्चा दक्षिणस्यां नासिकायां निः
षिच्योपगमनं कार्यं यथोक्तं सिद्धांतभाष्ये ॥ तत्रैके ऋतुकाले अनादेशहोममिच्छंति अपरे तु उदीर्ष्वात इत्यन
या दक्षिणस्यां नासिकायां नस्तः करोति त्येतत् गर्भलंभनमिति ॥ अनुस्मृतं व होमरहितस्य एकयर्चा
नस्तःकरणमात्रस्य सोत्र गर्भलंभनपदार्थत्वं जयंतेन तदनुसारिणा कारिकाकृतापि ॥ उक्तं च
शोनकेनापि उदीर्ष्वातःपतिवतीह्येतामृचमुदीर्यास्त्वित्यादिनाग्रंथेन ॥ न चोगमनमंत्रा अप्य
पेक्षकाः ॥ जयंतादिभिरनादरणात् ॥ उदाहृतपरिशिष्टाच्च ॥ प्राजापत्यचरुहोमकरणपक्षेपि
प्रथमगर्भे विवासो कार्यः ॥ अश्वगंधारसेन नस्तःकरणं तु प्रसक्तं आवर्त्तते ॥ परिशिष्टे अथर्तुम

[illegible]

Indira Gandhi National Centre for the Arts

गर्भाधानमाचार्येणानुक्रमितेऽत्वान कार्यमित्येक इति र्भ-२

त्याः प्राजापत्यमृतौ प्रथमे इत्यक्रमप्रहोमाम्नानात्॥ अथ गर्भलंभनमृतावितिक्रतु सामान्यमधिक
त्पनस्तः कारणाम्नानात्॥ तथैव नाप्यकारादिभिः संकथनाच्च॥ इत्यनंतदेवीये संस्कारकौस्तुभे गर्भाधा
नं॥ एवं जातगर्भाया धर्मा उच्यंते॥ पाद्मे गर्भिण्यधिकारे॥ नावस्कारेषूपविशेन्मूसलोलूखलादिषु॥ जलं च
नावगाहेत शून्यागारं च वर्जयेत्॥ नतु बांगारं वल्मीकं नाधितिष्ठेत न चोद्विग्नमना भवेत्॥ विलिखेन्न नखैर्भू
मिं नांगारेण न भस्मना॥ न शयालुः सदा तिष्ठेद्व्यायामं च विवर्जयेत्॥ न तुषांगारभस्मास्थिकपालेषु समा
विशेत्॥ वर्जयेत्कलहं गेहे गात्रभंगं तथैव च॥ न मुक्तकेशा तिष्ठेत नाशुचिः स्यात्कदाचन॥ न शयीतोत्तरशि
रा न चैवाधःशिराः क्वचित्॥ न वस्त्रहीना नोद्विग्ना न चार्द्रचरणा तथा॥ नामंगल्यं वदेद्वाक्यं न च हास्याधिका भ
वेत्॥ कुर्याच्च श्वशुरयोर्नित्यं पूजां मांगल्यतत्परा॥ तिष्ठेत्प्रसन्नवदना भर्तुः प्रियहिते रतेति॥ पद्मे॥ संध्यायां नैव भो
क्तव्यं गर्भिण्या वरवर्णिनि॥ न स्थातव्यं न गंतव्यं वृक्षमूले च सर्वदा॥ सर्वौषधीभिः कोष्णेन वारिणा स्नानमा
चरेत्॥ कृतरक्षा सुभूषा च वास्तुपूजनतत्परा॥ दानशीला तृतीयायां पार्वत्या नक्तमाचरेत्॥ गर्भिणी कुंजरा
श्वादिशैलहर्म्यादिरोहणं॥ व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्॥ शोकं रक्तविमोक्षं च साध्वसं कु
क्कुटासनं॥ व्यवायं च दिवास्वापं रात्रौ जागरणं त्यजेत्॥ अतिक्षारं तु नाश्नीयात् अत्यम्लमतिभोजनं॥ अती
क्ष्णमतिशीतं च गुर्वाहारं परित्यजेत्॥ इति वृत्तान्तवेन्नारी विशेषेण तु गर्भिणी॥ यस्तु तस्यां भवेत्सुतः स्थि
रायुर्वृद्धिसंयुतः॥ अन्यथा गर्भपतनमवाप्नोति न संशय इति॥ मार्कंडेयपुराणे गर्भं प्रकृत्य॥ तस्य रक्षा ४५
सदा कुर्यान्नित्यं शौचनिषेवणात्॥ प्रशस्तमंत्रलिखनाच्छस्तमाल्यानुलेपनात्॥ विशुद्धगेहवसनाद नाथा

लोक इति पाठे मात्स्य ६

साद्धवैद्विजेति॥ तत्रैव गर्भिणीं प्रकृत्य॥ अतो नवहन्नैवाद्विं न धाकारं पथ्यो निधिं॥ परिखांवासमाक्रामद
बला गर्भधारिणीति॥ ॥ अथ गर्भिणीपतिधर्माः॥ संग्रहे॥ गर्भिणीवांछितं द्रव्यं तस्यै दद्याद्यथोचितं॥ सूते चि
रायुषं पुत्रमन्यथा दोषमर्हतीति कालविधाने॥ क्षौरं शवानुगमनं नखकृंतनं च युद्धं च वास्तुकरणं त्वतिदू
रयानं॥ उद्वाहमंबुधिजलस्पृशनोपयोगमायुःक्षयो भवति गर्भिणिकापतीनां भवति॥ क्षौरं वपनं॥ तच्चात्र कार्त्स
स्याप्युपलक्षणं॥ नोदन्वतीं भिसिस्नायान्न च श्मश्रु आदि कर्तयेत्॥ अंतर्वत्न्याः पतिः कुर्वन्नप्रजा भवति ध्रुवमि
ति क्रतुस्मरणात्॥ यत्तु वपनस्य निषेधेपि कर्त्तनं च विधीयत इति स्मृत्यंतरवचनं तद्गर्भिणीपतिव्यतिरिक्ता
नां जीवत्पितृकादीनां यो वपननिषेधस्तत्र कर्त्तनविधानपरं॥ संग्रहे॥ दहनं वपनं चैव चौलं वै गिरिरोहणं।
नाव आरोहणं चैव वर्जयेद्गर्भिणीपतिरिति॥ स्मृत्यंतरे॥ सिंधुस्नानं द्रुमच्छेदं वपनं प्रेतवाहनं॥ विदेशगम
नं चैव न कुर्याद्गर्भिणीपतिरिति एतदपवादस्तत्रैव॥ क्षौरं नैमित्तिकं कुर्यान्निषेधे सत्यपि ध्रुवं॥ पित्रोः प्रेत
विधानं च गर्भिणीपतिराचरेत्॥ एते च नियमाः सप्तममासादूर्ध्वं भवंति॥ वपनं मैथुनं तीर्थं वर्जयेद्गर्भि
णीपतिः॥ श्राद्धं च सप्तमान्मासादूर्ध्वमित्याश्वलायनोक्तेः॥ श्राद्धं श्राद्धभोजनं॥ तीर्थं तीर्थयात्रा॥ इति गर्भिणी
पतिधर्माः॥ यदि कृतेपि गर्भाधाने गर्भस्रावः तदा भावः तदा प्रतिबंधकदोषेण वनिवृत्त्यै नारायणब
लि नागबली कार्यौ॥ परिशिष्टे॥ अथ नारायणबलिर्वाक्संवत्सवत्सरा बुद्धकालेऽष्टकं कादश्यां स्नातः

Indira Gandhi National Centre for the Arts

शुचौदेशे विष्णुं वैवस्वतं यमं च यथावदभ्यर्च्य तदग्रे तिलमिश्रान्मधुघृतप्लुतान्दश पिंडान् विष्णुरूपं प्रे
तं ध्यायन् काश्यपगोत्रासौ विष्णुदैवत अयं ते पिंड इति दक्षिणाग्रेषु दर्भेषु दक्षिणामुखः प्राचीनावीती पराची
नेन पाणिना दत्त्वा पिंडानर्घ्यादिभिरभ्यर्च्य प्रवाहणं तं कृत्वा नद्यां क्षिपेत्॥ अथ रात्रावयुग्मान् ब्राह्मणान्निमं
त्र्योपोषितः श्वोमध्यंदिने विष्णुमभ्यर्च्य प्रेतमुद्दिश्य ब्राह्मणानेकोद्दिष्टविधिना भोजयित्वा तेषु ब्राह्मणसमीपे
पिंडविधिनानिनयनांतं तूष्णीं कृत्वा विष्णवे ब्रह्मणे शिवाय परिवाराय यमाय विष्णो अयं ते पिंड इत्येवं चतु
रः पिंडान् प्रक्तशेषेण दक्षिणासंस्थं दत्त्वाथ पंचमं काश्यपगोत्र देवदत्तेति प्रेतं ध्यात्वा तद्रूपाय विष्णो अयं अ
त इति दद्यादथाचांतान् दक्षिणया संतोष्यैकैकं तेषु गुणवंतं विशेषतो वस्त्राभरणगोहिरण्यैः प्रेतबुद्ध्या तोष
येदथ तैः पवित्रपाणिभिः प्रेताय काश्यपगोत्राय ते तिलोदकांजलिरिति तिलोदकं दापयित्वानेन नाराय
णबलिकर्मणा भगवान् विष्णुरिमं देवदत्तं शुद्धमपापकर्मकं करोत्विति वाचयित्वा विसर्जयेदेष नारायणब
लिकल्प एवमन्यामन्यामस्वाभिमतदेवताया मद्वितीयायामभ्यर्च्य विधिमिमं कुर्यात् सोप्येनमपापं करो
ति न तु पुण्यकृतोपि [illegible] बलिमेनमकृत्वा पारलौकिकं कुर्यात् कृतं नोपतिष्ठते तद्रिक्तं विनश्यति
तस्माद्यथासंभवमपि कुर्यादिति॥ अथ प्रयोगः॥ शुक्लैकादश्यां नदीतीरादिशुचिदेशे स्नानादिनित्यक्रि ४६
यां तेप्राणानायम्यादिति ध्यादिसंकीर्त्य नांते मदीयकुलाभिवृद्धिप्रतिबंधकप्रेतस्य प्रेतत्वनिवृत्त्यर्थं नाराय

णबलिं करिष्य इति संकल्प्य कलशस्थापनविधिना स्थापितकलशद्वयेषु सुवर्णादिजातीयप्रतिमयोर्विष्णुमावा
हयामि वैवस्वतं यममावाहयामीत्यावाह्य पुरुषसूक्तेन यमाय सोमं सुनुतेति च षोडशोपचारैः संपूज्य तत्पूर्वभा
गे रेखायां दक्षिणाग्रकुशास्तरणं ते शुंधंतां विष्णुरूपी प्रेत इति दशस्थानेषु दक्षिणसंस्थमपो निनीय मधुघृत
प्लुतान् पिंडान् सतिलान् काश्यपगोत्र चैत्र प्रेत विष्णुदैवत अयं ते पिंड इति दक्षिणामुखः प्राचीनावीती दक्षिणाग्रे
षु कुशेषु पराचीनपाणिना सव्यं जान्वाच्य विष्णुरूपं प्रेतं ध्यायन् दद्यात्॥ गंधादिभिरभ्यर्च्य॥ प्रवाहणं तं कृ
त्वा नद्यादौ क्षिपेत्॥ तस्यामेव रात्रौ श्वः करिष्यमाणः श्राद्धे क्षणः क्रियतामित्येवमेकं त्रीन्पंच वेत्येवमयुग्मान्
ब्राह्मणान् श्राद्धोद्देशेन निमंत्र्योपोषणं कुर्यात्॥ श्वोभूते मध्याह्ने विष्णुमभ्यर्च्य प्रेतं विष्णुरूपिणमुद्दिश्यैको
द्दिष्टविधिना पादक्षालनादि तृप्तिप्रश्नांतं कृत्वा ब्राह्मणसमीपे पिंडपितृयज्ञवदुल्लेखनाद्यवनेजनांतं तूष्णीं
कृत्वा विष्णवे ब्रह्मणे शिवाय सपरिवाराय यमाय च नाममंत्रैः चतुरः पिंडान्दत्त्वा विष्णो अयं ते पिंड इति विष्णुरू
ऊं पं प्रेतं ध्यायन् पंचमं पिंडं दत्त्वार्चनादि प्रवाहणांतं कृत्वाचांतान्दक्षिणया संतोष्य तेष्वेकस्मै गुणवते प्रेतबुद्ध्या वस्त्रा
भरणगोहिरण्यानि दत्त्वा ब्राह्मणांश्चोदयेत् भवंतः प्रेताय तिलोदकांजलिदानं कुर्वंत्विति ते च पवित्रपाणयः सकु
ल शतिलतुलसीपत्रतोयांजलिं प्रेताय काश्यपगोत्राय देवदत्ताय विष्णुरूपिणे अयं तिलतोयांजलिरिति दद्युः॥ ततो
ब्राह्मणान् वाचयेत्॥ अनेन नारायणबलिकर्मणा भगवान् विष्णुरिमं देवदत्तं शुद्धमपापमर्हं करोत्विति ततः स्ना
त्वानुज्ञातेति परिशिष्टोक्तनारायणबलेः स्मृत्यर्थसारानुसारी प्रयोगः॥ अथ नागबलिः॥ तत्र शौनकः॥ अथ वक्ष्या
मि सर्पस्य संस्कारविधिमुत्तमं। सिनीवाल्यां पौर्णमास्यां कारयेद्विधिवत्ततः॥ हतसर्पवधो विप्रः पूर्वजन्मनि वा

Indira Gandhi National
Centre for the Arts

यदि॥ स्नात्वा गत्पत तो ब्राह्मणं दंडं दद्यात् द्विजातये॥ वधं प्रख्यापयेच्चापि चरेत्कृच्छ्रांश्चतुर्दश॥ वधे हत्त ऋनि
कृते लोहदंडं द्विजातये॥ दद्यात्पापविशुद्ध्यर्थं श्रोत्रियाय कुटुंबिने॥ विप्राय दंड मूल्यं वा सम्भावे सति दापयेत
सा[illegible]त्वा कर्मकर्तुरेतदेव प्रदापयेत॥ निष्क्रत्रयं द्विनिष्कं वा निष्कमेकं कनीयसे॥ अनुज्ञां च गुरोर्लब्ध्वा
संस्कुर्यादनंतरं॥ व्रियं गुडाद्दिगोधूमतिलपिष्टेन वाथवा॥ कृत्वा सर्पाकृतिं तेन नवसूर्पे निधाय च॥ अनेन वक्ष्य ५१
माणेन मंत्रेण प्रार्थये द्विजः॥ एहि पूर्वं मृत सर्प अस्मिन् पिष्टे समाविश॥ संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः॥ व
स्त्रोपवीत गंधाद्यै रक्षतैः कुसुमादिभिः॥ कर्ता पुष्पांजलिं दत्वा प्राणिपत्य हरेद्वदि॥ प्रक्षालितांघ्रि पाणिस्तु प्राच
म्योपविशेद्बुवि॥ कुर्यात्संस्कारसंकल्पं प्राणायामपुरःसरं॥ यज्ञोपवीति नाकार्यं सर्वसंस्कारकर्म तु॥ लौकिका
ग्निं प्रतिष्ठाप्य सामदाधानमाचरेत॥ ततो ग्नेरग्नेर्दिग्भागे भूमिं संप्रोक्ष्य वारिभिः॥ चितिं कृत्वाथ संस्तीर्य कुशैराज्ये
काष्ठकैः॥ पर्युक्ष्याग्निं परिस्तीर्य परिशि[illegible]ष्य समर्चयेत॥ कृत्वेध्माधानपर्यंतं तत्पात्रासादनादिकं॥ आघार च
क्षुषी हुत्वा सर्पिषा यथाविधि॥ सर्पं गृहीत्वा यत्नेन चितिमारोपयेत्सुधीः॥ अपसव्ये स्पृश्य पादौ गत्वा चाग्निसमी
पतः॥ स्रुवेण जुहुयादाज्यमग्नौ व्याहृतिभिस्त्रिभिः॥ सर्पास्ये जुहुयादाज्यं व्याहृत्या च समस्तया॥ आज्यशेषं स्रुवे
णैव सर्पदेहे निषेचयेत॥ स्रुवं तत्र निधायाथ यज्ञपात्राणि बर्हिषि॥ चितिं दक्षिणं कृत्वा प्राणिपत्य समापये
त॥ चमसस्थैर्जलैः सर्पं व्याहृत्या मुद्रपाणिना॥ अग्नेरज्ञानदत्यनया सर्पाग्निं प्रदापयेत॥ उपतिष्ठेद्
[illegible]मानं नमोस्तु सर्पेति मंत्रतः॥ ज्ञानतोऽज्ञानतो वापि कृत सर्प वधो मया॥ पूर्वजन्मनि वा सर्प तत्सर्वं क्षम ४७
यस्व मे॥ इति संप्रार्थ्य नागेंद्रं स्नात्वा गत्प पुनःपुनः॥ श्रीराज्ये न ततश्चाग्निं प्रोक्ष्य व्याहृतिभिस्त्रिभिः॥ हुतेस

र्वं जले नाग्निमग्निबिंचेत्ततःपरं॥ नास्थिसंचयनं कुर्यात् स्नात्वा चापगृहं व्रजेत्॥ ब्रह्मचर्यादिकं कार्यं त्रि
रात्र शुद्धिरिष्यते॥ चतुर्थे ह्नि संप्राप्ते सचेलं स्नानमाचरेत॥ घृतपायससंयुक्तैश्च द्विजानष्टौ तु भोजयेत॥ कर्त्ता
नामपदैर्विप्रान् अर्चयेद[illegible]
[illegible]माणकैः॥ सर्पोनंतस्तथा शेषः कपिलो नाग एव च॥ कालिकः शंखपालश्च भूधरश्चाप्रकीर्ति
ता॥ पादप्रक्षालनं कुर्यादेभिर्नामपदैः पृथक्॥ गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद्द्विजान्॥ एवं कृते विधाने
वै सर्पसंस्कारकर्मणि॥ सर्पहिंसाकृतात्पापान्मुच्यते नात्र संशयः॥ कुष्ठव्याध्यादिभिर्मुक्तः सर्वथा तेषजं
स्विदं॥ आयुरारोग्यमैश्वर्यं प्राप्य कामानवाप्नुयादिति॥ अथ नागबलि संस्कार प्रयोगः॥ सैतु सिनीवा
ल्यां पौर्णमास्यां पंचम्यां आश्लेषायुक्तनवम्यां कार्यः॥ पर्षदं प्रदक्षिणीकृत्य नत्वा तदग्रे निष्कं तदर्धं वा नि
धाय मम इह जन्मनि जन्मांतरे वा ज्ञानादज्ञानाद्वा जात सर्पवधदोषपरिहारार्थं प्रायश्चित्तं मुपदिशंतु भ
वंतः॥ तद्यथा॥ सर्वे धर्मविवेक्तार इति श्लोकान्पठित्वा मामनुगृह्णंतु भवंत इति प्रणमेत॥ ते रूपदिष्टः
चतुर्दशकृच्छ्र प्रायश्चित्तं यथोक्तप्रत्याम्नायेन करिष्ये इति संकल्पपूर्वकं वपनादिविधिना तदाचरेत
॥ ततो ब्राह्मणं संपूज्य॥ पूर्वोच्चरितएवं गुणविशेषणविशिष्टायां पुण्यतिथौ मम सर्पवधदोषपरिहा
रार्थं इमं लोहदंडं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय इमां दक्षिणां च तुभ्यमहं संप्रददे॥ देवस्यत्वा॰ प्र
तिगृह्य प्रतिगृह्णामीति विप्रः॥ ततो गुर्वाज्ञां लब्ध्वा व्रियं गुडाद्दिगोधूमतिलपुष्टचूर्णकृतमपिष्टेन सर्पा

Indira Gandhi National
Centre for the Arts

कृतिं कृत्वा शूर्पे निधाय सर्पं प्रार्थयेत्॥ एहि पूर्वमृत सर्प अस्मिन् पिष्टे समाविश॥ संस्कारार्थमहं भक्त्या
प्रार्थयामि समाहितः॥ ततः भुजंगेशाय विद्महे सर्पराजाय धीमहि॥ तन्नो नागः प्रचोदयादिति॥ आवाहना
दिषोडशोपचारपूजां कृत्वा पुष्पांजलिं दत्वा प्रणिपत्य॥ भो सर्प इमं बलिं गृहाण मम अभ्युदयं कुरु॥ इति ब
लिं समर्प्य॥ हस्तौ पादौ प्रक्षाल्याचमेत्॥ शुद्धभूमौ स्थित्वा प्राणानायम्य संकल्पं कुर्यात्॥ मम इह जन्मनि ज
न्मांतरे वा ज्ञानाज्ञानात् सर्पवधदोषपरिहारार्थं सर्पसंस्कारकर्म करिष्ये॥ ततो लौकिकाग्निं प्रतिष्ठाप्य
न्वादध्यात्॥ अस्मिन् सर्पसंस्कारहोमकर्मणि देवतापरिग्रहार्थं मन्वाधानं करिष्ये॥ अस्मिन्नन्वाहि
ते ग्ना विद्या धार चक्षुष्यं तमुक्त्वा ऽत्र प्रधानं अग्नौ अग्निं वायुं सूर्यं एताः प्रधानदेवताः॥ आज्येन भूर्भुवः
स्वरिति सर्पमुखे प्रजापतिं आज्येन आज्यशेषेण सर्पं सक्ष्ये॥ समिधमाधाय ततोऽग्नेरग्निदिशि भूमौ जलेन
प्रस्य चितिं कृत्वाग्निं चितिं च परिसमुह्य आग्नेय्याद्यैः दर्भैः पिंडपितृयज्ञवत् परिस्तीर्य परिषिच्य ब
पात्राण्यासाद्य इध्माधानाधारचक्षुष्यांतं कुर्यात्॥ ततः सर्पं गृहीत्वा चितामारोप्य आपः स्पृष्ट्वा अग्नि
समीपमेत्य ततः प्रधानहोमः॥ समस्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाजप्रजापतयऋषयः॥ अग्नि
वायुसूर्यप्रजापतयो देवताः॥ गायत्र्युष्णिगनुष्टुप् बृहत्यः छंदांसि आज्यहोमे विं॰ ॐ भूः स्वाहा॥ अग्नय
इदं न मम॥ इत्यादि व्याहृतीत्रयमग्नौ जुयात्॥ चतुर्थी सर्पमुखे जुहुयात्॥ आज्यशेषं स्रुवेणैव ॥४८
सर्पदेहे निषिंचयेत्॥ ततो हस्तगृहीतेश्च मसजलैः समस्तव्याहृत्या पाणिना स्पृष्ट्वा॥ अग्नेः रक्षाणे

ओं हंसः प्रातेष्भेदवुशीर्यनः॥ नारीबेर जगेदह॥

वसिष्ठो ऽग्निर्गायत्री॥ सर्पाय अग्निप्रदाने विं॰ ॐ अग्नेर्रक्षाणो ततउपस्थानं॥ ॐ नमस्तु सर्पेभ्यो ये के च पृथि
वीमनु॥ ये अंतरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥ ये दोरोचने दिवो ये वा सूर्यस्य रश्मिभिः॥ येषामप्सु सदांस्कृ
तं तेभ्यः सर्पेभ्यो नमः॥ या इषवो यातुधानानां ये वा वनस्पतीरनु॥ ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः॥ अ
थपौराणमंत्राः॥ कर्कोटक नमस्तेस्तु शंखपाल नमोस्तु ते॥ नागराज महादेव तव रूपाणि ते नमः॥ अफणाः
पाणिनो ये च सविषा निर्विषाश्च ये॥ सर्वे सर्पा वरेशाया: पुण्यमूर्ते नमोस्तु ते॥ त्वयेयं जगती स्वामिन् स्वफ
णामंडलोपरि॥ धृतैकदेशे ह्यणुवत् तस्मै तुभ्यं नमोस्तु ते॥ त्वया भगवति श्री महासुदेजाय निर्विषं॥ स्वभोगेनेव
पर्यंकमायस्तो भोगिनां वर॥ त्राहि त्राहि महाभोगिन् सर्पोपद्रवदुःखतः॥ संततिं देहि मे पुण्यां निर्दुष्टां दीर्घद
र्शिनां॥ प्रपन्नं पाहि मां भो स्या कृपालो दीनवत्सल॥ ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मया॥ जन्मांतरे अथवे
तस्मिन् मत्स्वैरथवापि भो॥ तत्पापं नाशयक्षिप्रपराधं क्षमस्व मे॥ इति संप्रार्थ्य नागेंद्रं स्नात्वा गत्य ततः पुनः
॥ क्षीराज्येनाग्निं संप्रोक्ष्य ततो व्याहृतिभिः स्त्रिभिः॥ हुते सर्पं जले नाग्निमभिषिंचेत्ततः परं॥ नास्थिसंचयनं कुर्या
त् स्नात्वा चम्य गृहं व्रजेत्॥ ब्रह्मचर्यादिकं कार्यं त्रिरात्रं शुद्धिरिष्यते ति॥ शौनकात् बौधायनमते तु एकरात्रं॥ अ
कर्तुरेवाशौचं आशौचं पिंडदः कुर्यान्न तु तद्बंधुगोत्रजा इति वचनात्॥ चतुर्थदिने संप्राप्ते सचेलं स्नानमाचरेत्
॥ घृतपायसभक्ष्यैस्तु द्विजानष्टौ तु भोजयेत्॥ कर्त्ता नामपदे विप्रान् अर्चये हृदयमाणकैः॥ सर्पस्वरूपिणे ब्राह्मणाय
इदं ते पाद्यं॥ अनंतस्व॰ शेषस्वरूपि॰ कपिलस्व॰ नागस्व॰ कालिकः॰ शंखपाल॰ भूधरस्वरूपिणे॰ इति पादौ

Indira Gandhi National Centre for the Arts

प्रक्षाल्याचम्य॥ ततो भूर्भुवः स्वः इदमासनं॥ आस्यतां॥ सर्पस्थाने क्षणः क्रियतां॥ ओं तथा॥ प्राप्नोतु भवान् प्रा
प्तवानि॥ एवं शेषादिभ्यः॥ ओं सर्पस्वरूप इदं गंधं एवं पुष्पधूपदीपवस्त्रादिदानं॥ एवं शेषादीनामपि गंधादिदानं॥ स
र्पाय इदमन्नं परिविष्टं परिवेक्ष्यमाणं च आतृप्तेर्दीयमानं स्वाहा संपाद्यतां॥ इदं न मम॥ एवं शेषादिभ्योपि अन्नदा
नं॥ आचांतेषु विप्रेषु सर्पादिनाममंत्रैर्बलिदानं॥ वस्त्रादिपूजा च कार्या॥ ततो ब्राह्मणानां तांबूलसुवर्णादि दक्षिणाप्रदा
नं च॥ तत आचार्यादीश्च पूजयित्वा सुवर्णनागदानं कार्यमिति सर्पस्य संस्कारं कृत्वा नागबलिं ततः॥ दत्वा स्वर्णमयं
नागमपरायात्मसुच्यते इति वचनात्॥ स्वर्णनागमावाहनादिषोडशोपचारैः संपूज्य प्रार्थयेत्॥ ब्रह्मलोके च ये सर्पाः
शेषनागपुरोगमाः॥ नमोस्तु तेभ्यः सुप्रीताः प्रसन्नाः संतु ते सदा॥ वि[illegible]ष्णुलोके च ये स
र्पाः वासुकिप्रमुखाश्च ये॥ नमोस्तु तेभ्यः॰ रुद्रलोके च ये सर्पाः तक्षकप्रमुखास्तथा॥ नमस्तु तेभ्यः॰ खांडवस्पत
थादाह स्वर्गयेच समाश्रिताः॥ नमोस्तु तेभ्यः॰ सर्पसत्रे च ये सर्पा आस्तिकेन च रक्षिताः॥ नमोस्तु॰॥ मलये चैव ये सर्पाः
कर्कोटप्रमुखाश्च ये॥ नमो॰ धर्मलोके च ये सर्पा वैतरण्यां समाश्रिताः॥ नमो॰॥ समुद्रे ये च ये सर्पा वैतरण्यां समाश्रि
ताः॥ नमो॰ ये सर्पाः पार्वतीयेषु दरीसंधिषु संस्थिताः॥ नमो॰ ग्रामे वा यदि वारण्ये ये सर्पाः प्रचरंति हि॥ नमो॰ पृथि
व्यां चैव ये सर्पा ये सर्पा खिलसंस्थिताः॥ नमो॰ रसातले च ये सर्पा अनंताद्या महाबलाः॥ नमो॰ एवं स्तुत्वा तु नागेंद्रमा
चार्याय निवेदयेत्॥ देशकालौ संकीर्त्य कृतस्य सर्पसंस्कारकर्मणः सांगतासिध्यर्थं इमं हेममयं नागं सकलशं सवस्त्रं ॥४८॥
सदक्षिणं तुभ्यमहं संप्रददे॥ न मम॥ अनेन स्वर्णनागदानेन अनंतादयो नागदेवताः प्रीयतां॥ तत आचार्याय गोदानं दे

यं॥ इमां गां सवत्सां स्वर्णशृंगीं रौप्यखुरां ताम्रपृष्ठीं कांस्यदोहां सवस्त्रां सदक्षिणां तुभ्यमहं संप्रददे॥ अनेनानंतादयः प्री
यतां॥ आचार्याय ततो दद्यात्कृष्णां गां च पयस्विनीं हि॥ वस्त्रालंकारणैः पूज्य ब्राह्मणान् ब्राह्मणीं तथा॥ यस्य स्मृत्या च नामोक्त्ये
ति॥ मया यत्कृतं सर्पसंस्काराख्यं कर्म तद्भवतां ब्राह्मणानां वचनात्॥ श्रीपरमेश्वरप्रसादात् सर्वं परिपूर्णमस्तु॥ तथास्त्वि
ति ते ब्रूयुः॥ पूजयेद्विधिवद्भक्त्या ब्राह्मणांश्चैव तोषयेत्॥ कृत्वा सर्पस्य संस्कारमनेन विधिना नरः॥ विरोगो जायते
क्षिप्रं संततिं लभते शुभां॥ सर्पापद्भवविनिर्मुक्तो भवेत्सर्पप्रसादतः॥ ततः पूर्वकृतं कर्म याति नाशं महामते॥ क्षीण
पापो विशुद्धात्मा विष्णुलोके महीयते॥ ततः कर्मणः सांगतासिध्यर्थं ब्राह्मणभोजनं कार्यं॥ इति नागबलिविधानं
समाप्तं॥ ॥ एवं नागबलिं कृत्वा ज्ञातौर्ध्वदेहिकतया तत्कार्यं गया॥ श्राद्धं च अतादृशस्य गयाश्राद्धमेव कार्यं॥
एवमपि फलासिद्धौ महार्णवोक्तो विधिः कार्यः॥ स यथा वायुपुराणे॥ चतुर्विधा च यो वंध्या भवेद्दृश वियोजनात्॥
वक्ष्ये तस्याः प्रतीकारं तत्स्वरूपं निबोधय॥ हिरण्येन यथाशक्त्या सवत्सां कारयेद्दृढां॥ धेनुं पलेन वत्सं च पादेन गुरु
रब्रवीत्॥ हिरण्येन यथाशक्त्येति॥ पलेन नैवा तदर्धेन तदर्धेनापि वा पुनरिति परिभाषोक्तप्रकारेण कुर्यादित्य
र्थः॥ धेनुं रूप्यखुरां रत्नं तस्याः पुच्छे नियोजयेत्॥ घंटां गले तिबध्नीयात्सवत्सां प्राङ्मुखः सुधीः॥ चंदनागरुकर्पूर
गंधमाल्यैः सुशोभनैः॥ उपचारैः षोडशभिर्नैवेद्यं पापसंभवेत्॥ मोदकं च तथापूपं गुडं लवणमेव च॥ जीरकं
च सुविस्तीर्णं पूर्पं वेणुमयेद्दृढे॥ धेनोरेकं प्रदातव्यं ब्राह्मणस्त्रीषु चैव हि॥ षडुष्टौ दश वा दद्यात्तदनंतरमेव च॥ उ
पचारैः षोडशभिः पूजयेति शेषः॥ मोदकादिभिः परिपूरितमेकं शूर्पं धेनोः स्थापयित्वोक्तद्रव्यपरिपूरितान्येव
शूर्पाणि षडष्टौ दश वा सभर्तृकाभ्यो ब्राह्मणीभ्यो दद्यादित्यर्थः॥ ब्राह्मणं सर्वशास्त्रार्थकुशलं धर्मवेदिनं॥ वि

या विनयसंपन्नं शांतं चैव जितेंद्रियं॥ अलोलुपं सर्वजनप्रियं कल्मषवर्जितं॥ आहूय मंत्रयां संपूज्य वस्त्राद्यैर्गंध
पुष्पकैः। ततो नैवकारयेत्सूजामादितो धेनुवत्सयोः॥ होमं च कारयेत्तत्र समिदाज्यं वरूत्कटं॥ पूजायां च होमे च मं
त्रमाह॥ सोमो धेनुमिति मंत्रं समुच्चार्य ततः पुनः॥ अस्य गौतम ऋषिः। त्रिष्टुप्। विहितार्थे वि०॥ ओं सोमो धेनुं सो
मो अर्वंतमाशुं सोमो वीरं कर्मण्यं ददाति॥ सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै॥ सोमे विनियुक्ता
या अप्यस्याः संयोगपृथक्त्वन्यायेन धेनुरपि देवताहोममुत्कटं कारयेदित्यभिधानात् समिदादिभिः प्रत्येक
मष्टोत्तरसहस्रं कुर्यात्॥ धेनुदानमाह॥ आङ्मुखायोपविष्टाय प्रदद्यात्तामुदङ्मुखः॥ मंत्रेणानेन विधिवत्पुच्छं
हस्ते निधाय च॥ दानमंत्रमाह आर्द्रश्लोकद्वयेन॥ या धेनुर्या गिरस्तां स त्रेत्राविष्टा सुरभेश्च या॥ दुहिता या तथ
भानोरंशेश्च वरुणस्य च॥ या वै गावः प्रवर्त्तंते वनेषूपवनेषु च॥ प्रीणंतु ता मम गृहं पुत्रपौत्रप्रदाः सुखं॥
प्र यच्छंतु दिवारात्रमविच्छेदं तथान्वये॥ एवं दत्वा तु तद्दानं प्राणिपत्य विसर्जयेदिति वंध्यात्वहरसुवर्ण
धेनुदानं॥ यद्यास्य पारुणसंवादोक्तं कार्यं॥ तद्यथा॥ निःश्रेयारणाशैवानपत्यः प्रजापतद्गुरुपक्रम्या अरुणा उ
वाच॥ वृथा गृहं धनं धान्यं अपुत्रं जन्म निःफलं॥ ममोपरि दयां कृत्वा प्रायश्चित्तं वदस्व मे॥ श्रीसूर्य उ०॥ तीर्थया
त्राप्रकर्त्तव्या रेवा तापीसमुद्भवा॥ एकेनापि वस्त्रेण दंपती स्नानमुत्तमं॥ श्रवणं हरिवंशस्य ब्राह्मणो ह्यानं स्व
ण॥ अष्टोत्तरशतान्विप्रान् मिष्टान्नेन तु तर्पयेत॥ ईशा वास्येति मंत्रेण जपं कुर्यात्सहस्रकं॥ दशांशहोमसंयु
क्तं कुर्याच्च विधिवन्नतः॥ पश्चात्तुलन्नसंख्याकैः शिवं संपूज्य यत्नतः॥ स्वर्णधेनुः प्रदातव्या सवत्सा सुरभी ५०
तथा॥ घृतकुंभं वैनतेय ब्राह्मणाय निवेदयेत॥ एवं कृते वैनतेय अपत्यं जायते कलाविति॥ द्विविधस्याप्यस्य कर्म

विपाककर्मणः कृच्छ्रादिप्रायश्चित्तपूर्वकमेवानुष्ठेयतया महार्णवादिसंमतत्वात्संक्षेपेण कृच्छ्रादिलक्षण
मुच्यते॥ तत्र याज्ञवल्क्यः॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन चैवायं पादकृच्छ्रः प्रकीर्त्तितः॥
यथा कथंचित्त्रिगुणः प्राजापत्योयमुच्यते॥ आपस्तंबः॥ सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः॥ चतु
र्विंशतिरयाच्याः परे निरशनास्त्रयः॥ प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत्॥ अयाचितं तु राजन्ये त्रिरात्रं ब्रा
ह्मणे स्मृतमिति॥ पादकृच्छ्रविधा विस्तं व्यवस्थामुक्तोर्धस्य पादोनस्य च विनियोगविशेषमाह॥ सायं प्रात
र्विनार्धस्यापादोनेन नक्तवर्जितमिति॥ याज्ञवल्क्यः॥ अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः॥ कृच्छ्रा
तिकृच्छ्रः पयसा दिवसानेकविंशतिं॥ द्वादशाहोपवासेन पराकः परिकीर्त्तितः॥ येषु नवदिनेषु भोज
नं प्रा... तत्र पाणिपूरान्नानियम्यते॥ यत्र कुक्कुटिकादिना ग्रासपरिमाणं कृत्वा एकग्रासपर्याप्तं दुग्धमे
कविंशतिदिने प्रश्नीयात्॥ प्राजापत्योक्तद्वाविंशत्यादिसंख्यया वा॥ यावता प्राणधारणं भवति तावदिति
मदनपारिजातः॥ पयोत्र पानीयं॥ अयमत्र कृच्छ्रातिकृच्छ्र इति गौतमोक्तैरिति भवदेवः॥ गोमूत्रं गोमयं
मद क्षीरं दधि सर्पिः कुशोदकं॥ जग्ध्वापरेह्न्युपवसेत्कृच्छ्रं सांतपनं चरेत्॥ पृथक्सांतपनं द्रव्यैः षडहः
सोपवासकः॥ सप्ताहेन तु कृच्छ्रोयं सांतपनः स्मृतः॥ तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्॥ एकरा
त्रोपवासश्च तप्तकृच्छ्र उदाहृतः॥ अंगिराः कपिलायां तु दुग्धायां धारोष्णं तु पयः पिबेत्॥ एष व्यासः
कृतः कृच्छ्रः श्वपाकमपि शोधयेदिति॥ तिथिवृद्ध्या चरेत्पिंडान् शुक्ले शिख्यंडसंमितान्॥ एकैकं ह्रास
येत्पिंडं कृष्णे चांद्रायणं चरन्॥ एतद्यवमध्यं चांद्रायणं। कृष्णादि शुक्लांतं तु पिपीलिकामध्यमित्युच्य

Indira Gandhi National Centre for the Arts

तेः॥ बौधायनस्तु चतुर्दश्यामुपोष्य कृष्णादिवापयित्वा पर्वणि पंचदशग्रासनियमं कृत्वा चांद्रायणमार
भेतेत्याह॥ ॥अथ प्रत्याम्नायाः॥ अपरार्के॥ समिद्घृतहविर्धान्यं तिलान्वा मारुताशनः॥ हुत्वा द्वादशस
हस्रं गायत्र्या कृच्छ्रमाप्नुयात्॥ द्वादशैव सहस्राणि जपेद्देवीमुपोषितः॥ जलांते विधिवन्मौनी प्राजापत्ये
प्रमुच्यते॥ अन्नदो नहिरण्येन द्वादशब्राह्मणान्शुचीन्॥ तर्पयेन्मारुताशी च श्रोत्रियान्कृच्छ्र उच्यते॥ उपो
ष्य द्व्यायुक्तस्तिलपात्राणि धर्मतः॥ द्वादश ब्राह्मणादिभ्यः प्राजापत्येन तत्समं॥ स्वयमाहत्य यो मूर्ध्नी तृणमा
त्रानुपोषितः॥ दद्याद्गोमंडले कृच्छ्रो द्वादशैव न संशयः॥ भारो द्विसहस्रपलपरिमितः॥ प्राणायामशतं कृत्वा
त्रिःशोत्तरमार्जिषु॥ अहोरात्रोषितस्तिष्ठेत् साङ्गुष्ठः कृच्छ्र उच्यते॥ नमस्कारसहस्राणि द्वादशैव दृढव्रतः
गोविप्रपितृदेवेषु कुर्यात्कृच्छ्रत्रयं भवेत्॥ कौर्मे॥ तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं॥ ताम्रपात्रं द
पलं जघन्यं परिकीर्तितं॥ द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चोत्तरं स्मृतं॥ सर्वत्र यात्राथां कृच्छ्रसंख्यया योजनं
संख्या स्यादिति उक्तं रौद्रे; स्मृत्यर्थसारे॥ वसिष्ठः॥ गोमूत्रेण स माषुकं पावकं चौपयोजयेत्॥ कृच्छ्रमेकं का
कं प्रोक्तं दृष्टमंगिरसा स्वयं॥ निश्वासी नोदिवा तिष्ठेत्रिरात्रं मारुताशनः॥ प्राजापत्यं विजानीयात् कूष्मांडैर्जुह
याद्घृतमिति॥ पाराशरः॥ कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयं॥ पुण्यतीर्थे नार्द्रशिराः स्नानं द्वादशसंख्यै
ति॥ माधवीये॥ प्राजापत्यं चरेन्विप्रो यद्यशक्तः कथंचन॥ आदानि पंचविप्राण्यानू भोजयेत्सम्यगीक्षितान्॥
एकमध्ययनं कुर्यात्प्राजापत्यमथापि वा॥ दद्याद्द्वादशसाहस्रं गवां मुष्टिं विचक्षणः॥ चतुर्विंशतिमंते कृच्छ्रो ५२
देव्ययुतं चैव प्राणायामशतद्वयं॥ तिलहोमसहस्रं तु वेदपारायणं तथा॥ विप्रा द्वादश वा भोज्याः पावकेष्टि

स्तथैव च॥ अन्याधापावमानेष्टिः समान्या दुर्मनीषिणः स्मृत्यर्थसारे रुद्रैकादशनी रुद्रो द्वादशांशोनिवर्त्ती
नात्॥ तत्र दशदस्तेन दंडेन त्रिंशद्धस्ता निवर्तनमिति तस्य द्वादशांशभूमिदाने न कृच्छ्र इत्यर्थः माधवीये॥ प्रा
जापत्यक्रियाशक्तौ धेनुं दद्यात्पयस्विनीं॥ धेनोरभावे दातव्यं तुल्यमूल्यं न संशयः॥ मदनरत्ने ब्राह्मे॥ गवाम
भावे निष्कं स्यात्तदर्धं पादएव वा॥ याज्ञवल्क्यः॥ निष्कं सुवर्णाश्चत्वार इति॥ एतत्परिमितं हेमरूप्यं वा अ
त्यशक्तौ पादार्धं तत्समं धान्यादि वा दद्यादिति स्मृत्यर्थसारः॥ षडुपवासाः प्राजापत्यप्रत्याम्नायः॥ एकवि
प्रभोजनमुपवासस्येति च॥ पार्थिवधेनौ रूप्यमाषकं वा दद्यादिति हारीतोक्तं रूप्यमाषकदानं नक्तस्ये
ति शूलपाणिः॥ षड्विंशन्मते धेनुः पंचभिराद्यानां मध्यानां त्रिपुराणिका॥ कार्षापणैकमूल्यादिकमूल्यादि
कनिष्ठानां प्रकीर्तिता॥ द्वात्रिंशत्पणिका गौर्वा वत्सः पौराणिकोभवेदिति च॥ यज्ञविषयमेतदिति शूलपाणिः
॥ कात्यायनः॥ द्वात्रिंशत्पणिका गावः॥ दशकर्षापणा चेनाविति॥ षड्विंशन्मते॥ प्राजापत्ये तु गामेकामं
दाति कृच्छ्रे द्वयं स्मृतं॥ चतु०॥ ते॥ प्राजापत्ये तु गामेकां दद्यात्सांतपने द्वयं॥ पराके तप्तातिकृच्छ्रे तिस्रस्तु ता
स्मृताः॥ अष्टौ चांद्रायणे ज्ञेयास्तिस्रो वा शक्त्यपेक्षया॥ शूलपाणिः॥ चांद्रायणं तु कुर्वाणः कुर्युः कृच्छ्रचतु
ष्टयं॥ तथा॥ चांद्रायणपराकाभ्यां निष्कृतिं धीमशक्नुयात्॥ स करिष्यामग्रभ्यर्थ प्राजापत्यस्य पंचकं॥ अ
त्र गुरुलघुपक्षाणां गुरुलघुकृच्छ्रादि भेदेन शक्ताशक्तभेदेन वा व्यवस्था॥ कृच्छ्रातिकृच्छ्रे धेनुचतुष्टयमि
ति मदनः॥ ॥अथ प्रायश्चित्तस्वीकारप्रकारः॥ पर्षदमुपवेश्य तस्मै धेनुं हस्त्यौदत्वा स्वपापं निवेदये

Indira Gandhi National
Centre for the Arts

त्॥ पापं विख्यापयेत्पापी दत्वा धेनुं तथा वृषं तथेति पराशरोक्तेः॥ महापातकादिष्वपि कं कल्पमिति मिताक्षरायां॥
विष्णुः॥ पाद वृद्ध्या वस्त्रदानं कृच्छ्रार्द्धे तैलकांचनं॥ पादहीने तु गामेकां कृच्छ्रे गोमिथुनं स्मृतं॥ आंगिराः सचेलं वाग्य
तः स्नात्वा क्लिन्नवासाः समाहितः॥ उपस्थाय ततः शीघ्रमातिमानं धरणीगतः॥ गात्रैश्च शिरसा चैव न च किंचि
दुदाहरेत॥ प्रदक्षिणीं कुर्यादिति महार्णवे॥ सर्वधर्मविवेक्तारो गोप्तारः सकला द्विजाः॥ मम देहस्य संशुद्धिं
म.ता.२५ कुर्वंतु द्विजसत्तमाः॥ मयाकृतं महाघोरं ज्ञातं किल्विषं॥ प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ॥ पूज्यैस्त
तः पवित्रोहं भवेयं द्विजसत्तमाः॥ मामनुग्रह्णंतु भवंत इति वदेदित्याचारः॥ आंगिराः॥ दृष्ट्वा पृष्टोति किं कार्य
मुपविश्याग्रतः स्थितं॥ यदि चेद्वेदसे सत्यं नियतं प्राप्नुयेशुभं॥ यथागतो स्य सत्येन न स्वं पृच्छति कर्हि
चित्॥ एवं तैः समनुज्ञातः सर्वं ब्रूयादशेषतः॥ ततः पर्षदनुज्ञया ब्राह्मणानां तु क्षत्रियाणां पुरोहितः॥ वै
श्यानां याजकश्चैव प्रायश्चित्तं समादिशेत्॥ शृणुष्वासौ इदं विप्रा यत आदिशते व्रतं॥ तत्ते यत्नेन कर्तव्यम
न्यथा नेह था भवेदिति अनेन प्रायश्चित्तेन ते शुद्धिर्भविष्यतीति॥ ततः पर्षदं विसृज्य देशकालौ संकीर्त्य मुक
पापनिवृत्यर्थं पर्षदुपदिष्टमिदं प्रायश्चित्तं पूर्वोत्तरांगसहितमाचरिष्ये इति संकल्प्य कल्पमाह विष्णुः॥ दिनांते न
खरोमादीन् प्रवाप्य स्नानमाचरेत्॥ भस्मगोमयमृद्वारि पंचगव्यादि कल्पितैः॥ मलापकर्षणं कार्यं बाह्यशौ
चोपसिद्धये॥ दंतधावनपूर्वेण पंचगव्येन संयुतं॥ व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शने॥ वपने विशेषो ५२
पराके॥ पापसंचयेशिखाघमिति॥ ततः आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च॥ ब्रह्म प्रज्ञां च मेधां च त्वं

नो धेहि वनस्पत इति॥ दंतधावनं॥ अनेन शाखाभिमंत्रणमिति केचित्॥ जिह्वोल्लेखनमप्याचारतः॥ भ
स्मस्नानविधिर्लैंगे॥ ईशानेन शिरोदेशे मुखे तत्पुरुषेण तु॥ हृद्देशे मघोरेण गुह्यं वामेन सुव्रत॥ सद्येन पा
दौ सर्वांगं प्रणवेन तु शोधयेत्॥ ईशानादि पदोये ते मंत्रैश्च तु र्थ्यंते रीशानादि नाम भिर्वालापये दित्यर्थः॥ गोम
यस्नानं गृह्यपरिशिष्टे॥ प्रातरुत्सृष्टं गोमयं तदंतरिक्षस्थं सगृह्य भूमिष्टं वो पर्यधश्च संत्यक्त्वा तीर्थमेत्य धौतपा
णिपादो दक्षिणाग्रं प्रणवेनादित्सुनिक्षिप्योत्तरं तीर्थाद्भिः स्वामध्यमं मानस्तोक इत्यभिमंत्र्य गंधाद्वारामिति त्वचा मूर्धा
दि सर्वांगमालिप्य प्रांजलिर्हिरण्यशृंगेति द्वाभ्यां अवते हेलेति द्वाभ्यां अवते हेलेति द्वाभ्यां प्रसंम्राजेति सूक्तेन
प्रार्थ्य॥ याः प्रवतः एतया तीर्थमभिमृश्यावगाह्य द्विराचम्य मार्जयेदिति॥ मृत्स्नानविधिः शैवे॥ अश्वक्रांते र
थक्रांते मंत्रेण मंत्रमृत्तिकां॥ उद्धृतासीति मंत्रेण सुसमाहितः॥ नमो मित्रस्येति च सूर्यायादर्शयित्वा
च भानवे॥ आरुह्येति च गात्राणि समालभ्य द्विराचमेत्॥ वारिस्नानविधिर्ब्राह्मे॥ आपो अस्मानिति कामा
स्करा भिमुखः स्थितः॥ इदं विष्णुर्जपित्वा च प्रतिस्रोतो निमज्जति॥ पंचगव्यविधिर्मात्स्ये॥ सावित्र्या दाय गो
मूत्रं गंधद्वारेति वै शकृत्॥ आप्यायस्वेति च क्षीरं दधिक्रावेण [illegible] तेजोसीति घृतं तद्वत् देवस्य त्वे
ति चोदकं॥ कुशमिश्रं जपेद्विद्वान् पंचगव्यं मंत्रैस्तत इति॥ स्नानांगतर्पणादि विधाय कर्तमंजाबालिः॥ आ
रंभे सर्वकृच्छ्राणां समाप्तौ च विशेषतः॥ आद्यैनेव द्विशाला ग्रौ जुहुयाद्याहृतीः पृथक्॥ श्राद्धं कुर्याद्गणे
चगो हिरण्यादि दक्षिणेति॥ होमो ष्टोत्तरशतमष्टाविंशतिर्वेति महार्णवः॥ दक्षिणामिति पाठे त्वं तत्र वश्य
द्धं॥ शातातपः॥ विधाय वैष्णवं श्राद्धं सांकल्पं निजकाम्यया॥ धेनुं दद्याद्विजेभ्योथ दक्षिणां च स्वशक्तितः इति

Indira Gandhi National
Centre for the Arts

॥ आज्यहोमे पंचगव्यहोमे चेध्मादवनादिस्थालीपाकेतिकर्तव्यतां केचिन्नेच्छंति ॥ आज्यहोमे पापहृन्महाविष्णुर्देवतेति च वदंति ॥ ततो ब्रह्मकूर्चविधिना पंचगव्यप्राशनं ॥ अतं निशामुखइत्युक्तवचने महार्णवादिभिस्तास्येनोक्तः प्रायश्चित्तसंकल्पो व्रतमिति माधवः ॥ पालाशादिपात्रे ताम्राद्याः गोमूत्रं अष्टमाषपरिमाणं गायत्र्यादाय श्वेतगोशकृत् षोडशमाषमितं गंधद्वारामित्यादाय पीतगोक्षीरं द्वादशमाषपरिमितमाप्यायस्वेत्यादाय नीलगो दधि दशमाषमितं दधिक्राव्णइत्यादाय कृष्णगोघृतमष्टमाष्यमितं तेजोसिशुक्रमसीत्यादाय कुशोदकं च तुर्माषमितं देवस्यत्वेत्यादाय सप्तपत्रै रक्षितमाग्नेयैः कुशै रिरावतीदं विष्णुर्मानस्तोके शंवतीभिर्हुत्वा प्रणवेनालोड्य ॥ तेनाभिमंत्र्य तेनोद्धृत्य तेनैव पिबेदिति स्मृत्यर्थसारः ॥ मरीचिस्तु ॥ अग्रयेस्वाहा सोमाय स्वाहेदं विष्णुर्मानस्तोके गायत्र्या प्रजापते न त्वदेतान्यादुतीर्जुहुयादित्याह ॥ माधवीये प्रजापतिः ॥ अग्नयेचैव सोमाय सावित्र्या च तथैव च ॥ प्रणवेन तथा हुत्वा स्विष्टकृच्च तथैव चेति ॥ जाप्ते ॥ उद्धृत्य स्विराच मेदिति ॥ जाबालिः ॥ स्त्रीणां होमो न दातव्यः पंचगव्यं तथैव च ॥ पराशरः ॥ स्त्रीशूद्रस्य तु शुद्ध्यर्थं प्राजापत्यं समाचरेत् ॥ पंचगव्यं च कुर्वीत स्नात्वा शुचिर्भवेत् ॥ स्त्रीशूद्राणां पंचगव्ये विकल्प इति महार्णवे ॥ प्राशनपक्षेपि कापिलगव्यं शूद्रेण न पेयं ॥ स्त्रीशूद्रौ तु विप्रैः कारयित्वा तूष्णीं पिबत इति स्मृत्यर्थसारः ॥ मदनदेवीये ॥ आहृत्य प्रणवेनैव तथाप्यप्रणवेन तु ॥ प्रणवेन समालोड्य प्रणवेनैव तत्पिबेदिति ॥ साशनारंभे व्रतं गृह्णीष्य इति विप्रान् प्रार्थयेदिति वृद्धाः ॥ ततः प्रायश्चित्तमुख्य विधाप्योक्तप्रत्याम्नायेन वा कृत्वा व्याहृतिहोमविष्णुश्राद्धगोदानानि पूर्वनद्विधाय कृतं प्रायश्चित ५३

तं पूर्णमस्त्विति ब्राह्मणान्वाचयित्वा पापद महाविष्णुस्मरणं कुर्यादिति ॥ अवादीत्थमनंतेन कृच्छ्रादेर्लक्षणादिकं ॥ देवेशः प्रीयतां तेन यस्य ज्ञानमयं तपः ॥ १ ॥ ॥ इत्यनंतदेवीये संस्कारकौस्तुभे कृच्छ्रादिविधिः ॥ एवं कृच्छ्राद्यनुष्ठानपूर्वकमहार्णवोक्तमरुणसंवादोक्तं वा कर्म कृत्वा कारायेतार संपूर्णतां वाचयेत् ॥ माधकृत्यौ कां पार्थिवपूजां प्रत्यहं कृत्वाभिलाष्टकजपं वा संवत्सरं कुर्यात्तद्यथा ॥ विश्वानर उवाच ॥ एकं ब्रह्मैवाद्वितीयं समस्तं सत्यं सत्यं नेह नानास्ति किंचित् ॥ एको रुद्रो न द्वितीयोवतस्थे तस्मादेकं त्वां प्रपद्ये महेशं ॥ १ ॥ एकः कर्ता त्वं हि सर्वस्य शंभो नानारूपेष्वेकरूपोस्यरूपः ॥ यद्वत्प्रत्यं सूर्य एकोप्यनेकस्तस्मान्नान्यं त्वां विनेशं प्रपद्ये ॥ २ ॥ रज्जौ सर्पः शुक्तिकायां च रूप्यं नैरः पूरस्तन्मृगाख्ये मरीचौ ॥ यद्वत्तद्विष्वगेषः प्रपंचो यस्मिन्ज्ञाते तं प्रपद्ये महेशं ॥ ३ ॥ तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ प्रसादः ॥ पुष्पे गंधो दुग्धमध्ये च सर्पिर्यत्तच्छंभो त्वं ततस्त्वां प्रपद्ये ॥ ४ ॥ शब्दं गृह्णास्यश्रवास्त्वं हि जिघ्रेरघ्राणस्त्वं व्यंघ्रि
हृ॰ रायासि दूरात् ॥ व्यक्षः पश्येस्त्वं रसज्ञोप्यजिह्वः कस्त्वां सम्यग्वेत्यतस्त्वां प्रपद्ये ॥ ५ ॥ नो वेदस्त्वामीश साक्षाद्विवेद नो वा विष्णुर्नो विधाताखिलस्य ॥ नो योगींद्रा नेंद्रमुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ॥ ६ ॥ नो ते गोत्रं नेश जन्मापि नाख्या नो वा रूपं नैव शीलं न देशः ॥ इत्थंभूतोपीश्वरस्त्वं त्रिलोक्याः सर्वान्कामान्पूरयेस्तद्भजे त्वां ॥ ७ ॥ त्वत्तः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोतिशांतः ॥ त्वं वै वृद्धस्त्वं युवा त्वं च बालस्तत्किं यत्त्वं नास्यतस्त्वां नतोस्मि ॥ ८ ॥ स्तुत्वेति भूमौ निपपात विप्रः स दंडवद्यावदतीव हृष्टः ॥ तावत्स बालोखिलवृद्धवृद्धः प्रोवाच भूदे {कृत्स्नवेदरूपो} श्री ५६

हृ॰

ववरं वृणीहि ॥ ९ ॥ ततउत्थाय हृष्टात्मा मुनिर्विश्वानरः कृती ॥ प्रत्युवाच विकिमज्ञातं सर्वज्ञस्य तव प्रभो ॥ १० ॥
सर्वान्तरात्मा भगवान् सर्वः सर्वप्रदो भवान् ॥ याच्ञां प्रति नियुंक्ते मां किमीशो दैन्यकारिणीं ॥ इति श्रुत्वा व
चस्तस्य देवो विश्वानरस्य हृद् ॥ शुचेः शुचिव्रतस्याथ शुचिः स्मित्वाब्रवीच्छुचिः ॥ १२ ॥ बाल उ० ॥ त्वया शुचेः शु
चिष्मत्यां यो भिलाषः कृतो हृदि ॥ अचिरेणैव कालेन स भविष्यत्यसंशयः ॥ १३ ॥ तव पुत्रत्वमेष्यामि शुचि
ष्मत्यां महामते ॥ ख्यातो गृहपतिर्नाम्ना शुचिः सर्वामरप्रियः ॥ १४ ॥ अभिलाषाष्टकं पुण्यं स्तोत्रमेतत्त्वयेरितं
॥ अब्दं त्रिकालं पठनात्कामदं शिवसन्निधौ ॥ १५ ॥ एतत्स्तोत्रस्य पठनं पुत्रपौत्रधनप्रदं ॥ सर्वशांतिकरं
चापि सर्वापत्तिविनाशनं ॥ १६ ॥ स्वर्गापवर्गसंपत्तिकारकं नात्र संशयः ॥ प्रातरुत्थाय सुस्नातो लिंगमभ्य
र्च्य शंभवे ॥ १७ वर्षं जपन्निदं स्तोत्रमपुत्रः पुत्रवान् भवेत् ॥ वैशाखे कार्तिके माघे विशेषनियमैर्युतः ॥
१८ ॥ यः पठेत्स्नानसमये लभते स कलं फलं ॥ कार्तिकस्य तु मासस्य प्रसादादहमव्ययः ॥ १९ ॥ तव पुत्रत्व
मेष्यामि यस्त्वन्यस्तत्पठिष्यति ॥ अभिलाषाष्टकमिदं न देयं यस्य कस्यचित् ॥ २० ॥ गोपनीयं प्रयत्नेन
महावंध्याप्रसूतिकृत् ॥ स्त्रिया वा पुरुषेणापि नियमाल्लिंगसन्निधौ ॥ २१ ॥ अब्दं जप्तमिदं स्तोत्रं पुत्रदं नात्र सं
शयः ॥ इत्युक्त्वांतर्दधे बालः सोपि विप्रो गृहं गतः ॥ २२ ॥ इति श्रीस्कंदपुराणे काशीखंडे विश्वेश्वरस्तोत्रं सं ५४
पूर्णं ॥ एवमपि फलाप्राप्तौ दत्तकपुत्रस्वीकारं कुर्यात् ॥ अथ दत्तके ग्राह्याग्राह्यविवेकः ॥ तत्र शौनकः ॥ ब्राह्म
णानां सपिंडेषु कर्तव्यः पुत्रसंग्रहः ॥ तदभावे सपिंडे वा अन्यत्र तु न कारयेदिति ॥ अत्र च सपिंडेष्वपि भ्रात

सुतो मुख्यः ॥ तदलाभे सगोत्रः सपिंडोपि यः कश्चित् ॥ तदभावे त्वसगोत्रः सपिंडः ॥ तदभावे च सपिंडः सगोत्रस्तद
भावे सपिंडोऽसगोत्रोपि ॥ तत्रापि भागिनेय दौहित्र वर्जं विरुद्धसंबंधाय त्या पुत्रत्वं बुध्यनर्ह भ्रातृपितृव्यमातुलव
र्जं च ॥ त्रयाणां वर्णानां स्वसमानवर्ण एव ॥ तत्रापि देशभेदप्रयुक्तगुर्जरत्वादिजात्या समानजातीय एव ॥ सर्वो
पि सभ्रातृक एव ॥ ज्येष्ठभिन्नश्च ॥ शूद्रस्य तु भागिनेयदौहित्रावपि ग्राह्यौ ॥ अत्र प्रमाणं ॥ मनुः ॥ भ्रातॄणामेकजा
तानां यद्येकः पुत्रवान् भवेत् ॥ सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति ॥ एकजातानामित्येव सिद्धे भ्रातृपदं
सोदरत्वे वि भ्रातृभगिनीनां परस्परपुत्रनियमो न भवतीति ज्ञापनार्थं ॥ एकजातग्रहणं भिन्नोदराणां स्वत्र
पितृकाणामपि सपिंडानां स्वस्वलाभदशायां भ्रातृपुत्रनियमो न भवतीति ज्ञापनार्थं । न तु भिन्नोदरभ्रातृसुतस्या
ग्राह्यत्वज्ञापनार्थं ॥ ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचिदिति वृद्धगौतमस्मृतिवचनान्निषेधस्मृतेः क्वा
प्यनुक्तं भात् ॥ एकइति एकोपीत्यर्थः ॥ तेन द्वयोरपि पुत्रवत्त्वे अन्येषामपुत्राणां न भ्रातृपुत्रग्रहणसंभवः ॥ पु
त्रवानित्यत्र पुत्रपुत्रौ पुत्री वा विद्यते यस्येति मतुबर्थं स्वीकृत्य न त्वेवैकं पुत्रं दद्यादिति निषेधस्यात्रानवकाश
इति केचित् ॥ तन्न ॥ निषेधबाधशास्त्रस्य स्पष्टत्वेन तरैकाप्यनुपलंभे सति शास्त्रविरुद्धे दृशतात्पर्यवर्णनासंभ
वात् ॥ पुत्रवानिति मतुपा एकहायनीपदे भद्रपादोक्तन्यायेन संख्याविशेषोदासीनपुत्रविशिष्टमात्रप्रत्या
यनाच्च ॥ न चात्र ददातेरमुख्यत्वान्नोक्तनिषेधप्रवृत्तिरिति शंक्यं ॥ वक्ष्यते ददातेरमुख्यताया अनुपदमेव
निराकरिष्यमाणत्वात् ॥ पुत्रपदं चौरसपरं ॥ जन्यपुंस्त्ववाचिनः पुत्रपदस्य तत्रैव मुख्यत्वात् ॥ तेन भ्रातृ
पुत्रस्यापि दत्तकादेः भ्रातृमतोपि न ग्रहणं ॥ उत्तरार्धे तेनेत्येकवचनात् ॥ पुत्रिण इति बहुवचनाच्च ॥ वदवे

Indira Gandhi National
Centre for the Arts

व्येकं युगपत्प्रतिग्रहीष्युरिति युगपत्प्रतिग्रहेण द्रौपदीभार्यात्ववत् द्व्यामुष्यायणत्ववच्च लक्षणानेकनिरूपि
तपुत्रत्वफलकस्य सत्त्वे प्रतिग्रहादिना भ्रातृपुत्रग्रहणमनिच्छति कस्मिंश्चिद्भ्रातरि इच्छतोप्येकस्य भ्रातृपुत्रप्रतिग्रह
नापत्तेः॥ अन्ये तु नैवात्र प्रतिग्रहविधिरनुमीयते किंत्विच्छत एव भ्रातृपुत्रस्य अपुत्रपितृव्यपुत्रत्वं विधीयते ते
न पुत्रवत् श्राद्धाधिकारादिलाभः॥ तथा च बृहत्पराशरः॥ अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत्॥ स एव
तस्य कुर्वीत श्राद्धं पिंडोदकक्रिया इति बृहस्पतिरपि॥ यद्येकजाता बहवो भ्रातरस्तु सहोदराः॥ एकस्यापि सुते जा
ते सर्वे ते पुत्रिणः स्मृताः॥ बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः॥ एका चेत्पुत्रिणी तासां सर्वासां पिंडदस्तु
स इति॥ अत्र सापत्न्यपुत्रस्यागृहीतस्यापि पिंडदानाधिकारित्वात् पितृपत्न्यः सर्वा मातर इत्यादिशास्त्राल्लोक
व्यवहाराच्च पुत्रत्वे निर्विवादं तत्सदृशाग्रह्य भ्रातृपुत्रस्याप्यगृहीतस्यैव पुत्रत्वं विधीयत इत्युचितं॥ अस्ति चो
क्तं॥ मनुवाक्येनापि सदृशं पत्नीत सापत्न्यपुत्रस्यागृहीतस्यापि पुत्रत्वस्याप्युक्तत्वविधायकं वाक्यांतरं॥ सर्वासामेक
पत्नीनामेका चेत्पुत्रिणी भवेत्॥ सर्वास्तास्तेन पुत्रेण पुत्रिण्यो मनुरब्रवीदिति तदपि न॥ अपुत्रस्यैव भ्रातृपुत्र
स्य पुत्रत्वे त्रयोदशपुत्रापत्तेः॥ तत्र च॥ पुत्रान्द्वादश यानाह नृणां स्वायंभुवो मनुः॥ तेषां षड् बंधुदायादाः षड
दायादबांधवा इति द्वादशसंख्याविरोधात्॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा॥ तत्सुता गोत्रजा बंधुशि
ष्यसब्रह्मचारिण इति याज्ञवल्क्यीयवचसि भ्रातृपुत्राणां भ्रात्रनंतरस्थाननिवेशानुपपत्तेश्च॥ तेषां पुत्रत्वे ५५
इतरपुत्रवत्पत्न्याः पूर्वमेव निवेशौचित्यात्॥ व्याख्याते च भ्रातॄणामेकजातानामिति वचो विज्ञानेश्वरेण
॥ भ्रातृपुत्रस्य पुत्रीकरणसंभवे अन्येषां पुत्रीकरणनिषेधार्थं न पुनः पुत्रत्वप्रतिपादनाय तत्सुता इत्यनेन

विरोधादिति॥ का तर्ह्येतस्य वचसो गतिरिति चेत्॥ नापुत्रस्य लोकोस्ति जायमानो वै ब्राह्मणः त्रिभिः ऋणवा
जायते यज्ञेन देवेभ्यः प्रजया पितृभ्यः ब्रह्मचर्येण ऋषिभ्य इत्यादिशास्त्रबोधितस्याप्रजत्वप्रयुक्तदोषस्य निवृ
त्तिः पुत्रकार्यभूता द्वादशपुत्रभिन्नेनापि भ्रातृसुतेनापुत्रपितृव्यस्य भवतीति ज्ञापनार्थं॥ संगच्छते चैकस्यापि
सुते जात इति यद्येकः पुत्रवान् भवेदिति च जननमात्रेण॥ सत्तामात्रेण चेतरेषां पुत्रवत्त्वसंकीर्तनं॥ उचितं
चैतत्॥ स्वपुत्रेणेव भ्रातृसुतेनापि समस्तपितॄणां पिंडोदकक्रियानिर्वाहस्य वंशविच्छेदपरिहारस्य च सं
भवात्॥ इत्थं च भ्रातॄणामिति सर्वे पुत्रिण इति च बहुवचनं तावतो वारुणानिति वत्षष्ठशमनीयेन प
रन्निति वच्च यथासंभवबहुत्वानुवादः॥ उक्तज्ञापनस्य फलं केवलं परलोकार्थितया भ्रातृपुत्रवतोऽ
पुत्रस्य दत्तकादिस्वीकारप्रवृत्तिनिरासः॥ पत्न्यादिभ्यः पूर्वमदीयपिंडदानरिक्थादिकारिकाश्चेद्वेदि
तिकामनायां भ्रातृपुत्रस्यैव दत्तकविधिना स्वीकारसिद्धिरप्यर्थाज्जायमाना भवति वाक्यस्य प्रयोजनं॥ अ
प्रजत्वदोषनिवर्तकतया पुत्रसदृशस्यैव पुत्रप्रतिनिधित्वेन स्वीकरणमुचितमिति षाष्ठप्रतिनिधिन्या
यादेवासिद्धेः॥ एवं च सति न मन्वादिवाक्ये पुत्रश्रुत प्रतिग्रहादिक्रियाकल्पने क्लेशः॥ नापि मिताक्षरा
दिग्रंथविरोधः॥ नापि याज्ञवल्क्यादिवाक्ये भ्रातृसुतानां पंचमस्थाननिवेशानुपपत्तिः पुत्रत्वेनारूढानां
भ्रातृसुतानां॥ पत्न्यादिषु सत्सु पुत्रकार्यभूतपैतृकऋणापाकरणकारिणामपि वचनात् रिक्थग्रहणा
नधिकारसंभवात् पुत्रत्वेनारूढानां तु संभवति तदधिकारः॥ संगच्छते चैवं सति कालिकापुराणे शंकरस्य

Indira Gandhi National
Centre for the Arts

तयोर्वैतालभैरवयोर्नंदिवाक्येन पुत्रार्जने प्रवृत्तयोर्मध्ये भैरवेणोर्वश्यामुत्पादितपुत्रस्य तज्ज्ञात्राऽवेता
लेनापि पुत्रत्वेन स्वीकरणं॥ ततः कदाचिदुर्वश्यां भैरवो मैथुनं गतः॥ तस्यां संजनमास स वेशं नाम पुत्रकं॥ तमे
व चक्रे तनयं वेतालोऽपि स्वकं सुतामिति॥ अत्र च स्वकसुतकार्यकारित्वेन तमेवाभ्यमन्यतेति यद्यर्थं क्रियते
द्विवा प्रतिग्रहेण स्वसुतत्वं संपादितवानिति॥ उभयथापि एतस्मिन्मतेन ज्ञातिः॥ भ्रातृसुताभावे पूर्वोदाहृ
तशौनकवाक्यादेव ग्राह्य संपिंडासंभवे सगोत्र एवेति नियममाह वृद्धगौतमः॥ स्वगोत्रे पुत्रलाभे स्युर्दत्तक्री
तादयः सुताः॥ विधिना गोत्रतां यांति न सापिंड्यं विधीयत इति॥ गोत्रतां संततित्वं॥ संततिर्गोत्रजननकुला
नीति त्रिकांडीस्मरणात्॥ सपिंडसगोत्रासंभवे सगोत्रः सपिंड एव ग्राह्यः शौनकोक्तवचनोत्तरार्धे सपिंडाभा
व एवासपिंडनियमात्॥ गोत्रापेक्षया सापिंड्यस्य प्रत्यासन्नतया तत्कृतसादृश्यस्य बलवत्त्वाच्च सर्वथा स
पिंडालाभे समानगोत्रस्यैव ग्रहणं॥ अनंतरोदाहृतवृद्धगौतमवचसैव सिध्यति॥ न सापिंड्यं विधीयत इ
ति चतुर्थपादोक्तनिषेधस्यासपिंडसगोत्र एव संभवात्॥ सगोत्रालाभेऽसगोत्रोऽपि॥ दत्ताद्याश्चापि तनया
निजगोत्रेण संस्कृताः॥ आयांति पुत्रतां सम्यगन्यबीजसमुद्भवा इति कालिकापुराणात्॥ गोत्ररिक्थानुगः पि
तुर्न भजेद्दत्रिमः सुत इति मानवाच्च लिंगाच्च॥ दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिंडता पंचमी सप्तमी तद्वद्गो
त्रं तत्पालकस्य चेति वृद्धमनुवाक्ये सापिंड्यगोत्रयोर्व्यवस्थाविधानाच्च॥ असगोत्रेष्वपि भागिनेयादि ५६
निषेधमाह शौनकः॥ दौहित्रो भागिनेयश्च शूद्राणां विहितः सुतः॥ ब्राह्मणादित्रये नास्ति भागिनेयः सु

तः क्वचिदिति॥ पूर्वार्द्धे भागिनेयस्य दौहित्रसाहचर्याद्दत्तशब्दे भागिनेयपदं दौहित्रोपलक्षणार्थं॥ पुत्रत्वप्र
स्य नर्द भ्रात्राद्युपलक्षणार्थं च॥ समानवर्ण एव ग्राह्य इति नियमस्तु पूर्वोदाहृतशौनकवाक्ये अन्यत्र तु न का
रयेदिति च शौनकोक्तब्राह्मणेऽब्राह्मणान्येषु न कर्तव्य इत्यर्थकेन लभ्यते तथा क्षत्रियाणां स्वजातौ वा गुरुगोत्रस
मेऽपि वा॥ वैश्यानां वैश्यजातीषु शूद्राणां शूद्रजातिषु॥ सर्वेषां चैव वर्णानां ज्ञातिष्वेव न चान्यत इति शौनकवच
ने एव समानवर्णत्वनियमे सिद्धे पुनर्ज्ञातिष्वेव न चान्यत इत्युक्तिः गुर्जरत्वादिनापि समानजातीयत्वनियमा
र्थं॥ क्षत्रियेण स्वीकर्तव्यस्य दत्तकस्य समानगोत्रस्यैवाचिकीर्षायां पुरोहितगोत्रेणैव समानगोत्रत्वमिति ज्ञाप
नार्थं गुरुगोत्रेति पौरोहित्यान् राजविशामित्याश्वलायनोक्तेः॥ सम्रात्क एव ग्राह्यत्वमिति सूचिं शौनकेन॥ नैक तं
पुत्रेण कर्त्तव्यं पुत्रदानं कदाचन॥ बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नत इति॥ वसिष्ठोऽपि॥ न त्वेवैकं पुत्रं दद्यात्प्र
तिगृह्णीयाद्वा स हि संतानाय पूर्वेषामिति॥ ज्येष्ठश्चिन्नो ग्राह्य इत्यपि स्मृत्यंतरे सूचितं॥ न ज्येष्ठं पुत्रं दद्यादिति॥
दौहित्रभागिनेयौ शूद्रेण ग्राह्यावित्याह शौनकः॥ दौहित्रो भागिनेयश्च शूद्राणां चापि दाप्यत इति॥ उक्तविधदत्त
कस्वीकारः पुंभिरिव स्त्रीभिरपि सधवाभिर्विधवाभिश्च कार्यः॥ वंध्या वा मृतपुत्रा वा पुत्रार्थं समुपोष्य चेति शौ
नकीयवचस्य विशेषश्रवणात्॥ केचित्तु॥ अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः सदेति॥ अस्मिन्वाक्ये एवका
रश्रवणाच्च॥ न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानादिति वसिष्ठवाक्ये भर्तुरनुज्ञाभावे स्त्रीणां प्र
तिग्रहनिषेधाच्च॥ नापुत्राणां स्त्रीणां भर्त्रनुज्ञाभावे पुत्रप्रतिग्रहेऽधिकारः इत्याहुः॥ तदयुक्तं॥ अपुत्रपदार्थस्य

Indira Gandhi National
Centre for the Arts

विधेयत्वेहि तद्विशेषणपुंस्त्वविवक्षामाश्रित्य पुंस्त्वश्रवणादिति हेतूपन्यासः उचितस्यात्॥ नतु तस्य विधेय
त्वं पुत्रस्याभावे तत्कार्यकारी हि प्रतिनिधिपदार्थः॥ एवं च नगिरा गिरेति ब्रूयादिति वाक्यबलादेव गिरापदका
र्येइरापदविधिबलात् गिरापदनिषेधस्य यदानुवादत्वमाश्रितं तदाकांक्षायोग्यतयासदकृतात्पुत्रप्रतिनि
धिः कार्य इत्येतावतो वाक्यादेवापुत्राधिकारिकत्वलाभात् अपुत्रपदं कथं नानुवादः॥ तदर्थस्याविधेय
त्वाभावे च नतरां पुंस्त्वविवक्षेति॥ किंच विरुद्धोऽयं हेतुरुपन्यस्तो हेतूः॥ एवकारश्रवणादेव पुंस्त्वस्याविवक्षित
त्वात्॥ अश्वमेधे हि अतिदशगात्राधिगुवचने अप्राप्तस्यापि षड्विंशतिपदस्य षड्विंशतिरित्येव ब्रूया
दित्यत्र न विधिः एवकारार्थविशेषणत्वादित्युक्तं पूर्वमीमांसायां॥ तथा अत्र ह्येवावपंतीत्यत्रानंत्यत्र चेषु अ
प्राप्तस्याप्यावापस्य तत एव न विधानमाश्रितं॥ तथोत्तरमीमांसायामप्यात्मानमेव लोकमुपासीतेत्यादौ तत एव
नोपास्यत्वेनात्मविधानमित्याश्रितं विवरणादौ॥ एवं चैवकारार्थविशेषणसंबंधवत्प्रातिकस्याविधेयत्वे कथं
तद्विशेषणपुंस्त्वविवक्षेति कृतबुद्धय एवं विदां कुर्वंतु॥ यदि परमेवकारमर्थे तैरेव रश्मिभिरूर्ध्व आक्रमत इ
तिवत् कथंचिदयोगव्यावृत्त्यर्थतयानुवादमाश्रित्यापुत्रपदार्थो विवक्ष्यते तथापि मलिनः स्यादित्यत्र मलिनप
दमिव फलकामनाक्षेपकत्वेनाधिकारिसमर्पकमेवं पुत्रपदं स्वीकार्यं॥ ततश्च स्वर्गकामादिपदगतपुंस्त्वा
विवक्षासाधकषाष्ठन्यायेनैव पुंस्त्वाविवक्षासिद्धिरिति पृथग्हेतूपन्यासिकत्वासिद्धिः॥ न चापुत्रपदं विपरि ५७
तं स्वीकृत्य शास्त्रांतरप्राप्तपुत्रप्रतिग्रहानुवादेन पुंसैव कर्तव्यो न स्त्रियेति परिसंख्यास्त्विति शंक्यं॥ तथा सति

स्त्रिया कर्तव्यं पुत्रप्रतिग्रहं भर्त्रनुज्ञां गाविधेरलीकत्वापत्तेः॥ नापि ततीयो हेतुः॥ निषेधवाक्यपर्यालोचनया भर्त्रनु
ज्ञानस्य प्रतिग्रहांगत्ववदङ्गीहितदंगत्वे न तद्विधिपरत्वस्य वाक्यस्याश्रयणीयं॥ न चाविहितमंगं भवतीति न्यायात्॥
ततश्च पुत्रप्रतिग्रहाय भर्त्रनुज्ञां स्त्री कुर्यादिति विधिर्यमधिकारिणं प्रवर्तयन् नियमविधितामापद्यते यश्च निषि
षयेसमर्थस्तमेवावगाहत इति न सधवां प्रत्येव तस्य प्रवृत्तिः॥ तस्मात् एव नियमो पत्नीस्य पाक्षिकप्राप्तेः संभवात्॥ तथै
वानुज्ञास्वीकारस्य शक्यत्वाच्च॥ स्वीकृतं हि विनैव विशेषणं नियमविधिस्य लाघवानुरोधेनैव विशेषविषयत्वमु
पांशुयजुषेत्यत्र द्वितीये॥ एवं च यथा पद्मौतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः॥ पिंडयज्ञं ततः कुर्यात्ततो न्वाहार्यकं
बुध इति वचसा वैश्वदेवाधिकृतसाग्निकं प्रति पिंडयज्ञांगत्वेन वैश्वदेवोत्तरकालतारूपमनुपादेयगुणनियतावि
ज्येष्टाद्यविभक्ततया तदनधिकृतसाग्निकस्य पिंडयज्ञाधिकारो न व्यावर्तते॥ तथा सधवां प्रत्युक्तनियमं कुर्वतापि
शास्त्रेण विधवायाः पुत्रप्रतिग्रहेऽधिकारो न व्यावर्त्यते न चानुज्ञारूपो गुणोऽनुपादेयो येन नां पुत्रस्य लोकोस्तीत्यादिवचनेना
वश्यकर्तव्यापि सा यं कालादिवदधिकारमवच्छिंद्यादिति सुधीभिरेवालोचनीयं॥ अथांगत्व प्रतिज्ञापरित्यज्यापि भर्त्रनु
ज्ञारहितां प्रति ग्रहनिषेधः क्रियत इत्युच्यते॥ तथापि न विधवायाअधिकारो व्यावर्तयितुं शक्यते अनुज्ञाशब्दो हि पुम
भिप्राय वचनोऽध्यीष्टादिशब्दवत्॥ एवं च जीवतो भर्तुस्तादृशाभिप्रायं तज्जीवनदशायां तन्मरणोत्तरं वा ज्ञातवत्याः क
थं नाधिकारः॥ त्वया पुत्रः स्वीकर्तव्य इति शब्दं प्रयुज्य भर्तरि मृते तु विधवया क्रियमाणं पुत्रस्वीकरणं भर्त्रनुज्ञैवकृत
म्भवतीति स्फुटं॥ ब्राह्मणाः संस्थापयत मे यज्ञमित्युक्त्वाऽहवनीयं प्रविष्टे यजमाने ऋत्विग्भिः क्रियमाणसर्वस्वारसमाप
नस्य यजमानानुज्ञातत्ववत्॥ वस्तुतस्तु नापुत्रस्य लोको स्तीत्यादिशास्त्रेण पुत्राकरणस्य दोषहेतुत्वे भर्त्रनुज्ञारहितां प्रति

Indira Gandhi National
Centre for the Arts

पुत्राकरणाभ्यनुज्ञापरमदः शास्त्रं न तु निषेधपरं शास्त्रप्राप्तनिषेधस्याप्राप्तत्वात् पर्युदासलक्षणाश्रयसं
गादिति सुधीभिरूह्यं॥ न च न स्वातंत्र्यं क्वचित् स्त्रिया इत्यनावेज्ञातयदधिक इति च भर्त्रभावेज्ञातिपरतंत्रत्वात्
॥ नापुत्राया विधवाया अधिकारः पुत्रप्रतिग्रहे सिध्यतीति शंक्यं किंतु मध्ये दूरदेशे तत्कन्यां पिता चेन्नापतिः पुत्रास्तु
वार्धके॥ अभावेज्ञातयेस्तेषां न स्वातंत्र्यं क्वचित् स्त्रिया इति हि याज्ञवल्क्यवचस्तद्व्याख्यानोपक्रमे च मिता
क्षराकारेण कंपाणिग्रहणात् प्राक् पिता कन्यां अकार्यकरणाद्रक्षेदिति॥ एवं च निषिद्धाचरणात् स्त्रीनिवर्त
नेतत्तदवस्थायां तत्तदधिकार इति वचनस्वरसाद्व्याख्यानाच्च प्रतीयते न तु विहिताचरणप्रतिबंधेपि न च नि
त्यकाम्यव्रताद्याचरणेज्ञातिपारतंत्र्यकृतो विधवानामधिकारप्रतिबंधः क्वचिद्देशे केरपि शिष्टैर्व्यवह्रिय
ते॥ पक्षद्वयावसाने तु राज्ञा भर्तुः स्त्रिया इति मिताक्षरोदाहृतवचने न च तत्वद्वुक्तरीत्याज्ञातिरहितानां विधवानां
राजाज्ञा विना व्रतादावधिकाराभावः स्यात्॥ न च व्रतादेः पुत्रप्रतिग्रहे कश्चिद्विशेष इति मदत्यां डित्यमाविष्क
लेयधर्मशास्त्राभिज्ञान स्मन्ये॥ न च प्रतिग्रहमंत्राभावे नाधिकाराभावो स्त्रिरपि घटते॥ अनुज्ञायां सत्यामिव
सत्यामपि तस्या मुक्तरीत्याधिकारनिर्णये रथकारवन्मंत्राध्ययन कल्पनासंभवात्॥ एतेनानुज्ञायां सत्या
मभंत्रकः प्रतिग्रह इति निरस्तं॥ तस्माद्विधवयापि स्वीकृतः पुत्रो दत्तिधनकाकूभवत्येवेति तादृशाज्ञा
णस्य दृष्टिप्रतिबंधं कुर्वतः स्वस्यैवानर्थाय यतंते यो ब्राह्मणस्य तु प्रतिकूलं समाचरेत्। विट्भुजां तु कृमीणां
स्यादेकः संवत्सरान्बहूनिति शास्त्रादित्यलं पल्लवितेन॥ चूडादिसंस्कारेषु कृतेष्वकृतेषु पंचमवर्षात् प्राग ५८
र्ध्वं च दत्तकोग्राह्यः यत्तु अकृतसंस्कार एवापूर्णपंचवर्ष एव दत्तकः स्वीकार्यः॥ दत्ताद्या अपि तनया निजगोत्रे

ण संस्कृताः॥ आयांति पुत्रतां सम्यक् अन्यबीजसमुद्भवाः॥ पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते॥ आचूडा
तं न पुत्रः स पुत्रतां याति चान्यतः॥ चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः दत्ताद्या यदि संस्कारा निजगोत्रे वै कृ
ता॥ एताद्यास्तनयास्तेस्युरन्यथा दासतोच्यते॥ ऊर्ध्वं तु पंचमाद्वर्षान्न दत्ताद्याः सुता नृप॥ गृहीत्वा पंचवर्षीयं पुत्रे
ष्टिं प्रथमं चरेत्॥ पौनर्भवं तु तनयं जातमात्रं समानयेत्॥ कृत्वा पौनर्भवष्टोमं जातमात्रस्य तस्य वै॥ सर्वास्तु
कुर्यात् संस्कारान् जातकर्मादिकान्नरः॥ कृते पौनर्भवष्टोमे सुतः पौनर्भवः स्मृत इति कालिकापुराणादिति॥ त
न्न॥ एषां वचसां बहुषु कालिकापुराणपुस्तकेष्वदर्शनान्निर्मूलत्वादिति केचित्॥ अन्ये तु समूलत्वेपि आद्य
श्लोकत्रयस्यासगोत्रदत्तकविषयत्वात्तस्याप्रामाणिकत्वेनांत्यश्लोकस्यापि तद्विषयत्वायत्वमेवोचितं॥ अतः
सगोत्रस्य दत्तनायं नियम इति परिणीतोपि दत्तको भवेदित्याहुः॥ वस्तुतस्तु नासगोत्रे प्यपुपनयनोत्तरसंस्का
रोत्तरं दत्तकत्वासामान्यनिषेधः कर्तुं शक्यः पुराणवचोभिर्वैदिकलिंगाविरुद्धस्मृतिवचसां प्रामाण्यासं
भवस्य वलाधिकरणवार्तिकराणक सिद्धत्वात्॥ उक्तपौराणवाक्यानां च बह्वृचब्राह्मणविरोधात्॥ तथा
हि॥ दत्ताद्या इति तावत्॥ कृत्रिमादीनामपि ग्रहणं इति निर्विवादं ततश्च स्वगोत्रेण संस्कृतः स्वयं दत्तोपि पुत्रो
न भवतीति प्रतीयते॥ ब्राह्मणे च शुनःशेपो वैश्वामित्रपुत्रः स्वयमत्त्वदिति स्फुटमुक्तं॥ अथ हशुनःशेपो वि
सि० श्वामित्रस्यांकमाससाद स होवाचाजीगर्तः सौयवसं ऋषे पुनर्मे पुत्रं देहीति होवाच विश्वामित्रो देवा वा इमं मह्य
मरासतेति स ह देवरातो वैश्वामित्र आसेति॥ अत्र माप्यं शुनःशेप इत्यूर्ध्वं कस्य पुत्रोस्त्विति विचारे सति तदीये

Indira Gandhi National Centre for the Arts

छेवनियामिकेति मद्दर्षीणां वचः श्रुत्वा शुनःशेपः स्वेच्छया विश्वामित्रपुत्रत्वमंगीकृत्य सद्यः सादनीयमंकमास
सादेति न वा सावनुपनीतः॥ तादृशस्य वेदाध्ययनासंभवात्॥ अनधीतवेदस्य च वैदिकमंत्रकरणकआज्यावस्था
दिस्तुतौ प्रवृत्त्ययोगात् इंद्रदत्तसुवर्णरथप्रतिग्रहे समंत्रकप्रवृत्त्ययोगाच्च श्रूयते चैषा॥ तस्माइंद्रः स्तूयमानः प्री
तो मनसा हिरण्यरथं ददौ॥ तमेतया प्रतीया यशश्चदिंद्र इति प्रतीयाय प्रतिजग्राहेति व्याख्यातं भाष्ये॥ अतः पौ
राणवचसां समूलत्वेपीत्थं योजना॥ अन्यवीजसमुद्भवा इति दत्ताद्यास्ते न यावज्जातकर्मप्रभृतिभिः स्वैः संस्कारै
र्निजगोत्रेण चेत्संस्कृता भवेयुः तदैव प्रतिग्रहीतुः सम्यक्पुत्रतां यांति सम्यक्त्वं च समानगोत्रत्वविशि
ष्टमसाधारण्य॥ तत्र यद्यपि जातकर्मादिषु साक्षाद्गोत्रविनियोगो न श्रूयते तथापि तदंगभूतवृद्धिश्राद्ध
द्वारके गोत्रसंबंधो बोध्यते चूडायां तु साक्षादेव तत्संबंधः॥ तत्तद्गोत्रिणं प्रति आर्षेयसंख्यया शिखाकरणविधा
नात्॥ शिखा अपि च कर्तव्याः कुमारस्यार्षसंख्ययेति॥ अत एव द्वितीयवचोप्यन्यतद्गति तसिलप्रत्ययं च षष्ठ्य
र्थे स्वीकृत्य एवकारं वा नधारणार्थमंगीकृत्येत्थं योज्यं॥ आचूडांतं जनकगोत्रेण यः संस्कृतः स प्रतिग्रहीतुः पुत्रो भ
वन्नापि नान्यस्यैव पुत्रतां याति किंतु द्व्यामुष्यायणो द्विगोत्रो भवतीति तथा चूडायाः प्राक् संस्कारेषु पितृगोत्रेण कृते अपि चू
डाप्रभृतिसंस्काराः प्रतिग्रहीत्रा निजगोत्रेण चेत्कृतास्तदा दत्ताद्यास्ते तनया निजगोत्रेण कृताः स्युः॥ अन्यथा तु अदासता ॥५६
दासवैलक्षण्यं परिक्थग्राहित्वादिना भवति प्रतु स्वासाधारणगोत्रत्वमित्यर्थके न तृतीयवचनेनापि चूडादिसंस्कारा
णां निजगोत्रानुष्ठानस्यैकगोत्रत्वापादकत्वेन तात्पर्यात् चूडाद्यग्रहणाच्च तत्पूर्वसंस्कारेषु जनकगोत्रेण कृते अपि सं

स्काराः प्रतिग्रहीतृगोत्रेण चेज्जाताः तदा द्व्यामुष्यायणत्वेपि न द्विगोत्रत्वं किंतु प्रतिग्रहीतृगोत्रत्वमेवेत्युक्तं भव
ति॥ यथा च प्रतिग्रहीतृगोत्रेण चूडाकर्म तत्समानगोत्रत्वप्रापकं तथा तद्गोत्रेण तच्छाखोक्तविधिनोपनयनं त
त्समानशाखीयत्वस्यापि प्रापकं भवति॥ यथाह वसिष्ठः॥ अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः॥ स्वगोत्रे
ण स्वगृह्योक्तविधिना स्वस्वशाखभागिति॥ यत्तु ऊर्ध्वं त्विस्यादिश्लोकार्द्धं तत्तु न स्वतंत्रनिषेधपरं॥ उत्तरार्धगतपु
त्रेष्टिविधिना वाक्यभेदापत्तेः॥ किंतु अनादुतिर्वैजर्तिलाश्च गवीधुकाश्चेत्यस्य पयोहोमविधिशेषत्ववत्पु
त्रेष्टिविधिशेषत्वमस्य बोध्यं॥ पुत्रेष्टिस्तु अग्नये पुत्रवते पुरोडाशमष्टाकपालं इंद्राय पुत्रिणे पुरोडाशमेकादशक
पालं प्रजाकामोग्निरेवास्मै प्रजां प्रजनयति वृद्धामिंद्रः प्रयच्छतीत्यासिद्धो प्रयुमं चरेदिति संस्कारेभ्यः प्रथम
मित्यर्थः॥ तथा वान्वारंभणीयाया आरंभयोग्यतार्थत्ववत्पुत्रेष्टेः संस्कारयोग्यतार्थत्वप्रतीतेः॥ तादृशसंतते
रेव दंपुत्रेष्ट्यपेक्षा न तु द्व्यामुष्यायणे इति सिद्धं॥ एवं पौनर्भवे पौनर्भवष्टोमाख्यसोमयागस्यापि संस्कारयो
ग्यतासिद्धिद्वारा तादृशसंततावेवोपयोगो बोध्यः॥ अनाहिताग्नीनां तु पुत्रेष्ट्यसंभवात्पुरोडाशस्थाने चरुका
र्योपि आहिताग्नेः पुरोडाशास्ते नाहिताग्नेश्चरव इति शास्त्रात्॥ अतः कृतसंस्कारोपि पंचवर्षाधिकबालोपि
दत्तको भवतीति सिद्धं॥ ॥इति ग्राह्याग्राह्यविवेकः॥ कथं ग्राह्य इत्यपेक्षायां शौनकः॥ शौनकोहं प्रवक्ष्यामि
पुत्रसंग्रहमुत्तमं॥ वंध्या वामृतपुत्रा वा पुत्रार्थं समुपोष्य च॥ वाससी कुंडले दत्त्वा उष्णीषं चांगुलीयकं॥ आचा
र्यं धर्मसंयुक्तं वैष्णवं वेदपारगं॥ वर्हिः कुशमयं चैव पालाशं चेध्ममेव च॥ एतान्याहृत्य वंधून्स्वज्ञातीनाहूय यत्न

Indira Gandhi National
Centre for the Arts

त:॥ बंधूंश्चान्नेन संपूज्य ब्राह्मणांश्च विशेषत:॥ अग्न्याधानादि यत्तत्र कृत्वाज्योत्पवनांतकं॥ दातु: समक्षं गत्वा
तु पुत्रं देहीति याचयेत्॥ दाने समर्थो दाता स्मै ये यज्ञेनेति पंचभि:॥ देवस्य त्वेति मंत्रेण हस्ताभ्यां प्रतिगृह्य च॥ अंगा
दंगेत्यृचं जप्त्वा चाघ्राय शिशुमूर्धनि॥ वस्त्रादिभिरलंकृत्य पुत्रच्छायागतं सुतं॥ नृत्यगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च
संयुत:॥ गृहमध्ये तमाधाय चरुं हुत्वा विधानत:॥ यस्त्वा हृदेति द्वाभ्यां च तुभ्यमग्ने ऋचैकया॥ सोमोऽददत् इत्येता
भि: पत्स्यं च पंचभिस्तथा॥ स्विष्टकृदादिशेषं च कृत्वा होमं समापयेत्॥ ब्राह्मणानां सपिंडेषु कर्त्तव्य: पुत्रसंग्रह:॥ त
दलाभे असपिंडे पुत्रमन्यत्र तु न कारयेत्॥ क्षत्रियाणां स्वजातौ वै गुरुगोत्रसमेऽपि वा॥ वैश्यानां वैश्यजा
तेषु शूद्राणां शूद्रजातिषु॥ सर्वेषां चैव वर्णानां ज्ञातिष्वेव न चान्यत:॥ दौहित्रं भागिनेयं वा शूद्राणां चापि दाप
येत्॥ नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन॥ बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नत:॥ दक्षिणां गुरवे दद्यात् यथाश
क्ति द्विजोत्तम:॥ नृपो राष्ट्रार्द्धमेवापि वैश्यो रत्नशतत्रयं॥ शूद्र: सर्वस्वमेवापि अशक्तश्चेद्यथाबलमिति॥ पंच
भिरित्यनंतरं दद्यादिति शेष: द्वाभ्यामिति॥ द्वाभ्यामृग्भ्यां द्वे आहुती इति केचित्॥ तत्र वक्ष्यमाणबौधायनसू
त्रैकमूलत्वप्रयुक्तलाघवलिप्सया एकस्या एव आहुते: स्वीकर्तुमुचितत्वात्॥ अयं च पुत्रप्रतिग्रहविधि
र्बह्वृचविषयो बह्वृचगृह्यप्रतिपादकत्वाच्छौनकस्य॥ यजुर्वेदीनां तु पुत्रप्रतिग्रहविधिं व्याख्यास्याम:॥ शोणि
स्प तशुक्रसंभवो मातृपितृनिमित्तकस्तस्य प्रदानपरित्यागविक्रयेषु मातापितरौ प्रभवतो न त्वेकं पुत्रं दद्यात् प्रति ६०
गृह्णीयाद्वा स हि संतानाय पूर्वेषां न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तु:॥ प्रतिग्रहीष्यन्नुपक

ल्पयते द्वे कुंडले अंगुलीयकं चाचार्यं च वेदपारगं कुशमयं बर्हि: पर्णमयमिध्ममित्यर्थ बंधूनाहूय मध्ये राजनि चा
वेद्य परिषदि चागारमध्ये ब्राह्मणानन्नेन परिविष्य पुण्याहं स्वस्त्यृद्धिमिति वाचयित्वाथ देवयजनोल्लेखनप्रभृ
त्याप्रणीताभ्य: कृत्वा दातु: समक्षं गत्वा पुत्रं मे देहीति भिक्षेत ददामीतीतर आह तं परिगृह्णाति धर्माय त्वा गृह्णा
मीत्यथैनं कुंडलाभ्यामंगुलीयकेन चालंकृत्य परिधानप्रभृत्याग्निमुखात् कृत्वा पक्वाज्जुहोति यस्त्वा हृदा कीरिणा
मन्यमान इति पुरोनुवाक्यामनूच्य यस्मै त्वं सुकृते जातवेद इति याज्यया जुहोत्यथ व्याहृतीर्हुत्वा स्विष्टकृत्प्रभृति
सिद्धमाधेनुवरप्रदानाद्दक्षिणां ददात्येते च वाससी परिधापयेत्ते कुंडले एतच्चांगुलीयकं॥ यद्येवं कृत्वौरस:
पुत्र उत्पद्यते तुरीयभागेभाग् भवतीति ह स्माह बौधायन इति॥ अंगुलीयकमित्यनंतरमनुषक्तेन ददातीत्यने
न कुंडलांगुलीयकदानं गृहीतं प्रति विधीयते॥ प्रभवत इति॥ मातापित्रोरेव दानाधिकार इत्याशय:॥ मध्य इति
॥बंधुसमक्षं राजन्यवेदनं कार्यमित्याशय:॥ प्रभवतीति॥ तुरीयभागमेव लभत इत्याशय:॥ अथ बह्वृचाधिकारि
क: शौनकोक्तरीत्या पुत्रप्रतिग्रहप्रयोग: पूर्वेद्यु: कृतोपवास:॥ वाससी कुंडले छत्रं उष्णीषं चांगुलीयकं॥ आ
चार्यं धर्मसंयुक्तं वैष्णवं वेदपारगं॥ बर्हि: कुशमयं चैव इध्मं पालाशमेव च॥ एतान्याहृत्य बंधूंश्च ज्ञातीनाहू
त्य यत्नत:॥ पवित्रपाणि: प्राणानायम्य देशकालौ संकीर्त्य ममात्मप्रजत्वप्रयुक्तपैतृकऋणापाकरणपुन्नामन
रकत्राणद्वारा श्रीपरमेश्वरप्रीत्यर्थं शौनकोक्तविधिना पुत्रप्रतिग्रहं करिष्ये तदंगत्वेन स्वस्तिपुण्याहवाचनं
आचार्यवरणं आचार्यस्य मधुपर्केणार्हणं विष्णुपूजनं बंधुवर्गब्राह्मणेभ्योऽन्नदानं च करिष्ये तदादौ निर्विघ्न

Indira Gandhi National
Centre for the Arts

नासिध्यर्थं गणपतिपूजनं करिष्य इति संकल्प्य वरणांतं कृत्वा मधुपर्कांते पितॄणां कुलदेवतानां गुरूणां प्रीत्यर्थं ब्रा
ह्मणान्बंधूंश्च भोजयेत्॥ ततश्चार्यः देशकालौ संकीर्त्य यजमानानुज्ञया पुत्रप्रतिग्रहांगत्वेन विहितं होमं करिष्य इ
ति संकल्प्य अग्निप्रतिष्ठापनांतं कृत्वा न्वाधानं कुर्यात्॥ चक्षुषी आज्येनेत्यंते अत्र प्रधानं सकृदग्निं षड्वारं सूर्यां सा
वित्रीं वरुणाग्निं वायुं सूर्यं प्रजापतिं च आज्येन शेषेण स्विष्टकृतमित्यादि अष्टाविंशतिमुष्टीन् तूष्णीं निरूप्य
तावत्कृत्वः प्रोक्ष्य आज्योत्पवनांतं कृत्वा ब्राह्मणैः सह दातुः समक्षं गच्छेत् दातारं प्रत्यस्मै पुत्रं देहीति ब्राह्मणद्वार
या आकारयेत्॥ ततो दाता आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं पुत्रदानं करिष्य इति
संकल्प्य गणपतिं संपूज्य यथाशक्ति चंदनादिना प्रतिग्रहीतारं संपूज्य ये यज्ञेनेति पंचानां नाभानेदिष्ठो मानव ऋ
षिः॥ विश्वेदेवा देवता आद्याश्च तस्रस्त्रिष्टुभः पंचम्यनुष्टुप्॥ पुत्रदाने विनियोगः॥ ये यज्ञेन दक्षिणया समक्ताः॥
परि जज्ञिरे इत्यं तेद्द मं पुत्रं तवयेत्। कत्तरणापाकरणपुन्नामनरकत्राणसिध्यर्थं आत्मनश्च श्रीपरमेश्वरप्रीत्यर्थं त
भ्यमहं संप्रददे न मम प्रतिगृह्णातु पुत्रं भवानित्यं ते प्रतिग्रहीतृहस्ते साक्षतं जलं क्षिपेत्॥ ततः प्रतिग्रहीता देवस्यत्वे
ति मंत्रेण हस्तद्वयेन प्रतिगृह्य स्वांके उपवेश्य अंगादंगादिति शिशुमूर्धनि आजिघ्रेत्॥ ततो युवं वस्त्राणीति वस्त्रं
परिधाप्य लक्ष्मीमुद्रिकां बध्वा कुंकुमादिना तिलकं कृत्वा हिरण्यरूपद्युत्यादिना कुंडलाभिरलं कृत्य छत्रेणाच्छादि ६१
तं बालं नृत्यगीतवाद्यैः स्वस्ति नो मिमीतमित्यादिमंत्रैश्च गृहमानीय हस्तपादौ प्रक्षाल्याचम्य अग्नेः पश्चिमतो मातु
रुत्संगे स्वदक्षिणतो बालमुपवेश्य आचार्य दक्षिणतः[illegible]यमुपविशेत्॥ तत आचार्यो बर्हिस्तरणाद्याज्यभागांतं

रु१

कुर्यात्॥ ततश्च रु अवदानविधिनावदाय यस्त्वा हृदा कीरिणेति द्वयोः रात्रेयो वसुश्रुत ऋषिः॥ अग्निर्देवता त्रि
ष्टुप्छंदः पुत्रप्रतिग्रहांग होमे वि॰ यस्त्वा हृदा॰ स्वस्ति अग्नये अनेन पतित्वा स्वाहेति जुहुयात्॥ यजमानः अग्न
य इदं॰ पुनरवदाय॰ तुभ्यमग्र इति मंत्रस्य सूर्या सावित्री सावि अनुष्टुप्॥ पुत्र तुभ्यमग्रे पर्यवहन्॰ सह स्वाहा॥
सूर्या सावि आ इदं॥ पुनरवदाय सोमोददद्गंधर्वायेति पंचानां सूर्या सावित्री ऋषिः॥ सूर्या सावित्री देवता आद्ये द्वे अनुष्टु
भौ॥ तृतीया जगती चतुर्थी त्रिष्टुप्॥ पंचम्यनुष्टुप्॥ पुत्र॰ पुनः पुनरवदाय पंचभिर्जुहुयात्॥ सर्वत्र सूर्या सावि
आ इति त्यागः॥ ततो व्यस्तसमस्तव्याहृतिभिराज्यं हुत्वा स्विष्टकृदादि होमशेषं समाप्य आचार्याय धेनुं दद्या
त्॥ दश त्रीन्वा ब्राह्मणान् भोजयेत्॥ कर्मणः संपूर्णतां वाचयित्वा ईश्वरार्पणं वीतेति शौनकोक्तः पुत्रप्रतिग्र
हयोगः॥ एवं यजुर्वेदिकर्तृको बौधायनोक्तरीत्या प्रयोगो बोद्धव्यः॥ ततः प्राग्संस्कृतस्य स्वस्तिवाचनं नां
दीश्राद्धादिपूर्वकं जातकर्मादिसंस्कारान् करिष्य इति विशेषः॥ अथ दत्तकस्य विवाहाद्युपयोगि गोत्रादि निर्ण
यः॥ तत्र यस्य प्रतिग्रहीत्रा जातकर्मादिभिश्चूडादिभिर्वा संस्कृतस्तस्य तद्गोत्रः॥ एवमभिप्रेत्येव गोत्ररिक्थे जनयि दे
तुर्न भजेत् त्रिमिमः सुत इति शास्त्रमपि प्रवृत्तं॥ एतदन्यस्तु प्रतिग्रहीत्रोपनयनमात्रसंस्कृतस्तदुत्तरप्रतिग्रहीतो वा
द्वैरात द्व्यामुष्यायणगोत्र एवेति द्व्यामुष्यायणप्रयोगाद्धि॥ तथाप्येषामवस्था अभिवादनश्राद्धादिगतगोत्रनिर्देशार्थावि
वाहे तु दत्तकमात्रेण वीतिप्रतिग्रहीत्रोः पित्रोर्गोत्रप्रवरवर्जनं कार्यं॥ प्रवरमंजर्यादिनिबंधेषु तन्निबंधोक्तेः॥
॥ ॥इति गोत्रनिर्णयः ॥ गौतमः॥ ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च॥ मातृबंधुभ्यः पंचमादिति॥ उक्तं

Indira Gandhi National
Centre for the Arts

च वसुदेवांगजाता च कौंतेयस्य विरुद्ध तद् इति वार्त्तिकव्याख्यावसरे न्यायसुधाकृता दत्तकविषयमेतदित्युं गोत्र-
त्वकुल्या जनककुले साप्तपुरुषं सापिंड्यमिति व्याख्यातं तद्विषयत्वेनैव सापिंड्यमीमांसायां॥ अतः कुलद्वये पि सा-
प्तपुरुषं सापिंड्यं प्रतीयते॥ पैठीनसिस्तु— न्मातृतः पंच पितृतः पुरुषानतीत्य उद्वहेदित्याह॥ व्याख्यातमेतदप-
रार्के॥ दत्तकादिपुत्राणां पित्रपक्षतो निवृत्तपिंडगोत्रार्षेयाणां त्रत्येतदुक्तं पंच पितृतः इति॥ अतश्च प्रतिग्रही-
तृपितृकुले साप्तपुरुषं सापिंड्यं प्रतीयते प्रतिग्रहीतृमातापितृकुलयोस्त्रिपुरुषं सापिंड्यमिति प्रांचः॥ अत्र
व्यवस्थोक्ता सापिंड्यदीपिकायां दत्तक्रीतादीनां जनकगोत्रेणोपनयने कृते जनककुले साप्तपुरुषं सापिंड्यं प्र-
तिगृहीतमातापितृकुले निवाप्यपिंडलक्षणं त्रिपुरुषं सापिंड्यं प्रतिग्रहीतृगोत्रेणोपनयने तत्कुले साप्तपुरुष-
मिति॥ उपनयनमात्रे कृते पंचपुरुषं॥ जातकर्माद्युपनयनांते कृते साप्तपुरुषमिति॥ पैठीनसिवचः साकल्याय
व्याख्येयं॥ न केवलं दत्तकस्य परिणयनार्थमेवैष सापिंड्योपन्यासः॥ किंतु तत्संततेस्तत्पित्रादिकुलोत्पन्नैः स-
ह संबंधसंभवनिर्णयार्थमपि॥ अन्यथा पार्थसुभद्रयोरदत्तयोः संबंधासंभवशंकायामत्र नायं सुभद्रयोर्दत्त-
कयोः संबंधासंभवशंकायां आचार्यकृतकोपन्यासस्य तदुपपत्त्यै सुधायां गौतमीयउपन्यासस्यालग्नकता-
पत्तेः॥ यादृशं दत्तकस्य यथासापिंड्यमुक्तं॥ तत्संततेरपि तथैव तद्बोध्यं॥ एतदेव यन्मदनपारिजाते उक्तं॥ दत्त-
पुत्राः सुतस्य मातुः प्रतिगृहीतृमातुः कुले त्रिपुरुषसापिंड्यं॥ दत्तपुत्रसुतस्य स्वजनककुले पंचपुरुषमिति तदपि ६२
पूर्वोक्तरीत्या दत्तकविशेषसंततिविषयत्वेन व्याख्येयं॥ इति सापिंड्यनिर्णयः॥ दत्तकपुत्रस्य जन्ममरणयोः

पूर्वापरपित्रोस्त्रिरात्रं सापिंडानामेकाहं यस्य सपिंडः पुत्रीकृतः॥ परपूर्वासु भार्यासु पुत्रेषु च॥ भर्तृपित्रोस्त्रिरा-
त्रं स्यादेकाहस्तु सपिंडग इति माधवीये हारीतवचनात्॥ बैजिकादभिसंबंधादनुरुंध्यादघत्र्यहमिति॥ तादृशदत्त-
केन पित्रादिमरणे त्रिरात्रं कार्यं॥ दत्तकश्च स्वयंदत्तः कृत्रिमः क्रीत एव च॥ मृतके मननके चैव त्र्यहाशौचस्य भागिन इ-
ति शुद्धितत्त्वे व्यासवचनात्॥ सपिंडस्य पुत्रीकरणे संपिंडमरणादिनिमित्तं दत्तकस्य तन्मरणादिनिमित्तं सापिंडानां द-
शरात्रमेव निर्विवादं सापिंड्यं च पूर्वोक्तरीत्या व्यवस्थितं माशौचहेतुः॥ इत्याशौचनिर्णयः॥ धनस्वामिनि मृते ता-
दीयपत्नीदुहित्रादिषु मत्स्वपि दत्तकपुत्र एव रिक्थं लभते॥ द्वादशविधपुत्राणामभावे पत्नी दुहितरश्चेत्यादिना पत्न्या-
दीनां रिक्थग्रहणाधिकारप्रतिपादनात्॥ पश्चादुत्पन्ने औरसे सति तु तदयं चतुर्थांशं लभते पूर्वोदाहृतबौधाय-
नसूत्रात्॥ विधानमालायां तु दत्तपुत्रे यदा ज्ञाते कदाचित्स्यादौरसो भवेत्॥ पितुर्वित्तस्य सर्वस्य भवेतां समभागिनौ
॥ अविधाने विधाने वा परिप्राप्नोति नंदनः॥ विवाहविधिभाजनं कुर्यान्न धनभाजनं॥ तस्मिन्ज्ञाते सुते दत्ते नह-
त्त्वविधानके॥ तत्सर्वस्यैव वित्तस्य स्वामी पितुरंजसा॥ जाते च न्येषु पुत्रेषु दत्तपुत्रपरिग्रहात्॥ पिता चेद्विभ-
जेद्वित्तं नैवासौ ज्येष्ठभाग्भवेदिति जाते उपनयनांतजातिकर्मादिसंस्कारविशिष्टतया निष्पद्यत इत्यर्थः॥ तादृश-
संस्कारालाभेन्यवाहविधानमिति॥ अविधानं संस्कारविध्यलाभः नंदनः प्रकरणाद्दत्तपुत्रः विधाने सति पूर्वोक्ता-
करीत्या धनलाभमुपजिघ्रत्या विधानपक्षेऽत्राहविधा [illegible]
[illegible] नेति तस्मिन्नौरसे दत्तविषये संस्कारविधाने न कृते॥ सत्यौरसः॥ परिग्रहात्॥ अनंतरमिति शेषः॥ ततश्च

Indira Gandhi National
Centre for the Arts

स

प्रति यदीत्रोपनयनांतसंस्कारसंस्कृतस्यौरससमानांशभागित्वं दत्तकस्य तत्र्कतकाः कलतदंतसंस्कारहित
स्य तु विवाहमात्रलाभो नान्यधनलाभः सत्यौरसे कतिपयसंस्कारलाभे तु चतुर्थांशलाभ इतिव्यवस्थेति इति दा
पादनिर्णयः दत्तकपुत्र्या अपि स्वीकार उक्तविधिना कार्यः ॥ वह्न्यामि पुत्रं संग्रहमित्यादिगतपुत्रपदस्य पुमान्पुं
इत्यादिवैदिकप्रयोगमूलकेन तृणीक्षुदुक्तन्यायेन पुत्रीसाधारण्यात् ॥ दानप्रतिग्रहविधिषु उद्देश्यविशेषपुंस्त्वा
विवक्षायाश्च इतिहासपुराणेषु कुंत्यादत्तकत्वोत्तेश्च पत्न्यभावे सारिकयापि तेदुहितृत्वात् ॥ सतांसद्धो पासिध्यर्थमि
ति दत्तकदीधितिः ॥ अकार्यं नंतदेवेन तेन तस्य मुदेऽस्तु सा ॥ ॥ इति श्रीमहापदेवसूनुनाअनंतदेवेन कृते संस्का
रकौस्तुभे दत्तकविधिः ॥ अथ गार्भिणगर्भस्राव हरं महार्णवे ॥ वायुपुराणे ॥ यज्ञोपवीतं कुर्वीत कांचनं तु स्व
शक्तितः ॥ अत्यंतवर्णयुक्तं च राजतं चोत्तरीयकं ॥ पलार्धेन तदर्धेन तदर्धेन तदर्धेनाथवा पुनः ॥ ग्रंथिप्रदेशे देयं तु
मौक्तिकं वज्रमेव च ॥ अल्पाल्पपंचगव्येन गायत्र्या ताम्रभाजने ॥ द्रोणप्रमाणं तस्मिंस्तु निक्षिपेद्दधि मध्यतः ॥ आ
ज्यस्योपरि संस्थाप्य सूपवीतं सुपूजितं ॥ गंधपुष्पाक्षतैर्धूपैर्नैवेद्यैरपि भक्तितः ॥ ततो ब्राह्मणमाहूय होमं च का त
रयेत् ॥ तिलैराज्येन मधुना मिश्रैरष्टोत्तरं शतं ॥ तस्मै दद्यात्तदेयं वस्त्राद्यैः पूजिताय तु ॥ मंत्रेणानेन विधिवत्साज्य
स्वाघोपवीतकं ॥ मंत्रः ॥ उपवीतं परिमितं ब्रह्मणा विधृतं पुरा ॥ भवतो कांस्यदानेन गर्भसंधारकं चेद्यकं ॥ धवान्य ६२
पि ब्राह्मणेभ्यस्तस्मिन्काले प्रदापयेत् ॥ अनुज्ञया तथा कार्या प्राणिपत्य क्षमापयेत् ॥ गर्भस्रावकराद्दोषादेव
स्माद्विमुच्यत इति ॥ अत्यंतवर्णयुक्तं उत्कृष्टं रक्तकांचनराजताभ्यां संबध्यते ॥ यज्ञोपवीतग्रंथौ मौक्तिकं उत्तरी

यग्रंथौ वज्रं ॥ गायत्र्यास्य स्थाने ह्याल्पाल्पत्वेनान्वयः ॥ तस्मिन् मध्यभागे द्रोणप्रमाणं दधि निःक्षिपेत् ॥ प्रस्थ माढकं द्रो
णं च खारिका चेति द्रोणपरिमाणं ॥ तस्मिन्नाल्पे शोभनमुपवीतं सोत्तरीयं विन्यस्य गंधाद्युपचारैः ॥ सुपूजितं कुर्या
दिति शेषः ॥ आज्यस्य द्रोणपरिमाणसंभवे शक्त्यनुसारि प्रमाणं ॥ मंत्रपूजायां गायत्र्येव ॥ होमे तु व्याहृतयो गाय
त्री वा ॥ स्वाभिका रं चंदं कर्मेति महार्णवः ॥ अतः पूजां भर्त्ता कुर्यात् ॥ तदभावे ब्राह्मणः कुर्यात् ॥ होमं तु ब्राह्मण ए
व ॥ त्यागं भर्त्ता ॥ तदभावे स्त्र्येव कुर्यात ॥ आज्यमधुमिश्रैस्तिलैरष्टोत्तरशतमाहुतयः ॥ प्रधानं पूर्वोत्तरतंत्रे स्वगृ
ह्योक्तं कार्यं ॥ होमांते ब्राह्मणपूजा वस्त्रादिभिः कार्या ततो ब्राह्मणा प्राङ्मुखायोदङ्मुखाधिकारिणी मंत्रेण दा
नं कुर्यात् विधिरिति पात्रस्य नामगोत्रोच्चारणादि गर्भस्रावनिदानदोषपरिहारद्वारा श्री मेश्वर प्रीत्यर्थंमु
ति फलसंकीर्त्तनं पात्रेण सावित्र्यादिपाठेन यथाशक्ति दक्षिणां चेति प्राप्यते ॥ मंत्रे नो कादुःखतरणोपायभूता
न वेत्यर्थः ॥ ततो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वोपवीतप्रगृहीतुरनुज्ञया प्राणिपातक्षमापनं कृत्वा यथा
शक्ति ब्राह्मणान् भोजयित्वेश्वरार्पणं कुर्यादिति ॥ अत्र च स्त्रवद्गर्भभवे सा तु बालकं हंति याविधेरिति महार्णवो
दाहृत वृद्धगौतमवचनोक्तनिदानभूतबालहत्याकृत्वे तत्कार्यं सूर्यारुणसंवादे स्त्रवद्गर्भप्रकृत्य ॥ ॥ श्री
अरुण उवाच ॥ प्रायश्चित्तं कथं स्वामिन् सत्यं वद ममाग्रतः ॥ श्रीसूर्य उवाच ॥ एकवासो विधिं चैव कुर्याद्वि
धिवत्ततः ॥ चंद्रसूर्योपरागे तु स्वर्णधेनुः प्रदापयेत् ॥ ब्राह्मणान्भोजयेत् पश्चात् प्राजापत्यचतुष्टयं ॥ सारस्व

Indira Gandhi National
Centre for the Arts

तजपंलक्षं दशांशं होमसंयुतं॥ अवर्णां हरिवंशस्य एकवित्तेन मानदः॥ शालपत्रैः शिवं पूज्य षण्मासाद्धविवासरे
॥ कलौ शांतामयं चैव घृतेन परिपूरितं॥ दातव्यं ब्राह्मणे चैव सर्वकामार्थसिद्धये॥ एवं कृते वै न तेयगर्भो निश्चल
तां व्रजेत इति एवं गर्भस्थैर्यविधिः कन्यानामेवोत्पत्तौ पुत्रार्थं पुत्रकामेष्टिप्रयोगः॥ ऋतुकालात् षष्ठे दिने भार्यया सह
कृतस्नानो यजमानः अलंकृतः प्राणानायम्य देशकालौ संकीर्त्य पुत्रकामः पुत्रकामेष्टिं करिष्ये
इति संकल्प्य तदंगं स्वस्तिवाचनमातृकापूजननांदीश्राद्धानि कृत्वा स्थंडिलादि अग्निप्रतिष्ठांतं कृत्वा समिद्द्वयम
दायान्वाधाने करिष्ये स्मिन्नन्वाहिते ग्नौ इत्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा अत्र प्रधानं अग्निं पंचवारं वरुणं पंच
वारं विष्णुं द्वौ सोमं सूर्यां सावित्री एताः प्रधानदेवताः पायसद्रव्येण शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनिधानां
तं कृत्वा श्वेतवत्सश्वेतगोक्षीरेण चरुं पक्त्वा आज्यभागांतं कृत्वा भार्ययान्वारब्धः प्रधानाहुतीर्जुयात॥ तत्राद्येकस्य:
॥ आ ते गर्भ इति अग्निरेतु प्रथम इति सूक्तद्वयस्य हिरण्यगर्भ ऋषिः॥ क्रमेणाग्निवरुणौ देवता अनुष्टुप् जगत्यौ
छंदसी चरुहोमे वि०॥ आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिं॥ आवीरोजायतां पुत्रस्ते दशमास्यः स्वाहा॥ अ
ग्नये॥ करोमि ते प्राजापत्यमागर्भो योनिमेतु ते॥ अनूनः पूर्णो जायतामश्लोणो पिशाचधीतः॥ स्वाहा॥ अग्नये॥ पु
मांस्ते पुत्रो नारि तं पुमाननुजायतां॥ यानि भद्राणि बीजान्यृषभा जनयंति नः स्वाहा अग्नये०॥ यानि भद्राणि बीजान्यृष ६४
भा जनयंति न तैस्त्वं पुत्रान्विंदस्व सा प्रसूर्धेनुका भव॥ स्वाहाग्नये॥ कामः समृध्यतां मह्यमपराजितमेव मे॥ यं का

मं कामये देव तं मे वायो समर्धय स्वाहाग्नये०॥ अग्निरैतु प्रथमो देवतानां सो स्यै प्रजां मुंचतु मृत्युपाशात्॥ तदयं राजा
वरुणो नु मन्यतां यथेयं स्त्री पौत्रमघं न रोदात्॥ स्वाहा वरुणाय०॥ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु
दीर्घमायुः॥ अशून्योपस्था जीवतामस्तु माता पौत्रमानंदमभिप्रबुध्यतामियं स्वाहा वरुणाय॥ मा ते गृहे निशि घो
ष उत्थादन्यत्र त्वद्रुदत्यः संविशंतु॥ मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज पश्यंती प्रजां
सुमनस्यमाना स्वाहा वरुणाय०॥ अप्रजास्तां पौत्रमृत्युं पाप्मानमुत वाघं॥ शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्र
ति मुंचामि पाशं॥ देवकृतं ब्राह्मणं कल्पमानं तेन हन्मि योनिषदः पिशाचान्॥ क्रव्यादो मृत्यूनधरान्पातयामि
दीर्घमायुस्तव जीव जीवं तु पुत्रा स्वाहा॥ वरुणायेदं॥ नेजमेष इति तिसृणां विष्णुस्त्वष्टा गर्भकर्त्ता ऋषिः॥ क्र
मेण विष्णुर्देवता अनुष्टुप् छंदः॥ चरुहोमे वि०॥ नेजमेष परापत० ऋ०॥ विष्णवे॥ यथेयं पृथिवी० द्वाभ्यां० ऋ०॥ वि
ष्णोः श्रेष्ठेन॥ विष्णवे० ऋ०॥ सोमो धेनुमित्यस्य राहूगणो गोतम ऋषिः॥ सोमो देवता त्रिष्टुप् छंदः॥ चरुहोमे वि०
ओं सोमो धेनुं० ऋ०॥ सोमायेदं स्वाहा॥ सूर्यायै सावित्र्या इदं॥ इति पंचदशाज्याहुतिर्हुत्वा स्विष्टकृद्धोमं कृत्वा
उभौ अपश्यं त्वेति मंत्रयोः॥ प्रजापति ऋ० वि० प्रजापतिर्देवता० त्रिष्टुप् छंदः चरुप्राशने वि० अपश्यं त्वा० दीध्यानाः इ
ति मंत्रस्य काश्यपावत्सप्रविशं गेत्यस्य देवोदासिः॥ पवद्रोत्र ऋषिः इंद्रो देवता गायत्री॥ नाभ्यालंभने० वि०॥ ओं
प्रविशं गम० मंत्रेण उभौ नाभ्यालंभनं कु०॥ ततो यजमानः प्रायश्चित्तहोमं समाप्य सवत्सां गां दत्त्वा ब्राह्मणेभ्यो
सुवर्णादि दक्षिणां दत्वा रात्रौ दर्भसंस्तरणे शयीतां॥ ततः मनसा यजमानः पंचहोतारमुपयादित्यादि॥

Indira Gandhi National Centre for the Arts

विरंचीज्य॥ इतिपुत्रकामेष्टिः॥ अथपुंसवनकालः॥ याज्ञवल्क्यः॥ पुंसः सवनस्पंदनात्पुरेति॥ शौनकः॥
व्यक्ते गर्भे तृतीये तु मासे पुंसवनं भवेत्॥ गर्भोव्यक्तस्तृतीये चेच्चतुर्थे मासि वा भवेदिति॥ बृहस्पतिः॥ तृतीये मासि
कर्तव्यं गृष्टेरन्यत्र शोभनं॥ गृष्टेश्चतुर्थमासे तु षष्ठे मास्यथवाष्टमइति॥ सप्तमान्मसूताग्रष्टिः स्यादिति त्रिकांडी॥ जा
तुकर्णः॥ सीमंतेन सहाथवेति॥ मदनरत्ने कालविधाने॥ कुर्यात्पुंसवनं प्रसिद्धिविषये गर्भे तृतीयेथवा मासि
स्फीततनौ तुषारकिरणे पुष्येथवा वैष्णवे॥ हित्वा कर्कटकं नृयुग्ममबलामन्ये त्वरिक्तेतिथौ शुद्धे नैधनधा
म्नि शुभेऽर्कशशिभृद्दिनेभे त्रिणांवासवे इति॥ प्रसिद्धविषये व्यक्ते॥ तुषारकिरणश्चंद्रः स्फीततनुः पूर्णबलः॥
तत्समयं लग्नः॥ प्रतिपत्पूर्वदशाहं मध्यबलः शीतगुः सितपक्षे॥ संपूर्णबलः पूर्णः कृष्णपक्षे पंचमीयावदिति
॥ प्रतिपत्पूर्वा यस्मिन्॥ तेन शुक्लैकादशीप्रभृतिकृष्णपंचमीपर्यंतः कालः प्रशस्त इति ज्ञायते॥ वैष्णवः श्र
वणः॥ पुष्यासंभवे चैषः॥ तृतीये गर्भमासे तिष्येण पोषितायाः इति गृह्यात्॥ तिष्येणेति प्राशने संबध्यत
इति व्याख्यानात्॥ श्रवणासंभवे नक्षत्राण्याह॥ गर्गः॥ कुप्पोत्कः॥ सवनाख्यं तु पुंनामर्क्षे शुभे दिने॥ पुन्नाम
श्रवणं तिष्यस्वाती हस्तपुनर्वसू॥ मूलं प्रोष्ठपदं चानुराधा मृगशिरोश्विनीति॥ नृयुग्मं मिथुनं॥ अबलां क
न्यां॥ अन्येषु एतद्भिन्नलग्नेषु॥ अत्र विशेषं बृहस्पतिः॥ कन्यायां न प्रशंसंति शुभं दृष्टयुतेपि चेति॥ विशेषनिषे
धं नान्ययोः प्रतिप्रसवो गम्यते॥ सीमंतेन सहानुष्ठाने कन्यायाएव निषेधइत्यपि कालविधाने॥ अरिक्तेतिथाविति ६५
सामान्येननि- धेपि नवमी सर्वथैव वर्ज्या॥ रिक्ताश्च पर्व नवमी त्यक्त्वा पुंसवने शुभा इति स्मृत्यंतरेण नवम्याः पुनरु

+ सांख्यायनगृह्ये पि॰ सप्तमे मासि प्रथमगर्भे सीमंतोन्नयनमिति + ५

पादानात्॥ नैधनधामाष्टमस्थानं॥ तस्मिन् शुद्धे ग्रहहीने॥ वितबुधः॥ पारिजाते बृहस्पतिः॥ गुरुशुक्रबुधेंदूनां केन्द्रकोण
दिवसांशकाः॥ तेषामुदयहोरा च पुंसवे तिशुभा वहः॥ तथा॥ मासप्रयुक्तकार्येषु मूढत्वं गुरुशुक्रयोः॥ न दोषकृदिति
तथा॥ वृद्धिर्दास्यं पुंसवाद्यं प्रेतकर्मानुमासिकं॥ एवमूह्यं॥ पुंसवने न सदा नबलोऽन्यस्य कार्यत्वात्तुल्यस्वित्यादिनिर्ण
यः॥ अथ सीमंतोन्नयनकालः॥ याज्ञवल्क्यः॥ षष्ठेष्टमे वा सीमंत इति॥ आश्वलायनः॥ चतुर्थे गर्भमासे सीमंतोन्नय
नमिति॥ बैजवापः॥ सीमंतोन्नयनं चतुर्थे पंचमे षष्ठे वापीति॥ अत्रिः॥ आधानादष्टमे मासि सीमंतोन्नयनं भवेत्॥ न
वमे मासि वा कुर्याद्यावद्गर्भविमोचनमिति॥ बृहस्पतिः॥ सौरेण च चतुर्थस्यान्मासे षष्ठेष्टमे वेति॥ वसिष्ठः॥ चतुर्थे वा
वने मासि षष्ठे वाप्यथवाष्टमइति॥ अतः सौरसावनमानयोर्विकल्पः॥ अत्रिः॥ आधानादष्टमे मासि सीमंतोन्नयनं
भवेत्॥ नवमे मासि वा कुर्याद्यावद्गर्भविमोचनमिति मदनरत्ने गार्ग्यः॥ यदि सीमंततः पूर्वं प्रसूता स्यात्तु भामिनी
॥ तदानीं पेटके गर्भस्थाप्य संस्कारमाचरेदिति॥ तत्रैव सत्यव्रतः॥ स्त्री यदा कृतसीमंता प्रसूयेत कदाचन॥ गृही
पुत्रा विधिवत्पुनः संस्कारमर्हतीति॥ बृहस्पतिः॥ पूर्वपक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकं च नेति॥ कृष्णपक्षे त्रयो
दश्यादित्रयमतिदुष्टमित्यर्थः॥ पक्षच्छिद्राश्चरिक्ता चाविनापंचदशी शुभाः॥ चतुर्थी च कदाचित्स्युस्तिथयश्च शु
भप्रदा इति॥ षष्ठ्यष्टमी द्वादश्यः पक्षच्छिद्राः पंचदशी अमावास्या॥ कदाचिदिति चतुर्थ्या वर्ज्यत्वं पाक्षिकमिति ज्ञा
यते॥ शुभसंस्थे निशानाथे चतुर्थी च चतुर्दशी॥ पौर्णमासी प्रशंसंति केचित्सीमंतकर्मणीति शास्त्रांतरात्॥ व्या
सः॥ पुरुषग्रहवाराः स्युः शुभाः सीमंतकर्मणि॥ मध्यौ स्त्रीग्रहवारौ तु वर्ज्यौ तु नपुंसकाविति॥ पुंग्रहाः रविभौमगु

रवः॥ स्त्रीग्रहौ सोमशुक्रौ नपुंसकौ शनिबुधौ॥ नक्षत्राण्याह बृहस्पतिः रोहिण्यैन्दवमादित्यपुष्यहस्तो
त्तरात्रयं॥ पौष्णं वैष्ण्यं च मैत्रं चैव सीमंते दश शस्यता इति॥ ऐंदवं मृगशिरः॥ आदित्यः पुनर्वसुः॥ पौष्णं रेवती॥
वैष्णवं श्रवणः॥ जपं तस्तु॥ पुंनामा श्रवणास्तिष्यो हस्तश्चैव पुनर्वसुः॥ अभिजित्प्रोष्ठपाश्विन्यनुराधा तथाश्वयु
वृ॥ इत्येतेषु नक्षत्रेषु कालविद्भिरस्याः प्रशस्तमित्युक्तं यन्नक्षत्रं तस्य नक्षत्रस्य मध्यमा स्मृते चंद्रमासि कर्म कुर्यात
॥ तत्रादावेव पंचदश नाडिका अग्राह्या अपनीय मध्यमास्त्रिंशन्नाडिका गृहीतव्याः॥ अत्रापि शोभ
ने मुहूर्ते कुर्यादित्याह॥ कारिकायामपि नक्षत्रस्य मध्यमे पादद्वये कर्मेदमिष्यत इति॥ कालविधाने सि
दोलविज्ञेयित्वशुभं वहुलं फला राशयोऽप्यशाकानि श्रेष्ठानीति॥ आलिंद्वश्विकः॥ इदं च कर्म सकृदेव का
र्यं॥ स्त्रीसंस्कारत्वान्न प्रतिगर्भमावर्तत इति वृत्तिकाराद्युक्तेः॥ यत्तु विष्णुः॥ सीमंतोन्नयनं कार्यं षष्ठेमा
स्यथवाष्टमे॥ गर्भसंस्कारत्वाद्यं केऽपि पाध्यायसंमतादिति तदीयरेणु कारिकोक्तेः॥ पुंसवनानवलो
मूनयोपतिः कर्त्ता तदभावे देवरादिः॥ सीमंतोन्नयने तु स्वयमेव कर्त्ता तथैव वृत्तिकाराद्युक्तेः॥ अथप
योगः॥ तत्राकृतगर्भाधानो द्विजाय गां दत्त्वा पुंसवनादि कुर्यात्॥ गर्भाधानस्याकरणे तस्यां जातस्तु
कुर्थेति॥ अकृत्वा गां द्विजे दत्त्वा कुर्यात्पुंसवनं पतिरिति पारिजाते आश्वलायनवचनात्॥ तत्र प्रवैद्यु
समानरूपवत्साया गोरन्यस्या वा क्षीरेणाद्यं संपाद्य माषाघटकं यवत्रयं मंडलाकारच्छायमगारमा
नदुं दंचमं अजीर्णदूर्वा पुंजं कुमार्या दृषदुपलाभ्यां पिष्टीकृतं शुद्धवसनाचले वद्धं च संपाद्य सीमंते वि ६६

कर्त्तव्ये औदुंवरपक्वयुग्मफलवत्स्तवकौ तदभावे तूपंतौ स्यातां दशाग्रसूत्रं न्यस्तवकौ वा त्रिश्वेतश
ललीं त्रीणि कुशपिंजूलानि च संपाद्य दक्षिणकृतौ कौलयुजं नयोपरेषुः कृतमंगलस्नातया परि
हितादतवस्त्रयालंकृतया दक्षिणतउपविष्टया युक्तो देशकालकीर्त्तनांते ममास्यां भार्यायामुत्पत्स्यमानगर्भ
स्य बैजिकगार्भिकदोषपरिहारपुंरूपताज्ञानोदयप्रतिरोधपरिहारद्वारा पुंसवनमनवलोभनं च तंत्रेण
करिष्ये इति पृथक्प्रयोगे संकल्पः॥ सीमंतोन्नयनस्य चेत्थं॥ ममास्यां भार्यायां गर्भाभिवृद्धिपरिपंथि॥ पि
शितरुधिरप्रिया लक्ष्मीभूतराक्षसीगणदूरनिरसनक्षमसकलसौभाग्यनिदानभूतमहालक्ष्मीसमावेश
नद्वारा प्रतिगर्भं वीजगर्भसमुद्भवैनोनिर्हरणद्वारा च स्त्रीसंस्काररूपं सीमंतोन्नयनाख्यं कर्म करिष्ये इति॥
त्रयाणां सहकरणे तु अनवलोभनमित्यंतं पूर्वसंकल्पवाक्यमुक्त्वा ममास्यामित्यादि उत्तरवाक्यं
३ ते कर्म च करिष्ये इति ब्रूयात्॥ तदंगत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये त
दादौ निर्विघ्नतासिध्यर्थं गणपतिपूजनं करिष्ये इति संकल्प्य क्रमेण कुर्यात्॥ अनयोः पुंसवनानव
लोभनकर्मणोः पुण्याहं॥ एते षां पुंस० नन सीमंतोन्नयनकर्मणां पुण्याहमिति यथार्थं वक्तुः प्रयोगः॥
प्रजापति उक्तकर्मभ्यां स्वस्ति॥ उक्तकर्मभ्यः स्वस्तिऋध्यंतामित्येवं प्रत्यृक्ति वाक्यं॥ नांदीश्राद्धे क्रतुदक्षसंज्ञकावि
रिति बोधा श्वेदेवाः॥ पृथक्के पुंसवनाद्यर्थं मोपासनं पवमानसंज्ञं प्रतिष्ठापयेत्॥ केवलसीमंते त्रयाणां सहत्वे वा धातेति बोध
यनः२ मंगलनामानं प्रतिष्ठापयेत्॥ अविघमानाग्नेः सर्वाधानिप्रभृते रग्न्युत्पत्तिः पूर्ववत्॥ अस्मिन् पुंसवना नः२८

Indira Gandhi National
Centre for the Arts

२९ इति पृथक्त्वे॥ सहत्वे तु चरुलोपं ते॥ स्वतंत्रसीमंते चक्षुषी आज्येनेत्यंते धातारं राकां विष्णुं विष्णुं विष्णुं प्रजा पतिं चाग्ने
नवलोमनहोमे देवतापरिग्रहार्थमन्वाधानं करिष्य इति द्वयोः पृथक्त्वे॥ एषु पुंसवनसीमंतोन्नयनहो न शोषणे +२
मेषु देव॰ रिष्य इति त्रयाणां सहत्वे॥ सीमंतस्य स्वातंत्र्ये तु अग्निं सीमंतोन्नयन इति॥ चक्षुषी आज्ये
नेत्यंते प्रजापतिं चरुणा प्रोक्षण्यादिपात्रासादनात्पूर्वं स्वस्य दक्षिणतः प्राग्ग्रीवास्तरणं॥ प्रणयनांते प्रजा
पतये त्वा जुष्टं निर्वपामीति चतुरो मुष्टीन् त्रिस्त्व्य हविरासादनांते स्वस्य दक्षिणदेशे प्राग्ग्रीवा आनडुहे चर्मणि उत्त
रलोमास्तीर्णे बहिराचांतसलिलां पत्नीं तीर्थेन प्रविश्यात्मानमग्निं चांतरेणानीयोपवेश्य॥ तथान्वारब्ध आ
ज्यभागांतं कृत्वा प्रत्यग्ग्रीवे उपविष्टायास्तस्याः क्षालितप्रसृतीकृतदक्षिणपाणावंतर्जानुस्थिते प्रसृतिमि
तं तद्धिभिः क्षिप्यते तत्र प्रागग्रं यवं तत्पार्श्वे द्वये माषद्वयं निधाय पत्नीं किं पिबसीति त्रिः पृच्छेत् सा च पुंसव
नमिति त्रिरुक्त्वा सयवमाषं तां — शेषं पीत्वा बहिराचमेत्॥ पुनरेवं द्विः कार्यं आचमनांतं एतत्पुंसवनं॥ अ
थ पूर्वकल्पितसवस्त्रं दूर्वापिंडमादाय मंडलागारच्छायायामुपविष्टायाः प्राङ्मुख्याः पत्न्याः पश्चिमतस्ति
ष्ठन् वदेत्॥ आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिं॥ आ वीरो जायतां पुत्रस्ते दशमास्यः॥ करोमि ते प्राजाप
त्यमा गर्भो योनिमेतु ते॥ अनूनः पूर्णो जायतामश्लोणोऽपिशाचधीतः॥ पुमांस्ते पुत्रो नारि तं पुमाननुजायतां
॥ तानि भद्राणि बीजान्यृषभा जनयंतु नौ॥ यानि भद्राणि बीजान्यृषभा जनयंति नः॥ तैस्त्वं पुत्रान्विंदस्व सा प्रसू
र्धेनुका भव॥ कामः समृध्यतां मह्यमपराजितमेव मे॥ यं कामं कामये देव तन्मे वायो समर्धय इति प्रजावत्सू ॥६७
क्तं॥ अग्निरैतु प्रथमो देवतानां सोऽस्यै प्रजां मुंचतु मृत्युपाशात्॥ तदयं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रम

घं न रोदात्॥ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः अशून्योपस्था जीवतामस्तु माता पौत्र
मानंदमभि प्रबुध्यतामियं॥ मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशंतु॥ मा त्वं विकेश्युर आव
धिष्ठा जीवपत्नी पतिलोके विराज पश्यंती प्रजां सुमनस्यमाना॥ अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाघं॥ शी
र्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुंचामि पाशं॥ देवकृतं ब्राह्मणं कल्पमानं तेन हन्मि योनिषदः पिशाचा
न्॥ क्रव्यादो मृत्यूनधरान्पातयामि दीर्घमायुस्तव जीवंतु पुत्राः॥ इदं जीवपुत्रसूक्तं॥ वामहस्तेन तदान
नमुत्तमप्यपत्न्या दक्षिणनासापुटे स्वांगुष्ठाग्रेण मंत्रांते दूर्वारसं तथा सिंचेत्॥ यथोदरपर्यंतं गच्छति॥
ततो दर्शनं तस्या वा तयात यास्पृष्टस्वरूमवदानविधिनाऽवदाय॥ वामहस्ते हृदि धारयन्॥ ओं प्रजा
पतये स्वाहेति जुहुयात्॥ प्रजापतय इदं॥ यत्ते सुसीम इति मंत्रस्य हिरण्यगर्भः प्रजापतिरनुष्टुप्॥ ना
र्या हृदयालंभने वि॰ यत्ते सुसीमे हृदये हितमंतः प्रजापतौ॥ मन्येहं मां तद्विद्वांसं माहं पौत्रमघं नियामि
ति॥ जायाहृदयं पाणितलेन स्पृशेत्॥ ततः पाणितलेनास्या हृदयं स्पृशेदिति शौनकोक्तेः॥ अथ
प्राग्ग्रीवे उपविष्टयान्वारब्धो जुहुयात् स्रुवेण॥ धातेति मंत्रद्वयस्य हिरण्यगर्भ ऋषिः॥ धाता देवता
॥ आद्यानुष्टुप् द्वितीया त्रिष्टुप् सीमंतोन्नयनप्रधानहोमे वि॰ ओं धाता ददातु दाशुषे प्राचीं जीवातुमक्षि
तां वयं देवस्य धीमहि सुमतिं वाजिनीवतः स्वाहा॥ धात्र इदं॥ ओं धाता प्रजानामुत राय ईशे धाते
दं विश्वं भुवनं जजान॥ धाता कृष्टीरनिमिषाभिचष्टे धात्र इद्धव्यं घृतवज्जुहोत स्वाहा॥ धात्र॰ राकाम

Indira Gandhi National Centre for the Arts

दमितिमंत्रद्वयस्य गृत्समदो राकाजगती॥ सीमंतोन्नयनप्रधानाज्यहोमेवि०॥ ॐ राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना॥ सीव्यत्वपः सूच्याछिद्यमानया ददातु वीरं शतदायमुक्थ्यं स्वाहा॥ राकाया इदं॥ यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि॥ ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा स्वाहा॥ राकायै०॥ नेजमेष इत्यादिमंत्रत्रयस्य हिरण्यगर्भो विष्णुरनुष्टुप्॥ नेजमेष परापत सुपुत्रः पुनरापत॥ अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान् स्वाहा॥ विष्णवे॥ यथेयं पृथिवी मह्युत्ताना गर्भमादधे॥ एवं तं गर्भमाधेहि दशमे मासि सूतवे स्वाहा॥ विष्णवे०॥ विष्णोः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्यां॥ पुमांसं पुत्रमाधेहि दशमे मासि सूतवे स्वाहा॥ विष्णवे॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॰ प्रजापते॰ ता बभूव॥ यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां स्वाहा॥ प्रजापतये॰ शौनकजयंतमते राकादेवत्याहुतिद्वयांते उक्थ्यं स्वाहेत्याहुतिरेका तदनुसार्यन्वाधानं च कार्यं॥ एवं स्वाहुतीर्हुत्वा॥ पत्न्याः पश्चिमतः प्राङ्मुखस्तिष्ठन् पूर्वकल्पितस्तबकद्वयं शललीपिंजूलत्रयसहितं पाणिनादाय पत्न्याः केशललाटसंधिमारभ्य मूर्धमध्यपर्यंतं॥ ॐ भूर्भुवः स्वरोमिति मंत्रं प्रत्युन्नयनमावर्तयंस्त्रिश्चतुर्वा सीमंतमुन्नयेत्॥ मंत्रस्य प्रजापतिर्बृहती सीमंतव्यूहने वि०॥ सगाधूमा मौदुंबरफलमालां तत्कंठे निधाय सामगानकुशलौ वीणागायनौ अन्यो वा संशास्ति सोमं राजानं संगायेतामिति॥ कुशलौ अन्यौ सोमो नो राजावतु मानुषीः प्र ॥६८ जा निविष्टचक्रासौ गंगे इति सन्निहितनदीनाम संबुध्यंतं वदंतौ वीणया सामगायेतां॥ तदभावे अन्यो

संबुध्यंतनामयुक्तं वाक्यमेव पठेतां त्रिः॥ तत उपस्तीर्य चरो राज्यस्य वदायद्विरभिघार्य स्विष्टकृदादि होमशेषं समापयेत्॥ ब्राह्मणेभ्यः ऋषभं दद्यात् तदभावे सन्निहितेभ्यो ब्राह्मणेभ्यो दद्यादिति॥ यद्यपि वृत्तिकारादिभिरुक्तं तथापि दद्यात्तथाऋषभं विदुषे ब्राह्मणायेति शौनकोक्तेरनियमाभिप्रायं बहुवचनं॥ अतः सन्निहितानां मध्ये विदुषे ब्राह्मणाय दद्यात्॥ ऋषभासंभवे तन्मूल्यं वृषभे षट्कार्षापणा इति प्रसिद्धं दद्यात्॥ शौनकप्रयोगादृषभो वृषभो वृष इति कोशाद्वृषर्षभयोरभेदात्॥ पुंसवनसीमंतोन्नयनयोः शतं शतं अनवलोभनस्य प्रत्येकं दश दश वा स्त्रीन् त्रीन्वा ब्राह्मणान् भोजयेत्॥ ॥ इति श्रीमदापदेवसूनुना अनंतदेवेन कृते संस्कारकौस्तुभे त्रयाणां सह प्रयोगः॥ ॥ अथ क्रियोने हृदयालंभनांते प्रत्यग्गवाजिन एवासीनया न्वारब्धः शरीरे वस्विष्टकृतं हुत्वा तंत्रं समाप्य ब्राह्मणान् भोजयेत्॥ स्वतंत्रसीमंते तु प्राग्गीव एवासीनया न्वारब्धः आज्येनैव स्विष्टकृतं हुत्वा तंत्रसमाप्तेः पूर्वं दानं ब्राह्मणभोजनांतं कुर्यात्॥ अत्र भुक्तवतः प्रायश्चित्तं पारिजाते धौम्यः॥ अष्टौ दने सोमे च सीमंतोन्नयने तथा॥ जातश्राद्धे तथोक्तस्का भोक्ता चांद्रायणं चरेदिति॥ तत्रैव त्र्यच्छिधाने॥ अराद्भ्वे जपेन्मंत्रं शतवारं न संशयः॥ सीमंते च महानुक्तौ भुक्ते किल्विषात्तदेति॥ अत्राद्यानां गर्भाहोदनीगभोजनमिव सीमंतागभोजनमेव निमित्तत्वेन विवक्षितं॥ अतस्तद्दिने तद्गृहे भोक्तुः प्रायश्चित्तमिति पारिजातीकाराशयः॥ परिशिष्टे तु पुंसव

नानवलोभनेऽन्यथोक्तं उक्तं तत्तीये पुंसवनं चतुर्थे नवलोभनं ब्रह्मणाग्निः संविदान इति षट् प्राजापत्याः स्था-
लीपाकस्य हुत्वाऽक्षीण्यांते नासिकायामिति प्रत्यृचं माङ्गुलेपन्नो गोगाम्यभिमृशेत् ॥ व्याख्यातं सीमंतोन्नयनं
प्रथमे गर्भे ॥ अनवलोभनं व्याख्यास्यामश्च रुद्रयं च कुर्वीतेति प्राजापत्यं ॥ पौरुषं च हिरण्यगर्भः समवर्त-
ताग्र इति षट् प्राजापत्ये सद्स्व शीर्षेति द्वितीये गुर्विण्याः कुक्षिमभिमंत्रयेतापुष्यमिति सूक्तेन ब्रा-
ह्मणान् भोजयित्वा स्वस्त्ययनं वाचयीतेति ॥ द्वितीये च रौसूक्तस्य विनियोगः ॥ सूक्तं सूक्तादौ दृष्टीनेपा-
द इति परिभाषायां गृह्य इव तत्परिशिष्टेपि प्रवृत्ते ॥ अयं प्रकारश्च नभाष्य वृत्तिकारादिभिराहृतः
उक्तं हि भाष्ये प्राजापत्यं प्रकृत्य ॥ उभयोः कर्मणोरयं साधारणः स्थालीपाक इति ॥ जयंतकारिकायो-
चनाम्ने वहोम उक्तः अतिशिष्टेरथ नाहृतं इति चन तत्प्रयोगो लिख्यते ॥ ॥ इति पुंसवनानवलोभ-
नसीमंतोन्नयनानि ॥ ॥ अथ सूतिकागृहं पारिजाते वसिष्ठः ॥ ऐंद्रे तु विक्रमस्थानं आग्नेय्यां पच-
नालयः ॥ वारुण्यां भोजनगृहं नैरृत्यां सूतिकागृहमिति ॥ तत्प्रवेशकालं गर्गः ॥ रोहिण्यैंदवपुष्ये-
षु स्वातीवारुणपौरवि ॥ पुनर्वसौ पुष्यहस्तधनिष्ठास्वुत्तरासु च ॥ मैत्रे त्वाद्ये तथाश्विन्यां सूतिकागा- ६६
रवेशनं ॥ गृहे तु कूलेग शौतुरिक्ताषष्ठ्यष्टवर्जिते ॥ सर्वे वाथ शुभाः केंद्रपापाश्च त्रिषडायगाः ॥ शुभो
शेशुभदृष्टो तु सूतिकावेशनं शुभमिति ॥ तद्विधिः पाद्मे ॥ प्रविसूतिकासंज्ञं कृतरक्षं समंततः ॥ सुम-

नौनिर्मितं रम्यं वास्तुविद्याविशारदौ ॥ प्राग्द्वारमुत्तरद्वारमथवासुदृढं शुभं ॥ देवानां ब्राह्मणा-
नां च गवां कृत्वा च पूजनं ॥ विप्रपुण्याहशब्देन शंखवाद्यरवेण च ॥ प्रसूता वृद्धवस्त्रैस्तथाज्ञैः शस्त्रमादय (?)
॥ हृष्टाविश्य सनीयाश्च प्रविशेत् पुस्त्रियश्च तत ॥ इरंउमूलचूर्णेन सघृतेन तथैव तां ॥ सुखप्रसवनार्थाय पश्चात्का-
तुतल्लिपेदिति ॥ प्रसवनिर्विघ्ने माध्वे वर्त्तकमृग्विधाने ॥ प्रमंदिने अचंत्वे तां जप इमं गर्भप्रमोचिनी ॥ इदं च मनसा ध्याये-
न्नारी गर्भं प्रमुंचतीति ॥ तथा विजिही ऊँ षनस्पते नादिदं आवनेस्रुतं ॥ पंचावयतु कामः स्याद्व्याचयेन्नमिदं जपन् ॥ स्त्रियं ग-
र्भप्रमूढां वापाययेदनुमंत्रितं ॥ उदकं च्यावने नैव गर्भो धश्ववतेसुखमिति ॥ अथ पुत्रजन्मनि कर्त्तव्यं वसिष्ठः ॥ जातमात्र-
कुमारस्य मुखमस्यावलोकयेत् ॥ पिता ऋणाद्विमुच्यते तपुत्रस्य मुखदर्शनादिति ॥ ज्योतिर्वसिष्ठः ॥ श्रुत्वा जातं पि-
ता पुत्रं सचैलं स्नानमाचरेत् ॥ उत्तराभिमुखो भूत्वा नद्यां वा देवखातके इति ॥ अत्रासन्निधौ श्रवणानंतरं स्नानं ॥ स-
न्निधौ मूलाद्यजातस्य मुखदर्शनानंतरं स्नानमिति बोध्यं ॥ पूर्ववाक्ये मात्रपदेन जन्मानंतरं मुखावलोकने व्यव-
धानं निषेधात् ॥ एतच्च रात्रावपि कार्यं ॥ नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु ॥ पुत्रजन्मनि यात्रायां शर्व-
र्यां दत्तमक्षयमिति व्यासोक्तेः ॥ रात्रौ नद्यादिगमनाशक्तौ व्यासाद (?) सांख्यायनः ॥ दिवाहृतेन तोयेन कृत्वा स्वर्णयु-
तं तु तत् ॥ रात्रिस्नाने तु संध्याते (?) कुर्यादनलसंनिधाविति ॥ आशौचांतरमध्ये पुत्रजन्मनि नैमित्तिके स्नाना-
वस्येवाधिकारः ॥ सूतके तु समुत्पन्ने पुत्रजन्म यदा भवेत् ॥ कर्तुस्तात्कालिकी शुद्धिरिति प्रजापतिवचनात् ॥ पु-
त्रजन्मनिमित्ताशुद्धेरप्यवधिं जैमिनिः ॥ यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं ॥ छिन्ने नाले ततः पश्चात्सूतकं
Indira Gandhi National Centre for the Arts

शंखः सर्वेषां सकुल्यानां द्विपदचतुष्पथान्यहिरण्यादिति॥एतआशौचमध्यपिकार्यमितिमाधवः +
तुविधीयतइति॥नैमित्तिकाधिकारसंपादकसंध्यावंदनादेः पूर्णार्थमुत्तरार्द्धं॥जाःकालिः॥जन्मतोनंतरका
र्यंजातकर्मयथाविधि॥दैवादतीतकालं चेदतीतेसूतकेभवेत्॥अछिन्ननाभिकर्तव्यं श्राद्धं वैपुत्रजन्मनि॥हेम
श्राद्धंचकुर्वीतेतिनैमित्तिकक्रममाहाचार्यः॥जातंकुमारंतंदृष्ट्वास्नात्वानीयगुरून्पिता॥नांदीश्राद्धावसानेतु
जातकर्मसमाचरेदिति॥जातकर्मांतरमपितदहः कर्तव्यमाहहारीतः॥जातेकुमारेपितॄणामामोदात्पुण्यं तद
हस्तस्मात्तिलपूर्णानिपात्राणिसहिरण्यानिब्राह्मणानाहूयपितृभ्यः स्वधांकुर्यात्प्रजापतयेचेति॥ब्राह्मे॥देवा
श्चपितरश्चैवपुत्रेजातेद्विजन्मनां॥आयांतितस्मात्तदहःपुण्यंपूज्यंचसर्वदा॥तत्रदद्यात्सुवर्णंचभूमिंगांतु
रंगंरथं॥छत्रंछागंचमाल्यंचशयनंचासनंगृहमितिवृद्धयाज्ञवल्क्यः॥कुमारजन्मदिवसेविप्रैःकार्यःप्रति
ग्रहः॥हिरण्यभूगवाश्वादिधान्यशय्यासनादिषु॥तत्रसर्वंप्रतिग्राह्यंपक्वान्नंतुविवर्जयेत्॥भक्षयित्वातुत
न्मोहाद्द्विजश्चान्द्रायणंचरेत्॥सूतकेतुसकुल्यानामदोषोमनुरब्रवीदिति।पितुःपादिस्पादोविशेषमाप्लुला
यतः॥यस्तौमृतेवापतितसन्यस्तेवाविदेशगते॥तद्गोत्रजेनश्रेष्ठेनकार्याःपुंसवनादयः॥दीक्षांतेदीक्षितोभ
ताजातकृत्यादिकंचरेत्॥पुंसवनादीनिकर्माणिज्येष्ठोनकारयेत्॥अकृतेन्यकृतेकर्मण्यापत्सुस्वास्थ्य
मागतः॥दानेज्ञीलणावाकैश्चपुत्रकर्मान्तरंचरेदिति॥श्रेष्ठेनेतिताद्दृशएवप्रतिनिधिरित्येवमर्थः॥दीक्षिते
नदीक्षाकालेस्वयमपिजातकर्मनकार्यं॥नापितत्प्रतिनिधिनाऽन्येन।किंत्ववभृथांतेविसृष्टदीक्षः स्वयमेव
कुर्यादित्यर्थः॥श्रेष्ठःकनिष्ठहस्तेनपुंसवनादीनिनकारयेदित्यर्थः।जातकर्मतुकारयेदितिसूच्यते॥ ॥ ७०

अकृतइतिनिषिद्धप्रतिनिधिनाकृतत्वमित्यकृततामापन्नंकर्मातिक्रांतकेनापिनिमित्तेनकंचित्कालंस्वयंक
र्तुमसमर्थोपिनान्येनकारयेत्॥स्वास्थ्योत्तरंदानसहितब्राह्मणाशीर्भिःसोत्कर्षपुत्रसंस्कारंकुर्यादित्यर्थः॥
महारोगार्तस्तुसत्यपिसामर्थ्येस्वयंजातकर्मनकुर्यात्॥रोगार्दितस्तुतत्कालेस्वशक्त्यान्येनकारयेत्॥यावत्स्वा
स्थ्यंभवेत्तावत्ताचरेज्जातकक्रियामित्याश्वलायनवचनात्॥जातकर्मानंतरंकर्तव्यमाहवसिष्ठः॥दत्वागोभूहि
रण्यादिततोलग्नंनिरीक्षयेत्।लग्नमेवप्रशंसंतिज्योतिःशास्त्रविदोजनाः॥आरिक्तपाणिर्दैवज्ञात्शृणुयात्पुत्रज
न्मनीति॥ततश्चदैवज्ञोक्तदुःस्थानस्थितग्रहप्रीत्यर्थंशक्त्याउचितदानानिकुर्यात्॥अशक्तःसंकल्पपूर्वकंजपपूजा
दीन्ब्राह्मणान्नियुंजीतेति॥अथजातकर्मप्रयोगः॥पुत्रेजातेमात्रेमूलज्येष्ठादौअनुत्पन्नस्यतस्यमुखंकुलदेवताकु
लवृद्धप्रमाणमपूर्वकंआलोकयन्दद्यादुदङ्मुखःस्नायात्तदसंभवेगृहेवाऽहृताभिःशीताभिःस्वर्णयुताभिर
द्भिःस्नायात्॥रात्रावनलसन्निधौ॥ततोद्विराचम्यप्रागकृतसंध्यावंदनश्चेत्॥पूर्णसंध्योपासनंकुर्यात्॥अथशु
क्लवस्त्रमाल्यादिभिरलंकृतःपवित्रपाणिःअकृतनालच्छेदंअपीतस्तन्यंअन्यैरस्पृष्टंक्षालितमलंकुमारंमात
रुत्संगेप्राङ्मुखंकारयित्वाप्राङ्मुखोदेशादिकीर्तनांते॥अस्यममकुमारस्यगर्भांबुपानजनितसकलदो
षनिर्हरणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भव॥एनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंजातकर्मकरि
ष्ये॥तदादौस्वस्तिपुण्याहवाचनंमातृकापूजनंचकरिष्ये॥हिरण्येनजातकर्मांगभूतंपुत्रजन्मनिमि
त्तकंचाभ्युदयिकंतंत्रेणकरिष्ये॥तदादौनिर्विघ्नतासिद्ध्यर्थंगणपतिपूजनंकरिष्येइतिसंकल्प्यगण

Indira Gandhi National
Centre for the Arts

+ अत्रापि केचित्सकलमंत्रपर्या लोचनाभिमर्शनमिच्छंति। अन्येमंत्रविभागमिच्छंति अश्मा भवेत्येनेन व्यदर्शि + २
पाति पूजनं कुर्यात्॥ अस्य जातकर्मणः पुण्याहं भवंतो ब्रुवंत्वित्यादि प्रयोगः॥ आद्धेचयुग्मब्राह्मणपर्याप्तंहि
७१ रण्यं स्वाहा न ममेति प्रयोगः॥ ततो मधुसर्पिषी विषममात्रेण मिश्रिते शिलायां निक्षिप्य यथा तयोः सुवर्णरजः
संसर्गो भवति तथा सुवर्णं संघृष्य पात्रे सौवर्णादि पात्रे सौवर्णे राजते वापि पात्रे कांस्यमये थवा॥ मधुसर्पिषि
सिच्याथ हिरण्येनावघर्ष[illegible]: प्राशयेत् हिरण्येन कुमारं मधुसर्पिषी इति आश्वलायनस्मृतो अत्रक्रमोऽविवक्षि
त इति बह्वृचः त्रेतसंभवत्यप्रतेददामीति मंत्रस्य हिरण्यगर्भः सविता त्रिष्टुप्॥ कुमारेण मधुसर्पिः प्राशने वि नि०
प्रतेददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनां॥ आयुष्मान् गुप्तो देवताभिः शतं जीव शतं जीव शर
दो लोके अस्मिन्निति॥ मंत्रांते तेनैव हिरण्येन कुमारं पाययित्वा तद्धिरण्यं प्रक्षाल्य स्वयमाचम्य तद्धिरण्यं
कुमारदक्षिणकर्णे निधाय॥ मेधां त इति मंत्रस्य हिरण्यगर्भः सविता सरस्वत्यश्विनावनुष्टुप्॥ कुमार
दक्षिणकर्णे जपे वि० कर्णसमीपे मुखं नीत्वा जपेत्॥ मेधां ते देवः सविता मेधां देवी सरस्वती मेधां ते अश्वि
नौ देवावाधत्तां पुष्करस्रजाविति हिरण्यं सव्यकर्णे निधाय॥ तथैव तां मं[illegible]जपित्वा शिशोरंसौ दक्षिणेन पाणिना पु
गपदभिशेतं ओं अश्मा भव परशुर्भव हिरण्यमस्तृतं भव॥ वेदो वै पुत्रनामासि स जीव शरदः शतं॥ इंद्रे ७१
श्रेष्ठानि गृत्समद इंद्रस्त्रिष्टुप्॥ कुमारांसाभिमर्शने वि० ओं इंद्र श्रेष्ठानि द्रविणानि धेहि चित्तिं द
+ णमंसं अभिमर्शनं इंद्रश्रेष्ठानस्मे प्रयंधीत्यास्यांसममिति अपरस्यादुः सकृदेव त्रयो मंत्राः० श्योकव्या इति +

+ मंत्रः सकृत्पर्यायेणाभिधानमि+
+ येके अमंत्रामिच्छंति २+

[illegible] क्षस्य सुभगत्वमस्मे पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नां॥ अस्मे
प्रयंधीत्यांगिरसो घोर इंद्रस्त्रिष्टुप्॥ कुमारां० ओं अस्मे प्रयंधि मघवन्नृजीषिन्निंद्र रायो विश्ववारस्य भूरेः॥ अस्मे
शतं शरदो जीवसे धा अस्मे वीरां छश्वत इंद्र शिप्रिन्निति॥ ततोऽस्य पुरमिदृश्य अंगादंगात्संभवसि हृदया
दधिजायसे॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमिति॥ मूर्धानं त्रिराजिघ्रेदिति बह्वृचः पारिजातोदाहृतं
रक्षापुत्रो विविधप्रथमाजिघ्राति पिता सुतं तावन्मात्रं स्मरेत्तस्य तं मातापि प्रपापयेदिति आचार्यवचोनु
सरंतः॥ वृत्तिकृत्पंतादयस्तु॥ प्रवासादाग[illegible]स्यैव सूत्रानुसारेण त्रिराघ्राणमित्याहुः॥ तद्वेत्यं प्रवा
सादेत्य गृहद्वारि स्थित्वा गृहमवेक्षेत गृहा मा बिभीतेति॥ अथ प्रविशेदूर्जं नहं सुमनसः प्रपद्य इति॥ अ
थ शिवं शग्ममिति मंत्रं सकृदुक्त्वा त्रिरनुवीक्षमाणः प्रपद्य कृताचमनो नेकपुत्रश्चेज्ज्येष्ठानुपूर्व्येण शिरः स
र्वतो गृहीत्वा त्रिरवघ्राय जपेत्॥ अंगादंगादिति मंत्रं॥ प्रतिपुत्रं शिरोवघ्राणादि जपांता वृत्तिः एकपुत्रः स
कृदेव तावत्तं कुर्यात्॥ पूर्वमतानुसारे जातकर्मो ते विक्रियमाणमाघ्राणमित्यैमेव शिरोवघ्राणादिजपांतं
कर्तुमुचितं ततो नाम्ना मम्पोऽभूयसी दक्षिणां शक्तो पूर्वोक्तदेयां तरालेऽचु दत्वा ऽरिक्तपाणिर्देवज्ञपूजनपू
र्वकं जन्मलग्नगतग्रहावधारणं कृत्वा प्रतिकूलग्रहानुकूल्यसिध्यर्थं विशिष्टदानानि कुर्यात्॥ जपादिक
र्मणि वाचनब्राह्मणान्निपुज्य नालच्छेदं कालयित्वा हिरण्योदकेन मातुर्दक्षिणस्तनं प्रक्षाल्य मात्रा कुमा
रं पाययेत्॥ इमं कुमारो जरां धयतु दीर्घमायुः प्रजीवसे॥ अस्मै स्तनो प्रयुंजाना आयुर्वर्चो यशो बलमिति
के नापि ब्राह्मणेन पाठितमंत्रेण॥ तमवर्ण्ण तमिति ब्राह्मणा आशीर्वादमंत्रं वदेयुः॥ गृहपतिशिष्टेतु॥ अथ जात

Indira Gandhi National
Centre for the Arts

कर्म पुत्रे जाते पुरान्येरालंभादग्निरिंद्रः प्रजापतिर्विश्वेदेवा ब्रह्मेत्यनादेशदेवता हुत्वा आकृस्विष्टकृतः सर्पि
र्मधुप्राशनादि कुर्यादिति ॥ परिशिष्टांतरे तु कुमारस्य तु जातस्य अरणी षोडशांगुलौ ॥ आहृत्य चोत्तरामेर
णीं ताभ्यामग्निं तु मंथयेत् ॥ जुहुयाज्जातकर्मादि पित्रे औपासनेपि वा ॥ तस्मिन् कुमारकर्माणि विवाहांतानि
कारयेत् ॥ सगृह्यश्चात ऊर्ध्वं स्याद्विधिनानेन संस्कृतद्रुत्फकं ॥ तस्मिन्मंथनोत्पन्ने ॥ आपि वेत्यस्योत्तरार्धे नान्व
यः ॥ होमपक्षे नांदीश्राद्धांतं जातकर्मांगभूतं होमं करिष्य इति संकल्प्यारणी परिगृह्य पूर्ववन्मथितमग्निं लौ
किकमग्निं वाऽऽहृत्य तिभिः प्रतिष्ठाप्य समयेन्धाधाने चक्षुषी आज्येनेत्यते अग्निमिंद्रं प्रजापतिं विश्वान्देवान्ब्रह्म
णमिति प्रधानदेवता आज्येन ॥ शेषेण स्विष्टकृतमित्यादि आज्यभागांतं कृत्वा सुवर्णेनायेस्वाहृत्य वं पंच
नी हुत्वा मधुसर्पिः प्राशनादि अत्राभिमर्शनांतं मूर्धाघ्राणांतं वा कृत्वा स्विष्टकृदादि इति क्रमः ॥ कुमार्यास्त्वपि
तज्जातकर्मामंत्रकं कार्यं ॥ आवृत्तैव कुमार्या इति सूत्रात् ॥ तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समंत्रक इ
ति स्मृतेश्चेति कौस्तुभे जातकर्मप्रयोगः ॥ अथ जन्मदेवतानां पूजनादि आसः ॥ सूतिकावासनिलया जन्मदा निमित्तार्
नाम देवताः ॥ तासां यागनिमित्तात्तु शुद्धिर्जन्मनि कीर्तिता ॥ जन्मशौचे सत्यपीत्यर्थः ॥ प्रथमे दिवसे षष्ठे वा
दशमे चैव सर्वदा ॥ त्रिष्वाशौचं न कुर्वीत सूतके पुत्रजन्मनि इति ॥ चकारात् पंचमाष्टमयोरपि ॥ तत्र प्रथ
मे नैमित्तिकश्राद्धादौ ॥ दशमे बलिदानान्नदानयोः इतरत्र तु जन्मदेवतापूजादौ ॥ बलिदानं तु दशमे ह्यन्न ७२
दानं प्रशस्तमिति ॥ अन्नदानं च सगोत्रेभ्यः ॥ अथ पूजाप्रयोगः ॥ पंचमादिरात्रे प्रथमयामे कुमारस्य पित्रादि
राचमनादि देशकालकीर्तनांते स्य बालस्य सर्वमातृकस्यायुरारोग्यसकलारिष्टशांतिद्वारा श्रीपरमेश्वर

प्रीत्यर्थं जन्मदानं जीवंतिकायाश्च पूजनं करिष्य इति संकल्प्य गणेशपूजां षोडशोपचारैः कृत्वा प्रार्थयेत्
॥ लंबोदर महाभाग सर्वोपद्रवनाशन ॥ त्वत्प्रसादादविघ्नेश चिरंजीवतु बालक इति ॥ ततः कुड्यादि लि
खित प्रतिमासु तंडुलपुंजेषु वा जन्मदाः ॥ जीवंत्यपरनाम्नीः षष्ठीं च षोडशोपचारैः पूजयेत् ॥ जन्मदाभ्यो
नम इति नाममंत्रेण जन्मदानामावाहनादि ॥ आयाहि वरदे देवि महाषष्ठीति विश्रुते ॥ शक्तिभिः सह बालं
मे रक्ष जागरवासरे इति षष्ठ्या आवाहनं ॥ शक्तिस्त्वं सर्वदेवानां लोकानां हितकारिणी ॥ मातर्बालमिमं रक्ष
महाषष्ठि नमोस्तु ते इति इतरोपचाराणां तस्यै समर्पणं ॥ ततस्तस्याः प्रार्थनं जननी सर्वभूतानां बालानां
च विशेषतः ॥ नारायणी स्वरूपेण बालं मे रक्ष सर्वदा ॥ भूतप्रेतपिशाचेभ्यो डाकिनीयोगिनीषु च ॥ मातेव
रक्ष बालं मे श्वापदे पन्नगेषु च ॥ गौरीपुत्रो यथा स्कंदः शिशुत्वे रक्षितः पुरा ॥ तथा ममाप्ययं बालः षष्ठिके
रक्ष्यतां नम इति ॥ उक्तदिनेषु पूजितदेवताप्रीत्यर्थं ब्राह्मणेभ्यो यथाचारं तांबूलदक्षिणां दद्यात् ॥ पक्वान्नभिन्न
दानप्रतिग्रहयोर्न दोषः ॥ ॥ इति जन्मदेवतादिपूजनं ॥ ॥ अथ शौचे कर्तव्यनिर्णयः ॥ भारद्वाजः ॥ सूत
के मृतके कुर्यात्प्राणायामं समंत्रकं ॥ तथा मार्जनमंत्रांस्तु मनसोच्चार्य मार्जयेत् ॥ गायत्रीं सम्यगुच्चार्य सू
र्यायार्घ्यं निवेदयेत् ॥ मार्जनं तु न वा कार्यमुपस्थानं न चैव हीति ॥ पैठीनसिः ॥ सूतके सावित्र्या जलं प्रक्षिप्य
प्रदक्षिणं कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति प्राणायामः सावित्र्याः पुनर्वचनं स्पष्टोच्चारणार्थं ॥ विष्णुः ॥ आशौ
चे होमदानप्रतिग्रहस्वाध्याया निवर्तंते ॥ नाशौचे कस्यचिदन्नमश्नीयादिति ॥ अत्र होमो वैश्वदेवाख्यः ॥ पं
चयज्ञविधानं तु न कुर्यान्मृतिजन्मनोरिति स्मृत्यंतरात् ॥ न तु अग्निहोत्रौपासनाख्यः ॥ वैतानोपासनाः कार्याः

Indira Gandhi National
Centre for the Arts

मोन्नरं॥होमश्रौपा+५

क्रियाश्च श्रुतिनोदिता इति याज्ञवल्क्योक्तेः॥ कर्मवैतानिकं कार्यं स्नानोपस्पर्शनात्स्वयमिति हारीतोक्तेश्च वैता
निकग्रहणमौपासनहोमोपलक्षणार्थं॥ तस्यापि श्रौतत्वेन लिंताद्धारोक्तेः॥ स्नानाचमनेन तात्कालिकी॥ अग्निहो
त्रस्य होमार्थं शुद्धिस्तात्कालिकी भवेदिति गोभिलोक्तेः॥ स्थालीपाकं पिंडपितृयज्ञादि स्मार्त्तं तु आशौचे प्यन्यद्वारा
कारयेत्॥ न त्वजेनापि स्वयं कुर्यात्॥ सूतके तु समुत्पन्ने स्मार्त्तं कर्म कथं भवेत्॥ पिंडयज्ञं चरुं होमं असगोत्रेण का
रयेदिति॥ एतच्च प्रथमाब्दं सन:॥ सोसगोत्रेणापि कारणीयद्त्वाशयेन तदुक्तेः॥ न तु तत्रापि नियमः॥ अग्निहो
त्रतुल्यत्वात्॥ अन्ये तु स्थालीपाकादि च औपासनहोमेऽप्यन्यकर्तृत्वनियमं मन्यंते॥ काम्यस्यापि प्रतिप्रसवं पुलस्त्यः
सद्यःशौचमित्यनुवृत्तौ॥ सान्निहित्यमुपस्पृश्य राहुग्रस्ते दिवाकरे॥ सत्रधर्मप्रवृत्तस्य दानकर्मफलेष्विण इति सन्नि
दिनतीर्थे स्नात्वा राहूपरागे काम्यदानं कुर्यात्॥ तथा प्रसन्नप्रवृत्तोपीति व्याख्यातं पारिजाते॥ तथा बृहस्पतिः॥ क
न्याविवाहे संक्रांतौ सूतकं न कदाचनेति॥ जमदग्निः सूतके मृतके वापि जाडूयाः सलिले स्थितः॥ नाभिमात्रे जले
स्थित्वा कुर्याद्दानजपादिकमिति॥ एतदुभयं काम्यविषयमपीत्यपि तत्रैवोक्तं॥ अथ सूतिकाशुद्धिः॥ द्विजातेः सू
तिकायास्याद्दशाहे न तु शुध्यति॥ त्रयोदशाहे संप्राप्ते॥ स्पृश्यास्पृश्यत्वसंशयमिति॥ अशुद्धा शूद्रा अस्पृश्या निवृ
त्तिरत्रोच्यते॥ कर्मानधिकारस्तु तत्र दृष्णोचित्ते शौचात्ते सर्वेषां निवर्त्तते॥ द्विजातिस्त्रीणां तु पुत्रप्रसूतानां विंशतिरा ७३
त्रांते कन्याप्रसूतानां तु मासांत इति संक्षेपः॥ इत्याशौचकर्त्तव्यादिनिर्णयः॥ अथ जननशांतयः॥ तत्रादौ गोप्रसवज
नने गर्गः॥ पित्रारिष्टे सुतारिष्टे मात्ररिष्टे तथैव च॥ प्रायश्चित्तं ततः कुर्यात्तत्तद्दोषस्य शांतये॥ तादृशानक्षत्रोत्पन्नस्य चिरि
पित्राद्यरिष्टे तत्तद्दोषशांत्यै तत्तत्प्रायश्चित्तं कुर्यादित्यर्थः॥ पूर्वाश्विनीमुद्गे सार्पमघा चित्रेंद्रमूलभे॥ एतेषु सद्योषु

जातस्य कुर्याद्गोजननं तथा॥ जन्मर्क्षे वा त्रिजन्मर्क्षे शुभवारे शुभे दिने॥ कृत्वाभ्यंगादिकं सर्वं गृहालंकारपूर्वकं॥ गोमये
नोपलिप्याथ गृहस्येशानभागके॥ पंकजं कर्णिकायुक्तं रजोभिः श्वेतवर्णकैः॥ व्रीहींस्तत्र विनिक्षिप्य यथाविज्ञानुसा
रतः॥ नववस्त्रैस्तु तन्मध्ये रक्तवस्त्रं प्रसारयेत्॥ स्थापयित्वा शिशुं तत्र पुनः सूत्रेण वेष्टयेत्॥ प्राङ्मुखं तमवाक्‌पा
दं तिलगर्भगतं शिशुं॥ गोमुखं दर्शयित्वा तु पुनर्जातं तु गोमुखात्॥ विष्णुर्योनिमिति सूक्तेन गव्येन स्नापयेच्छि
शुं॥ गवामंगेषु मंत्रेण गवामंगेषु संस्पृशेत्॥ विष्णोः श्रेष्ठेन मंत्रेण गोप्रसूतं तु बालकं॥ आचार्यस्तु समादाय पश्चान्मा
त्रे दद्येत्तदा॥ माता जघन्यभागस्था शिशुमानीय तं मुखात्॥ ततः पित्रे तदा दद्यात्ततो मात्रे प्रदापयेत्॥ वस्त्रेण नि
च संस्थाप्य पुत्रस्य मुखमीक्षयेत्॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिश्च संयुतं॥ आपो हि ष्ठादिभिर्मंत्रैरभिषिंचे
त्ततः शिशुं॥ मूर्ध्नि चाघ्राय तत्पुत्रं तन्मंत्रेण तदा पिता॥ अंगादंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्र
नामासि स जीव शरदः शतमिति॥ मूर्धानि त्रिरवघ्राय तं शिशुं स्थापयेत्ततः॥ पुण्याहं वाचयेत्पश्चाद्ब्राह्मणैर्वेद
पारगैः॥ दरिद्रा यथाविप्राय तां गामभ्यर्च्य दापयेत्॥ गोवस्त्रस्वर्णधान्यानि दद्याद्वेदोदितः क्रमात्॥ युणाद्या कि
यनं दद्यात् ब्राह्मणेभ्यस्तदा पिता॥ ततो होमं प्रकुर्वीत स्वस्वशाखोक्तमार्गतः॥ उत्सवं च ततः कुर्यादाज्यभा
गांतमेव च॥ होमस्येशानदिग्भागे धान्योपरि शुभं घटं॥ पंचगव्यं घटे स्थाप्य तिलांस्तत्र विनिक्षिपेत्॥ ह्रीरि
कुंभ कषायांश्च पंचरत्नानि निक्षिपेत्॥ वस्त्रयुग्मानि संछाद्य गंधादिभिरथार्चयेत्॥ विष्णुं वरुणमभ्य
र्च्य प्रतिमां च विधानतः॥ प्रतिमां यक्ष्मणः अत्रैतद्देवस्य होमविधाना तच्च कार्याच्चेति केचित्॥ तन्न विश्वक
र्मादिपूजायां प्रतिमानियमसंभवे॥ पूर्वपूजांतरविधिकल्पनस्यान्याय्यत्वात्॥ चकारस्य विधानशब्दो

Indira Gandhi National
Centre for the Arts

तत्तद्दुचितेतिकर्त्तव्यतानिरूपितसमुच्चयार्थत्वात्॥यतइंद्रादिभिर्मंत्रैः कुंभं स्पृष्ट्वाभिमंत्रयेत्॥दधिमध्वाज्ययु
क्तेनहोमंकुर्याद्विधानतः॥आपोहिष्ठेतितिसृभिः अप्सुमेसोमइत्यथ॥तद्विष्णोःपरमंपदमृग्भ्यांतेतिसूक्तेन
अग्निरग्निःप्रत्यृचंचाष्टाविंशतिसंख्यया॥अशक्तश्चाष्टसंख्यंवादधिमध्वाज्यसंयुतं॥आदित्यादिग्रहाणांच
होमंकुर्यात्समंत्रकं॥ ॥इतिगोप्रसवविधिः॥अथप्रयोगः॥बालस्यजन्मर्क्षेतदारभ्यगणनेनदशमेकोन
विंशेवानक्षत्रयोस्तदसंभवेदेवुनक्षत्रादियुक्ते॥शुभदिनेवाकृतमंगलस्नानोगृहमुपलेपनादिनालंकृत्य
सभार्योऽस्यबालस्यामुकदुष्टकालोत्पत्तिसूचितारिष्टनिवृत्तिद्वारापरमेश्वरप्रीत्यर्थंगोमुखप्रसवाख्यां
शांतिं करिष्य इतिसंकल्प्यतदंगत्वेनगणेशपूजां करिष्य इतिसंकल्प्यतंसंपूज्याचार्यवरणंतत्पूजनंचकु
र्यात्॥आचार्योयदत्रसंस्थितामितिसर्षपविकिरणंशुचीवइतिपंचगव्येनापोहिष्ठेतित्र्यृचेनदेशप्रोक्ष
णंस्वस्त्ययनंतार्क्ष्यमितिप्रार्थनंचविधायगृहस्यैशानभागेगोमयेनोपलिप्यश्वेतरजोभिःकर्णिकायुक्तप
कजंकृत्वातत्रव्रीहीन्क्षिप्त्वातेषुसूर्पंतस्मिन्नवंवस्त्रंप्रसारितंतत्रतिलविकिरणंचकृत्वाप्राङ्मुखंअवा
क्पादंशिशुंनिधायसशिशुंसूर्पंरक्तवस्त्रेणवेष्टयित्वातस्मिन्गोमुखसान्निध्यंकृत्वाविष्णुर्योनिमितिसूक्तस्यत्वष्ट
विष्णुरनुष्टुप्सूक्तेनजन्मचिंतनंकृत्वातेनैवारव्यापंचगव्येनाशिशुंस्नापयित्वागवामंगेषुतिष्ठंतिभुवना
निचतुर्दश॥यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रचेतिगोःसर्वांगेषुवामांगेष्वेववास्पृशेत्॥ततआचा ७४
र्योबालमादायगोमुखसमीपेवालंनीत्वापुनरादायपित्रेदद्यात्तत आचार्यःपितृहस्तेनमात्रेदापयेत्॥नवेवस्त्रे
शिशुंस्थाप्याच्छादनमपसार्यपुत्रमुखेक्षणंकुर्यात्॥ ततःपंचगव्येनाचार्यःशिशुंप्रोक्षेत् आपोहिष्ठेतितिसृ

भिः आसांसिंधुद्वीपआंबरीषआपोगायत्रीअभिषेकेवि०॥ततःपितास्तद्वयेनपरिगृह्यदानपूर्वकंअंगादंगादि
तिमंत्रेणशिशोर्मूर्धनित्रिरवघ्रायअथास्थानेशिशुंस्थापनंकृत्वाशाखाध्यायिभिःस्वशाखोक्तविधिनापुण्याह
वाचनंकुर्यात्॥ततआचार्योगोर्दरिद्रब्राह्मणस्यचपूजनपूर्वकंतस्मैतद्दानंविधिनाकारयेत्॥ततोयजमा
नोवस्त्रस्वर्णधान्यानियथाशक्त्यकोदिप्रीत्यर्थंआचार्यायदत्वाऽन्येभ्योब्राह्मणेभ्योभूयसींदक्षिणांदद्यात्
ततआचार्योगोमुखप्रसवशांतिहोमंकरिष्य इतिसंकल्प्यस्थंडिलाग्निस्थापनादिकोदिग्रहणमा
वाहनंकृत्वान्वाधानंकुर्यात्॥चक्षुषीआज्येनेत्यंतेऽत्रप्रधानं अपःद्वादशोत्तरशतसंख्याभिर्दधिमध्वाज्या
हुतिभिर्द्वात्रिंशत्संख्याभिर्वा विष्णुंअष्टाविंशतिसंख्याभिर्दधिभिःअष्टाभिर्वा॥यक्ष्मदहणंअष्टव्याधि
कशतसंख्याभिर्दधिभिःअष्टचत्वारिंशत्संख्याभिर्वाअर्कादीन्प्रत्येकंअष्टाविंशतिसंख्याभिर्दधिभिः
प्रत्येकमष्टाभिर्वा॥शेषेणेत्यादिः आज्यभागांतेस्थंडिलस्यैशानदिशिग्रहपीठेत्तरतोमहीद्यौरित्यादिवि
धिनाधान्योपरिघटस्थापनंकृत्वातस्मिन्पंचगव्यंतिलान्क्षीरिद्रुमकषायान्पंचरत्नानिक्रमेणनिःक्षि
प्यवस्त्रयुग्मेनसंछाद्यगंधपुष्पादिभिःकलशमभ्यर्च्यकृताष्टताङ्गरणप्रतिमयोर्विष्णुवरुणौपूजयेत्॥तद्वि
ष्णोरितिमेधातिथिर्विष्णुर्गायत्रीतत्वायामिशुनःशेपोवरुणस्त्रिष्टुप्गोप्रसवप्रधानपूजनेवि०॥पूजां
तेकुंभंस्पृष्ट्वाभिमंत्रयेत्॥यतइंद्रेतिपल्गंनर्गरुजोरुद्रतीकुंभाभिमंत्रणेवि०॥यतइंद्रभयामहेततोनो
अभयंकृधि॥मघवंछग्धितवतन्नऊतिभिर्विद्विषोविमृधोजहि॥त्वंहिराधस्पतेराधसोमहःक्षय
स्यासिविधतः॥तंत्वावयंमघवन्निंद्रगिर्वणःसुतावंतोहवामहे॥इंद्रःस्वलुतरत्रहापरस्पानोवरेण्यः

Indira Gandhi National Centre for the Arts

॥स नो रक्षिष चरमं समध्यमं मपश्चात्सानु नः पुरः॥ स्वन्नः पश्चादधरादुत्तरात्पुर इंद्र निपाहि विश्वतः॥ आरे अ
स्मत्कृणुहि दैव्यं भयमारे हेतीरदेवीः॥ अद्याद्या श्वः श्व इंद्र त्रास्व परे च नः। विश्वा च नो जरितॄन्सत्पते अहा दि
वा नक्तं च रक्षिषः॥ प्रभंगी शूरो मघवा तुवीमघः संमिश्लो वीर्याय कं॥ उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमि
क्षतुरिति॥ ततश्चाचार्यः स्रुवेण दधिमध्वाज्यहोमं कुर्यात्॥ आपो हि ष्ठेति तिसृणां सिंधुद्वीप अंबरीष आपो
गायत्री गोप्रसवप्रथानहोमवि॰ सत्यपि होमस्य वारुणत्वं च इत्येव त्यागः पार्वणहोमे पूर्णमासायेदमिति व
त्॥ अप्सु मे॥ ऋष्यादि पूर्ववत्॥ अतएव नानुष्टुभो ग्रहणं तद्विष्णो मेधातिथिर्विष्णुर्गायत्री विष्णव इदं॥ अ
क्षीभ्यां त इति षण्णां विवृहा यक्ष्महानुष्टुप् अक्षीभ्यां ते॥१ ग्रीवाभ्यः २ आंत्रेभ्यः ३ ऊरुभ्यां ४ मेहनात् ५ अंग
दंगात्॥ ६ यक्ष्मघ्न इदं॥ ततश्चाक्षिभ्यां ते त्यादिभिर्दध्यादिहोमः सवित्रे सोमायेदमिति त्यागः॥ सर्वत्र प्रत
वं अष्टाविंशतिरष्टौ वाहुतयः॥ प्रणीतानिनयनं संस्याजपांते परिस्तरणविसर्जनादि॥ आचार्याय यथाश
क्तिदक्षिणां दत्वा स्थापितदेवतानामुत्तरपूजाविसर्जनांते स्थापितमाचार्यहस्ते प्रतिपाद्याग्निं संपूज्य विसृ
ति धारणां ते गच्छ गच्छेति तं विसृज्य दशपात्री त्वा ब्राह्मणान्भोजयेत् कर्मणः पूर्णतां वाचयित्वेश्वरार्पणं कुर्यात्
॥इति गोप्रसवप्रयोगः॥ ॥अथ कृष्णचतुर्दशीजननशांतिः॥ ॥गर्गः कृष्णपक्षे चतुर्दश्यां प्रसूते षड्विधं फ ७५
लं॥ चतुर्दशीं च षड्भागां कुर्यादादौ शुभं स्मृतं॥ द्वितीये पितरं हंति तृतीये मातरं तथा॥ चतुर्थे मातुलं हंति पंचमे वं
शनाशनं॥ षष्ठे तु धनहानिः स्यात् आत्मनो वंशनाशनं॥ तस्मात्सर्वप्रयत्नेन शांतिं कुर्याद्विधानतः॥ आ
चार्यं वरयेद्धीमान् पुत्रदारसमन्वितं॥ ब्राह्मणान्नृत्विजश्चैव स्वस्तिवाचनपूर्वकं॥ रुद्राधिदेवतां तस्यां कल

मात्रसुवर्णतः॥ तदर्धार्धेन वा कुर्याद्वित्तशाठ्यविवर्जितः॥ प्रतिमां कारयेच्छंभोः सर्वलक्षणसंयुतां॥ वृषभे च
समासीनो वरदां शूलपाणिनीं॥ शुद्धस्फटिकसंकाशां श्वेतमाल्यां वरान्वितां॥ त्र्यंबकेन मंत्रेण पूजां कुर्याद्वि
धानतः॥ स्थापयेद्वै ततः कुंभान् चतुर्दिक्षु यथाक्रमं॥ पुण्यतीर्थजलोपेतान् यान्स्योपरि विन्यसेत्॥ तन्म
ध्ये स्थापयेत्कुंभं शतच्छिद्रसमन्वितं॥ पंचमृत्तं च रत्नानि पंचत्वक् पंचपल्लवान्॥ पंचधान्यं सुवर्णं च तन्म
त्रै विनिक्षिपेत्॥ शतौषधानि निक्षिप्य श्वेतवस्त्रैश्च वेष्टयेत्॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥
आयांतु यजमानस्य दुरितक्षयकारकाः॥ आवाह्य वरुणं मंत्रैरनेन च विधानतः॥ इमं मे वरुण इत्यनया त
त्वा यामीत्यृचा तथा॥ त्वं नो अग्न इत्यनया स त्वं न इति मंत्रतः॥ आग्नेयकुंभमारभ्य पूजां कुर्याद्यथाक्रमा
त्॥ आ नो भद्रास्य सूक्तं च मंडा अग्नेश्च सूक्तं कं जप्त्वा पुरुषसूक्तं च कद्रुद्रं तु क्रमाज्जपेत्॥ ईश्वरस्याभि
षेकं च रुद्रपूजां च कारयेत्॥ ईश्वरस्य रुद्रस्य पूजाकर्म सुनिर्वर्त्य होमं कुर्याद्विधानतः॥ गेहस्येशानदि
ग्भागे कुंडं कुर्याद्विधानतः॥ विस्तरायामखातं च अरत्निद्वयसंमितं॥ कुंडकंठं परित्यज्य समंताद्द्व्यंगुलं क्र
मात्॥ मेखलोच्छ्रायविस्तारौ चतुस्त्र्यंगुलक्रमात्॥ पश्चिमे मध्यभागे तु योनिं कुर्याद्विधानतः॥ समिदाज्य
चरूंश्चैव तिलमाषांश्च सर्षपैः॥ अश्वत्थप्लक्षपालाशसमिद्भिः खादिरैः शुभैः॥ अष्टोत्तरसहस्रं वा अ
ष्टोत्तरशतं तु वा॥ अष्टाविंशतिमेतैश्च होमं कुर्यात्पृथक् पृथक्॥ त्र्यंबकेन मंत्रेण तिलान् व्याहृतिभिः क्रमा
त्॥ ग्रहाणां चैव होतव्यं अस्मद्युक्तविधानतः॥ एवं क्रमेण होतव्यं होमशेषं समापयेत्॥ सर्वालं
कारयुक्तानां त्रयाणामभिषेचनं॥ त्रयाणां मातापितृबालकानां॥ चतुर्भिः कलशैरद्भिः वृद्धत्कुंभस

Indira Gandhi National
Centre for the Arts

मन्वितं॥ धौतांबराणि धृत्वाथ कुर्यादाज्यावलोकनं॥ पूर्णाहुतिं च जुहुयाद्यजमानः समाहितः॥ तत्सर्वं
परया भक्त्या ईश्वराय निवेदयेत्॥ सर्वालंकारसंयुक्तां सवत्सां गां पयस्विनीं॥ प्रतिमां वस्त्रयुग्मं च आ
चार्याय निवेदयेत्॥ ईश्वरप्रीतये शक्त्या कुर्याद्ब्राह्मणभोजनं अन्येषां चैव सर्वेषां कुर्याद्ब्राह्मणभो
जनं॥ तस्मादनेन विधिना विघ्नशाद्यविवर्जितः॥ एवं यः कुरुते शांतिं सर्वपापैः प्रमुच्यते॥ सर्वान्कामा
नवाप्नोति स्थिरजीवी सुखी भवेदिति॥ ॥अथ कृष्णचतुर्दशीजननशांतिप्रयोगः॥ देशकालौ संकीर्त्य अ
स्य शिशोः कृष्णचतुर्दश्यां अमुकांशजननसूचितसर्वारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्र
हमखां कृष्णचतुर्दशीजननशांतिं करिष्ये तदंगत्वेन गणपतिपूजनं स्वस्तिपुण्याहवाचनं आचार्यव
रणं च करिष्ये॥ देवतानां पूजनं॥ अस्मुत्तारणं आचार्यः कर्म करिष्य इति संकल्प्य यदत्र संस्थितमिमा
दिस्वस्त्ययनं तार्क्ष्यमित्यंते स्थंडिलपूर्वभागे महीद्यौरित्यादिमंत्रावृत्त्या पदार्थानुसमयेन मध्ये शतछि
ङं तस्य आग्नेय्यादिविदिक्षु चतुरः कलशांश्च स्थाप्य शतच्छिद्रे स्योना पृ० पंचमृदः॥ अश्वत्थेव इति पंच
पल्लवान्॥ सप्तरत्नानीति पंच रत्नानि रुवति भी मो वृषभस्तविष्ण्या इति पंचत्वचः॥ ॐ षधयः समिति पं
चधान्यानि॥ हिरण्यरूप इति सुवर्णं॥ या ॐषधी इति सर्वौषधीः शतावरीं निक्षिप्य॥ युवा सुवासा इति वस्त्रैः
ङः संवेष्ट्य पूर्णा दर्वि पूर्णपात्रानि धानानि तेरुद्र प्रतिमां कर्ष तदर्धतदर्धान्यतरपरिमितहेमनिर्मितां
वराभयांकितदक्षहस्तां वृषारूढां स्थापयित्वा त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् रुद्रपूजने वि० त्र्यंबकं यजा० ॥७६
ष्टुद्रस्फटिकसंकाशां श्वेतमाल्यांबराढ्यं ध्यात्वा एकादशाभिषेकघटितोपचारैः रुद्रं संपूज्य आग्ने



य्यादिचतुर्षु कलशेषु गंधद्वारां इति गंधं ओषधय इति यवान्॥ अश्वत्थेव इति पंचपल्लवान्॥ कांडात्कांडा
दिति दूर्वाः सप्तरत्नानीति पंच रत्नानि॥ हिरण्यरूप इति हिरण्यं॥ याः फलिनीरिति फलं॥ युवा सुवासा इ
ति वस्त्रवेष्टनं पूर्णादर्विपूर्णपात्रनिधानं॥ एतावत्कांडानुसमयेन कृत्वा इमं मे वरुण इति सर्वे समुद्रा इति च स
मुद्रादिसहितं वरुणमावाहयेत्॥ इमं मे वरुणस्य शुनःशेपो वरुणो गायत्री॥ वरुणावाहने वि० समुद्रादिसहितं व
रुणं संपूज्य॥ उत्तरकलशेष्वपि समुद्रादिसहितवरुणपूजने क्रमेण तत्त्वायामि० त्वन्नो अग्ने इत्यादयो मंत्राः
॥ तत्त्वाया[illegible]शुनःशेपो वरु० त्वन्नो अग्न इत्यस्य गोतमो वामदेवोग्निवरुणौ त्रिष्टुप्॥ स त्वन्नो अग्न इत्यस्य गो
तमो वामदेवोग्निवरुणौ त्रिष्टुप्० सर्वपूजांते देवदानव इति प्रतिकलशं प्रार्थना तत्र क्रमेण चतुर्षु कलशेषु
सूक्तजपः आ नो भद्रा इति दशर्चस्य सूक्तस्य राहुगणो गोतमो विश्वेदेवा देवता आद्याः पंच सप्तमी च जगत्यः
॥ षष्ठी विराट्स्थाना शेषास्त्रिष्टुभः जपे वि० भद्रा अग्ने रिति द्वादशर्चस्य वाध्र्यश्वः सुमित्रोग्निर्देवता॥ आद्ये द्वे
जगत्यौ अंत्यास्त्रिष्टुभः भद्रा अग्ने र्वध्र्यश्वस्य॥ सहस्रशीर्षेति षोडशर्चस्य सूक्तस्य पुरुषो नारायणो देवता अ
नुष्टुप् छंदः॥ कद्रुद्रायेत्यस्य सूक्तस्य घोरः कण्वो रुद्रो गायत्री० कद्रुद्राय प्रचेतस इति ततोग्निवेद्यां ग्रहा
श्च प्रतिष्ठाप्यान्वाधानं कुर्यात्॥ समिद्द्वयमादाय अत्र प्रधानं॥ आदित्यादिनवग्रहानष्टाष्टसंख्याभिः अर्का
दिजातीयसमिदाहुतिभिश्चर्वाहुतिभिः आज्याहुतिभिरधिदेवताप्रत्यधिदेवताद्यायद्पीठदेवता एकैक
संख्याकाभिः समिच्चर्वाज्याहुतिभिः रुद्रं प्रत्येकमष्टोत्तरशतसंख्याभिः अश्वत्थप्लक्षपलाशखदिर
जातीयसमिदाहुतिभिश्चर्वाहुतिभिः॥ आज्याहुतिभिस्तिलमाषसर्षपाहुतिभिः अग्निवायुसूर्यप्रजाप

Indira Gandhi National
Centre for the Arts

तो स्तिलाहुतिभिः शेषेण स्विष्टकृतमित्यादिआज्यभागांते कृते यजमानः यथादैवतं त्यागं कुर्यात् ॥ तदनंतरं
होमांते स्विष्टकृदादि नवाहुत्यंते बलिदानं पूर्णाहुतिः प्रणीतानिनयनं ॥ संस्त्राजपः ॥ दंपत्योरभिषेकः ॥ श्रो
तवस्त्राचंदनादिधारणं आज्यं रूपरूप मित्यवलोक्य सदक्षिणं दत्वा पूर्णाहुतिं हुत्वा कृतं कर्मरुद्रार्पणं कृत्वा आ
चार्याय वस्त्रयुग्मसहित सोपस्कर गो निष्क्रयदानं ॥ ऋत्विग्भ्यः हिरण्यनिष्क्रयदानं ॥ स्थापितदेवतानां पू
जनविसर्जने ॥ आचार्यहस्ते प्रतिपादनं च अग्नेः पूजनविसर्जने ॥ यथाशक्ति ब्राह्मणभोजनस्य संकल्पः ॥
भूयसीदानस्य चाविष्णुस्मरणं तदर्पणं च कुर्यात् ॥ ॥ इति कृष्णचतुर्दशीजननशांतिः ॥ अथ सिनीवाली
कुहूशांतिविधिः ॥ ॥ प्रयोगपारिजाते गार्ग्यः ॥ सिनीवाल्यां प्रसूतास्याद्यस्य भार्या पशुस्तथा ॥ गजाश्वाम
हिषीचैव शक्रस्यापि श्रियं हरेत् ॥ ये संति सकलाश्चान्ये स्वप्रसादोपतीविनः ॥ वर्जयेत्तान शेषांस्तु पशुप
क्षिमृगादिकान् ॥ कुहूप्रसूतिरत्यर्थं सर्वदोषकरा स्मृता ॥ यस्य प्रसूतिरेतेषां तस्यायुर्धननाशनं ॥ सुवर्णंतु
समस्तत्र दोषस्तु पूर्वलो भवेत् ॥ शांतिं विना विशेषेण परित्यागो विधीयते ॥ परित्यागात्तत्र शांतिं कुर्यादिमां
विचक्षणः ॥ तत्फलं तत्क्षणाद्वै न पुनरेवानुपालनं ॥ नत्युजेत्पंडितो मोहाद्दर्शादर्शनतोपि वा ॥ तद्योगाश्चाशुभे
त्किंचित्स्वयं वा नाशमश्नुते ॥ कल्पोक्ताशांतिः कर्त्तव्या शीघ्रं दोषापनुत्तये ॥ रुद्रः शक्रश्च पितरः पूज्याः स्युर्देव ७१
ताः क्रमात् ॥ कर्षमात्रसुवर्णेन तदर्धार्धेन वा पुनः ॥ अथवा शक्तितः कुर्याद्वित्तशाठ्यविवर्जितः ॥ प्रतिमाका
रयेद्धीमान् चतुर्भुजसमन्वितां ॥ त्रिशूलखड्गवरदाभयहस्तान्यथाक्रमात् ॥ श्वेतवर्णां श्वेतपुष्पां श्वेतां वरवृष
स्थितं ॥ त्रियंबकेन मंत्रेण पूजां कुर्याद्यथाविधि ॥ इंद्रश्चतुर्भुजो वज्राकुशचापससायकः ॥ रक्तवर्णो गजारू

ढो यत इंद्रेति मंत्रतः ॥ पितरः कृष्णवर्णाश्च चतुर्हस्ता विमानगाः ॥ यष्ट्यक्षसूत्र कमंडल्वभयस्पेवधारिणः ॥ ये चे
हेति च मंत्रेण पूजां कुर्यादनंतरं ॥ आग्नेयीं दिशमारभ्य कुंभान् कोणेषु विन्यसेत् ॥ तन्मध्ये स्थापयेत् कुंभं शतच्छि
द्रसमन्वितं ॥ तेष्वेव पंचगव्यादीस्ततन्मंत्रैश्च निक्षिपेत् ॥ कल्पोक्ता शांतिः कर्त्तव्या कुर्याच्छीघ्रं स्वशक्तितः ॥ गोदा
नं वस्त्रदानं च सुवर्णं चोर्वरां शुभां ॥ दशदानानि चोक्तानि क्षीरमाज्यं गुडस्तथा ॥ आज्यावेक्षणमेतानि तत्तन्मंत्रे
श्च कारयेत् ॥ समिदाज्यचरोर्होमः तिलमाषैश्च सर्षपैः ॥ अश्वत्थप्लक्षपालाश समिद्भिः खादिरैः शुभैः ॥ अष्टोत्त
रशतं मुख्यं प्रत्येकं जुहुयाद्द्विजः ॥ त्रियंबकेन मंत्रेण तिलान्व्याहृतिभिः पुनः ॥ चतुर्भिः कलशैर्युक्तं वृहत्कुंभसम
न्वितं ॥ शांतिवत सकलं कार्यं अभिषेकं च कारयेत् ॥ पितृमातृशिशूनां च अभिषिंचेत्तु वारुणैः ॥ शंकरस्याभि
कं च कुर्याद्ब्राह्मणभोजनं ॥ अन्येषां चैव सर्वेषां ब्राह्मणानां च तर्पणं यथाशक्त्यानुसारेण द्विजवाचनपूर्वकमि
ति ॥ ॥ अथ प्रयोगः ॥ कर्त्तास्य कुमारस्य सिनीवालीजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सि
नीवालीजननशांतिं करिष्ये इति संकल्प्य गणेशपूजादिवरणांतं कुर्यात् कुहूजनने कुहूजननसूचिते सूर्दः ॥
कुहूजनने गोमुखप्रसवोपि पीतिकेचित् ॥ चतुर्दशीविद्धामावास्या सिनीवाली ॥ प्रतिपद्विद्धा कुहूः ॥ वे द्वयर
हितो दर्शः ॥ ततआचार्यः सर्षपविकिरणादि प्रार्थनांतं कृत्वोक्तप्रतिमानामग्न्युत्तारणं कृत्वा स्थंडिलमा
भागे विदिक्षु आग्नेयीमारभ्य महीद्यौरित्यादिमंत्रैः पदार्थानुसमयेन चतुरः कुंभानासाद्य मध्ये शतच्छिद्रं
संस्थाप्य चतुर्षु जलसेचनं गंधद्वारेति तत्सवितुरित्यादिभिः पंचगव्यानि स्योना पृथिवीति पंच मृदः

Indira Gandhi National
Centre for the Arts

सद्दिरत्नानीतिपंचरत्नानिरुवतीतिपंचत्वचः॥ओषधयः सवदंत इतिपंचधान्यानिहिरण्यरूपसइतिहि
रण्यंप्रक्षिप्यपंचस्वपिपूर्णादर्वीतिपूर्णपात्रविधानांते मध्यमेयथाशक्तिनिर्मितामुक्तलक्षणांरुद्रप्रतिमा
निधायत्र्यंबकंवासिष्ठोरुद्रोनुष्टुप्॥रुद्रावाहनेवि॰ त्र्यंबकमंत्रेणरुद्रंश्वेतवस्त्रगंधपुष्पादिभिः संपूज्यपंत
दक्षिणतोयतइंद्रेतिभर्गइंद्रस्त्रिष्टुप् इंद्रंसंपूज्ययेचेहेतिशंखः पितरस्त्रिष्टुप्॥उत्तरतः पितॄन्संपूज्यचतु
र्षुकुंभेषुवरुणांसंपूज्यआनोभद्राइतिपवेदचेदी॥यजुर्वेदीनमोवाचइति॥गवामंगेषुतिष्ठंतिगांदद्यात्॥शर
र्षु कुंभेषुवरुणंसंपूज्य आनोभद्रा इति ... हिरण्यगर्भगर्भस्थं
ण्यंसर्वलोकानांलक्ष्मीयारक्षणंपरं॥सुवेषधारिवस्त्रत्वमतः शांतिंप्रयच्छमइतिवस्त्रं॥हिरण्यगर्भगर्भस्थं
मितिसुवर्णं॥सर्वभूताश्रयाभूमिर्वराहेणसमुद्धृता॥अनंतसस्यफलदाअतः शांतिंप्रयच्छमइतिउर्वरां
॥ततोदशदानानि॥गोभूतिलहिरण्याज्यवासोधान्यगुडानिच॥रौप्यंलवणमित्याहुर्दशदानानिपंडिताः
॥गांनुवंचोक्तमंत्राभ्यांपुनर्दत्वातिलान्दद्यात्महर्षेर्गोत्रसंभूताः कश्यपस्यतिलाः स्मृताः॥तस्मादेषांप्रदा
नेनममपापंव्यपोहत्विति॥उक्तमंत्रेणहिरण्यंपुनर्दत्वाज्यंदद्यात्॥कामधेनुषुसंभूतंसर्वक्रतुषुसंस्थि
तं॥देवानामाज्यमाहारमतः शांतिं॰ उक्तमंत्रेणवासः पुनर्दत्वाधान्यंदद्यात्॥सर्वदेवमयंधान्यंसर्वोत्प
त्तिकरंमहत्॥प्राणिनांजीवनोपायमतः शांतिंप्रयच्छमेइति॥यथादेवेषुविश्वात्माप्रवरश्चजनार्दनः ७८
॥सामवेदस्तुवेदानांमहादेवस्तुयोगिनां॥प्रणवः सर्वमंत्राणांनारीणांपार्वतीयथा॥तथारसानांप्रव
रः सदैवेक्षुरसोमतः॥ममतस्मात्परांशांतिंददस्वगुडसर्वदेतिगुडं॥प्रीतिर्यतः पितॄणांचविष्णुशंक

रयोः सदा॥शिवनेत्रोद्भवंरूप्यमतः शांतिंप्रयच्छमइतिरूप्यं॥यस्मादन्नरसाः सर्वेनोत्कृष्टालवणंविना॥
शंभोः प्रीतिकरनित्यमतः शांतिंप्रयच्छमइतिलवणं॥इतिदशदानानितत्तःक्षीरंदद्यात्॥क्षीरजातास्तथा
शंखाः क्षीरादमृतसंभवः॥क्षीरात्क्षीरोदवत्कीर्तिः क्षीरेप्राणस्यसंभवः॥तस्मात्क्षीरप्रदानेनअतः शां
तिंप्रयच्छमइति॥आज्यगुडावुक्तमंत्राभ्यांपुनर्दत्वाज्यपूर्णेकांस्यपात्रेरूपंरूपमितिसकुटुंबः प्रतिबि
पंवीक्ष्यदद्यात्॥आज्यंतेजः समुद्दिष्टमाज्यंपापहरंस्मृतं॥आज्यंसुराणामाहारआज्येदेवाः प्रतिष्ठि
ताइति॥भुवोमानंगोचर्म।तिलानांद्रोणः॥सुवर्णरजतयोः सुवर्णंतदर्धंतदर्धान्यतरत्॥आज्यस्य
पलानिचत्वारिंशत्॥वाससास्त्रित्वं॥धान्यस्यपंचद्रोणाः॥एवंगुडलवणयोः॥सप्तहस्तेनदंडेनत्रिंश
द्दंडानिवर्तनं॥दशतान्येवगोचर्म॥अत्रगवादीनांदक्षिणात्वात्सदक्षिणमनन्ताहमितितद्वचनाभा
वादग्निपदक्षिणात्मकगोधान्यादेरिनदक्षिणांतरापेक्षा॥नचैवंदक्षिणादानकालेदानापत्तिः॥अपि
रात्तदीक्षणीयादिगोचरन्यायेनप्रत्यक्षपाठबलीयस्त्वात्॥अस्मिन्नप्यवसरेक्रियमाणदानेनुलिंगान
तिरूपप्रयोजनसंभवात्॥आकरेदशदानोत्तरमुक्तक्षीरादिदानस्यहोमोत्तरकर्तव्यतोक्तिस्तुकिं
मूलेतिनविद्मः॥अथाचार्योग्निंप्रतिष्ठाप्यग्रहानावाह्यसंपूज्यान्वाधानंकुर्यात्॥चक्षुषीआज्येनेत्यंते
अत्रप्रधानंग्रहानर्कादिसमिदाद्याहुतिभिर्विक्षितसंख्याभिः त्र्यंबकंअश्वत्थप्लक्षपालाशखदिरैः
प्रत्येकमष्टोत्तरशतसंख्याभिः आज्याहुतिभिश्चचर्वाहुतिभिः ससर्षपतिलमाषाहुतिभिश्चप्रत्येकंताव

Indira Gandhi National
Centre for the Arts

ताभिः॥ इंद्रं पितॄंश्च प्रत्येकमष्टाविंशति संख्याभिरष्ट संख्याभिर्वा कृद्ध्यादतिभिः॥ प्रजापतिं तिलैः॥ शेषे
णोत्पादि यथाच्चायानं त्यागे कृते प्रायश्चित्त होमांते बलिदानं॥ मूर्धानमिति पूर्णाहुतिश्च॥ ततो ग्रहकुंभसहित
चतुःकुंभजलयुत शतछिद्रेण मातृपितृशिशूनामभिषेकस्तत्वायामीतिभिरेषाश्च नः शेपावरु
णास्त्रिष्टुप्॥ ततो विभूतिधारणं तेषां षोडशोपचारै रुद्रस्येतरेषां पंचोपचारैः पूजनं विसर्जनं प्रतिमा आचा
र्यहस्ते प्रतिपाद्याग्निं संपूज्य विसर्ज्य यथाशक्ति द्विजानुज्ञया ब्राह्मणान्साज्यांधुपश्चादीन् भोजयेदिति
सिनीवाली कुहूशांतिः॥ अथ दर्शशांतिः॥ नारदः अथातो दर्शजातानां मातापित्रोर्दरिद्रता॥ तद्दोषप
रिहारार्थं शांतिं वक्ष्यामि ते सदा॥ पुण्याहं वाचयित्वादौ क्रतुसंकल्पपूर्वकं॥ कुंडं वा मंडलं कुर्यात्तद्देशस्था
पयेद्द्वयं॥ मंडलं सर्वतोभद्रं॥ तत्कुंभे निक्षिपेद्द्रव्यं दधिक्षीरघृतादिकं॥ आदिशब्दाद्गोमूत्रगोमये॥ न्यग्रो
धोदुंबराश्वत्थसचूतानि वकास्तथा॥ एतेषां वृक्षमूलानि त्वगादीन्पल्लवांस्तथा॥ एवं रत्नानि नि आपोहिष्ठा
क्षिप्य वस्त्रयुग्मेन वेष्टयेत्॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥ आयांतु यजमानस्य दुरितक्षयकाः
॥आपोहिष्ठात्यृचेनाथ कयानश्चित्र इत्यृचा॥ यत्किंचेदमृचा चैव समुद्रज्येष्ठ इत्यृचा॥ अभिमंत्र्योदकं प
श्चादग्नेः पूर्वप्रदेशके॥ उदकमभिमंत्र्य पश्चाद्दर्शदेवतास्थापयेदित्याशयः मंडलं कुर्यादिति यदुक्तं
तदाह॥ हारिद्रं रक्तकं चैव कृष्णं श्वेतं च नीलकं॥ एतेषां तंडुलैश्चैव सर्वतोभद्रमुद्धरेत्॥ दर्शश्च देवमाया ७९
दर्शदेवतापितरः तत्तद्रूपां प्रतिमां
श्च सोमसूर्यरूपकाः॥ प्रतिमां स्वर्णजां नित्यं राजतीं ताम्रजां तथा॥

स्थापयेदिति सभेदेनान्वयः॥ कुक्षा आयितत्वात्तत्रापीदं॥ सर्वतोभद्रमध्ये च स्थापयेद्दर्शदेवतां॥ ग्रहव
र्णं वस्त्रयुग्मं तद्वर्णं गंधपुष्पकं॥ आप्यायस्वेति मंत्रेण सविता पश्चात्तथैव च॥ उपचारैः समाराध्य ततो हो
मं समाचरेत्॥ कृत्वा वह्निं प्रतिष्ठाप्य क्रतुसंकल्पमीदृशं॥ आयुरारोग्यसिध्यर्थं सर्वारिष्टप्रशांतये॥ पुत्रस्य
दर्शजननदोषनिर्हरणाय च॥ मातापित्रोः कुमारस्य सर्वानिष्टप्रशांतये॥ तेषामायुःश्रियैश्चैव शांति
होमं करोम्यहं॥ सामिधश्च चरुद्रव्यक्रमेण जुहुयात्कृती॥ हुनेत्सवितृमंत्रेण सोमो धेनुं च मंत्रतः॥ एतैर्मं
त्रैश्च प्रत्येकं हुनेदष्टोत्तरं शतं॥ एतैरिति बहुवचनं प्राणवस्वादाकारसादित्साभिप्रायेण अनुवादः॥
अत एवाह॥ दशस्य देवताहोमस्त्वष्टाविंशति संख्यया॥ होममेवं तु कृत्वाथ विदध्याच्चाभिषेचनं॥ आ
पः कुमायुष्य सूक्तं समुद्रज्येष्ठ इत्यृच॥ एतैर्मंत्रैरभिषेकं मातापित्रोः शिशोस्तथा॥ ततः स्विष्टकृतादिस्या
द्धोमशेषं समापयेत्॥ हिरण्यं रजतं चैव कृष्णां धेनुं सदक्षिणां॥ अन्येभ्योपि यथाशक्ति दातव्या दक्षिणा त
था॥ ब्राह्मणान्भोजयेत्तत्र कारयेत्स्वस्तिवाचनमिति॥ इति नारदोक्ता दर्शशांतिः॥ अथप्रयोगः॥ क
र्त्ता कृतनित्यक्रियः पवित्रपाणिः सपत्नीकः स्वासने उपविश्य देशकालकीर्तनांते अस्य बालस्य दर्शज
नस्सूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं दर्शजननशांतिं करिष्ये॥ अखंडामाजनने इत्थं सं
कल्पः॥ अमायाः खंडतिथित्वे उत्तरविद्धामाजनने कुहूजनन शांतिं करिष्य इति संकल्पे विशेषः॥ ततो ग
णेशपूजन पुण्याहवाचनाचार्यर्त्विग्वरणाचार्यादिपूजनानि कुर्यात्॥ तत आचार्यो यदत्र संस्थितानि

Indira Gandhi National Centre for the Arts

रुवाविनीमोक्षणसविष्यपाण्डं नेपिशानोहरिणीपंचहत्तः॥ आयोनिंसोमःस्कुहतंनिगीरनगाय्यईलग्नवातनिर्दिगथई।

स्त्यादि स्वस्त्ययनं तार्क्ष्यमिति प्रार्थनांतं कुर्यात्॥ तत्र आचार्यः कुंडात्स्थंडिलाद्वा पूर्वे सर्वतोभद्रपर्यान्तं स्थ
लमतिक्रम्य मही द्यौरित्यादिना कुंभस्थापनादि जलसेचनांतं कृत्वा तत्र आप्यायस्वेति मंत्रेः क्षीरदधिघृ
तानि प्रक्षिप्य गाय आगंधद्वारामिति च गोमूत्रगोमये प्रक्षिप्य न्यग्रोधोदुंबराश्वत्थचूतनिंबमूलानां त्वचो
रु नमिनीम इति तत्पल्लवानश्वत्थेव इति पंचरत्नानि सहिरण्यानीति निक्षिप्य युवासुवासा इति वस्त्रयुग्मेनावे
ष्ट्य॥ सर्वेसमुद्राः सरितस्तीर्थानि जलदा नदाः॥ आयांतु यजमानस्य दुरितक्षयकारकाः इति समुद्रादिदेव
तासहितं वरुणमावाह्य संपूज्य कलशोदकं आपो हिष्ठेति तच्चेन कयान श्चित्र इत्यृचा यत्किंचेदमिति समु
ज्य ष्टा इति च सग्म्यां च आभिमंत्र्य तत्पश्चिमे अग्नेः पूर्वभागे कृष्णनीलरक्तादिवर्णतंडुलैर्यथोचितं पू
रितस्थंडिलावस्थीमद्वादिगर्भं सर्वतोभद्रं संवत्सरकृत्यांगगर्ताने तत्रतो घापनोक्तरीत्या कृत्वा तत्र
ब्रह्मादि प्रसिद्धदेवतापूजांते मध्ये सुवर्णप्रतिमायां पितॄनावाहयेत् ये चेहेति शंखः पितरस्त्रिष्टुप्द
क्षिणतः रजतप्रतिमायां सोममुत्तरतः ताम्रप्रतिमायां सूर्यं चावाहयेत्॥ आप्यायस्व० गोतमः सोमो गाय
त्री सविता पश्चात्तादिति नाभागः सविता त्रिष्टुप्॥ ततो देवतात्रयं संपूज्याग्निं प्रतिष्ठाप्य सर्वतोभद्रस्येशा ८०
न्यां ग्रहप्रतिष्ठापनादि वरुणपूजांतं कृत्वान्वादध्यात् चक्षुषी आज्येनेत्यंते आदित्यादिग्रहानृचिकौबि
त संख्याभिः समिञ्चवीज्याहुतिभिः पितॄनष्टाविंशतिसंख्याकाभिः समिद्बीज्याहुतिभिः सोमं सूर्यं च प्रत्ये
कं अष्टोत्तरशतसंख्याकाभिः तदाहुतिभिः॥ शेषेण स्विष्टकृतमित्यादि ततः आज्येन सहचरोः पर्यग्निकरण

दिकाले कुर्यात्॥ आज्यभागांते आयुरारोग्य इति मंत्राभ्यां यजमानेन होमसंकल्पपूर्वकं त्यागे कृते सर्त्विगा
चार्यः ब्रह्मा न होमं कुर्यात्॥ तदंते स्विष्टकृतः पूर्वं हिरण्यवर्णामिति आयुष्यं वर्चस्यमिति सूक्ताभ्यां समु
द्रज्येष्ठा इन्द्र चाच सवालौ पितरा व भिषिञ्चस्विष्टकृतादि कुर्यात्॥ ततो बलिदानपूर्णाहुती कृत्वा होमशे
षं समापयेत्॥ ततो यजमानः हिरण्यरजतेसदक्षिणे कृष्णां धेनुं च आचार्याय दत्वा सर्त्विग्भ्यश्च यथाश
क्ति दक्षिणां दत्वा स्थापितदेवतोपस्थापनक्रमेण उत्तरपूजाविसर्जने कृत्वा प्रतिमा आचार्याय प्रतिपा
द्य आग्निं संपूज्य गच्छ गच्छेति विसर्ज्य शांतीः पाठयित्वा ब्राह्मणान् भोजयित्वा तेभ्यो दक्षिणादानं ते स्वस्तिभ
वंतो ब्रुवंत्विति वाचयेत्॥ ते च स्वस्तीति वदेयुः॥ ॥इति दर्शशांतिः॥ इति संस्कारकौस्तुभे दर्शशांतिप्र
योगः॥ इति तिथिशांतयः॥ ॥अथ नक्षत्रशांतयः॥ ॥अथ मूलशांतिविधिः॥ अथातः संप्रवक्ष्यामि मूलजा
ताहिताय च॥ मातापित्रोर्धनस्यापि कुलशांतिहिताय च॥ त्यागो वा मूलजातस्य स्याद्वाष्टाब्दस्य दर्शने॥ अभुक्तमू
लजातानां परित्यागो विधीयते॥ ज्येष्ठांत्ये घटिका चैका मूलादौ घटिकाद्वयं॥ अभुक्तमूलमित्याहुर्जातं पुत्रं विवर्जये
त्॥ अदर्शनाद्वापि पितुः सतु तिष्ठेत्समाष्टकं॥ एवं च दुहितुर्ज्ञेयं मूलजातफलं बुधैः॥ अन्यत्र तु॥ न बाला हंति मू
लर्क्षे पितरं मातरं तथा॥ मूलजा श्वशुरं हंति व्यालजा च तदंगनां॥ माहेंद्रजाग्रजं हंति देवरं तु द्विदेवताशं तिवी
पुष्पलास्याऽन्नर्द्धिदोषो न विद्यत इति॥ बाल आश्लेषा॥ माहेंद्रं ज्येष्ठा॥ द्विदेवं विशाखा मुख्यकालं प्रवक्ष्यामि शं
ति होमस्य यत्नतः॥ जातस्य द्वादशाहे तु जन्मर्क्षे वा शुभे दिने॥ समाष्टके द्वादशाहे कुर्याद्वा शं[illegible]मादरात्॥ उक्त

Indira Gandhi National
Centre for the Arts

राद्वेसमाष्टके द्वादशाद्दे इतिमदनरत्नपाठः॥ सुसमे पुण्यदेशे तु मंडपं कारयेद्बुधः॥ पुण्यभूमिर्मंत्रितैस्तोयैः प्रोक्षि
तायां क्षितौ ततः॥ तत्रोदकुंभं सुश्लक्ष्णं रक्तं व्रणविवर्जितं॥ अकृष्णमूलं निर्छिद्रं पूरयेन्निर्मलांभसा॥ वस्त्रावगुं
ठितं कुर्यात्पूरयेत्तीर्थवारिणा॥ कूर्चहेमसमायुक्तं चूतपल्लवशोभितं॥ स्वस्तिकोपरि विन्यस्य क्षीरद्रुमसपल्ल
वैः॥ ब्रीहींश्च निक्षिप्य ईशान्यां च निधापयेत्॥ रत्नानि निःक्षिप्य सर्वौषधिसमन्वितं॥ आर्चितं गंधपुष्पा
द्यैः श्रीरुद्रं चतुःस्पृशन् जपेत्॥ षडंगसहितं सम्यक्तं जपेद्रुद्रसंख्यया॥ बह्वृचा रुद्रसूक्तैर्वा छंदोगा रुद्रसामगैः॥ एका
दशाष्टत्रिद्व्येकसंख्यया शक्तितो जपेत्॥ तत्राप्रतिरथं सूक्तं शतरुद्रानुवाककं॥ रक्षामंत्रं तथा पुंण्यं रक्षोघ्नं च
स्पृशन्जपेत्॥ त्र्यंबकं जपेत्सम्यगष्टोत्तरसहस्रकं॥ एकवारं तथान्येपि पावमानीः स्पृशं जपेत्॥ संस्थाप्य प
चकुंभांश्च द्वयं वा तदलाभतः॥ श्रीरुद्रस्यैककुंभस्य सर्वसूक्तानि तत्र तु॥ तथान्यैश्च स्थिरं कुंभं पूर्वोक्तैर्लक्षणैर्युतं
॥चतुःप्रस्थवर्णं कुर्यात्पंचवक्त्रं तथैव च॥ वस्त्रावगुंठितं कुर्यात्पूरयेत्तीर्थवारिणा॥ पंचरत्नसमायुक्तं आम्रपल्ल
वसंयुतं॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥ राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत्॥ कुंभस्य निर्सितैर्दे
शीर्होमस्थानं प्रकल्पयेत्॥ गोमयालेपिते देशे कुर्यात्स्थंडिलमुत्तमं॥ कृत्वाग्निमुखपर्यंतमुक्तेश्वादिस्वशाखवतः ॥८१
॥पूर्णपात्रनिधानांतं कृत्वा पूजां समारभेत्॥ नक्षत्रदेवतारूपं सुवर्णेन प्रयत्नतः॥ निष्कमानेन वार्धेन पादेना
यस्व स्वशक्तितः॥ प्रतिमालक्षणेनैव कारयित्वा विचक्षणः॥ यथामूल्यं सुवर्णस्य स्थापयित्वा प्रपूजयेत्॥ सुवर्णस
संस्मरेन्निर्ऋतिं श्यामं सुमुखं नरवाहनं
वर्दैवत्यं सर्वदेवात्मको नलः॥ सर्वदेवात्मको विप्रः सर्वदेवमयो हरिः॥

॥रक्षोधिपं खड्गहस्तं दिव्याभरणभूषितं॥ प्रतिमापूजनार्थाय वस्त्रयुग्मं प्रकल्पयेत्॥ पंकजं कारयेद्भूमौ रक्तश्वे
श्रीहितंडुलैः॥ चतुर्विंशद्दलोपेतं शुक्लैर्वा कर्णिकान्वितं॥ तस्योपरि न्यसेत्पात्रं स्वर्णं वा रौप्यमन्मयं॥ शुद्धवस्त्रेण
संछाद्य तत्र मूलानि निक्षिपेत्॥ मूलानि शतमूलानि॥ तदलाभे विष्णुक्रांता सहदेवी तुलसी तुथवा वरी॥ मूलनाम्ना
निगृह्णीयात्तदभावे विशेषतः॥ स्थापयेत्कर्णिकामध्ये वस्त्रगंधाद्यलंकृतं॥ कूर्चहेमजलोपेतं कुंकुमौषधि
संयुतं॥ कुंभोपरि न्यसेद्विद्वान् मूलनक्षत्रदेवतां॥ अधिप्रत्यधिदेवौ च दक्षिणोत्तरदेशयोः॥ अधिदेवं जपेदादौ
ज्येष्ठानक्षत्रदेवतां॥ तथा प्रत्यधिपादौ च पूजयेद्देवतां शुभं॥ उत्तराषाढऋक्षाद्या अनुराधांतमर्चयेत्॥ इंद्रादी
शानपर्यंतं पूजयेत्स्वस्वनामतः॥ स्वस्वलिंगोक्तमंत्रैश्च प्रधानादि प्रपूजयेत्॥ पंचामृतेन संस्नाप्य आवाह्या
घसमर्चयेत्॥ आवाह्येति ल्यब्लोपे पंचमी॥ अथेति पूर्णपात्रनिधानांतं कृत्वेत्यनेनान्वयानुवादः॥ अतएव
दूपचारैः षोडशभिरिति आवाहनमारभ्यार्चनविवरणं॥ उपचारैः षोडशभिः यद्वा पंचोपचारकैः॥ रक्तचंद
नगंधाद्यैः पुष्पैः हेमसितादिभिः॥ मेषश्रृंगादिधूपैश्च घृतदीपैः तथैव च॥ सुरापोलिकमांसाद्यैः नैवेद्यैः भोजना
दिभिः॥ मत्स्यमांससुरादीनि ब्राह्मणानां विवर्जयेत्॥ सुरास्थाने प्रदातव्यं क्षीरं सैंधवमिश्रितं॥ पायसं लवणा
पितं मांसस्थाने प्रकल्पयेत्॥ उक्तगंधाद्यलाभे तु यथालाभं समर्पयेत्॥ पुष्पांजलिं समभ्यर्च्य होमं कुर्याद्यथो
दितं॥ निर्वापप्रोक्षणादीनि चरोः कुर्याद्यथाविधि॥ दर्विगृहीत्वा विधिवत् नैर्ऋत्येव ऋचा हुनेत्॥ पायस
घृतसंमिश्रं हुनेदष्टोत्तरं शतं॥ विधिवदिति पायसचरौ खदानधर्मविधेः प्रतिप्रसवः॥ अन्यथा नघ

Indira Gandhi National Centre for the Arts

क्यात्॥ समिदाज्यचरून्पश्चाच्छक्तितः संख्यया हुनेत्॥ पश्चात्पायसहोमोत्तरं॥ अधिदेवतयोश्चैवं जुहुयात्स्वस्वमं
त्रतः॥ चतुर्थ्यंतेन नमोंते स्वाहांतैः स्वस्वमंत्रकैः॥ नक्षत्रदेवतापश्चपायसेन तु होमयेत्॥ कृत्तिकेति पंचदश
भिर्जुहुयात्क्रमशस्ततः॥ गायत्र्या जातवेदसे त्र्यंबकमिति क्रमात्॥ सीरा युंजंति नामाग्निं वास्तोष्पत्यग्निमेव च॥ क्षे
त्रस्य पति नाम्ना नाग्निं दूतं पुरो दधे॥ श्रीसूक्तेन तथा विद्वान्समिदाज्यचरून्क्रमात्॥ अष्टोत्तरशतैर्वाथ अष्टाविं
तिभिः क्रमात्॥ अष्टाष्टसंख्यया वापि जुहुयाच्छक्तितो बुधः॥ त्वन्नः सोमेन पायसं जुहुयात्तु त्रयोदश॥ चतुर्गृही
तमाज्यं च यातेरुद्रेति मंत्रतः॥ स्रुवेण जुहुयादाज्यं महाव्याहृतिभिः क्रमात्॥ हुत्वा स्विष्टकृतं पश्चात्प्रायश्चित्ता
हुतीर्हुनेत्॥ आचार्ययजमानो वा अग्नौ पूर्णाहुतिं हुनेत्॥ समुद्रादूर्मिसूक्तेन प्राजापत्यमथापि वा॥ पूर्णा
दर्वि शतक्रतेति मंत्रैः पूर्णाहुतिं हुनेत्॥ होमशेषं समाप्याथ वह्निमारोपयेद्बुधः॥ कुंभाभिमंत्रणं कुर्यात्तद्दक्षि
णो नाभिमर्शयेत्॥ मस्तकप्रशमनार्थाय जपेत्तु त्र्यंबकं शतं॥ रुद्रकुंभोक्तमार्गेण रुद्रमंत्रैस्स्पृशञ्जपेत्॥ धूप
दीपं च नैवेद्यं कुंभयुग्मे निवेदयेत्॥ प्रासादयेत्ततो देवमभिषेकार्थमादरात्॥ तस्मिन्काले ग्रहातिथ्ये क
र्नमंत्रमूर्तिभिर्युता॥ पृथक्प्रशस्ते तेनैव नक्षत्रे व्यासदेववा॥ अभिषेकविधिं वक्ष्ये सर्वाचार्यैरुदीरितं॥
भद्रासनोपविष्टस्य यजमानस्य ऋत्विजः॥ दारपुत्रसमेतस्य कुर्युः सर्वेभिषेचनं॥ आपो हिष्ठामिति सूक्ते ८२
न पावमानीभिरेव च॥ आपो हि ष्ठेति नवभिरापद्द्राव्ययेन च॥ सहस्राक्षेण चेनापि देवस्य त्वेति मंत्रकैः
॥ शिवसंकल्पमंत्रेण वरुणस्यापि मंत्रकैः॥ योसौ वज्रधरो देवो महेंद्रो गजवाहनः॥ मूलजातशि

शो दोषं मातापित्रोर्व्यपोहतु॥ योसौ शक्तिधरो देवो हुतभुङ्मेषवाहनः॥ सप्तजिह्वश्च देवोग्निर्मूलदोषं०॥
यो सौ दंडधरो देवो धर्मो महिषवाहनः॥ मूलजातशिशोर्दोषं व्यपोहतु यमो मम॥ योसौ खड्गधरो देवो नि
र्ऋती राक्षसाधिपः॥ प्रशामयतु मूलोत्थदोषं गंडांतसंभवं॥ योसौ पाशधरो देवो वरुणश्च जलेश्वरः॥ न
क्रवाहः प्रचेता नो मूलोत्थाघं०॥ योसौ देवो जगत्प्राणो मारुतो मृगवाहनः॥ प्रशामयतु मूलोत्थं दोषं बा
लस्य शांतिदः॥ योसौ निधिपतिर्देवः खड्गभृद्वाजिवाहनः॥ मातापित्रोः शिशोश्चैव मूलदोषं व्यपोहतु॥ योसौ
पशुपतिर्देवः पिनाकी वृषवाहनः॥ आश्लेषामूलगंडांतदोषमाशु व्यपोहतु॥ विघ्नेशः क्षेत्रपो दुर्गा लोक
पालानवग्रहाः॥ सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः॥ तच्छ्रेयोरभिषेकेतु सर्वदोषोपशांतिदं॥ स
र्वकामप्रदं दिव्यं मंगलानां च मंगलं॥ वस्त्रांतरितकुंभाभ्यां पश्चात्तु स्नापयेद्बुधः॥ ततः शुक्लांबरधरः शु
क्लमाल्यानुलेपनः॥ यजमानो दक्षिणाभिस्तोषयेदृत्विजादिकान्॥ धेनुं पयस्विनीं दद्यात् आचार्याय
सवत्सकां॥ निर्ऋतिप्रतिमावस्त्रकुंभे हेमं च दापयेत्॥ ग्रहार्थवस्त्रप्रतिमा तत्तद्रूपाश्च दक्षिणाः॥ श्री
रुद्रजापिने देयो हस्तिनः स्वान्प्रयत्नतः॥ तत्कुंभवस्त्रप्रतिमास्तेभ्यो दद्यात्स्वयत्नतः॥ इतरेषामपि विप्रा
भ्यः शक्त्या दद्याच्च दक्षिणां॥ उक्तालाभे तु तद्दद्यात् आचार्यब्रह्मऋत्विजां॥ तत्तन्मूल्यं प्रदातव्यं शक्त्या वाथ
प्रदापयेत्॥ आचार्याय च यद्दत्तं तदर्धं ब्रह्मणो भवेत्॥ सदस्याय ब्राह्मणेभ्य ऋत्विग्भ्यश्च तदर्धकं॥ आ
शीश्चं ते सोग्रहीयात्स्वगृह्यगाथ समापयेत्॥ दद्यादन्नं पायसादि ब्राह्मणान्भोजयेत्ततः॥ अलाभे सति पश्चा

Indira Gandhi National Centre for the Arts

शद्गर्थकं तदभावतः ॥ सर्वेषां तेष्वपवनं ब्राह्मणो वा पि वस्तथा ॥ गृहीत्वमापयेद्विद्वान्निर्नित्रृतिः आयतामिति
॥ विधाने चरिते स्मिंस्ततः शांतिर्भवेद्ध्रुवं ॥ गंडांतेष्वेवं कर्त्तव्यं पुष्यार्थं तद्दहवेत् ॥ समाष्टके द्वादशाद्दे
कुर्याद्वा शांतिमादरात् ॥ इत्युक्तमनुनासम्यक्मूलजातहितायच ॥ मातापित्रोर्धनस्यापि वंधुशोकापनु
त्तये ॥ अथैतदनुसारी प्रयोगः ॥ अमुकमूलोत्पन्नो वर्षाष्टकसहितद्वादशाद्दांते वषोष्टकांते द्वादशाद्दा
ते वा तदन्यमूलोत्पन्नो तु द्वादशाद्दे अव्यवहितागामिमूलनक्षत्रयुते शुभदिने वा गोप्रसवशांतिमुक्तविधि
नाकृत्वादिशकालकीर्त्तनांते स्य कुमारस्य मूलप्रथमचरणजन्मसूचितसर्वारिष्टपरिहारद्वारा श्रीपर
मेश्वरप्रीत्यर्थं शौनकोक्तप्रकारां सग्रहमखां शांतिं करिष्य इति संकल्प्य गणपतिपूजनादि ऋत्विग्व
रणांतं कुर्यात् द्वितीयादिचरणोत्पन्नो संकल्पो ह्येवोद्धव्यः अत्र सदास्योक्ता कृतौ ऋत्विजश्चाष्टौ द्वाद
श षोडश वा ॥ ब्राह्मणाः श्रोत्रियाश्चाष्टौ द्वादशाथ षोडशेति कश्यपोक्तेः ॥ अल्पं ताशक्तौ चत्वारो वि
॥ यथाशक्ति सवस्त्रालंकारमधुपर्केणानुष्ठाव्रातेषां पूजनं ॥ तत आचार्यः पवित्रपाणिः प्राणाना
यम्य यथाचारं संकल्प्य सुसमीकृत पुण्यदेशे यदत्र संस्थितामिति सर्षपान्विकीर्य एतोन्विंद्रं स्तवामेति मि
स्त्रिर्ऋष्यिर्जलमाभिमंत्र्य तेनापोहिष्ठेति तृचेन तां भूमिं प्रोक्ष्य मंडपपद्मीमंडपदेवतापूजनं माघकृत्यो ८३
क्तविधिना कुर्यात् ॥ ततः प्रतिमास्थुत्तारणं कृत्वा मंडपस्य तदभावे प्रोक्षितभूमेर्वा ऐशान्यां स्वस्तिकं वि
रच्य मही द्यौरिति भुवं स्पृष्ट्वा ओषधयः समिति द्रोणमितव्रीहीन् प्रक्षिपेत ॥ अथोक्तलक्षणं कलशप्रक्षा

लितं वस्त्रावगुंठितं युवा सुवासा इति कृत्वा तीर्थवारिणेमं मे गंगेत्यापूर्य शरासः कुशास इति हिरण्यरूप इति
कूर्वहेमसमायुक्तं विधाय चूतपल्लवैः संयुतं स्वस्तिके व्रीहिषु विन्यस्य सर्पेल्लवाः क्षीरिद्रुमशाखा अश्वत्थेव
दूर्तिनिःक्षिप्य सहिरत्नानीति पंचरत्नानि या ओषधीरिति सर्वौषधीः गंधद्वारामिति गंधं याः फलिनीरि
ति पुष्पफले ओषधयः समिति यवान् कांडात्कांडादिति दूर्वाः स्योनेति मृदः ॥ आपोहिष्ठेति तृचेन पंचगव्यं
चानिः क्षिप्य पूर्णा दर्वीति पूर्णपात्रं निधाय तस्मात्कलशाच्चतुर्दिक्षु मही द्यौरित्यादिमंत्रावृत्त्या चतुर्णां क
लशानां पूर्णपात्रनिधानांतं कृत्वा मध्यकलशस्य साष्टदलवाससि हेमप्रतिमायां या ते रुद्रेति मंत्रस्य कश्य
पो रुद्रः स्वराडनुष्टुप् तेन मंत्रेण रुद्रमावाह्य तेनैव संपूज्य चतुर्ष्विमं मे वरुण तत्त्वा यामि त्वन्नो अग्ने स
त्वं नो अग्न इति क्रमेण वरुणमावाह्य पंचोपचारैः संपूज्य यजुर्वेदी यजमानश्चेत् कंचिदृत्विजं मध्यकुंभे
षडंगैकादशिनीजपे योजयेत् स च रुद्रकलशं स्पृशन् जपेत् ॥ बह्वृचो यजमानश्चेद्रुद्रसूक्तजपे कंचि
द्योजयेत् छंदोगश्चेद्रुद्रसामजपे सामगांस्त्रीन्योजयेत् ॥ तेपि कलशं स्पृशंतो जपेयुः सूक्तसामजपयोरेका
दशाष्टविंशोकसंख्यानां विकल्पः ॥ कद्रुद्रायेति नवर्चस्य घोरः कण्वो रुद्रो गायत्री ॥ इमा रुद्रायेत्येकाद
शर्चस्य कुत्सो रुद्रो नव जगत्यो अंत्ये त्रिष्टुभौ ॥ आ ते पितरिति पंचदशर्चस्य गृत्समदो रुद्रस्त्रिष्टुप् सवे
षां जपे वि० सूक्तांतरसत्त्वेपि न तज्जपः ॥ बह्वृचवचनस्य त्रिषु पपत्रे ॥ आवो राजानमिति त्र्यृचस्य सामो वाम
देवो रुद्र आद्यस्य त्रिष्टुप् द्वयोर्गायत्री जपे वि० चतुर्णामन्येषामपि तत्रैव जपः ॥ तत्र तज्जपसंदेशपात् ॥ आशुः
शिशान इति सूक्तस्यैंद्रोऽप्रतिरथ इंद्रः ॥ चतुर्थ्या बृहस्पतिः त्रिष्टुप् ॥ अंत्यानुष्टुप् ॥ त्वमग्ने रुद्र इत्यनुवाकस्य रुद्रस्य

Indira Gandhi National Centre for the Arts

वाड ऋषिः॥ अस्यात्मा रुद्रो देवता॥ जगती छंदः॥ त्वमग्न इत्यस्य वामदेवोग्निस्त्रिष्टुप्॥ रक्षोहणमिति पंचविंशर्चस्यां
गिरसः प्रायुरग्निस्त्रिष्टुप्॥ चतस्रोत्या अनुष्टुभः सर्वेषां जपे वि॰ अत्रापि शक्त्या पूर्वोक्तसंख्या स्वीकारः ततस्त्रेपंच
कमंत्रस्याष्टोत्तरसहस्रं जपं तत्रैव कश्चित्कुर्यात्॥ पावमानीनां तिसृणाम् चांच आ सोम धृच्छंदाः पवमान सोमे
गायत्री॥ अन्येषु कलशेषु शांतिजपमृत्विजः कुर्युः॥ यद्वा कुंभपंचकस्थाने कुंभद्वयं संस्थाप्य तत्रैकादिमरुद्र
कुंभे रुद्रादि सर्वजपः॥ अन्यकुंभे तदुत्तरस्थे वरुणमावाह्य शांतिजपः॥ यद्वा चतुःप्रस्थ वरुण एक एव कुंभः
पंचकुंभस्थाने स्थापनीयः॥ तत्र मुख्ये मध्यमकुंभे कार्यं चतुर्षु प्रस्थवरुणेषु कुंभचतुष्टय कार्यं कर्तव्यमिति प्रयव
स्था॥ ततः स्थापितकुंभोत्तरतो रक्तवर्णाः श्वेतौ वा व्रीहितंदुलैश्चतुर्विंशद्दलोपेतं सकर्णिकं पंकजं विधायत
त्कर्णिकायां मही द्यौरिति भुवं स्पृष्ट्वा ओषधयः समिति व्रीहीन् क्षिप्त्वा सौवर्णं राजतं ताम्रं मृन्मयं वा कुंभं दृढं
मंत्रेणाच्छिद्रवस्त्रवेष्टितं कृत्वा तत्र इमं मे गंगे इति तीर्थजलमानीय बर्हिः शिखादीनि शतमूलानि तदलाभे वि
ष्णुक्रांता सहदेवी तुलसी शतावरी निक्षिप्य कृमंत्रे गंधाद्यलंकृतं कूर्चद्वेमोपेतं कुंकुमसर्वौषधिसंयुतं विधा
या कलशे त्विति कर्णिकायां स्थापयेत्ततः पूर्ववद्या ओषधीरित्यादि मंत्रैः यज्ञादिप्रक्षेपं कृत्वा पूर्णादर्वीति निक्षि
त पूर्णपात्रे साष्टदलवस्त्रं निधाय निष्कतदर्धतदर्धान्यतरमान हेमनिर्मितां निर्ऋतिप्रतिमां प्रतिमां तरा
॥पंचामृतेन प्रक्षाल्य तत्र वस्त्रे निर्ऋतिप्रतिमां तद्दक्षिणे तदुत्तरतश्चेंद्रप्रतिमामपां प्रतिमां॥ पूर्वादिदलेषु ८४
विश्वेदेवादिप्रतिमास्तदभावे फलानि तंदुलपुंजान्वा निधाय प्राच्यादिस्थानेषु लोकपालप्रतिमाः फलादि वा
निधाय प्रतिमासु देवता आवाहयेत्॥ तद्यथा॥ मोषुणो घोरः कण्वो निर्ऋतिर्गायत्री इंद्र वो मधुच्छंदा इंद्रो गाय

त्री अप्सु मे मेधातिथिरापो नुष्टुप्॥ विश्वान्देवानावाहयामि॥ विष्णुं॥ वसून्॥ वरुणं॥ अजमेकपादं॥ अहिर्बुध्न्य
म्॥ पूषणं॥ अश्विनौ॥ यमं॰ अग्निं॰ प्रजापतिं॥ सोमं॰ रुद्रं॰ अदितिं॰ बृहस्पतिं॰ सर्पान् पितॄन्॰ भगं॰ अर्यमणं॰ स
वितारं॰ त्वष्टारं॰ वायुं॰ इंद्राग्नी॰ मित्रं॰ इत्या[illegible]नांते ग्रहमखरीत्या लोकपालानावाह्य नैर्ऋतप्रदेशस्थंडि
लाद्यग्निस्थापनांतं कृत्वा स्थापितकुंभेशानदेशे ग्रहानावाह्य संपूज्य तद्देशान्यां कलशप्रार्थनांतं कुर्यात्॥ त
तोन्वाधानं चक्षुषी आज्येनेत्यंते॥ आदित्यादिग्रहान्प्रत्येकमर्कादिजातीयसमिच्चर्वाज्याहुतिभिरेतत्संख्याभिः
अधिदेवताः प्रत्यधिदेवताः विनायकादिक्षेत्रपालांताः लोकपालांश्च पूर्वोक्ताहुतिभिरेतत्संख्याभिः॥ निर्ऋतिं
प्रत्येकमष्टोत्तरशतसंख्याभिर्घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिः समिदाद्याहुतीनां शक्तितो न्यूनसंख्या
करणपक्षे तथैव निर्देशः॥ इंद्रमपश्च प्रतिद्रव्यमष्टाविंशतिसंख्याभिरुक्ताहुतिभिः॥ विश्वेदेवाद्यांश्चतुर्विंश
तिदेवता अष्टाष्टसंख्याभिः पायसाहुतिभिः रक्षोहणमग्निं विंशत्यधिकशतसंख्याभिः कृसराहुतिभिः सवि
तारं दुर्गं त्र्यंबकं कवीन् दुर्गां वास्तोष्पतिं अग्निं क्षेत्राधिपतिं मित्रावरुणावग्निं चएता देवताः प्रत्येकमष्टा
ष्टसंख्याभिः कृसराहुतिभिः श्रियं प्रतिद्रव्यं विंशत्यधिकशतसंख्याभिः समिदाज्यचर्वाहुतिभिः सोमं त्रयोदश
पायसाहुतिभिः रुद्रं स्वराजं चतुर्गृहीताज्येन अग्निं पृथिवीं महांतं वायुमंतरिक्षं महांतमादित्यं दिवं महांत
चंद्रमसं नक्षत्राणि दिशो महांतं चाज्येन शेषेणेत्यादि पात्रासादने पायसचरुकृसरार्थस्थालीनां स्रुवाण
माज्यस्थालीनां शूर्पेणीं चासादनादि प्रणीतास्थापनांतं कृत्वा निर्ऋत्यादीनावाह्यमाणतत्तन्मंत्रैः पूजां कुर्या
त्॥ निर्ऋतये वस्त्रयुग्मं रक्तचंदनं कृष्णसितादिपुष्पाणि मेषशृंगधूप आज्यदीपः पोलिकौदनसुरामांसान्न

Indira Gandhi National
Centre for the Arts

कं पुरुषाहारपर्याप्तं नैवेद्यं ॥ तच्चाभावे तु सुरास्थाने सैंधवमिश्रं क्षीरं मांसस्थाने लवणमिश्रं पायसं देयं अन्नैः
सम्नवे मुख्यमेवोक्तयं ॥ पुष्पांजल्यंते पूजने कृते निर्ऋतिमिंद्रमपश्चात् द्विशूर्पपर्ययोः पायसार्थं चर्वर्थं च द्वादश
ष्टीनत्रस्मीनिरूप्य पायसार्थे निरुप्ते षस्मावनिमुष्टीन् त्रस्मीनिरूप्य पश्चात्तरे कृत्सराष्ट्रं चतुश्चत्वारिंशत्संख्या
न्मुष्टीन्निरूप्य चर्वर्थं पुनश्चतुरः पुनः पायसार्थे द्विपंचाशन्मुष्टीन्निरूप्य तत्तत्संख्यया श्रोस्य क्रमेण वह्नत्य पा
त्रत्रये हविस्त्रयं श्रपयेत् ॥ ततोयथान्वाधानं त्यागः ॥ तद्यथा ॥ एतत्संख्याहुतिपर्याप्तं समिद्द्रव्यं चरुराज्यं च आदि
त्याय सोमाय - एवमधिदेवतादिभ्यस्त्यागः ॥ ततोष्टोत्तरशतसंख्याहुतिपर्याप्तं घृतसंमिश्रपायसं निर्ऋतये
समिदादिषु सैवसंख्या न्यूनसंख्यां वा यथापूर्वसंकल्पितां तदनुसारी त्यागः ॥ इयदाहुतिपर्याप्तं समिदाज्यचर्वा
त्मकं द्रव्यत्रयं निर्ऋतये ॥ अष्टाविंशत्याहुतिपर्याप्तं उक्तद्रव्यचतुष्टयमिंद्राय · एवमग्नेः अष्टाष्टसंख्याहुति
यो पर्याप्तं पायसं विश्वेभ्यो देवेभ्यो विष्णवे वसुभ्यो वरुणाय · अजायैकपदे · अहये बुध्न्याय · पूष्णे · अश्विभ्यां · यमा
य · अग्नये · प्रजापतये · सोमाय · रुद्राय · अदित्यै · बृहस्पतये · सर्वेभ्यः पितृभ्यः नगाय · अर्यम्णे · सवित्रे त्व
ष्ट्रे · वायवे · इंद्राग्निभ्यां · मित्राय · विंशत्यधिकशताहुतिपर्याप्तं पायसं हविरक्षोघ्ने अग्नये अष्टाष्टसंख्याहुतिप
र्याप्तं कृसरद्रव्यं सवित्रे दुर्गायै · अंबिकायै · कविभ्यो दुर्गायै · वास्तोष्पतये अग्नये क्षेत्राधिपतये मित्रावरु
णाभ्यां अग्नये च । विंशत्यधिकशतसंख्याहुतिपर्याप्ताः समिधस्तावदाज्यं तावांश्च चरुः श्रियै त्रयोदशाहुति ८५
पर्याप्तं पायसं सोमाय · चतुर्गृहीताज्यं रुद्राय स्वराजे · एकैकाहुतिपर्याप्तमाज्यं अग्नये पृथिव्यै महते वायवे
तरिक्षाय महते आदित्याय दिवे महते चंद्रमसे नक्षत्रेभ्यो दिग्भ्यो महते च ॥ एवं त्यागे कृते साचार्यास्त्विजस्त

थैवजुहुयुः ॥ तत्र आदित्यादिग्रहजोदर्शनशांत्यक्तरीत्या होमः ॥ सोपि पूर्णोत्तरः कार्यः ॥ निर्ऋतिर्गायत्री होमे ·
इंद्र वो मधुच्छंदा इंद्रो गायत्री अग्ने मेधातिथिरग्निरनुष्टुप् एते मंत्राः प्रणवादि स्वाहांते यज्ञियतरु समिधः
संकल्पानुसारिसंख्याः दधिमधुघृताक्ता होतव्याः पायसचरून् चतुरवत्ताद्यवदानविधिनाहविर्गृही
त्वा जुहुयात् विधिवदिव्या कारीरेकः पायसहोमे समाप्ते समिदादिहोमारंभः ॥ ततश्च विश्वेभ्यो देवेभ्यः स्वाहे
त्येवं उक्ताश्चतुर्विंशति नाममंत्रैः प्रत्येकमष्टाष्टसंख्यया पायसहोमः ॥ रक्षोघ्नेति पंचदशर्चस्य गौतमो वा
मदेवो रक्षोहाग्निः त्रिष्टुप् कृसरहोमे वि · प्रत्यृचमष्टसंख्यया होमः ॥ गायत्र्याप्यष्टोत्तरशताहुतयः ॥ जातवेद
कश्यपो दुर्गा त्रिष्टुप् कृ · तं · अंबकं वसिष्ठो रुद्रोनुष्टुप् कृ · त · सीरा युंजंतीत्यस्य बुधः सौम्यः कवयो गाय
त्री त · ताम् अग्निवर्णां · रात्रिर्गायत्री कृ · त · क्षेत्रस्य वामदेवः क्षेत्रस्य पतिरनुष्टुप् कृ · त · हिरण्याज्जमद
स्प ग्निर्मित्रावरुणौ गायत्री कृ · त · अग्निं दूतं पुरो दध इति सांगिरसो विरूपोग्निर्गायत्री कृ · त · हिरण्यवर्णा
मिति पंचदशर्चस्य सूक्तस्य आनंदकर्दमचिक्लीतेंदिरासुता ऋषयः श्रीर्देवता आद्यास्तिस्रोनुष्टुभः
॥ चतुर्थी प्रस्तारपंक्तिः ॥ पंचमी षष्ठी च त्रिष्टुभौ ॥ ततोष्टाचनुष्टुभः अंत्या प्रस्तारपंक्तिः ॥ होमे वि · प्रत्यृचं
समिदाज्यचरून् अष्टाष्टसंख्यया जुहुयात् ॥ त्वन्नः सोमविश्वत इत्यस्य गाथः सोमस्त्रिष्टुप् पायसहोमे वि ·
१२ या · या ते रुद्रेत्यस्य वशिष्ठो रुद्रः स्वराडनुष्टुप् आज्यहोमे वि · अग्नेन चतुर्गृहीतं हुत्वा स्रुवेण च त
स्य आज्याहुतीर्जुहुयात् भूरग्नये च पृथिव्यै च महते च स्वाहा ॥ भुवो वायवे चांतरिक्षाय च महते च स्वा
हा ॥ स्वरादित्याय च दिवे च महते च स्वाहा ॥ भूर्भुवः स्वश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वा

Indira Gandhi National Centre for the Arts

हेति॥ ततः स्विष्टकृत्प्रायश्चरुकृसराणां सकृत्सकृदवदायाज्यं द्विरग्ध्वा यदस्येति॥ ततः प्रायश्चि
त्तहोमांते कृतेदिक्पालग्रहविनायकादिभ्यो रुद्रायनिर्ऋतये इन्द्रायाग्नये सदीपमाषभक्तबलिदानं
कार्यं॥ अथाचार्यो यजमानो वा पूर्णाहुतिं जुहुयात्॥ समुद्रादूर्मिरित्येकादशर्चस्य सूक्तस्य गोतमो वामदे
वोग्निस्त्रिष्टुप्॥ अंत्या जगती [illegible] र्णाहुतौ वि॰ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्॥ पूर्णा दर्वि विश्वे
देवाः शतक्रतुरनुष्टुप्॥ पूर्णा॰ सप्त ते अग्ने सप्तवान् अग्निर्जगती॥ पूर्णा॰ अग्नये प्रजापतये शतक्रतवे स
प्तवते अग्नये॥ ततः प्रणीताग्निनयनसंस्थाजपपरिस्तरणविसर्जनपरिसमूहनपर्युक्षणानि कृत्वा ग्रहा
ग्नौ एतच्छांतिकरणपक्षे तत्समारोपः॥ ततो रुद्रकलशं दक्षिणतः स्थापयन् त्र्यंबकमिति मंत्रं शतकृत्वो जप
त्॥ यजमानस्य याजुषत्वादिनिमित्तकेच पूर्ववद्रुद्रैकादशिन्यादिजपमपि॥ अत्रापि संख्याविकल्पः
पूर्ववत्॥ अथ रुद्रकुंभं निर्ऋतिकुंभगतदेवताः पंचोपचारैः संपूज्य नववस्त्रादिना यजमानाभि
षेकं करिष्य इति ताः प्रार्थयेत॥ अस्मिन्समये भूमिभिक्षतायद्पूजनं कार्यं सर्वकलशोदकं
चैकपात्रे आदाय विनायकशांतिवत्स्वस्तिकचर्मणी गनि मितिमन्द्रासने उपविष्टं धृतनववस्त्रं स
र्वौषध्यनुलिप्तांगं यजमानं तद्वामभागोपविष्टां तादृशीं सापत्न्यां पत्नीं च सर्त्विग्गाचार्यो भिषिंचेत्॥
कश्यपोक्तं शतच्छिद्रां तर्थारणं कृत्वा कृत्वा॥ अभिषेकमंत्राः आदी भ्या मितिषण्णां काश्यपो विष्टदायुर्हो ८६
नाशनोनुष्टुप्॥ अभिवि॰ त्रिभिर्ष्टं देवेति सप्तानां वासिष्ठ ऋषिः॥ आद्यानां त्रयाणामग्निश्चतुर्णां वि
श्वेदेवाः आद्या गायत्री द्वितीयानुष्टुप् तिस्रो गायत्र्यो ते द्वे अनुष्टुभौ अभिः आपो हिष्ठेति नवर्चस्यांबरीष

सिंधुद्वीप आपो गायत्री द्वे अनुष्टुभौ पंचमी वर्धमाना सप्तमी प्रतिष्ठा अभिः आपइद्वेति द्वयोः सप्तर्षयो विश्वेदेवा
अनुष्टुप्॥ सदस्पतेरित्येतिस्तृचस्य प्राजापत्यो यज्ञमानाशानो पृष्मदाग्निस्त्रिष्टुप्॥ देवस्य त्वेति त्रिभिर्याजुषः॥ यज्ञा ग्रत
इति स्मा प्रजापतिर्मनस्त्रिष्टुप्॥ अथ योसौ वज्रधरो देवो महेन्द्रो गजवाहनः॥ मूलजातशिशोर्दोषं मातापित्रो
र्व्यपोहतु॥ योसौ शक्तिधरो देवो हुतभुङ्मेषवाहनः॥ सप्तजिह्वश्च देवोग्निर्मूलदोषं व्यपोहतु॥ योसौ दंडधरो दे
वो निर्ऋती राक्षसाधिपः॥ प्रशामयतु मूलोत्थं दोषं गंडांतसंभवं॥ धर्मो महिषवाहनः॥ मूलजातशिशोर्दो
षं व्यपोहतु यमो मम॥ योसौ खड्गधरो देवो निर्ऋती राक्षसाधिपः॥ प्रशामयतु मूलोत्थं दोषं गंडांतसंभवं॥ यो
सौ पाशधरो देवो वरुणश्च जलेश्वरः॥ नक्रवाहः प्रचेतानो मूलोत्थाघं व्यपोहतु॥ योसौ देवो जगत्प्राणो मा
तो मृगवाहनः॥ प्रशामयतु मूलोत्थं दोषं बालस्य शांतिदः॥ योसौ निधिपतिर्देवः खड्गभृद्वाजिवाहनः॥ माता
पित्रोः शिशोश्चैव मूलदोषं व्यपोहतु॥ योसौ पशुपतिर्देवः पिनाकी वृषवाहनः॥ आश्लेषामूलगंडांतं दोषम
शु व्यपोहतु॥ विघ्नेशः क्षेत्रपो दुर्गा लोकपाला नवग्रहाः॥ सर्वे दोषप्रशमनं सर्वे कुर्वंतु शांतिदाः इति मंत्रैः सुर
स्त्वाभिष्यादिभिश्चाभिषिंचेत्॥ तच्छ्रयोः शंपुर्विश्वेदेवाः शक्करी अभिः ततो वस्त्रवेष्टितमुखाभ्यां निर्ऋतिरुद्र
कुंभाभ्यामभिषिक्तो यजमानः शुद्धवस्त्रगंधमाल्यधरः सपत्नीकः सापत्न्यो विभूतिधारणं कृत्वा निर्ऋतिरुद्रक
लशस्थदेवताविसर्जनग्रहाणामुत्तरपूजां विसर्जनं च कृत्वाचार्यादीश्चंदनादिना संपूज्याचार्याय सवत्सां प
यस्विनीं गां दद्यात्॥ निर्ऋतिप्रतिमां सोपस्करां तत्करां तत्कलशं च तथा ग्रहप्रतिमा ग्रहप्रीत्यर्थं दक्षिणाश्च॥ ततो
रुद्रजापिभ्यो न्हान्देयः रुद्रप्रतिमा सोपस्करा तत्कुंभाश्च॥ इतरेभ्योपि यथाशक्ति दक्षिणां दद्यात्॥ ये

Indira Gandhi National Centre for the Arts

न्वमनडुहोरसंभवे दशकार्षापणान्धेनोश्च पावनडुहिस्मृतावितिमूल्यं देयं तदसंभवे यथाशक्ति दद्यात्॥ तत्राचार्यद
दक्षिणार्धं ब्राह्मणेभ्यस्तदर्धं सदस्याय तदर्धार्धं प्रत्येकमृत्विग्भ्यो देयं ततस्तेभ्यो मूल्यजननस्त्वचितसर्वारिष्टनिवृत्तिरस्त्वि
ति आशिषं गृहीत्वा ब्राह्मणान्विसर्जयेत्॥ ततः पायसादिना शतं तदर्धं दश वा ब्राह्मणान्भोजयेत्॥ तैश्च ब्राह्मणैः सर्वशां
तिपावपूर्वकं भुक्त्वाऽशिषो देयाः यजमानो निर्ऋतिः प्रीयतामिति तान्विसर्जयेत् सत ईश्वरार्पणं कुर्यादिति मूलशां
तिः॥ ॥ मंडलादिश्चाग्नेयमित्यादि परिभाषाबलात्तत्तदृष्टेति सूक्ते रक्षोहाग्निर्देवतागुणस्य विशेष्यं प्रतिसोपेक्षत्वा
च॥ यत्तु केश्चिदुक्तं ऋत्विक्स्तुतिर्वेत्यनुक्रमणीकोक्तेः सीरायुंजंतीत्यस्य ऋत्विक्स्तुतिर्देवतेति॥ तन्न॥ स्तुतेर्मंत्रा
प्रकाश्यत्वेन स्तुत्यपन्यासस्य स्तुतिविषये देवतात्वघोतनार्थत्वात्॥ तथा च समुद्रादूर्मिरित्येकादशाग्नेयं जगत्या
तं सौर्यं वापं वाग्नयं वाघृतस्तुतिर्वेत्यनुक्रमणिकामनुसृत्याह वेदभाष्यकारः॥ अग्निसूर्यापगोघृतानामन्य
तमोदेवतेति॥ तथा यज्ञया वेति सूक्तं उच्छिष्टं चम्वोरित्येतदृग्विषयामन्त्याचर्मप्रशंसा वेतितामनुसृत्याह सः अभिष
वणचर्म देवतेति तथाश्वमेधांगभूताध्रिगुविनियुक्तसूक्तगोषु रामानोद्यधिकाऽश्वस्तुतिरित्येकं रूपाता मेव
नुसृत्य स एवाह॥ अश्वस्य स्तूयमानत्वाद्यातेनोच्यते सा देवतेति न्याये नाश्वोदेवतेति॥ ऋत्विक्स्तुतेर्देवतात्वे ८७
तत्तुल्यन्यायतया क्वचिद्विषयेषु घृतस्तुतिचर्मप्रशंसाश्वस्तुतीनामेव देवतात्वे भाष्यकारो ब्रूयात्॥ न घृतादीनां
॥ किं च पितृश्च नस्तुतिरित्यनुक्रमणीव्याख्यावसरे तद्भाष्यकारेणोक्तं अत्र स्तुतिरन्नमस्य देवते त्यर्थ इति पुनश्चेत्स
तथा तेनोच्यते सा देवतेत्यनुक्रमणीपरिभाषोक्तेः॥ तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्देवतमित्याच
क्षते से वा देवतोपपरीक्षायत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन्स्तुतिं प्रयुंक्ते तद्देवतः स मंत्रो भवतीति नि

रुक्तात्र॥ अत्र भाष्यं यमर्थं वस्तु कामयमानः ऋषिर्यस्यां देवतायामग्निरुतायामार्थपत्यमर्थपतिभावम
त्मन इच्छन्नमुष्या देवतायाः प्रसादेनाहमनुष्यार्थस्य पतिर्भविष्यामीत्येतां बुद्धिं पुरोधाय स्तुतिं प्रयुंक्ते तद्दे
वत एव स मंत्रोऽर्थात्म वति एतेन लक्षणेन सर्वमंत्रेषु देवतोपलब्ध्या जायते ऽस्यार्थस्य एवं देवता दातुं सम
र्थ इति जानानः स्तुतिं प्रयुंक्ते येन मंत्रेण सा प्राधान्यस्तुतिभाक् तस्य देवतेति अत्र व्याख्याद्वयेपि स्तुतिभागेव
देवतानां स्तुतिरिति स्फुटं ज्ञायते अत एव ऋत्विक्स्तुतिर्वेति वाशब्दो विश्वेदेवदेवतात्वार्थः इति तत्स्तुत्या नि
कत्वार्थः॥ वैश्वदेवं तु त्रिष्टुबंतमुद्बुध्यं बुधः सौम्या ऋत्विक्स्तुतिर्वेति पाठितादिग्रथे पूर्वसूक्तदेवतात्वेनो
क्ता विश्वेदेवा उद्बुध्यमिति सूक्ते तु वर्तते तु हि हवेत च्छद्वाविंशत्यष्टौ दैवतछंदांसि द्वित्रिचतुःपंचषट्
सूक्तं भांजीति परिभाषानुसारेण तु शब्देन तद्योतनात्॥ न चैवमन्वाधानादौ विश्वेदेवशब्दस्यात्विकृश
ब्दस्य वा निर्देशेन भवितव्यं न कविशब्दनिर्देशेनेति वाच्यं तद्यानि नामानीति निरुक्ते नयीयन्नामार्थः प्रा
धान्येन मंत्रे स्तुत्स्य तथा प्रतीयते तन्नाम्ना निर्दिश्यमानस्यैव तस्य देवतात्वप्रतीतेः॥ पार्वणीं जुहोतीति वि
हिते होमयोः ऋजव इमममावास्येति मंत्रवर्णागतपूर्णमासामावास्या शब्दाभ्यामेवोद्देशस्य सर्वयाज्ञिक
संमतत्वदर्शनाच्च॥ विधिशब्दस्य मंत्रत्वइति न्यायेन होमविधिमाशब्दविशेषणदेवतोद्देशं विधित्स
तां तरंगमंत्रानुसारेणैव क्रमस्यैव देवताशब्दस्याविनियमनौचित्याच्च कविधीरनाम्नो मेयाविनामपारे
तुल्येपिधीरपदार्थस्य कविविशेषण तया भाष्यकृताक्तेश्च॥ विश्वबांदेवानामि वार्त्तिज्ञामपि बहुवचनां

Indira Gandhi National Centre for the Arts

मा
नक्षत्रपदेनाभिधानसंभवाच्च प्रज्ञाधिकारपठितानि रुक्तोक्तन्यायेन देवताविकल्पस्य ध्यानफलतासंभवाद्भे
स्फलं ॥ ॥ अथाश्लेषाशांतिविधिः मानवसंहितायां ॥ असंभवे तु जन्मर्क्षे अन्यस्मिन् वाशुभे दिने स्नातो भूंगा
दिभिस्तस्मिन् वरयेत् द्विजोत्तमान् ॥ विन्यसेत् पंच कुंभांस्तु द्वयं वा तदलाभतः ॥ देवतास्थापने चैकमेकं रुद्राभि
मंत्रेण ॥ मूलर्क्षोक्तप्रकारेण कुंभेभिः क्षिप्य पूजयेत् ॥ गोमयालेपिते देशे धान्याद्यैः परिशोभिते ॥ पंकजं कार
येच्चत्र चतुर्विंशद्दलान्वितं ॥ तंडुलैः कारयेद्धार रक्तपीतसितासितैः ॥ कर्णिकायां न्यसेद्ब्रीहीन् स्थापयेत्तेषु कुं
भकं ॥ कुंभं च वस्त्रगंधाद्यैस्तत्तन्मंत्रैः प्रपूजयेत् ॥ याः फलिनीरित्यनया क्षिपेद्रत्नौषधादिकान् ॥ कुंभोपरिस्थ
पात्रे तु आश्लेषाप्रतिमां यजेत् ॥ तस्य पूर्वोत्तरनक्षत्रे दक्षिणोत्तरयोर्यजेत् ॥ इंद्रादीशानपर्यंताभितरक्षोणिप
जयेत् ॥ मूलोक्तेन विधानेन कुंभयोरभिमंत्रणं ॥ रुद्राचौ रुद्रकुंभे तु पूर्ववद्धे वेषमाचरेत् ॥ नमोस्तु सर्पे
भ्यः पूजामंत्र इतीरितः ॥ सर्पो० एवं ध्यात्वा ततो भूयो होमकर्म समारभेत् ॥ कर्तुः शास्त्रोक्तमार्गेण आचार्य
स्याथवाचरेत् ॥ इदं सर्पेभ्यो जुहुयाद् दधिप्रत्यधिदैवतं ॥ अष्टोत्तरशतं वापि अष्टाविंशतिमेव वा ॥ मूलन
क्षत्रवच्छेषं होमकर्म समाचरेत् स्रुवेणां हुत्वा तत्कर्माणि कृत्वा संपातकं तथा ॥ कुंभे जलेषु प्रक्षिप्य अभिषेक
मथाचरेत् ॥ दारपुत्रसमेतस्य यजमानस्य पूर्ववत् ॥ अभिमंत्रितकुंभाद्भिरभिषेचनमाचरेत् ॥ तथापौर ८८
णमंत्रैश्च पल्लवैरभिषेचयेत् ॥ अश्लेषाजे तु जातस्य माता पित्रोर्धनस्य च ॥ भ्रातृज्ञातिकुलस्थानां दो
षं सर्वं व्यपोहतु ॥ योसौ वागीश्वरो नाम अधिदेवो बृहस्पतिः ॥ मातापित्रोः शिशोश्चैव गंडांतं स व्यपोह

तु ॥ पितरः सर्वभूतानां रक्षंतु पितरः सदा ॥ सर्पनक्षत्रजातस्य वित्तं च ज्ञातिबांधवान् ॥ ततः शुक्लांबरधरो
यजमानः सुभूषितः ॥ दक्षिणाभिस्ततो विद्वान् मूलवच्च व्रतोषयेत् ॥ शुक्तवस्त्रश्च विप्रेभ्यः स्वीकुर्यादाशिषं
द्वी ॥ इत्यनेन विधानेन सर्वारिष्टं विनश्यति ॥ सर्पाधीश नमस्तुभ्यं नागानां च गणाधिप ॥ स्नानार्घ्यं मया द
त्तं सर्वारिष्टप्रशांतये ॥ मूलनक्षत्रवत्कुर्यात् सर्पे गंडे स्वनामतः इति ॥ अथ प्रयोगः ॥ द्वादशादेतदसंभवे ज
न्मर्क्षे अन्यस्मिन् शुभदिने वा प्राण्यानिन्यविधिं विधाय तैलाभ्यंगोद्वर्तनादिना स्नातो देशकालौ संकीर्त्य अस्य शि
शोराश्लेषाजननसूचितसर्वारिष्टपरिहारद्वारा परमेश्वरप्रीत्यर्थं मनूक्तविधिना सग्रहमखामाश्लेषाशां
तिं करिष्य इति संकल्प्य गणेशपूजादि आत्विग्वरणांतं कुर्यात् ॥ आत्मुत्तारण सर्षपाविकिरणाद्यंते ॥ मूलशां
त्युक्तप्रकारेण कुंभपंचके चतुः प्रस्रवणपंचवक्त्रौकं कुंभे वा सवरुण रुद्रस्यावाहनादि पूजनं विधाय स
द्वेकादशिनीजपरक्षोघ्नमितिसूक्तजपी ते रुद्रकुंभोत्तरभागे गोमयोपलिप्ते धान्यादिभिः परितः शोभि
ते शुद्धतंडुलैः रक्तपीतासितकृष्णपिष्टकैर्वा चतुर्विंशद्दलान्वितं पंकजं विधाय तत्कर्णिकायां भूमिमहीयौ
रित्याभिमृश्य ओषधय इति व्रीहीन् क्षिप्य कलशं क्षितिस्थापितकलशमिमं मे गंगे इति तीर्थोदकेनाप
र्य गंधद्वारामिति गंधपुष्पाद्याय वासु वीसा इति वस्त्रवेष्टनेन च संपूज्य कांडात्कांडादिति दूर्वाभिश्च अ
श्वत्थे व इति पंचपल्लवैः स्योनेति सप्तमृद्भिः आपो हि ष्ठेति पंचगव्येन च संयोज्य याः फलिनीरिति पंचर
त्नानि यवान् सर्वौषधीः फलं च प्रक्षिप्य पूर्णा दर्वीति निहितपूर्णपात्रे साष्टदलवस्त्रे आश्लेषादेवताप्रतिमा
यां नमोस्तु सर्पेभ्य इति सर्पानावाह्य ध्यायेत् सर्पा रक्तास्त्रिनेत्राश्च द्विभुजाः पीतवस्त्रकाः ॥ फलकासिधर

Indira Gandhi National
Centre for the Arts

स्तीक्ष्णोदिष्या मरणान्त्रूषितइति॥ तद्वद्दक्षिणोत्तरदेशयोः पुष्यमघे अधिप्रत्यधिदेवते आवाह्य चतुर्विंशतिद
लेषु पूर्वदलमारभ्य प्रादक्षिण्येन पूर्वाफाल्गुनीमारभ्य पुनर्वसुपर्यंतानि नक्षत्राण्यावाहयेत्॥ तत्र पुष्यावाहने॥
बृहस्पतिः प्रथमं जायमानः॥ तिष्यं नक्षत्रमभिसंबभूव॥ श्रेष्ठो देवानां पृतनासु जिष्णुः॥ दिशोनु सर्वा अभयन्नो अ
स्तु॥ तिष्यः पुरस्तादुत मध्यतो नः॥ बृहस्पतिर्नः परिपातु पश्चात्॥ बाधेतां द्वेषो अभयं कृणुतां॥ सुवीर्यस्य पतयः
स्याम इति तैत्तिरीयशाखोक्तो मंत्रः॥ तथा मघावाहने॥ उपहूताः पितरो ये मघासु॥ मनोजवसः सुकृतः सुकृत्याः
॥ते नो नक्षत्रे हवमागमिष्ठाः॥ स्वधाभिर्यज्ञं प्रयतं जुषंतां॥ ये अग्निदग्धा येनग्निदग्धाः॥ येमुंलोकं पितरः क्षि
यंति॥ यांश्च विद्म यां उ च न प्रविद्म॥ मघासु यज्ञं सुकृतं जुषंतामिति॥ तथा पूर्वाफल्गुन्याद्यावाहनानि तत्रस्थे
षु गवां पतिः फल्गुनीनामसि त्वमित्यादिवाक्याष्टकैः कर्त्तव्यानि यद्वा नाममंत्रैः॥ पूर्वाफल्गुनीभ्यां नमः॥
पूर्वाफल्गुन्यावावाहयामि उत्तराफल्गुनीभ्यां २ हस्ताय० ३ ... चित्रायै० ४ निष्ट्यायै० ५ विशाखाभ्यां० ६
अनूराधेभ्यो० ७ ज्येष्ठायै० ८ मूलाय० ९ पूर्वाषाढाभ्यः १० उत्तराषाढाभ्यः ११ श्रोणायै० १२ श्रविष्ठाभ्यो० १३
शतभिषजे० १४ पूर्वप्रोष्ठपदेभ्यः १५ उत्तरप्रोष्ठपदेभ्यः १६ रेवत्यै० १७ अश्वयुग्भ्यां० १८ अपभरणीभ्य १९
कृत्तिकाभ्यः० २० रोहिण्यै० २१ मृगशीर्षाय० २२ आर्द्रायै० २३ पुनर्वसुभ्यां० २४ इत्येतैः॥ तत आवाहितदे ९६
वता उक्ततत्तन्मंत्रैः षोडशोपचारैः संपूज्याचार्यो यजमानश्च शाखोक्तेन स्वशाखोक्तेन वा विधिनाग्निं प्रतिष्ठा
प्य ग्रहपूजां वरुणपूजां तां कृत्वान्वादध्यात् तत्र ग्रहपीठस्थदेवतानां मूलशांतिवन्निर्दिश्य कृत्वा सर्पान् प्रति अ
अं अष्टोत्तरशतसंख्याभिर्घृतसंमिश्रपायससमिदाज्यचर्वाहुतिभिः॥ तिष्यं मघां च अष्टाविंशतिभिस्तदाहु

तिभिः सर्पाणामष्टाविंशतिश्चेत्तयोरष्टावष्टौ॥ पूर्वाफल्गुन्यादिचतुर्विंशतिदेवताः प्रत्येकमष्टाष्टसंख्याभिः पा
यसाहुतिभिः रक्षोहणम्नतिदेवतानिर्दिश्य मूलशांतिवत्॥ शेषेणेत्यादि॥ पायसकृसरचरूणां श्रपणं आज्यभागांते
यथान्वाधानं त्यागं यजमानः॥ तत्तन्मंत्रैर्होमं च सर्त्विगाचार्यः कुर्यात्॥ आज्यहोमेषु प्रत्याहुति उत्तरतः स्थापित ति
जलकुंभे संपाताख्यशेषं प्रक्षिपेत्॥ सर्पेभ्यो होमस्तु इदं सर्पेभ्यो हविरस्तु जुष्टं॥ आश्रेषा येषामनुयंति चेतः॥ ये अंत
रिक्षं पृथिवीं क्षियंति॥ तेनः सर्पासो हवमागमिष्ठाः॥ ये रोचने सूर्यस्यापि सर्पाः॥ ये दिवं देवीमनु संचरंति॥ येषा
माश्रेषा अनुयंति कामं॥ तेभ्यः सर्पेभ्यो मधुमज्जुहोमीति तैत्तिरीयोक्तवाक्याष्टकेन कार्यः॥ इदं सर्पेभ्यो जुहुयादि
ति मानवोक्तेः॥ मदनरत्नोदाहृतसंहितायामस्यामेव शांतौ होमाधिका रइदं सर्पेभ्य इति च वाक्यान्यष्टौ तु सा
र्पमद्दस्तुसूक्त्यासंवादलाभाच्च॥ अत एवेदं हविरिति योजनये दमित्यस्य मानववाक्ये वैयर्थ्यमापादयन्नो नमोमा
भ्यः॥ सर्पतिष्यमघाहोमोऽवदानसंपदा पायसचर्वा कार्यः॥ प्रायश्चित्तहोमांते विनायकादिभ्यो बलिदानं
तं कृत्वा रुद्राय सर्पेभ्यः तिष्याय मघाभ्यः क्षेत्रपालाय च सदीपबलीन् दद्यात्॥ तत आचार्यो द्वादशगृहीतादिवि
धिना मूलशांतिवत् पूर्णाहुतिं हुत्वा संपातं कुंभे क्षिपेत् ततः प्रणीतानिनयनादि तत्त्वपुच्छरणांतं॥ ततो रुद्रकुं
भं दक्षिणतः स्पृष्ट्वा अंबवकजपादि मूलशांतिवत्॥ ततो रुद्रसर्पादिदेवतानां पंचोपचारैरुत्तरपूजां कृत्वा
भिषेकानुज्ञां तद्ददेवादाय अभिषिंचेत् सर्त्विगाचार्यः अक्षीभ्यामित्यादि यज्ञायत इत्यंतं मूलशांतिवत्॥ श्लो
केषु विशेषः॥ योसौ वज्रधरो देवो महेंद्रो गजवाहनः॥ सार्पजातशिशोर्दोषं मातापित्रोर्व्यपोहतु॥ योसौश
क्तिधरो देवो हुतभुङ्मेषवाहनः॥ सप्तजिह्वश्च देवोग्निः सार्पदोषं व्यपोहतु॥ योसौ दंडधरो देवो धर्मोम

Indira Gandhi National Centre for the Arts

द्विषवाहनः॥ सार्पजातशिशोर्दोषं व्यपोहतु यमो मम॥ योसौ खड्गधरो देवो निर्ऋती रक्षसाधि
६० पः॥ प्रशामयतु सार्पोत्थं दोषं गंडांतसंभवं॥ योसौ पाशधरो देवो वरुणश्च जलेश्वरः॥ नक्रवाहः
प्रचेतानः सार्पोत्था घं व्यपोहतु॥ योसौ देवो जगत्प्राणो मारुतो मृगवाहनः॥ मातापित्रोः शिशोश्चै
व सार्पदोषं व्यपोहतु॥ योसौ पशुपतिर्देवः पिनाकी वृषवाहनः॥ आश्लेषामूलगंडांतं दोषमाशु व्य
पोहतु॥ विघ्नेशः क्षेत्रयो दुर्गा लोकपाला नवग्रहाः॥ सर्वदोषप्रशमनं सर्वे कुर्वंतु शांतिदाः॥ आश्ले
षाऋक्षजातस्य मातापित्रोर्धनस्य च॥ भ्रातृज्ञातिकुलस्थानां दोषं सर्वं व्यपोहतु॥ योसौ वागीश्वरो
नाम अधिदेवो बृहस्पतिः॥ मातापित्रोः शिशोश्चैव गंडांतं सव्यपोहतु॥ पितरः सर्वभूतानां रक्षंतु
पितरः सदा॥ सर्पनक्षत्रजातस्य वित्तं च ज्ञातिबांधवान्॥ सुराश्च॰ तच्छुयोः॰ शतछिद्रांतर्धाने नमूलवदभिषे
कांते आचार्य रुद्रजापि भ्यो धेनु कृष्मानडुद्दारत्रे भ्यो दक्षिणा यादानं मूलवत् कृत्वा ग्रहाणामुत्तरपूजां विधा
यसर्पे भ्यो हतफलपुष्पयुतमर्घ्यं दद्यात् सर्पाधीशनमस्तुभ्यं नागानां च गणाधिप॥ गृहाणार्घ्यं मया दत्तं सर्वा
रिष्ट प्रशांतये इति तिलैर्वा सुवर्णेन संकल्प्य आदिः आशीर्ग्रहणांतं मूलवदिति आश्लेषा शांतिः॥ ॥ अ
थ ज्येष्ठा शांतिविधिः॥ अलया मले॥ ज्येष्ठादौ जननी पिता॥ तृतीये जननी भ्राता स्वयं माता चतुर्थके॥
आत्मानं पंचमे हंति षष्ठे गोत्रक्षयो भवेत्॥ सप्तमे चोभय कुलं ज्येष्ठमातरमष्टमे॥ नवमे श्वशुरं हंति स ६०
र्वं हंति दशांशकः॥ वसिष्ठः॥ सुरशत्ता राजनिता युवाग्रजं द्विदैवता राजनिता तु देवरं॥ पुरंदरर्क्षे जनि
तः सुतस्तथा स्वस्याग्रजं हंति न युक्ति का यदि॥ पारिजाते गार्ग्यः॥ सुखासीनं मुनिश्रेष्ठं गर्गं मुनिगणा

न्वितं॥ कृतांजलिपुटो भूत्वा पप्रच्छ पतिशौनकः॥ गर्ग॥ ज्येष्ठानक्षत्रसंभूतं गंडदोषविनिर्णयं॥ तस्य
शांतिविधानं च यथावत्कथयाम्यहं॥ घटिकैका च भे प्रांते ज्येष्ठादौ घटिकाद्वयं॥ तयोः संधिरिति
यं शिशुगंडं समीरितं॥ प्रथमे च द्वितीये च द्वितीये च ज्येष्ठक्षे च तृतीयके॥ पादत्रये जातनरो ज्येष्ठां
प्यत्र प्रजायते॥ ज्येष्ठांत्यपादजातस्तु पितुस्तस्य विनाशनः॥ जायते नात्र संदेहः दशाद्यभ्यंतरे तथा॥
ज्येष्ठर्क्षे प्रथमा नृजातः अग्रजस्य विनाशनः॥ तृतीये कन्यका जाता हंति शीघ्रं यवाग्रजं॥ तच्छांतिं
स्य वक्ष्यामि गंडदोषप्रशांतये॥ सुदिने शुभनक्षत्रे चंद्रताराबलान्विते॥ सुतकां तथवा कुर्याज्ज्येष्ठा
शांतिं विधानतः॥ वज्रांकुशधरं देवमैरावतगजान्वितं॥ कुर्याच्छचीपतिं रम्यं देवेंद्रं सुरनायकं॥ कर्ष
मात्र सुवर्णेन कर्षार्द्धेनार्धपादतः॥ तद्विधानं प्रकुर्वीत वित्तशाठ्यं न कारयेत्॥ शालितंडुलसंपूर्णकुं
भस्योपरि पूजयेत्॥ इंद्रायेंद्रो मरुत्वत इति मंत्रेण वाग्यतः॥ गंधपुष्पैर्धूपदीपैर्नानानैवेद्यनिवेदनैः
पूजयेद्विधिना विप्र लोकपालगणान्वितं॥ रक्तवस्त्रद्वयोपेतं पूजयेत्सुरनायकं॥ तत्र संस्थापयेत्कुं
भान् चतुर्दिक्षु विशेषतः॥ तन्मध्ये स्थापयेत् कुंभं शतछिद्रसमन्वितं॥ पुण्योदकसमायुक्तान् वस्त्र
युग्मविवेष्टितान्॥ कुंभेषु विन्यसेद्धीमान्पंच गव्यं समंत्रकं॥ पंचामृतं पंचरत्नं मृत्तिकापंचसंख्यकाः
॥ पंचवृक्षकषायांश्च पंचपल्लवकांस्तथा॥ सुवर्णं कुशदूर्वाश्च शतौषधिविनिक्षिपेत्॥ पूजयेद्वा
रुणो मंत्रैः कुंभांस्तत्र प्रयत्नतः॥ त्वन्नो अग्ने जपेदादौ सत्वन्नो द्वितीयकं॥ समुद्रज्येष्ठा इति च

Indira Gandhi National
Centre for the Arts

कार्यपसूजकादीनां शुभं तत्सर्वं समर्पयेत्॥ आचार्याय च गां दद्यात् सुशीलां च पयस्विनीं॥ रक्तवर्णां वत्सयुतां स
र्वालंकारभूषितां ५
मेमं गंगे चतुर्थकं॥ पूजयेद्वस्त्रयुग्माद्यैः चतुरः कलशानपि॥ कलशस्थान्वरुणान पीत्यर्थः॥
६१ जपं कुर्युः प्रयत्नेन मंत्रैरेभिर्द्विजोत्तमाः॥ आग्नेयिद्राजपं कुर्यात् मद्रात्रग्ने अशेषतः॥ इंद्रसूक्तं
रुद्रसूक्तं जपेन्मत्स्यं जपं ततः॥ इंद्रं संपूज्य देवेंद्रं वरुणं कुंभसंस्थितं॥ सुसंकल्पविधानेन होमका
ब८ र्यं ततश्चरेत्॥ सामिद्भिर्वा जुहुयाद्धस्य शतमष्टोत्तरं तथा॥ सर्पिषा चरुणा चैव मूलमंत्रेण वाग्यतः
॥ दुनेज्ञाप्यं चत्ते नैवयतद्वंद्वमयेति चा तिलान्माहुतिभिर्दुत्वा शतमष्टोत्तरं पृथक्॥ भार्याशिशु
समीपेतं यजमानं विशेषतः॥ अभिषेकं प्रकुर्वीत सुकैर्वारुणसंज्ञितैः॥ समुद्रज्येष्ठादिभिर्मंत्रै
रिमं मे वरुणस्तथा॥ द्यौः शांतेघादिभिर्मंत्रैरभिषेकं समाचरेत्॥ अभिषेकानिवृत्तौ तु यजमानः
समन्वितः॥ शुक्लवस्त्राणि धृत्वा य कुर्यादाज्यावलोकनं॥ पेरूपंरूपेति मंत्रेण चित्रे तत्र सुरेवच॥
देवता पुरतः स्थित्वा॰ धूपदीपनिवेदनं॥ दद्यात्स्वाचमनं सम्यक् कृतांजलार्घ्यं तथेवच॥ नमस्ते सुरना
थाय नमस्तुभ्यं शचीपते॥ गृहाणार्घ्यं मया दत्तं गंडदोषप्रशांतये॥ वस्त्रयुग्मादिधानां च यथाविभव
सारतः॥ यक्षगंधर्वसिद्धैश्च पूजितोसि ~~सुरनी~~ रक्तवर्णां वत्सयुतां सर्वालंकारभूषितां शचीपते॥ दानै ६१
धानेन देवेश गंडदोषं विनाशय॥ अष्टोत्तरशतं संख्यां कुर्याद्ब्राह्मणभोजनं॥ ततो पि दक्षिणां दत्वा ब्राह्म
णत्समापयेत्॥ इमां हुत्वा ज्येष्ठा शांतिं यथा विष्णुकुमारगतः॥ गंडदोषं विनिर्जित्य आयुष्मान् जायते
नरः॥ कृत्सुक्तं वृद्धगर्गेण शौनकायविशेषतः॥ ज्येष्ठानक्षत्रसंभूतगंडदोषप्रशांतये॥ अज्ञानाद्वा यदा

इंद्राग्ने होमकृत्वे तेपवस्व मधुमत्तमः॥ सुतस्य योनिमासदं॥ ७

ज्ञानाद्वे कल्पा वाधनस्य च॥ यन्न्यूनमतिरिक्तं वा तत्सर्वं क्षंतुमर्हसि॥ ॥ इति ज्येष्ठानक्षत्रशांतिः॥ अथप्र
योगः॥ सुदिने देवनक्षत्रयुते चाले पितुश्चंद्रताराबलान्विते सूतकांते सति सपत्नीकः कर्ता देशादिकी
र्तनांते अस्य शिशोर्ज्येष्ठाजननसूचितसर्वारिष्टपरिहारद्वारा परमेश्वरप्रीत्यर्थं ज्येष्ठाजननशांतिक
रिष्यइति संकल्प गणेशपूजादि ऋत्विग्वरणांतं कुर्यात्॥ आचार्यः सर्षपाविकिरणान्तं प्रोक्षणांतं
माभ्युत्तारणानि कृत्वा महीद्यौरित्यादिविधिना स्थापितकलशशालितंडुलैः पूरयित्वा तत्रपूर्णाद
र्वीति निहितपूर्णपात्रे साष्टदलं वस्त्रे कर्षतदर्धतदर्धान्यतरमान हेमनिर्मितां शच्या सहेरावता
रूढं॰ वज्रांकुशहस्तभुजामिंद्रप्रतिमां निधाय इमा वाद नाद्युपचारैः पूजयेत्॥ इंद्राग्ने होमरूत्व तइ
तिमंत्रस्य कश्यपो मारीचप इंद्रो गायत्री पूजने वि॰ इंद्रमावाहये लोकपालांश्चावाहये तत्समान्वितं मि
द युक्तमंत्रेण पूजनाय न्यासमा। द्विमौनीत्र वेत वस्त्रार्पणकाले रक्तवस्त्रद्वयं नैवेद्यकाले शष्कुल्यादि
नानाभक्ष्यनिवेदनं कुर्यात् पूजांते तस्य चतुर्दिक्षु कुंभचतुष्टयं तस्य पूर्वमध्यभागे च शतच्छिद्रं महीद्यौ
रित्याद्यावृत्यानि धाय इमं मे गंगे इति चतुर उदकेनापूर्य तेषु गायत्र्यादिभिः पंचगव्यं गोमूत्रादि आ
प्यायस्वेत्यादिभिः पंचामृतं क्षीरादि॥ सहिरत्नानीति पंच रत्नानि॥ स्योनेति पंचमृत्तिका॥ अश्व
त्थेव इति पंचपल्लवान् तत्कषायसहितान् हिरण्यरूप इति हेम। सहिरत्नानीति पंच रशरास इति उ
शान्॥ कांडात्कांडादिति दूर्वाः॥ या ओषधीरिति सर्वौषधीः प्रादक्षिण्येन मंत्रावृत्यानिः क्षिप्य युवा सुव

सत्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेळो ऽव यासिसीष्ठाः ॥ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ॥ अव यक्ष्व नो वरुणं रराणो वीहि मृळीकं सुहवो न एधि ॥

६२ साइति वस्त्रयुग्मवेष्टितेषु तेषु पूर्णपात्राणि निधाय तेषु क्रमेण वरुणपूजां कुर्यात् ॥ प्रथमकलशे त्वन्नो अग्न इत्यस्य गोतमो वामदेवो वरुणस्त्रिष्टुप् वरुणपूजने विनियोगः ॥ द्वितीये स त्वं न इत्यस्य गोतमो वामदेवो वरुणस्त्रिष्टुप् पू० तृतीये समुद्रज्येष्ठा ॥ वसिष्ठो वरुणस्त्रिष्टुप् ॥ चतुर्थे इमं मे गंगेत्यस्य सिंधुक्षित्प्रैयमेधो वरुणो जगती पू० प्रतिकुंभं वस्त्रयुग्मं वस्त्रार्पणसमर्थेर्पयेत् तत्र तु ऋत्विजश्चत्वारि सूक्तानि जपेयुः ॥ आ नो भद्रा इति दशर्चस्य सूक्तस्य राहूगणो गोतमो विश्वेदेवाः आद्याः पंच सप्तमी च जगत्यः षष्ठी विराट् शेषास्त्रिष्टुभः प्रथमकलशे जपे वि० ॥ मद्रा अग्नेरिति द्वादशर्चस्य चाध्यश्वः सुमित्रोऽग्निः आद्ये द्वे जगत्यौ अन्यास्त्रिष्टुभः प्रथमकलशे जपे वि० पुरुषसूक्तस्य पुरुषो नारायणोऽनुष्टुप् अन्त्या त्रिष्टुप् ॥ तृतीयकलशे जपे वि० ततः कद्रुद्रायेत्यस्य घोरः कण्वो रुद्रो गायत्री चतुर्थकलशे जपे वि० आचार्यः ऐंद्रकलशे इंद्रायेंदो मरुत्वत इत्येतमष्टोत्तरशतादिसंख्यया जपित्वा यत इंद्रस्य भर्ग इंद्रस्त्रिष्टुप् एतत्सूक्तं जपित्वा रुद्रजपं त्र्यंबकमिति मृत्युंजयं पंचाष्टाविंशत्यादिसंख्यया कुर्यात् ॥ ततः स्थंडिलेऽग्निं वेधा ग्रहान् प्रतिष्ठाप्यान्वादध्यात् ॥ अत्र प्रधानं ग्रहानेतत्संख्याभिः समिच्चर्वाज्याहुतिभिः तदंगदेवता अप्येतत्संख्याभिरुक्ताहुतिभिः इंद्रं पलाशसमिदाज्यचर्वाहुतिभिः प्रतिमृष्टोत्तरशतसंख्याभिः प्रजापतिमष्टशततिलाहुतिभिः शेषेणेत्यादि ॥ आज्यभागांते अष्टोत्तरशताहुतिपर्याप्तं समिदाज्यचर्वात्मकं द्रव्यं त्र्यंबकमिंद्रायेति तत्संख्याहुतिपर्याप्तास्तिलाः प्रजापतये ६२

इति त्यागोत्तरं वाग्यत आचार्यो द्रव्यत्रयेणोक्तसंख्यं होमं कुर्यात् एतद्धोमांते इंद्रायेंदो मरुत्वत इति यद्इंद्रेति न चं जपेत् ॥ ततो व्याहृतिभिस्तिलानष्टोत्तरशतं जुहुयात् आज्यचरुतिलशेषैः स्विष्टकृतं हुत्वा प्रेयश्चित्तहोमांते कुर्यात्ततो बलिदानं लोकपालादिभ्यो इंद्राय क्षेत्रपालाय च ॥ ततः पूर्णाहुतिः प्रणीताविमोकः संस्राजप्रश्वपरिस्तरणाविसर्जनादि पर्युक्षणं ततो भार्याशिशुसहितं यजमानं सनेसने समुपवेश्याभिषेकः ॥ नद्वितेषामिति दशर्चस्य सूक्तस्याजीगर्तिः शुनःशेपो वरुणस्त्रिष्टुप् ॥ पश्चिद्वीत्येकाविंशत्यर्चस्याजी० पो वरु० गायत्री इदं कवेरित्येकादशर्चस्य कूर्मो गृत्समदो वरुणस्त्रिष्टुप् समुद्रज्येष्ठेति मंत्राणां वासिष्ठ आपस्त्रिष्टुप् समुद्रज्येष्ठादिभिर्मंत्रैः इमं मे वरुणेत्यस्याजीगर्तिः० पो व० गायत्री इमं मे० द्यौः शांता सादित्येन शांतेति० पृथिवी शांतिरंतरिक्षं शांतिरिति० तयाहं शांत्येति याजुषमंत्रैश्च त्रिभिरभिषिक्तो यजमानः पत्नीसह शुक्लवस्त्रचंदनकुसुमानि धृत्वा रूपंरूपमिति चित्रं देवानामिति तत्स्वसुरिति मंत्रैरवलोकितमाज्यं सदक्षिणं ब्राह्मणाय दत्वेंद्रपुरोभागे स्थित्वा गंधादिपंचोपचारैः संपूज्य मनतां चूले निवेद्य गंधपुष्पफलयुक्तमर्घ्यं निवेदयेत् ॥ मंत्रः ॥ नमस्ते सुरनाथाय नमस्तुभ्यं शचीपते ॥ गृहाणार्घ्यं मया दत्तं गंडदोषप्रशांतये इति ॥ तत आचार्याय सुशीलां पयस्विनीं रक्तवर्णां सवत्सां हेमशृंगादिसर्वालंकारभूषितां गां दद्यात् गोदानविधिना मंत्रो विशेषः ॥ यज्ञगंधर्वसिद्धैश्च पूजितोऽसि शचीपते दानेनानेन देवेश गंडदोषं प्रशमयेति अस्या गोर्दक्षिणात्वेन दक्षिणांतरं ॥ ततोऽष्टोत्तरशतं ब्राह्मणान्

भोजयेत्तेभ्यो यथाशक्ति दक्षिणां दत्वा प्रणिपत्य क्षमध्वं ममापराधानिति क्षमाप्यैवं प्रार्थयेत्॥ अज्ञानादथवा
६३ ज्ञानाद्वैकल्याद्वाध्वनस्य च॥ यन्न्यूनमतिरिक्तं वा तत्सर्वं क्षंतुमर्हसीति॥ ततो विसर्जनं आचार्य दत्तसोप
स्करां प्रतिमां दत्वाग्निं संपूज्य विसृज्याग्निं धृत्वा गच्छ गच्छेति तं विसृज्य ज्येष्ठाशांतिसुकृतं यन्मया लब्धं तेन देवेंद्रप
मेश्वरः प्रीयतामिति॥ इति ज्येष्ठाशांतिः॥ अथ व्यतीपातवैधृतिसंक्रमशांतिः॥ शौनकः॥ अथातः संप्रव
क्ष्यामि शौनकः शांतिमुत्तमं॥ वैधृतौ च व्यतीपाते महादोषोभिजायते॥ कुमारजन्मकाले तु व्यतीपातश्च
वैधृतिः॥ संक्रमश्च रवेस्तत्र जातो दारिद्र्यकारकः॥ दरिद्राणां महादुःखं व्याधिपीडा महद्भयं॥ अप्रियं
मृत्युमाप्नोति नात्र कार्या विचारणा॥ स्त्रीणां च शोकदुःखं च सर्वनाशकरो भवेत्॥ शांतिर्वा पुष्कला
कृता यत्र दोषो न कश्चन॥ गोमुखप्रसवं कुर्यात् शांतिं कुर्यात्प्रयत्नतः॥ जपाभिषेकदानेभ्यो होमादपि
विशेषतः॥ नवग्रहमखं कुर्यात्तस्य दोषस्य शांतये॥ प्रथमं गोमुखाज्जन्म ततः शांतिं समाचरेत्॥ गृहस्य
पूर्वदिग्भागे गोमयेनानुलिप्य च॥ अलंकृते सुदेशे तु व्रीहिराशिं प्रकल्पयेत्॥ पंचद्रोणमितं धान्यं तदर्धं तंदु
लेषु च॥ तदर्धं तु तिलैः कुर्यादन्योन्योपरि कल्पयेत्॥ द्रव्याणामपि राशौ तु अष्टपत्रं लिखेद्बुधः॥ पुण्याहं वा
चयित्वा तु आचार्यं वृणुयात्ततः॥ पंचांगभूषणं दद्यात् वस्त्रांगुलीयकं॥ राशौ प्रतिष्ठितं कुंभमव्रणं सु ६३
मनोहरं॥ तीर्थोदकेन संपूर्य सर्वौषधिपल्लवं॥ सगर्भपंचरत्नं च वस्त्रयुग्मेन वेष्टयेत्॥ तस्योपरिन्य
सेत्पात्रं सूक्ष्मवस्त्रेण संयुतं॥ प्रतिमां स्थापयेद्धीमान् साधिप्रत्यधिदेवतां॥ चंद्रादित्याकृती पार्श्वे मध्ये वै

धृतिमर्चयेत्॥ वैधृतिं तद्देवतां रुद्रं॥ एवमेव व्यतीपातशांतौ संक्रमणस्य च॥ मानोरुत्तरतो रुद्रमग्निं दक्षिण
तो यजेत्॥ निष्कमात्रेण वार्धेन पादेनापि स्वशक्तितः॥ प्रतिमां कारयेद्धीमान् तत्तल्लक्षणलक्षितां॥ प्रतिमापूजना
र्थाय वस्त्रयुग्मं निवेदयेत्॥ अधिदेवो भवेत्सूर्यः चंद्रः प्रत्यधिदेवतं॥ ततो व्याहृतिपूर्वेण तत्तन्मंत्रेण सोमपूजयेत्
॥ त्रैयंबकेन मंत्रेण प्रधानप्रतिमां यजेत्॥ उत्सूर्य इति मंत्रेण सूर्यपूजा समाचरेत्॥ आप्यायस्वेति मंत्रेण सोम
पूजा समाचरेत्॥ उपचारैः षोडशभिर्यद्वा पंचोपचारकैः॥ अर्चयित्वा गंधपुष्पाद्यैः फलं नैवेद्यमर्पयेत्॥ मृत्युंजये
न मंत्रेण प्रधानप्रतिमां स्पृशेत्॥ अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा॥ अष्टाविंशति वारं वा पूजांते च स्वशक्ति
तः॥ सर्वसौरं प्रजप्याथ सोमे च सोममंत्रतः॥ आनो भद्रेति सूक्तं च भद्रा अग्नेश्च सूक्तकं॥ जपेत्तु पौरुषं सूक्तं त्रैयंबक
मतः परं॥ कुंभस्थं स्पृष्ट्वा चतुर्दिक्षु जपं कुर्युस्तथर्त्विजः॥ कुंभस्य पश्चिमे देशे स्थंडिलेग्निं प्रकल्पयेत्॥ स्वगृह्योक्तवि
धानेन कारयेत्संस्कृतानलं॥ त्रैयंबकेन मंत्रेण समिदाज्यचरून् हुनेत्॥ अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा
॥ अष्टाविंशति वा कुर्यात्स्वस्य शक्त्यनुसारतः॥ मृत्युंजयेन मंत्रेण तिलहोमं समाचरेत्॥ ततः स्विष्टकृतं हुत्वाभि
षेकं तु कारयेत्॥ समुद्रज्येष्ठासूक्तेन आपो हिष्ठा ऋचेन च॥ अक्षीभ्यामिति सूक्तेन पावमानीभिरेव च॥ त्रैयंब
केन तत्सूर्य आप्यायस्वेति मंत्रतः॥ सुरास्त्वामिति मंत्रैश्चाभिषेकं समाचरेत्॥ अभिषेकाप्लुतं वस्त्रमाचार्या
य निवेदयेत्॥ श्वेतवस्त्रधरो भूत्वा भूषणाद्यैरलंकृतः॥ यजमानः स्त्रियायुक्तः आज्यावेक्षणमाचरेत्॥ आचार्यं पू
जयेत्तत्र वस्त्रहेमांगुलीयकैः॥ गोदानं वस्त्रदानं च स्वर्णदानं विशेषतः॥ तद्दोषशमनार्थाय आचार्याय प्रदाप
येत्॥ छादनपटं दद्यात्ततः शांतिर्भवेदिति॥ जापकेभ्यो ब्राह्मणेभ्यो दक्षिणाः प्रतिपादयेत्॥ दीनांधकृपणेभ्य

Indira Gandhi National
Centre for the Arts

६५ अपदध्यान्नरिदक्षिणां॥ ब्राह्मणान् भिष्टान्नैर्भोजयेच्छक्तितः॥ ताभ्यां चार्यर्त्विजश्चैवार्च्य॥ बंधुभिः सह भुंजीत यथाविभ
वसारतः॥ एवं यः कुरुते मर्त्यो न वै दुःखमवाप्नुयादिति॥ अथ प्रयोगः॥ गोमुखप्रसवमुक्तविधिना कृत्वा देशका
लौ संकीर्त्यास्य शिशोर्व्यतीपातजन्मसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं व्यतीपातशांतिं करिष्ये
इति संकल्प्य गणेशपूजनाद्युक्तलक्षणाचार्यवरणांतं कुर्यात्॥ वृतायतस्मै पटवस्त्रयुगं कुंडलयुगमंगुलीयकं च
दद्यात्॥ आचार्यो यदत्र संस्थितमिति सर्षपविकिरणं शुचीव इति पंचगव्येन आपोहिष्ठेत्यद्भिश्च गृहपूर्वदिग्भाग
प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति मंत्राभ्यां प्रार्थ्य॥ तत्रैव गोमयलिप्ते रंगवल्ल्याद्यलंकृते समदेशे मही द्यौरिति भुवमभि
मृश्य ओषधयः समिति पंचद्रोणपरिमितव्रीहिराशिं कृत्वा तं समं कृत्वा तदुपरि सार्द्धद्रोणद्वयमितं तंडुलराशिं
तदुपरि सपादद्रोणमितं तिलराशिं च कृत्वा तत्राष्टदलं च कृत्वा कलशोसीति तत्राव्रणं कुंभं प्रतिष्ठाप्य इमं मे गंग इति ती
र्थोदकेनापूर्य स्योनापृथिवीति सप्तमृदो या ओषधीरिति सर्वौषधीरश्वत्थेव इति पंचपल्लवान् तत्सवितुर्गंध
द्वारां आप्यायस्व दधिक्राव्णो तेजोसि शुक्रमसीति पंचगव्यानि गंधद्वारामिति गंधं सहिरत्नानीति पंचरत्नानि त
त्र प्रक्षिप्य वस्त्रयुग्मेनावेष्ट्य तदुपरि सूक्ष्मवस्त्रयुतं पूर्णपात्रं पूर्णादर्वीति निधाय तदुपरि निष्कतदर्धतदर्धान्य
तरपरिमितहेमनिर्मितसूर्यप्रतिमां निधाय तत्र सूर्यमावाह्य नामोपचारैः पूजयेत् व्याहृतीनां परमेष्ठी प्र
जापतिः प्रजापतिर्बृहती॥ उदुत्यमिति मंत्रस्य मेधातिथिऋषिः सूर्यस्त्रिष्टुप् पूजने विनियोगः॥ ॐ भू
र्भुवः स्वः ॐ उदुस्सूर्यो बृहदर्चींष्यश्रेत् पुरु विश्वा जनिम मानुषाणां समो दिवा ददृशे रोचमानः क्रत्वा कृतः सु ६५
कृतः कर्तृभिर्भूत्॥ तद्दक्षिणतोऽग्निमावाहयेत्॥ अग्निं काण्वो मेधातिथिरग्निर्गायत्री अग्निपूजने वि० ॐ भूर्भुवः

स्वः अग्निं दूतमिति० उत्तरतश्चंद्रमावाहयेत्॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्॥ ॐ भूर्भुवः स्वः त्र्यंबकं यजामह इति
॥ एवमेव संक्रांतिशांतौ संक्रांतिशांतिं करिष्य इति संकल्पे विशेषः॥ व्यतीपातसंक्रमणयोर्जन्मनि तु व्यतीपातसं
क्रांतिशांती तंत्रेण करिष्य इति संकल्पः॥ तिस्रो देवताः षोडशोपचारैर्वस्त्रयुग्मसहितैः पंचोपचारैर्वा संपूज्य
गंधपुष्पाद्यर्चितफलनैवेद्यं समर्प्य प्रधानप्रतिमां स्पृशन् सर्वसौरमंत्रान् जपेत्॥ उदुत्यमिति त्रयोदशर्चस्य
सूक्तस्य कण्वपुत्रः प्रस्कण्वो नवाद्या गायत्र्योंत्याश्चतस्रोनुष्टुभः॥ चित्रं देवानामिति षडर्चस्य आंगिर
सः कुत्सस्त्रिष्टुप्॥ इदं मित्रमिति द्वयोः औचथ्यो दीर्घतमास्त्रिष्टुप्॥ हंसः शुचिषदिति गोतमपुत्रो वामदे
वो जगती यत्त्वा सूर्येत्यत्रिरनुष्टुप्॥ यदद्य सूर्येत्येकस्या उत्सूर्येतितिसृणां उद्वेतीति सार्द्धचतसृणां उदुत्यद्वी
+तमिति बृहती शीर्ष्णः शीर्ष्णः सतो बृहती तच्चक्षुरिति पुरउष्णिक्॥ बण्महाँ असीति द्वयोः भृगुपुत्रो जमदग्निः
पूर्वा बृहती उत्तरा सतो बृहती॥ नमो मित्रस्येति सूर्यो नोदिव इति पंचर्चस्य सूर्यपुत्रः चक्षुर्गायत्री॥ विभ्राड्बृ
हदिति चतसृणां सूर्यपुत्रो विभ्राड् जगती विभ्राजामित्यस्यास्तारपंक्तिः॥ आयं गौरिति तृचस्य सार्पराज्ञी गायत्री
सर्वेषां सूर्यो देवता जपे वि०॥ ततो रुद्रप्रतिमां स्पृशन् त्र्यंबकं जपमंत्रमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशति
वारं जपेत्॥ ततश्चत्वार ऋत्विजश्चतुर्दिक्षु कुंभं स्पृष्ट्वा क्रमेण सूक्तानि जपेयुः॥ पूर्वस्यां आ नो भद्रा इति सूक्त
स्य राहूगणो गोतम ऋषिः विश्वेदेवाः आद्याः पंच सप्तमी च जगत्यः षष्ठी विराट्स्थाना शेषास्त्रिष्टुभः॥ न प
वि० दक्षिणस्यां भद्रे अग्ने इति द्वादशर्चस्य वाध्यश्वः सुमित्र ऋषिः॥ अग्निर्देवता आद्ये द्वे जगत्यौ॥ [illegible]
स्त्रिष्टुभः॥ प्रतीच्यां सहस्रशीर्षेति षोडशर्चस्य पुरुष ऋषिः॥ नारायणो देवता अनुष्टुप् छंदः॥ उत्तरस्यां

Indira Gandhi National
Centre for the Arts

वकं वसिष्ठो रुद्रोनुष्टुप्॥ अथ कुंभपश्चिमदेशेग्निं स्थंडिले स्वगृह्योक्तविधिना प्रतिष्ठाप्य कुंभस्योत्तरतो ग्रहा
६५ णामावाहनादि पूजां कृत्वा तद्देशे नैर्ऋत्यां कलशस्थापनं कृत्वाग्नेः पश्चिमतः उपविश्यान्वादध्यात्॥ चक्षुषी आ
ज्येनेत्यंते अत्र प्रधानं आदित्यादित्यादिग्रहान् चिकीर्षितसंख्याभिः अर्कादिजातीयसमिच्चर्वाज्याहुतिभिः
ग्रहपीठदेवताः एकैकसंख्याभिः समिच्चर्वाज्याहुतिभिः सूर्यं प्रत्येकमष्टोत्तरशतसंख्याभिः समिदाज्यचर्वा
हुतिभिः अग्निं रुद्रं च प्रत्येकमष्टाविंशतिसंख्याभिस्तदाहुतिभिः मृत्युंजयं अष्टोत्तरशतसंख्याभिस्तिलाहु
तिभिः शेषेणेत्यादि प्रायश्चित्ताद्युत्तं ते बलिदानं ततः पूर्णाहुतिः प्रणीताविमोक्षः संस्राजपेनोपस्थानं च॥ ततो
ध्यनूतनवस्त्रयोर्दंपत्योः सबालयोरभिषेकः समुद्रज्येष्ठा इति सूक्तस्य वसिष्ठ आपस्त्रिष्टुप् आपोहिष्ठेति ति
सृणां सिंधुद्वीप आपो गायत्री अक्षीभ्यामिति षण्णां विवृहा यक्ष्मदानुष्टुप्॥ स्वादिष्ठयेति पावमानीनां मधुच्छंदाः
पवमानः सोमो गायत्री उत्सूर्यो अग्निर्देवतं त्र्यंबकं॥ पूजाकाले उक्तमेवामृष्यादि सुरास्त्वामभिषिंचंत्वित्यादिना
पौराणमंत्रेणाप्यभिषेकांते भिषेकवासः आचार्याय समर्प्य सपत्नीकः श्वेतवस्त्रचंदनादि धृत्वा स्रग्वणमालादि
नालंकृत आज्यमवेक्ष्य तत्स्वाज्यं सदक्षिणं ब्राह्मणाय दत्वा वस्त्रहेमांगुलीयकेराचार्यं संपूज्य व्यतीपातजननदोषशां
त्यर्थं गोवस्त्रस्वर्णादि तुभ्यं संप्रदद इति आचार्याय तानि दत्वा तदर्थं प्रच्छादनं पटं तथैव दद्यात् ऋत्विग्भ्यो यथा ६५
शक्ति दक्षिणां दत्वादीनां धनरूपेणे भूयसीं दत्वा शतं ब्राह्मणान् त्रिभिः सदमिष्टान्नैर्भोजयित्वा पूर्णतां वाच
यित्वेश्वरार्पणं कृत्वा बंधुभिः सह भुंजीतेति व्यतीपातसंक्रांतिशांतिः॥ वैधृतिशांतौ तु संकल्पे वैधृते रुक्ते ख॥ आ
वाहनमध्ये सव्याहृतिकेन त्र्यंबकमिति मंत्रेण रुद्रमावाह्य दक्षिणत उत्सूर्यो बृहदर्चीपीति सूर्यमुत्तरतश्चा

प्यायस्वेति सोमम् आवाह्य पूजने रुद्रप्रतिमां स्पृष्ट्वा मृत्युंजयजपः। सूर्यप्रतिमां स्पृष्ट्वा सर्वसौरजपः। सो
मप्रतिमां स्पृष्ट्वाप्यायस्वेति जपः। अन्वाधाने रुद्रं समिच्चर्वाज्यैः प्रतिद्रव्यमष्टोत्तरशतसंख्याहुतिभिः सूर्य
सोमौ प्रत्येकमष्टाविंशतिसंख्याहुतिभिः तदाहुतिभिः मृत्युंजयमष्टोत्तरसहस्रे वा तद्विंशत्यन्यतरसंख्याभिः
शेषेणेत्यादि तथैव होमः कार्य इति विशेषः। इति वैधृतिशांतिः। अथैकनक्षत्रजननशांतिः। तत्र गार्ग्यः। एकस्मिन्ने
वनक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः। प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्य निश्चयः। तद्दोषनाशाय तदा प्रशस्तां शांतिं च कुर्याद
भिषेचनं च। संपूज्य स्वर्क्षप्रतिमां तदग्रे शांतिं च कुर्याद्द्विजवानुरूपं। तत्र शांतिं प्रवक्ष्यामि गर्गाचार्यमतेन तु। शु
नक्षत्रे शुभवारे च चंद्रताराबलान्विते। रिक्तां विष्टिं विवर्ज्य तु प्रारभेद्धि भवेत्सुधी॥ आचार्यं वरयेत्पूर्वं चतुरश्च
द्विजोत्तमान्। पुण्याहं वाचयित्वा तु शांतिकर्म समारभेत्। अग्नेरीशानदिग्भागे नक्षत्रप्रतिमां ततः। तत्तदृक्षोक्तमंत्रेण
अर्चयेत्कलशोपरि। रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत्। स्वशाखोक्तेन मार्गेण क्रमादग्निमुखं ततः। अनेनैव तु मंत्रे
णकुर्यादष्टोत्तरं शतं। प्रत्येकं समिदन्नाज्यैः प्रायश्चित्तां तमेव च। अभिषेकं ततः कुर्यादाचार्यः पितृपुत्रयोः। वस्त्रालं
कारगोदानै राचार्यं पूजयेत्पुनः। ऋत्विजां दक्षिणां दद्यात् माषत्रयसुवर्णकं। देवताप्रतिमादानं धान्यवस्त्रादिभिः सह
यानशय्यास्नानादीनि दद्यात्तद्दोषशांतये। भोजयेद्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः इति। भ्रात्रोः पितृपुत्रयो
रित्यत्र पुंस्त्वमविवक्षितं निमित्तविशेषणत्वात्। एकोदरयोर्जन्यजनकयोश्चैकनक्षत्रे जनने शांतिरित्याशयः। पू
र्वैर्विधित्सिता पुण्याहवचनात्। अतएव वाचयित्वेति आनंतर्यार्थकं। नक्षत्रप्रतिमां तद्देवताप्रतिमां वा। नक्षत्रदे
वता पूज्या त्वधिप्रत्यधिपूर्वकमिति ज्योतिर्निबंधात्। तत्तदृक्षोक्तमंत्रा अग्निर्नः पातु कृत्तिका इत्यादयः॥ तं नक्षत्र

Indira Gandhi National
Centre for the Arts

तद्देवतोभयप्रकारांकृत्वा स्वसद्व्येपि विधिमोगाद्ध॥ अथ प्रयोगः॥ उक्तसमये जनकनक्षत्रोत्पत्तौ गोमुखप्रसवं
कृत्वा एकोदरनक्षत्रोत्पत्तौ तत्प्रसूत्वादेशकालौ संकीर्त्य अस्य शिशोः पित्रेकनक्षत्रोत्पत्तिसूचितसर्वारिष्टपरि
८६ हारद्वारा श्रीपरमेश्वरप्रीत्यर्थं शांतिमभिषेकंपूजितनक्षत्रप्रतिमाग्नेयथाशक्तिदानं च करिष्ये इति संकल्प्य गण
पतिं पूजयित्वा आचार्यं चतुरः ऋत्विजश्च वृत्वा पुण्याहं वाचयीत। ततः आचार्यो यदत्र संस्थितमिति सर्षपवि
किरणं प्रोक्षणप्रार्थनादि च कृत्वा स्थंडिले दिव्यांकलशौ महीद्यौरित्यादिना स्थाप्य तत्र रक्तवस्त्राच्छादिते
नक्षत्रतद्देवतान्यतरप्रतिमां कृत्वाग्न्युत्तारणांतं मंत्रेणावाहनादि उपचारैः पूजयेत्। वस्त्रार्पणे तत्कर्मसमर्प
येत्। पूजांते गिं व्याहृतिभिः प्रतिष्ठाप्यान्वाधाने चक्षुषी आज्येनेत्यंते ऽदोनक्षत्रमिमां देवतां वा प्रत्येकमष्टोत्त
रशतसंख्याकाभिः समिच्चर्वाज्याहुतिभिः शेषेण स्विष्टकृदादि प्रायश्चित्तहोमांते प्रणीताविमोकादि आचार्यः
कलशोदकेन तयोरभिषेकं कुर्यात्। पैयारिकनक्षत्रजन्मः ततः पूजितप्रतिमामग्निं आचार्याय वस्त्रालंकार
गां दद्यात्। ज्योतिर्निबंधोक्त्या स्वर्णरूप्यमयौ हरिहरौ संपूज्य तौ वा दद्यात्। विधिजस्यास्य …
तरो वध्यतां सुखे। प्रीयेतां मूर्तिदानेन देवौ हरिहरावमौ॥ इति। माषत्रयस्कर्णमूर्त्या … वोत्तर ८६
पूजा विसर्जनं। आचार्यस्तत्प्रतिमां प्रतिपादनं धान्यवस्त्रादिभिः सह। यानशय्यासनादीनि ब्राह्मणेतरेभ्यो
दानं कृत्वा तैः सहाचार्यऋत्विजो भोजयित्वा पूर्णतां वा वाचयित्वेश्वरार्पणं कुर्यादिति एकनक्षत्रजननशांतिः॥
अथ ग्रहणजननशांतिः। पारिजाते। ग्रहणे चंद्रसूर्यस्य प्रसूतिर्यदि जायते॥ शांतिं तत्र प्रव

क्ष्यामि नराणां हितकाम्यया॥ यस्मिन् ऋक्षे विशेषेण ग्रहणं संप्रजायते॥ तदृक्षाधिपतेरूपं सुवर्णेन प्रकल्प
येत्॥ यथाशक्त्यानुसारेण वित्तशाठ्यं न कारयेत्॥ सूर्यग्रहे सूर्यरूपं सुवर्णेन विशेषतः॥ चंद्रं चंद्रग्रहे दद्या
द्मानं रजतेन विशेषतः॥ राहुरूपं प्रकुर्वीत नागेन वा विचक्षणः॥ शुचौ देशे प्रयत्नेन गोमयेन प्रकल्पयेत्
॥ नागेन सीसमथवा तस्योपरि न्यसेद्धीमान् नववस्त्रसुशोभनं॥ त्रयाणां चैव रूपाणां स्थापनं तत्र कार
येत्॥ रक्ताक्षतं रक्तगंधं रक्तपुष्पं वराणि च॥ सूर्यग्रहे प्रदातव्यं सूर्यप्रीतिकराय च॥ श्वेतवस्त्रं श्वेतमाल्यं
श्वेतगंधाक्षतादिभिः॥ चंद्रग्रहे प्रदातव्यं चंद्रप्रीतिकराय च॥ राहवे चैव दातव्यं कृष्णपुष्पं वराणि च॥ दद्या
न्नक्षत्रनाथेभ्यः श्वेतगंधानुलेपने॥ सूर्यं संपूजयेद्धीमान् आकृष्णेनेति मंत्रतः॥ चंद्रग्रहे च पालाशैः समि
द्भिर्जुहुयान्नरः॥ दूर्वाभिर्जुहुयाद्धीमान् राहोः संप्रीणनाय च॥ समिद्भिर्जलवृक्षोत्थैर्नक्षत्रेशाय जुहुयाद्बुधः
॥ नक्षत्राय नक्षत्राधिपतये॥ आज्येन वरुणाचैव तिलैश्च जुहुयात्ततः॥ पंचगव्यैः पंचरत्नैः पंचत्वक्पंच
पल्लवैः॥ जलैरोषधिकल्कैश्च सहितैः कलशोदकैः॥ अभिषेकं प्रकुर्वीत यजमानः प्रयत्नतः॥ मंत्रैर्वरु
णादैवत्यैरापोहिष्ठादिभिः॥ इमं मे गंगे पितरस्तत्त्वा यामीति मंत्रकैः॥ अभिषेके निवृत्ते तु यजमानः समा
हितः॥ आचार्यं पूजयेत्सम्यक् सुशांतो नियतेंद्रियः॥ तस्माद्धान्यस्य पत्रेण कृत्वा प्रतिकांतित्रयं॥ दक्षिणा
भिश्च संयुक्तं यथाशक्त्यनुसारतः॥ ब्राह्मणान् भोजयित्वा तु प्रणिपत्य क्षमापयेत्॥ तेभ्योपि दक्षिणां दद्या
द्यजमानः समाहितः॥ अनेन विधिना शांतिं कृत्वा सम्यग्विशेषतः॥ अकालमृत्युशोकं च व्याधिपीडां
च नाप्नुयात्॥ सौख्यं सौमनसं नित्यं सौभाग्यं लभते नरः॥ इत्थं ग्रहणजातानां सर्वारिष्टविनाशनं॥ कथि

Indira Gandhi National Centre for the Arts

तंमार्गवेणेदंशोनकायमहात्मने॥ अथप्रयोगः॥ सूर्यग्रहणेप्रसूतौतत्कालस्थितनक्षत्रस्याधि
धिष्ठात्र्यग्न्यादिदेवतातुष्ट्याः सूर्यस्यचयथाशक्तिहेम्नाप्रतिमेविधायराहोःसीसेननागाकृतिंकृत्वा॥श्री
८७ यांतेममभार्यायाः सूर्यग्रहणकालीनप्रसूतिसूचितसर्वारिष्टपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंस
ग्रहमखशांतिंकरिष्यइतिसंकल्प्यगणेशपूजनाद्याचार्यवरणपूजांतंकुर्यात्॥ चंद्रग्रहेतुसूर्यस्था
नेराजतंचंद्रबिंबंकुर्यादन्यद्वयंपूर्ववत्संकल्पेसूर्यस्थानेचंद्रपदप्रयोगः॥ ततआचार्योग्रहदेत्रेस्याचं
लेशुचिदेशेगोमयेनोपलिप्यतत्रनवसदशशालितश्वेतवस्त्रंप्रसार्यतत्रोक्तदेवतानांरूपत्रयंनिधाय
आकृष्णेनहिरण्यस्तूपःसवितात्रिष्टुप्॥ मध्येसूर्यंरक्तवर्णैर्वस्त्रगंधाक्षतपुष्पैर्धूपादिभिश्चपूजयेत्
तद्दक्षिणतोराहुंकृष्णवर्णैर्गंधादिभिर्धूपादिभिश्चपूजयेत्॥ स्वर्भानोरित्यस्यात्रिः॥ स्वर्भानुस्त्रिष्टुप्॥ नक्षत्र
देवतामग्निर्नःपातुकृत्तिकाइतितैत्तिरीयपठितनक्षत्राद्याष्टकेनपूजयेत्सूर्यस्योत्तरतः॥ चंद्रग्रहेतुमध्ये
चंद्रपूजनंआप्यायस्वगोतमःसोमोगायत्रीआप्यायस्वेतिमंत्रेणश्वेतैर्गंधादिभिर्धूपादिभिश्चेतिविशे
षः॥ अन्यदेवयोःपूजनंपूर्ववत्॥ ततोऽग्निस्थापनं॥ ग्रहपूजांकलशस्थापनांतांकृत्वान्वाधानंकुर्यात्॥
चक्षुषीआज्येनेत्यंतेग्रहान्वाधानंकृत्वासवितारंअर्कसमिदाज्यचरुतिलानांप्रत्येकमष्टोत्तरशताहुतिदुभि
भिःस्वर्भानुंदूर्वासहिताज्यादीनांतावतीभिराहुतिभिर्नक्षत्रदेवतामग्निंजलवृक्षसमित्सहिताज्यादीनांताव
भिराहुतिभिःशेषेणेत्यादि॥ चंद्रग्रहेअर्कस्थानेचंद्रस्यार्कसमित्स्थानेपालाशसमिधांनिर्देशः॥ ग्रहसिद्ध ८७
स्त्रस्यपर्यग्निकरणादि॥ यथान्वाधानंत्यागः॥ आयुष्टितांतेबलिपूर्णाहुती॥ संस्थाजपांतेपंचगव्यंपंचरत्न

पंचत्वक्पंचपल्लवैरोषधकल्कैश्चमिश्रितलौकिकजलैर्ग्रहकलशोदकैश्चसहितैरभिषेकः॥ आपोहिष्ठेति
तच्चस्यसिंधुद्वीपआपोगायत्रीइमंमइतिसिंधुक्षित्प्रैयमेधोनद्योजगतीपितरःपितामहाःपरेवरेइतियाजुषमंत्रे
णतत्त्वायामिशुनः० अभिषेकांतेआचार्यंसंपूज्यतस्मैप्रतिमात्रयंदक्षिणांचदद्यात्॥ ततोग्रहाणांपूजनंविस
र्जनंप्रतिमाप्रतिपादनंब्राह्मणभोजनसंकल्पश्चेतिग्रहणशांतिः॥ अथनक्षत्रगंडांतशांतिविधिः॥ पारिजा
ते॥ अश्विनीमघमूलादौत्रिषटकनवनाडिकाः॥ रेवतीसार्पशाक्रांतेमासाश्वत्ररतुसायकाः॥ अश्विनीमघमू
लादौनाडिकाद्वितयंतथा॥ रेवतीसार्पशाक्रांतेनाडिकाद्वयमेवहि॥ अश्विनीमघमूलानांपूर्वार्धेबाध्यतेपिता
॥पूषाहिशाक्रपश्चार्धेजननीबाध्यतेशिशोः पूषारेवती॥ अहिराश्लेषा॥ शाक्रंज्येष्ठा॥ पितृघ्नश्चदिवाजातोरात्रि
जातस्तुमातृहा॥ दिवाजातोदिवागंडांतेजातइतियावत्॥ आत्मघ्नःसंध्ययोर्जातोनास्तिगंडेनिरामयः॥ सर्वेषांगंड
जातानांपरित्यागोविधीयते॥ वर्जयेद्दर्शनंवापितत्त्वषाण्मासिकंभवेत्॥ तच्चवर्जनं॥ तस्यशांतिंप्रवक्ष्यामिसोम
मंत्रेणभक्तिमान्॥ कांस्यपात्रेप्रकुर्वीतपलैःषोडशभिर्नवं॥ अष्टाभिश्चचतुर्भिर्वाद्वाभ्यांवाशोभनंतथा॥ तन्म
ध्येपायसेशंखेनवनीतेनपूरितं॥ राजतंचंद्रमर्चेतसितपुष्पसहस्रकैः॥ देवज्ञःक्षौमवासास्तुसितपुष्पैश्चराचि
तः॥ सोमोद्भमितिसंचिंत्यपूजांकुर्यादतंद्रितः॥ जपेत्सहस्रकंमंत्रंप्रद्धानःसमाहितः॥ आप्यायस्वेतिमंत्रेण
पूजांकुर्यात्समाहितः॥ दद्याद्वैदक्षिणामिष्टांगंडदोषप्रशांतये॥ शुक्लंवागीश्वरंचैवतान्नपात्रसमन्वितं॥ गंडदो
षोपशांत्यर्थंदद्याद्वैदविदेशुचिः॥ ज्योतिर्निर्बंधे॥ कुंकुमंचंदनंकुष्ठंगोरोचनमथापिच॥ चूतपूर्णेषुकुंभेषुचतुर्षु
प्रसिंचेत्क्रमात्॥ सहस्राक्षेणमंत्रेणबालकेस्नापयेन्नरः॥ पितृयुक्तंदिवाजातंमातृयुक्तंतुराात्रिजं॥ स्नापयेत्पि

Indira Gandhi National
Centre for the Arts

न्मातत्सांसंध्ययोरुत्तयोरपि॥ कांस्यपात्रे घृतं पूर्णं गंडदोषोपशांतये॥ सक्षीरं मौक्तिकं शंखं श्वेतवस्त्रयुगं शुभं॥
६८ यजुर्वेदविदे दद्याद्गंडदोषापनुत्तये॥ दद्याद्धेनुं हिरण्यं च यद्वा आचार्यं पूजयेत्॥ आयुर्वृद्धिकरं जप्त्वा कुर्याद्ब्राह्म
णतर्पणमिति॥ अत्र चाश्विन्याद्यादिभागे आदिसंख्यारेवत्याद्यंत्यभागे ह्यादशादिसंख्या घटिका दुष्टाः॥ तत्तदाद्यंत्य
भागस्थे घटिके द्वे द्वे घटिके दुष्टतरे अश्विन्यादिभागो दिवा रेवत्याद्यंत्यभागो रात्रौ दुष्टतमौ॥ तत्रापि घटिकेति द्वे
॥ अत एवानिमित्ततारतम्येन नैमित्तिकतारतम्यं कांस्यपात्रपरिमाणचतुष्टयोपन्यासेन सूचितं अत एव चंद्रवा
गीश्वरप्रतिमादावपि कर्षादिपरिमाणतारतम्यमूह्यं॥ अथ प्रयोगः॥ षण्मासोत्तरमेकादशे वाह्नि प्रथमतो गा
पसवं कृत्वा देशकालौ संकीर्त्य ममास्य शिशोः रेवत्यश्विनीसंध्यात्मकगंडांतजननसूचितसर्वारिष्टनिरासद्वा
रा श्रीपरमेश्वरप्रीत्यर्थं नक्षत्रगंडांतशांतिं करिष्य इति संकल्प्य गणेशपूजनादि यजुर्वेदविद्वेदज्ञाचार्यवरि
णं कुर्यात्॥ ततस्तं चंदनशुक्लमाल्यैः क्षौमशुक्लवाससोश्चापूजयेत्॥ ततआचार्यो निर्मितस्यापि निमित्तानु
सारिपरिमाणकांस्यपात्रस्य पुनर्निर्माणमाप्यायस्वेति मंत्रेण कुर्याच्चंद्रप्रतिमानामग्न्युत्तारणं च॥ ततो यद
त्रेति सर्षपविकिरणादिना भूसंस्कारं कृत्वा उपलिप्तदेशे कांस्यपात्रे पायसं पयो वा निःक्षिप्य तत्र नवनी
तपूर्णं शंखं निधाय तत्र राजतं चंद्रबिंबं स्थापयित्वा सोमोदमिति ध्यानपूर्वकं समाहितचेता आप्यायस्वेति मं
त्रेणावाहनादिषोडशोपचारैस्तत्र चंद्रपूजनं कुर्यात्॥ तत्र श्वेतं सदशं वस्त्रद्वयं समर्पणीयं पुष्पाणि श्वेतानि ६८
सहस्रमर्दलीयानि मौक्तिकं दक्षिणा तदसंभवे दुष्टमन्यत्॥ पूजांते तमेव मंत्रं सावित्र्या सं चंद्रं ध्यायन् सहस्रं स
प्तरणवमष्ट्यादिस्मरणपूर्वकं जपेत्॥ तदुत्तरतस्ताम्रकलशमद्री घोरित्यादि विधिना स्थापयित्वा तत्र राज

तप्रतिमायां बृहस्पतिमंत्रेण वागीश्वरं संपूज्य तदुत्तरतः क्रमेण तेनैव विधिना निहितकुंभे चतुष्टये आश्वत्थ
वो निषदनमित्याम्रपल्लवपुष्पे यांतं कृत्वा चतुर्षु क्रमेण द्रवीभूतानि कुंकुमचंदनकुष्टगोरोचनानि सिंचेत्॥ ते
षु वरुणं पूजयेत्॥ ततः पश्चिमदेशे स्थंडिलादि अग्निप्रतिष्ठापनांतं कृत्वा स्थापितकलशोत्तरभागे ग्रहावा
हनादि वरुणपूजांतं कृत्वान्वाधानादि ग्रहमखं पूर्णाहुत्यंतं कुर्यात्॥ अभिषेककाले वारुणकलशचतुष्टय
स्थोदकेन दिवा गंडांतजातं बालं पित्रा सह रात्रिजातं मात्रा सह संध्ययोर्जातमुभाभ्यां सहाभिषिंचेत सहस्राक्षे
णेतिमंत्रस्य यक्ष्मनाशनः प्राजापत्य इंद्रस्त्रिष्टुप्॥ अभिषेके वि० ततः सर्वकलशोदकैः समुद्रज्येष्ठेत्यादिभिः सु
रास्त्वेत्यादिभिश्चाभिषिक्तास्ते सुस्नाताः सपत्नीकः कृताचस्तश्वेतचंदनादि विभूति धारणं कृत्वाचार्याय शंखदा गं
नं कुर्यात् इमं सचंद्रं शंखं सवस्त्रयुगं समौक्तिकं नवनीतापूपस्करसहितं गंडदोषापनुत्तये वेदज्ञाय यजुर्वेद
विदे तुभ्यमहं संप्रदद इति॥ तत्सांगतासिद्ध्यर्थं सहिरण्यां धेनुं दद्यात्॥ ततो वागीश्वरं ताम्रपात्रसहितं तुभ्यं गं
डदोषशांत्यर्थं संप्रददे इति बृहस्पतिप्रतिमादानं तदंगत्वेन यथाशक्ति दक्षिणादानं च॥ ततः स्थापितेतरदेव
तानामुत्तरपूजापूर्वकं विसर्जनमाचार्यहस्ते प्रतिपादनं च ततः सदस्याद्येणेति मंत्रस्याष्टोत्तरशतं यथाशक्ति
जपो दशावरब्राह्मणभोजनं चेति नक्षत्रगंडांतशांतिः॥ ॥ अथ तिथ्यादिगंडांतशांतिः॥ पारिजाते गार्ग्यः
॥ अनुक्तेतरजातस्य सूतकांत्यदिने थवा॥ शांतिश्रुभेद्धि वा कुर्यात् नावत्पुत्रं न लोकयेत्॥ तिथिगंडे त्वनड्वाहं
नक्षत्रे धेनुरुच्यते॥ कांचनं लग्नगंडे तु गंडदोषो विनश्यति॥ आद्यभागे पितुर्गंडे त्रयाणामभिषेचने॥ माता
पित्रोः शिशोश्चेत्यर्थः॥ इतरत्र शिशोर्मातुरभिषेकं च कारयेत्॥ द्वयोरेवेत्यर्थः॥ उत्तरे तिलपात्रं स्यात्पुर्व

Indira Gandhi National Centre for the Arts

गोदानमुच्यते॥ अजाप्रदानं त्वाष्ट्रे च पूर्वाषाढे च कांचनं॥ उत्तरा तिष्य चित्रार्द्रा पूर्वाषाढोद्भवस्य च॥ कु
६६ र्याच्छांतिं प्रयत्नेन नक्षत्राकारजं बुधः॥ सुवर्णेन तदर्धेन यथा वित्तानुसारतः॥ नक्षत्राधिपते रूपं कृत्वा वस्त्रद्वय
न्वितं॥ वरुणस्यार्चनं कार्यं स्वस्तिवाचनपूर्वकं॥ शतौषधीचरत्नानि मृत्त्वक् पल्लवसंयुतां॥ प्रक्षिप्येति शेषः॥
८ पूजांते समिधं त्वाज्यैर्होमं तिलयवैस्तथा॥ ततः पूर्णाहुतिं हुत्वा वेदाध्यायिकुटुंबिने॥ उत्तराप्रथमे पादे तिलपा
त्रं तथैव च॥ तिष्ये तु गां सवत्सां च सुशीलां च पयस्विनीं॥ अजां चित्रासु वेदद्यात्पूर्वाषाढे तु कांचनं॥ यवांश्च त्रि
माषांश्च तिलमुद्गांश्च दापयेत्॥ यथा वित्तानुसारेण कुर्याद्ब्राह्मणभोजनं॥ पितुरायुष्यसिध्यर्थं शांतिरत्रा वि
धीयते॥ एवं यः कुरुते नूनं शांतिकर्मसमाहितः॥ न दोषैर्लिप्यते नित्यं पद्मपत्रमिवांभसेति॥ तिथिलग्नगंडा
न्तलक्षणं ज्योतिर्निबंधे॥ पूर्णानंदाख्ययोस्तिथ्योः संधिर्नाडीद्वयं तथा॥ गंडांतं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु
॥ कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः॥ गंडांतरालं स्यात् घटिकार्धं मृतिप्रदमिति॥ पूर्णाः पंचमी दशमी
पंचदश्यः॥ नंदाः एतदुत्तराः षष्ठ्यद्याः कुलीरः कर्कटः कीटो वृश्चिकः॥ चापं धनुः॥ उत्तरादीनां निषिद्धभागद्व
वस्थोक्तान्नासिंहप्रसादे॥ चित्राद्यार्द्रे पुष्यमध्ये द्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये॥ जातः पुत्रश्चोत्तराद्ये वि
धत्ते पित्रोर्भ्रातुः स्वस्य वापि प्रणाशमिति॥ उत्तराफाल्गुन्याद्यपाद इत्यर्थः॥ एवं चोदाहृतगार्ग्यस्मृतावुत्तरा ६६
दौ तिथिगंडादौ च दानशांत्योर्वक्ष्यमाणवचनालोचनेन समुच्चयप्राप्तावनुक्तेतरजातस्येत्यनेन सर्वमिति द्वैतत्कु
लानामनुक्तः शङ्कोक्तपूर्वार्द्धतरोत्तरार्द्धजन्मनिमित्ते शांतिरेव न वह्निः प्रयोगं दानमिति बोध्यते॥ पूर्वार्द्धजन्मनि तु दाने
मप्यादितिथिगंड इति॥ नक्षत्रे॥ नक्षत्रगंडे॥ ज्येष्ठामूलसंध्यादावित्यर्थः॥ न तूत्तरादौ तत्र दानांतरस्य वक्ष्यमाणत्वात्॥

अत्र च निमित्तानंतरं नालच्छेदात्पूर्वं गंडोत्तरार्धाधिकरणकं दानं कार्यमिति दर्शयितुं सप्तमीनिर्देशः॥ पूर्वोत्तर
वाक्यपर्यालोचनेनैव निमित्तत्वाभावात्॥ उत्तरार्धात्पूर्वार्द्धे दोषाधिक्यमेव दर्शयितुमाह आद्यभाग इत्येवमुत्तरेति
लपात्रस्यादित्यादावपि पूर्वार्द्धजन्मनि उत्तरार्द्धे दानानि कर्त्तव्यानीत्युच्यते अत एव शांतिविधौ प्रयत्नेनेति पूर्वोत्त
रार्द्धयोर्जन्मनि शांतिर्नियमेन कर्त्तव्येति ज्ञापनार्थं॥ नक्षत्राकारेति पदं रूपमित्यनेन संबध्यते॥ अर्चनं कार्यमि
ति चाग्रिमपदद्वयं॥ ततश्चाधिष्ठात्रधिष्ठपयोरभेदार्चितनेन पूजादिकार्यं॥ अतो मंत्रोप्युभयप्रकाराकस्तेति
रीयशाखागतो वाक्याष्टकरूप एव ग्राह्यः॥ होमकालीनत्यागोपि नक्षत्रेष्टाविवाधिष्ठात्रधिष्ठयोरुभयोर्देशेन
कार्य इति सूच्यते॥ तिथिलग्नगंडजन्मनि चाह॥ वरुणस्येति अत्र नक्षत्राधिपतेरिति पदवर्जपूर्वश्लोकानुषंगः
॥ ततश्च तत्र वरुणपूजनमेव कार्यमित्यर्थः॥ तत्रैव शांत्यंगत्वेन दानमाह यवांश्चेत्यादिना॥ कर्त्तुरकरणे दोषेन
शांते राव श्यकतां सूचयितुमाह पितुरिति॥ अथ प्रयोगः॥ [illegible]गंडपूर्वार्द्धजन्मनि कर्त्ता स्नानः पुत्रमनालोक्या
स्य शिशोस्तिथिगंडपूर्वार्द्धजन्मसूचितसर्वारिष्टनिरासद्वारा श्रीपरमेश्वरप्रीत्यर्थमनडुद्दानं करिष्य इति संक
ल्प्य नालच्छेदात्पूर्वं गंडशेषे ब्राह्मणपूजनपूर्वकमनड्वाहं ददात्॥ असंभवे कार्षापणाष्टकं वा॥ स्तकांते शुभदिने
वास्नातो नड्डानामित्यस्य स्थाने शांतिमिसूहेन संकल्प्य गणेशपूजनादि आचार्यवरणांतं कुर्यात्॥ स च यदत्रे त्यादि
ना भूशुद्धिं कलशस्थापनं कृत्वा कलशे या ओषधीः॥ सदिरत्नानि॥ स्योना॥ रुवति॥ अश्वत्थे व इति शतौषधी रत्नानि
निमर्दत्वचः पल्लवांश्च निःक्षिप्य पूर्णादर्वीति स्थापितपूर्णपात्रे स्थापितहेमवरुणप्रतिमायां तत्त्वायामीति वरुणं पू
जयेत्॥ ततोग्निं प्रतिष्ठाप्य ग्रहान्संपूज्यान्वादध्यात्॥ चक्षुषी आज्येनेत्यंते अत्र प्रधानं वरुणं प्रतिद्रव्यमष्टोत्तरशतसंख्या

Indira Gandhi National Centre for the Arts

१०० भिः समिधां चरोः आज्यस्य तिलयवानां चाहुतिभिः होमेणाद्यादि बलिदानपूर्णाहुतिप्रणीताविसर्गान्ते कलशतोयोदकेन समुद्रज्येष्ठेत्यादिभिः पित्रादित्रयाणामभिषेको यवव्रीहिमाषतिलमुद्गानां दक्षिणात्वेन दानं विप्रभोजनादि यथाशक्ति ब्राह्मणभोजनं चेति॥ तिथिगंडांतरार्धजन्मनि तु नतान्कालिकादानं शंतो मातुः शिशोश्चाभिषेक इति विशेषः॥ नक्षत्रगंडस्योत्तरादीनि पिंडनागाभिषेक इति विशेषः॥ लग्नगंडपूर्वार्द्धजन्मनि कांचनदानमिति विशेषः॥ तत्र ह्यक्याष्टकेन पूजनं उत्तरार्द्धजन्मस्य च पूर्वार्द्धजन्मनि धेनोस्तिलपात्रादेश्च दानं शांतौ नक्षत्रप्रतिमायास्तत्र यवव्रीह्यादेरभिषेकश्च वस्याच पूर्ववत्॥ इति निनदानं॥ दक्षिणाकाले उत्तरार्द्धे तिलपात्रादेर्दानं इतरत्र यवव्रीह्यादेरभिषेकश्च वस्या च पूर्ववत्॥ इति पारिजाते गार्ग्यः॥ अथातः संप्रवक्ष्यामि जन्मकाले तिथ्यादिगंडांतशांतिः॥ ॥ अथ दिनक्षयादिशांतिः॥ दिनक्षये व्यतीपाते व्याघाते विष्टिवैधृतौ॥ मूले गंडे विशेषतः॥ गंडांतानां च नामानि महादोषकराणि च॥ दिनक्षये व्यतीपाते व्याघाते विष्टिवैधृतौ॥ तस्मिन् गंडदिने प्राप्ते प्रसूतिर्यदि जायते गंडे च परिघे यमघंटके॥ कालगंडे मृत्युयोगे दग्धयोगे च दारुणे॥ तस्मिन् पापयुते सति॥ यजनं देवतानां च ग्रहाणां चैव पूजनं॥ दीपं शिवालये नित्यं॥ अतिदोषकरी प्रोक्ता तस्मिन् पापयुते सति॥ अभिषेकं शंकराय अश्वत्थस्य प्रदक्षिणं॥ आयुर्वृद्धिकरं जाप्यं सर्वारिष्टविनाशनं॥ घृतेन परिदापयेत्॥ अभिषेकं शंकराय अश्वत्थस्य प्रदक्षिणं॥ आयुर्वृद्धिकरं जाप्यं सर्वारिष्टदूरदानं॥ गुरुदेवताविप्राणां पूजनं श्रीचवर्द्धनं॥ पुष्ट्यायुस्तुष्टिशांत्यर्थं ममीष्टफलसिद्धये॥ सर्वारिष्टदूरथीय ग्रहपूजां समाचरेत्॥ शिवाय विधिवद्भक्त्या दीपदानं करोति यः॥ अखंडं गोघृतेनैव स सर्वे मृत्युंजयं जपेत्॥ सर्वसंयेन नरः॥ विष्णुमूर्त्तिर्महापुण्यमश्वत्थं श्रीकरं सदा॥ प्रदक्षिणान् रोगनत्या कृत्वा मृत्युंजयं जपेत्॥ सर्वसंपत्समर्थं तथा कल्याणवृद्धये॥ अभीष्टफलसिद्ध्यर्थं कुर्याद्ब्राह्मणभोजनं॥ अभिषेकं शिवे शांतिं कृत्वा

छ १ १००

मृत्युंजयी भवेत्॥ मूले वा सर्पगंडे वा कुर्यादेतानियत्नतः॥ आयुर्वृद्धिकरार्थाय गंडदोषप्रशांतये इति॥ तन्मृत्युंजयी भवेत्॥ मूले वा सर्पगंडे वा कुर्यादेतानि यत्नतः॥ तन्त्रपुत्रादिष्ट्वाभिषिक्तस्य पापयुते समीति विष्ट्यादेरपि निषिद्धांशायुते जन्मकाले सति दोषाधिक्यमित्याशयः॥ तत्र प्रतिपत्सु तेषु मीति विष्ट्यादेरपि निषिद्धांशा नारद वृद्धवसिष्ठः॥ विरुद्धयोगेषु य आद्यपादः सूतमेजापुत्र्यादौ जन्मनि स्वल्पदोष इत्यर्थः॥ मूलादीनां निषिद्धांशा नारद वृद्धवसिष्ठः॥ विरुद्धयोगेषु य आद्यपादः सर्वेषु कार्येषु विवर्जयेत्॥ सर्वैव तु यो व्यतीपातयोगः सर्वोपि नेष्टः परिघार्द्धमाद्यं॥ तिस्रस्तु नाड्यः प्रथमे च वज्रे गंडातिगंडे पि च षट् च षट् च॥ व्याघातयोगे नव पंच शूले शेषेषु कार्येषु विवर्जनीया इति॥ यमकंटकाल्याद्‌॥ अर्कारतमसौम्यार्यमंदाः पद्येकराः शिवाः॥ कंटकाख्यो महादोषः सर्वकर्मविनाशकृत्॥ आरो भौमः यो तमो राहुः॥ आर्यो बृहस्पतिः॥ मंदः शनिः॥ मैत्रविश्वांबुपाशीड सार्पाख्यतारकाः॥ मृत्युयोगास्तु कराः सूर्यवारादिषु क्रमात्॥ विश्वेति वैश्वदेव मुत्तराषाढेत्यर्थः॥ अंबुप शततारकेत्यर्थः॥ यमघंटक इति॥ वाग्मोषः॥ तमादगर्गः॥ मघाविशाखा आर्द्राच मूलमदं च कृत्तिका॥ रोहिणी हस्त इत्येते यमघंटाः क्रमात्॥ षष्ठी च वेरिति॥ रविवारमारभ्येत्यर्थः॥ दग्धयोगानाह नारदः॥ एकादशी चेंदुवारे द्वादशी चार्कवासरे॥ षष्ठी च दृश्यते द्वितीया बुधवासरे॥ अष्टमी शुक्रवारे च नवमी शनिवासरे॥ पंचमी भौमवारे च दग्धयोगाः प्रकीर्तिता इति॥ कालदंडो मानुधासरनरणीयोगः॥ आश्विन्यादिषाभिजिन्नक्षत्राणां चतुर्भिश्चतुर्भिः क्रमेणादित्यवासरादिषु योगे तानि प्यभेष्वष्टाविंशतियोगेषु पठितः॥ आनंदकालदंडश्चेति॥ यजनं देवतानामिति देवतापदेन गुरुदेवताविप्राग्रह्यंते॥ जपांतीक्ष्णकर्मणां प्रशंसापरे वाक्यशेषेतत्संकीर्तनात्॥ ब्राह्मणभोजनेनाश्वत्थप्रदक्षिणं तानि समाप्य तन्मध्यपवितस्यापि शंकराभिषेकस्य शांतिपदसामानाधिकरण्यात्

Indira Gandhi National
Centre for the Arts

रत्पेन रथक्त्वं कीर्त्तनं पूर्वोक्तपूजादीनामन्यशान्तीनां च निरपेक्षकार्यकार्याभिषेक इति द्योतनार्थं जपस्य तद
१०१ नंतरसंकीर्त्तनं तत्तुल्यताज्ञापनार्थं ॥ निमित्तभूयस्त्वे चैकादशाभिरभिषेकजपयोः संख्याविवृद्धिः कल्पनीया
॥ मूलेवेति तद्गंड इत्यर्थः ॥ पूर्वोक्तगंडांतशांत्यासह विकल्पेनाभिषेकसहिताभिजपकार्याणि कुर्यादित्यर्थः
॥ ॥ इति दिनक्षत्रादिगंडांतशांतिः ॥ अथ विषनाडीजननशांतिः ॥ ॥ पारिजाते वृद्धगार्ग्यः ॥ विषनाडी
षु संजातः पितृमातृधनात्मनां ॥ नाशकृद्विषशस्त्राद्यैः क्रूरलग्ने शुभेपि वा ॥ तद्दोषपरिहाराय शांतिकर्म
समारभेत् ॥ रुद्रोयमोग्निर्मृत्युश्च देवताः परिकीर्तिताः ॥ सुवर्णेन यथाशक्तितत्तल्लक्षणलक्षिताः ॥ प्रति
माः कारयित्वा तु आढकव्रीहिभिः स्थले ॥ स्थंडिलं परिकल्प्याथ कुंभमौषधिसंयुतं ॥ जलैः संपूर्य संस्था
प्य मृदादि प्रक्षिपेत्ततः ॥ वस्त्रद्वयेन संवेष्ट्य पंचरत्नानि निक्षिपेत् ॥ कुंभोपरि तु संस्थाप्य चतस्रः प्रतिमा
स्तथा ॥ तत्तन्मंत्रैश्च संपूज्य गंधपुष्पोपहारकैः ॥ कद्रुद्रायेति मंत्रेण यमाय सोममित्यथा ॥ अग्निर्मूर्द्धेति मं
त्रेण परं मृत्योरितित्वथ ॥ एतैश्चतुर्भिर्मंत्रैश्च क्रमाद्वह्नेन्नथा ॥ समिच्चरुघृतद्रव्यैः प्रत्येकं च यथाक्रमात्
॥ ऋत्विग्भिश्च सहाचार्यो जुहुयादष्टसहस्रकं ॥ अष्टोत्तरशतं वापि अष्टाविंशतिमेव वा ॥ ततस्तिलैर्जुहुयाद्
वा स्तत्तन्मंत्रैश्च मंत्रवित् ॥ ततोभिषेचयेद्दानमंत्रैः पौराणिकैः क्रमात् ॥ वक्ष्यमाणैरिति शेषः ॥ प्रीयतां भग
वानीशः पिनाकी सर्वतो मुखः ॥ तव मूर्तिप्रदानेन सर्वाभीष्टप्रदो भव ॥ ईषत्पीनोयमः कालो दंडहस्तः प्र
सन्नधीः ॥ रक्तदृग्नीलकायश्च महिषस्थः शिवं कुरु ॥ पिंगभ्रुश्मश्रुकेशांतः पिंगाक्षश्चरणोरुणः ॥ छागस्थः सहस्र १०१
त्रश्च सप्तार्चीरक्तलोचनः ॥ तव मूर्तिप्रदानेन मम पापं विनाशय ॥ दंष्ट्राकरालवदनो नीलांजनसमाकृतिः ॥ रक्ता

सोसिगदापाणिर्मृत्युर्मां पातु सर्वदा ॥ दानमेवं विधेर्मंत्रैर्यथाविधिसमाहितः ॥ गोभूहिरण्यवस्त्रैश्च आचार्यं
पूजयेत्सुधीः ॥ एवं कुर्याद्विधानेन विषदोषः प्रशाम्यतीति ॥ विषनाडीस्तिथिवारसंबंधिनी राह वृद्धगर्गः ॥ तिथि १५
इषु ५ नाग ८ अद्रि ७ गिरि ७ ईश ॥ वारिधिः ४ गज ८ अद्रि ७ दिक् १० पावक ३ दिक् च १० भास्कराः १२ मुनि ७ ईभ
८ संख्याः [illegible] क्रमात्पश्चात् विषारंभघटिकाश्च तुष्टयमिति ॥ तिथीनां पंचदशत्वात्तिथिशब्देन पंच
दशसंख्योच्यते एवमग्रेपि एवं च सति प्रथमा प्रतिपदमारभ्यैकोनविंशतितमी पर्यंतं विषघ्नती या यां षष्ठी
मारभ्य नवमीपर्यंतं विषं एवमग्रेप्यूह्यं ॥ विंश २० चतु ४ द्वादश १२ दिक् च १० शैला ७ बाणाश्च ५ तत्वानि २५
यथाक्रमेण ॥ सूर्यादिवारेषु भवंत्यनंतरं खलु डोनिषा स्यु घटिकाश्चतुष्टयमिति ॥ अत्रापि आदित्यवासरे
विंशत्युत्तरं चतस्रः सोमवासरे चतुष्टयोत्तरं चतस्र इत्येवं व्यवस्था पूर्ववद्बोध्या ॥ नक्षत्रविषनाड्यो नार
दे नोक्ताः ॥ खमार्गणाः ५० वेदपक्षाः २४ ॥ खरामाः ३० व्योमसागराः ४० वार्धिचंद्राः २१ काष्ठरूपदस्राः २१ श
रामाः ३० व्योमबाहवः २० द्विरामाः २२ खाग्नयः ३० शून्यदस्राः २० कुंजरनंमयः १८ रूपपक्षाः २१ व्योमद
स्राः २० वेदचंद्राः १४ चतुर्दश १४ शून्यचंद्राः १० वेदचंद्राः १४ षड्जाः ५६ वेदबाहवः २४ शून्यदस्राः २० शू
न्यचंद्राः १० पूर्णचंद्राः ० गजेंदवः १८ तर्कचंद्राः १६ वेदपक्षाः २४ खरामाः ३० अश्विनीक्रमात् ॥ आन्यः प
राः स्युर्घटिकाश्च तस्या विषसंज्ञिता इति ॥ अत्रापि अश्विन्यां पंचाशद्घटिकोत्तरं च तस्रो भरण्यां चतुर्विं
शति घटिकोत्तरं च तस्रो घटिका विषनाड्य इत्येवं व्यवस्था पूर्ववद्बोध्या ॥ ॥ अथ प्रयोगः ॥ कर्ता शौचाचां
देशकालौ संकीर्त्य विषनाड्यां तद्विशुजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं वृद्धग

Indira Gandhi National
Centre for the Arts

गोक्तविधिना शांतिकर्म करिष्य इति संकल्प्य गणेशपूजनाद्याचार्यवरणांतं कुर्यात्॥ आचार्यो यदत्र संस्थि-
१०२ तमिति स्थलशुद्धिं कृत्वा यथाशक्ति यथालक्षणं निर्मितानां हेमीनां रुद्रादिप्रतिमानां चतसृणामग्न्युत्ता-
रणं कृत्वा पूर्वभागे मही द्यौरिति भुवं स्पृष्ट्वा तत्र ओषधयः संवदंत इति चतुःप्रस्थपरिमितान्व्रीहीन्प्रक्षि-
प्य तैः स्थंडिलं परिकल्प्य तत्र कलशस्थापनोदकपूरणे समंत्रके कृत्वा या ओषधीरिति सर्वौषधीः प्र-
क्षिप्य स्योनेति मृदः अश्वत्थे व इति पंचपल्लवान् कांडात्कांडादिति दूर्वाः हिरण्यरूप इति हिरण्यं या
फलिनीरिति फलं युवा सुवासा इति वस्त्रद्वयेनावेष्ट्य सहिरत्नानीति पंचरत्नानि निक्षिप्य गंधद्वारामि-
ति गंधादिना कलशं संपूर्णा दर्वीति पूर्णपात्रं निधाय तत्र प्रतिमाचतुष्टयं निधाय तास्वावाहनादि
षोडशोपचारैर्देवताः पूजयेत्॥ कद्रुद्रायेत्यस्य कण्वो रुद्रो गायत्री॥ यमाय सोमं यम्यमो यमोनुष्टुप्॥ अ-
ग्निर्मूर्धा विरूपोग्निर्गायत्री परं मृत्यो इत्यस्य गृत्समदो रुद्रस्त्रिष्टुप् पूजांते स्थंडिले पश्चिमभागस्थेग्निं
प्रतिष्ठाप्य स्थापितेतरभागे ग्रहपूजनं कलशस्थापनांतं कृत्वान्वादध्यात् चक्षुषी आज्येनेत्यंते ग्रहपी-
ठदेवतान्वाधानं प्रसिद्धरीत्या कृत्वा रुद्रं प्रतिद्रव्यमष्टोत्तरशतसंख्याभिः समिच्चरुघृताहुतिभिः यम-
मग्निं मृत्युं च तावतीभिस्त्रिद्रव्याहुतिभिः ता एव देवतास्तिलाहुतिभिश्च तत्संख्याभिः शेषेण स्वादि॥ प्र-
णीताप्रणयनांते आज्यनिर्वापः आज्येन सह ग्रहसिद्धान्नस्य पर्यग्निकरणं॥ संमार्गांते च रोरग्नावधि-
श्रयणमभिघारणं च कृत्वोदगुद्वासनादि आज्यभागांते ग्रहपीठदेवता उद्दिश्य यथान्वाधानं त्यागे १०२
कृते प्रत्येकमष्टोत्तरशतसंख्याहुतिपर्याप्तं समिच्चरुघृतात्मके द्रव्यत्रये रुद्राय० एवं यमाय० अग्न-

ये० मृत्यवे० एवं तत्संख्याहुतिपर्याप्तं तिलद्रव्यं रुद्रादिभ्यो न ममेति त्यागे कृते ऋत्विक्सहित आचार्य-
स्तान्मंत्रैर्जुहुयात्॥ प्रायश्चित्तहोमांते लोकपालेभ्यो ग्रहपीठदेवताभ्यश्च बलिदानं रुद्रयमाग्निमृ-
त्युभ्यश्चांते क्षेत्रपालाय॥ पूर्णाहुत्यंते प्रणीताविमोकः कलशद्वयोदकेनाभिषेकः॥ समुद्रज्येष्ठेत्यादि-
भिर्मंत्रैः॥ प्रीयतां भगवानीश इत्यादिभिश्चतुर्भिः श्लोकैश्च॥ ततस्तैरेव श्लोकैः समाहित एकैकां देव-
तामाचार्याय दद्यात्॥ ततस्तस्मै गोमहिरण्यवस्त्राणि तन्निष्क्रयं वा दद्यात् कृतस्य कर्मणः सांगतायै इ-
मां दक्षिणां तुभ्यमहं संप्रददे इति॥ एवमृत्विग्भ्योपि यथाशक्ति दक्षिणादानं॥ ततो ग्रहपीठदेवताना-
पूजनविसर्जने आचार्यहस्ते प्रतिपादनं ब्राह्मणभोजनं चेति विषनाडीशांतिः॥ ॥अथ यमलशांतिः
तत्रैतरेयिब्राह्मणं॥ यस्याहिताग्नेर्यस्य भार्या गौर्वा यमौ जनयेत् का तत्र प्रायश्चित्तिरिति सोग्नये मरु-
त्वते त्रयोदशकपालं पुरोडाशं निर्वपेत् तस्य याज्यानुवाक्ये मरुतो यस्य हि क्षये राइवेद चरन्न देवेति आ-
हुतिं वाऽहवनीये जुहुयादग्नये मरुत्वते स्वाहेति सा तत्र प्रायश्चित्तिरिति आहिताग्नेः कृतप्रकारंभस्य ति-
॥ अकृत तदारंभस्य पूर्णाहुतिरिति वृत्तिकारः आश्वलायनसूत्रकारेण तु यस्य भार्या गौर्वा यमौ जनये-
दिष्टिर्मरुत इति मारुतेतियाग एवोक्तः वृत्तिकृद्वचनात्ताभ्यां मरुत एवात्र देवते सूक्ते॥ एवकारवशे-
सिद्धांतभाष्यकृतापि तदुपपादनाच्चानपूर्णाहुतिरिति तदीयमेवकारव्याख्यांतरं वृत्तिकृदाद्यनाद-
रादुपेक्षणीयं॥ अनाहिताग्नेस्तु गृह्याग्निमत आह कारिकाकारः अथ यस्य वधूर्गौर्वा जनयेद्यमौ त-
तः॥ समरुद्भ्यः चरुं कुर्यात्पूर्णाहुतिमथापि वेति॥ गृह्याग्निनापि स्मृत्योक्तं च स्तु कात्यायनोक्तप्रायश्चित्तं कु-

Indira Gandhi National Centre for the Arts

र्यात् स्वगृह्योक्ताग्नावेव गृह्योक्तस्य लौकिकाग्नौ संभवात्॥ तच्च तदीयगृह्ये पठितं॥ अथातो यमलजनन
नेविधिं व्याख्यास्यामो यस्य नार्या गौर्वा वडवा वा विकृति प्रसवेन्न प्रायश्चित्ती भवेत् सूर्योदशाहे चतुर्णां क्षीर
१०२ वृक्षाणां कषायमुपाहरेत् प्लक्षवटोदुंबराश्वत्थशमीदेवदारुगौरसर्षपास्तेषां मिश्रमेपो हिरण्यं दूर्वांकुरैः
सर्वौषधीभिरिष्टौ कलशानापूर्य दंपती स्नपयेत्॥ आपो हि ष्ठेति तिसृभिः कयान इति द्वाभ्यां पंचेंद्रेण पंचवारु
णेनेदमापः प्रवहतेत्यपाद्यमिति स्नापयित्वालंकृत्य तौ दर्भेषूपवेशयति॥ मारुतं स्थालीपाकं श्रपयित्वाज्य
भागाविष्ट्वाज्याहुतीर्जुहोति पूर्वोक्तैः स्नपनमंत्रैः स्थालीपाकस्य जुहोति॥ अग्नये स्वाहा सोमाय॰ पवमा
नाय॰ पावकाय॰ मारुताय॰ मरुद्भ्यः यमाय॰ अंतकाय॰ मृत्यवे अग्नये स्विष्टकृते स्वाहेत्येतदेव गृहोत्प
न्नेषु उलूकः कपोतो गृध्रः श्येनो वा प्रविशेत् स्तंभो वा प्ररोहेत् वल्मीकं मधुजालं वा स्युः वेदुदकुंभप्रज्वल
ने आसनशयनयानं गेगृहदग्धो। धिकाहिकलास सरीसृपसर्पणे छत्रध्वजविनाशेष्वन्येषूत्पातेषु एतदे
व प्रायश्चित्तं गुरुशांतिं चोक्तेन विधिना कृत्वा ब्राह्मणान् भोजयित्वा स्वस्ति वाच्याशिषः प्रतिगृह्णीयादि
ति॥ विकृतिप्रसवो यमलोत्पत्तिः॥ अद्भिः पूरितेषु कुंभाद्येः प्लक्षादिशाखाभिर्गौरसर्षपैर्मिश्रितं हिरण्यं
प्रक्षिप्य दूर्वांकुराणां सर्वौषधीनां च प्रक्षेपः कार्यः॥ पंचेंद्रा मंत्रा यस्मिन् तत्पंचेंद्रसूक्तं॥ एवमन्यत॥
इदमिति ऋक्॥ अपाद्यं अप नः शोशुचदघमिति सूक्तं उतपातेभिस्तनं तरं भूकंपोल्कापातकाक १०३
सर्पसंगमप्रोक्षणादिष्विति केचित्पाठः॥ आहिताग्न्यधिकारिकमारुतपुरोडाशस्थाने विहितस्य मा
रुतस्थालीपाकस्य प्रायश्चित्तसमाख्यया तुल्यकार्यस्य पुरोडाशेन सह समुच्चयं वदन्त्येनमोमाग्नेय

॥ अथ प्रयोगः॥ मम आचार्याय यमलजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थमित्या
यस्य इति श्रौताग्निमतो गृह्याग्निमतस्तु मारुतस्थालीपाकेन यक्ष्य इति संकल्पः॥ अकृतप्रकृत्यारंभ
स्य तत्तत्स्थाने पूर्णाहुतिं होष्यामीति॥ अग्निमान्यस्तु सग्रहमखं कात्यायनोक्तं प्रायश्चित्तं करिष्ये इति
संकल्प्य गणेशपूजनाद्याचार्यवरणांतं कुर्यात्॥ आचार्यो पदत्तेत्यादिना भूशुद्धिं विधाय प्रागादिक्रमे
ण शान्युतास्तु दिक्क्रमहीद्यौरित्यादिविधिना कलशाष्टकपूरणांतं कृत्वा हिरण्यरूप इति हिरण्यं कषा
यादिसहितं प्रक्षिप्य कांडात्कांडादिति दूर्वा या ओषधीरिति सर्वौषधीः प्रक्षिप्य गंधादिप्रक्षेपादि
वरुणपूजनांतं कुर्यात्॥ अथ कलशोदकैराचार्यो दंपत्योरभिषेकं कुर्यात्॥ आपो हि ष्ठेति तिसृणामं
बरीषः सिंधुद्वीप आपो गायत्री अभि॰ वि॰ कयानइति द्वयोर्वामदेव इंद्रो गायत्री॰॥ आनस्तुत इति
पंचानां वामदेव इंद्रस्त्रिष्टुप्॥ अभि॰ मोषुणेति पंचानां वसिष्ठो वरुणो गायत्री अभि॰ इदमापइत्यस्य सि
धुद्वीप आपोनुष्टुप्॰ अप नः शोशुचदिति अष्टर्चस्य सूक्तस्य कुत्सोग्निर्गायत्री॥ अभि॰ एवमभिषिक्तो दंप
ती श्वेतवस्त्रचंदनपुष्पैः सौवर्णालंकृत्य दर्भेषूपवेशयति तौ तत्रोदङ्मुखौ तिष्ठतः तत्समीपे
प्राङ्मुख आचार्यः स्थंडिलेग्निं प्रतिष्ठाप्य ईशान्यां ग्रहपूजां कलशस्थापनांतां कृत्वान्वाधानं कुर्यात्॥ चक्षु
षी आज्येनेत्यंते॥ अपस्ति सप्तभिराज्याहुतिभिः इदं सप्तभिः वरुणं पंचभिः॥ अपरएकया॥ अग्निमष्टाभिराज्या
हुतिभिः अग्निं सोमं पवमानं पावकं मारुतं मरुतो यममंतकं मृत्युं च॥ एकैकया चर्वाहुत्या शेषेण स्वादि
॥ हूत्मीवदृत्रिंशद्वारान्निर्वापप्रोक्षणे॥ यथान्वाधानमाज्याहुतिषु त्यागः॥ अग्नये स्वाहेत्यवदानसंप्रदान

Indira Gandhi National Centre for the Arts

वाहुतयः॥ यथालिंगं त्वजतापित्र्यस्या धाम्न नामरुतो धेया॥ व याजेषु समिद्ध इति त्यागेपि समिदा धाम्न ना
निरुक्तो काग्निध्यानवत्॥ ततः स्विष्टकृदादि बलिदानांते पूर्णाहुतिः पूर्णपात्रनिनयनं यद कलशनाभिषेकआ
१०४ चार्याय दक्षिणादानं स्थापितदेवतानां पूजनादि आचार्यहस्ते प्रतिपादनांते च कृत्वा ब्राह्मणान्भोजयित्वा स्वस्ति भ
वंतो ब्रुवंत्विति वाचयीत ते च स्वस्तीति वदेयुः तेभ्य आशिषो गृहीत्वेश्वरार्पणं कुर्यादिति यमलजननशांतिः॥ अ
थ त्रिकप्रसवशांतिः॥ ॥शांतिसर्वस्वे॥ सुतत्रये सुता चेत्स्यात्तत्त्रयं वा सुतो यदि॥ माता पित्रोः कुलस्यापि तद
निष्टं महद्भवेत्॥ ज्येष्ठनाशो धनेहानिर्दुःखं वा सुमहद्भवेत्॥ जातस्यैकादशाहे वा द्वादशाहे शुभे दिने॥ आचार्यम
त्विजो वृत्वा ग्रहयज्ञपुरःसरं॥ ज्येष्ठनाशो धनेहानिर्दुःखं वा सुमहद्भवेत्॥ जातस्यैकादशाहे वा द्वादश्या ब्रह्मविष्णु
महेशेंद्रप्रतिमाः स्वर्णतः कृताः॥ पूजयेद्धान्यराशिस्थाः कलशोपरि शक्तितः॥ पंचमे कलशे रुद्रं पूजयेद्रुद्रसंख्य
या॥ रुद्रसंख्यया चत्वारि सूक्तानि जपेदित्यर्थः॥ रुद्रसूक्तानि चत्वारि शांतिसूक्तानि सर्वशः॥ आचार्यो जुहु
यात्तत्र समिदाज्यतिलांश्चरुं॥ अष्टोत्तरसहस्रं वा त्रिशतं वा शतं तु वा॥ देवताभ्यश्चतुर्वक्त्रादिभ्यो ग्रहपुरःस
रं॥ ब्रह्मादिमंत्रैरिंद्रस्य यत इंद्र भयामहे॥ ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं ततः॥ अभिषेकं कुटुंबस्य कृत्वा
चार्यं प्रपूजयेत्॥ हिरण्यं धेनुरेका च ऋत्विजां दक्षिणां ततः॥ आज्यस्यावेक्षणं कृत्वा शांतिपाठं तु कारयेत्॥ इति
त्रिकशांतिः॥ अथ प्रयोगः॥ एकादशे द्वादशे अन्यस्मिन्वा शुभे दिने समाचार्यो देशकालौ संकीर्त्य मम सुतत्रययज त
न्मानंतरं सुताजननसूचितसर्वारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं सग्रहमखां शांतिं करिष्य इ १०४
ति संकल्पः॥ निमित्तांतरे तूहः कार्यः॥ ततो गणेशपूजनाद्याचार्यर्त्विग्वरणांतं कृत्वा आचार्यो ग्रहत्रेत्यादि॥

अग्न्युत्तारणं च॥ ततः स्थंडिलपूर्वभागे ग्रहपूजां कलशस्थापनवरुणपूजनांतां कृत्वा तदुत्तरतउदक्सं
स्थानां पंचकलशानां महीद्यौरित्यादिविधिना यथाशक्ति धान्योपरि स्थापितानामुपरि यथाशक्ति हेम
निर्मिताः ब्रह्मविष्णुमहेशेंद्ररुद्रप्रतिमाः स्थापयित्वा तासु देवताः पूजयेत्॥ ब्रह्मजज्ञानं वामदेवो ब्रह्म
त्रिष्टुप्॥ इदं विष्णुरित्यस्य मेधातिथिर्विष्णुर्गायत्री॥ तत्पुरुषायेत्यस्य हिरण्यगर्भो महेशो गायत्री॥ यत इं
द्रेत्यस्य भर्ग इंद्रस्त्रिष्टुप्॥ कद्रुद्रायेत्यस्य घोरः कण्वो रुद्रो गायत्री॥ पूजांते रुद्रकलशस्य प्राच्यां चत्वारि रुद्रस
क्तानि कश्चिदृत्विग्जपेत्॥ कद्रुद्रायेत्यस्य [illegible]॥ इमा रुद्राय तवसे इत्येकादशर्चस्य कुत्सो रुद्रः आद्यान
वजगत्यः॥ अंत्ये द्वे त्रिष्टुभौ॥ आ ते पितरिति पंचदशर्चस्य सूक्तस्य गृत्समदो रुद्रस्त्रिष्टुप्॥ इमा रुद्राय स्थिरध
न्वन इति चतसृणां वसिष्ठो रुद्रः तिस्रो जगत्यः अंत्या त्रिष्टुप् जपे वि० प्रत्येकमेकादशवारं सूक्तानां जपः
॥ तदंते आ नो भद्रा इत्यादि शांतिसूक्तानि जपेत्॥ ततोऽग्निप्रतिष्ठापनादि अन्वाधाने चक्षुषी आज्येनेत्यं
ते प्रसिद्धग्रहपीठगतदेवतान्वाधानं कृत्वा ब्रह्माणं विष्णुं महेशमिंद्रं रुद्रं च प्रत्येकं समिदाज्यतिलच
रूणां प्रत्येकमष्टोत्तरसहस्रसंख्याहुतिभिः शेषेणेत्यादि असमर्थे वा अष्टोत्तरत्रिशताहुतिभिरिति अत्राप्यशक्तो
अष्टोत्तरशताहुतिभिरिति वा॥ आज्यभागांते यथान्वाधानं त्यागः॥ ततः प्रधानहोममुक्तमंत्रैराचार्य ऋ
त्विक्कर्तृकं ग्रहहोमपुरःसरं कुर्यात् प्रायश्चित्तहोमांते बलिः पूर्णाहुतिश्च॥ ततः प्रणीताविमोके संस्रा
जपपरिस्तरणविमोकांते षट्कलशोदकेन सकुटुंबस्य यजमानाभिषेकः समुद्रज्येष्ठा इत्यादिमंत्रैः ततो आ १०५
चार्याय सहिरण्यधेनुं दत्वा ऋत्विग्भ्यो यथाशक्ति दक्षिणादानं च कृत्वा स्थापितदेवतानामुत्तरपूजन
विसर्जनांते तत्प्रतिमा आचार्यहस्ते प्रतिपाद्य कांस्यपात्रे रूपं रूपमित्याज्यमवेक्ष्य सदक्षिणं तद्दानं कृत्वा॥

Indira Gandhi National Centre for the Arts

ब्राह्मणभोजनं यथाशक्ति संकल्प्य यथाशक्तिशांति ... कारयित्वा परमेश्वरार्पणं कुर्यादिति त्रिकशांतिप्र
योग:॥ ॥अथ दंतजननशांति:॥ अद्भुतसागरे ... दंतजन्मनि सामान्ये पृणुस्नानमत: परं॥ भद्रासने
१०५ निवेश्यैनं मूर्द्धि मूलफलैस्तथा॥ सर्वौषधै: सर्ववीजै: सर्वगंधैस्तथैव च॥ स्नापयेत्पूजयेच्चात्र वह्निं सोमं स
मीरणं॥ पर्वतांश्च तथाख्यातान् देवदेवं च केशवं॥ तेषामेव जुहुयाद् घृतमष्टोयथाविधि॥ ब्राह्मणानां च
दानव्यायथाशक्त्या च दक्षिणेति॥ तत्रैव बृहस्पति:॥ बालानामष्टमे मासि षष्ठे मासि ततः पुन:॥ दंताय स्य
च जायंते माता वा म्रियते पिता॥ बालक: पीड्यते तत्र स्वयमेव न संशय:॥ दधिक्षौद्रघृताक्तानामश्वत्थ
समिधां तत:॥ जुहुयादष्टशतं प्राज्ञ: समंत्रेण तु मंत्रवित्॥ धेनुं च दक्षिणां दद्यात्ततः संपद्यते शुभमिति॥
विष्णुधर्मोत्तरे तु॥ दंतजन्मानि बालानां लक्षणं तन्निबोध मे॥ उपरि प्रथमं यस्य जायंते च शिशोर्द्विजा:॥ दंतैर्वा
सह यस्य स्याज्जन्मनार्गवसत्तम॥ द्वितीये च तृतीये च चतुर्थे पंचमे तथा॥ यदा दंताश्च जायंते मासे चैवमहज्ञ ये
॥पितरं मातरं वाथ खादेद्वात्मानमेव च॥ तत्र शांतिं प्रवक्ष्यामि तां मे निगदत: शृणु राजश्रेष्ठगतं बालं नौस्थं
वा स्नापयेद्द्विज:॥ तदभावे तु धर्मज्ञ कांचने तु वरानने॥ सर्वौषधै: सर्वगंधैर्वीजै: पुष्पै: फलैस्तथा॥ पंच
गव्येन रत्नैश्च मृत्तिकाभिश्च भार्गव स्थालीपाकेन धातारं पूजयेत्तदनंतरं॥ सप्ताहं चात्र कर्तव्यं तथा ब्रा
ह्मणभोजनं॥ अष्टमेऽहनि विप्राणां तथा देया च दक्षिणा॥ कांचनं रजतं गाश्च भुवं वाथ नमेव चेति॥ अथ १०५
प्रयोग:॥ अस्य शिशो: प्रथममूर्ध्वदंतजननसूचितारिष्टपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं शांतिकं क रि
ष्ये॥ निमित्तांतरे सदंतजननसूचिते स्फुट:॥ द्वितीयमासे दंतजननसूचितत्वेवमूहश्च संकल्प्य:॥ गणेशपू
जनाद्याचार्यवरणांते आचार्योयदक्षेत्यादि। धातिमानामस्तु तारणं च कृत्वा होमदेशोत्तरभागे गजपृष्ठ

नौकायां सौवर्णपीठे वास्वास्तिक चर्मयोगेन भद्रासनत्वेन कल्पिते बालमुपवेश्य सर्वौषध सर्वगंधादि
युक्तजलै: स्नापयित्वा होमदेश पूर्वभागे स्थापितकलशोपरि धातारं वह्निं सोमं वायुं पर्वतान् केशवं च षट्
प्रतिमासु संपूज्याग्निं प्रतिष्ठाप्य ग्रहान्संपूज्यान्वादध्यात॥ अत्र प्रधानं ग्रहान्वाधानांते धातारं सकृच्चरुणा
वह्निमा... समंत्रेणाग्निं ... अष्टाविंशतिसंख्याभि: ... निर्वपामि ... समंत्रेनिर्वापप्रोक्ष
णाद्यादेवतार्के कयाज्याहुत्या शेषेणेत्यादिधान्येत्वाजुष्टं निर्वपामि प्रोक्षामीति समंत्रेनिर्वापप्रोक्ष
णा ग्रहानुद्दिश्य त्यागहोमांते धात्रे स्वाहेति अवदानधर्मेण सकृदाहुति:॥ ॐ वह्नये स्वाहा॥ ॐ सोमाय स
मीरणाय० पर्वतेभ्य० देवदेवाय० केशवाय० इति स्रुवेणाज्याहुतय:॥ यथालिंगं त्याग:॥ चर्वाज्याभ्यां स्विष्ट
कृद्वलिपूर्णाहुत्यंते कलशद्वयोदकेनाभिषेक:॥ यथाशक्त्याचार्याय दक्षिणादानं तद्धस्ते प्रतिपादनं तेभ्य
यसीदक्षिणामन्येभ्यो यथाशक्ति दत्वा सप्ताहं ब्राह्मणभोजयेत् अष्टमेऽहनि शक्त्यनुसारेण कांचनादिदानं
तेभ्य: कार्यं दिनाष्टकं ब्रह्मचर्यादिव्रतचर्यांते परमेश्वरार्पणं कुर्यादिति सदंतजननादिशांति:॥ ॥षष्ठे
ष्टमे वा मासे दंतोत्पत्तौ तु तदनुसारि संकल्पपूर्वकं बृहदादि तत्कलशोदकेनाभिषेक:॥ आचार्याय धेनु
र्देया ब्राह्मणभोजनांत ईश्वरार्पणं कुर्यादिति षष्ठममासदंतोत्पत्तिशांति:॥ अष्टमादिषु मासेषु दंतजन्म शु
भावहमिति ज्योतिर्निबंधवाक्ये तु अतद्गुणसंविज्ञानबहुव्रीहिणा नवमादिग्रहणमिति वृद्धा:॥ ॥अथ प्रस
ववैकृतशांति:॥ वृद्धगर्ग:॥ यत्र गर्भविपर्यासो मानुषाणां गवामपि॥ अद्भुतानि प्रसूयंते तत्र देशस्य विद्रव:
॥अत्रापि दिव्यजाशांति: कार्या पंचदशी बुधै:॥ पंचदशी प्राप्येति शेष: पर्वणीत्यर्थ:॥ मानुषामानुषाणां च
गोजाश्वमृगपक्षिणां॥ जायंते जातभेदाश्च सदंता विकृतास्तथा॥ बहुशीर्षा अशीर्षा वा बहुकर्णा अकर्णका:
Indira Gandhi National
Centre for the Arts

१०६ एकशृंगा द्वित्रिशृंगास्तथैव चतुरादिजः॥दीर्घकर्णा महाकर्णा गजकर्णाश्च मानवाः॥ मानवाश्च यदा व्याघ्रमार्जारा
स्तनुधारिणां॥जायंते पुरुषा यत्र तत्र संग्राममादिशेत्॥राजश्रेष्ठकुलेनाशो धूमस्य च॥यमला यत्र जायंते नारीणां ग
जवाजिनां॥ब्रह्मशांतिं ततः कुर्याद्यत्र ब्रह्मा प्रशस्यते॥अष्टोत्तरसहस्राणि चरुं वै जुहुयाद्घृतं॥समिधांतु पला
शीनां तर्पयेत्पूर्वद्विजान्॥दासीदाससमायुक्तं गोदानं फलसंयुतं॥कांचनं वृषभं वस्त्रं दद्याद्विप्राय दक्षिणां॥अ
शिरा जायते जंतुस्तथा द्वित्रिशिरास्तथा॥सूर्याद्भुतं विजानीयात्पूजयित्वा दिवाकरं॥दध्याज्यमधुसंयुक्ताः समि
धस्त्वर्कसंभवाः॥यद्वा जनः प्रसूतिभिः जुहुयाद्घृतमेव च॥धेनुं सुवर्णं वस्त्रं च दद्याद्धोत्रे च दक्षिणां॥सर्वदोषा
विनश्यंति ततः संपद्यते शुभं॥मृगीजनयते सर्पान् मंडूकांश्चाप्यमानुषान्॥इंद्रस्याद्भुतमिदं तद्वारे संप्रपूजये
त्॥औदुंबरस्य समिधो दधि सर्पिः समन्विताः॥दोषोपशमनार्थी य जुहुयान्नियमे स्थितः॥वस्त्रं सुवर्णं धेनुं
च दद्याद्विप्राय दक्षिणां॥स्त्रीगर्भपातो यमलं प्रसूयंते यथा स्त्रियः॥सदंताश्चैव जायंते जातमात्रं हसंति च॥बुधा
द्भुतं विजानीयात्तद्वारे तं प्रपूजयेत्॥वस्त्रं गावः सुवर्णं च दद्याद्विप्राय दक्षिणां॥अद्भुतसागरे सारदः गौरीसि
द्धगते चैव यस्य गौः संप्रसूयते॥मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः॥तत्र शांतिं प्रवक्ष्यामि येन संपद्यते शु
भं॥प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत्॥ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः॥अयुतो होमो॰ व्याहृतिभिः
कार्यः॥तथा॥अस्य वामस्य सूक्तेन तद्विष्णोरिति मंत्रतः॥[illegible] जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकां मृत्युंजये १०६
न मंत्रेण जुहुयाच्च तथायुतं॥श्रीसूक्तेन ततः स्नायात् शांतिसूक्तेन वा पुनरिति॥अथ सुखप्रसवकरं॥ मदनरत्ने ता
रणी घटिकायां करंकीभूत गोमूर्द्धा स्रति कामवनोपरि॥तत्कालनिहितो नार्याः सुखप्रसवकारकः॥अस्थिमात्र

+वापितस्तु नः॥विप्राणां नामकर्म स्याद्दशो चांते तु शेषयोरिति नारदवाक्ये विप्राणां दशमे आशौचानिवृत्तिं विना+ २

वशिष्ठो गोमस्तकाद्रस्यार्थः॥उपोदक्यास्तु मूलानि तैलयुक्तानि कारयेत्॥योनिप्रलेपो दातव्यः सुखं नारी प्रसूयते
॥वंशानिर्वयोस्त्वक् तुलसीमूलं कपित्थपत्रं च॥करवीरमेतानि पिष्ट्वा क्षीरेण माहिषेणैव॥समतोलितं सतैलं योनिर्लि
प्त्वा च ते नापि॥मृतगर्भं निःसारयति किमत्र चित्रं सुखप्रसवे॥अत्र सर्वप्रयोगाः सुगमा इति नालिख्यंते॥अनुष्टुप्छंदः
यक्षिणी देवता॰ हिमवत्युत्तरे पार्श्वे सुरथा नाम यक्षिणी॥तस्या नूपुरशब्देन विशल्या भवतु गर्भिणी स्वाहा॥अनेन मंत्रेण
तैलं दूर्वाग्रेण स्पृष्ट्वा जप्त्वा गर्भिणीं प्राशयेत्॰ प्रसववेदनसमये शीघ्रं प्रसोष्यते॥अथ मंत्रांतरं ॐ ह्रीं क्रों क्षः यं इति मं
त्रः तैले मायाबीजं विलिख्य अनेन मंत्रेण दूर्वाग्रेण स्पृष्ट्वा एकविंशतिवारं॰ अष्टोत्तरशतवारं वा अष्टोत्तरसह
स्रं वाभिमंत्र्य तत्तैलं प्रसववेदनसमये स्त्रियं प्राशयेत् शीघ्रं प्रसोष्यत इति गिर्वाणेंद्रिये॥यत्कांत्यासूर्यचंद्रा
द्याश्च वह्न्यौ द्वकांतयः॥श्रीकांतस्य मुदे तस्य प्रोक्ताजननशांतयः॥इत्यापदेवसुतानंतदेवकृते स्मृतिकौस्तु
भे संस्कारदीधितौ जननशांतिनिरूपणं॰॥अथ नामकरणं॥तत्र नाम चास्मै दधुरिति सूत्रव्याख्यावसरे वृ
त्तिकृता नामकरणस्याचार्येण कालांतरानुक्तेर्जातकर्मानंतरं कार्यमित्येक इति॥तथा च ज्योतिर्वसिष्ठः
॥जन्माद्द्वादशे देवादशादेवा विशेषतः॥कुर्याद्वै नामकरणं कुमारस्येति वै श्रुतिरिति पारस्करः॥दशम्यां
मुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोतीति॥उत्थाप्य सूतिकां॥नवदशम्यामतीतायामिति व्याख्यान
मुचितं॥अध्याहारस्यानुचितत्वात्॥अपरार्के मेधातिथिस्या मनंगीकाराच्च॥जन्मतो दशमे वापि द्वादश्यां
विकल्पितास्मृता प्रतीतेश्च॥एवं येषां दशाहतः प्राक्शुद्धिस्तद्विषयं दशम्यामिति कल्पतरूक्तिरयुक्ता॥तथा स
क्षत्रियवैश्ययोर्विप्रवद्धर्मोक्तो उक्तवाक्य व्यवस्थायां निस्तात्पर्यकत्वापतेः॥याज्ञवल्क्यः॥अहन्येकादशे

Indira Gandhi National Centre for the Arts

नामेतिपारिजाते बृहस्पतिः॥ द्वादशे दशमे वापि जन्मतो दिवसे शुभे॥ षोडशे विंशतौ चैव द्वाविंशे वर्णतः क्रमा
दिति॥ षोडशैकोनविंशे वा द्वात्रिंशे वर्णतः इति क्वचित्पाठः॥ कीदृशः क्रमादित्यस्यार्थ इत्यपेक्षायामुक्तं संग्रहे॥ एका
१०७ दशे द्विविप्राणां क्षत्रियाणां त्रयोदशे॥ वैश्यानां षोडशे कार्यं मासांते शूद्रजन्मन इति॥ एकादश इति दशम द्वादशयो
रुपलक्षणं॥ त्रयोदश इति षोडश इति च विंशादेः क्षत्रियादिभिः स्वाशौचकालात्पूर्वं न कार्यमित्यत्र तात्पर्यं॥ भविष्ये
नामकरणप्रकरणे द्वादश्यामपरे रात्रौ मासे पूर्णे तथापरे॥ अष्टादशेह्नि च तथा वदंत्यन्ये मनीषिण इति॥ आश्व
लायनपरिशिष्टे नामत्वेकादशे दिवसे शतरात्रे संवत्सरे वा यथोपपत्ते वा जन्मन्येकादशे चैव नक्षत्र इति गोभिल
परिशिष्टे॥ जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामकरणमिति॥ व्युष्टेति क्रांते॥ मनुः॥ नामधेयं दशम्यां तु द्वाद
श्यां वापि कारयेत्॥ पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्वित इति॥ अपिशब्दादेकादशे॥ ततश्च द्वादशादिनांतका
लेषु न पुण्यतिथिनक्षत्रचंद्रानुकूल्यादिगुणादरः॥ तुल्यन्यायात्तथा क्षत्रियादेर्विशिष्य विहिते त्रयोदशादिदिने
पि न तदादरः कार्य इति उत्तरार्धगतैकवाशब्दस्यार्थः॥ ततश्च कालांतरेषु तदादरौचित्यं ध्वन्यते॥ द्वितीयवाश
ब्देन तु गुणान्वितं नक्षत्रमपि स्वतंत्रः काल इति ज्ञाप्यते॥ अत एव ब्राह्मणादेर्दशमैकादशद्वादशादिनेषु कुर्व
तः क्षत्रियादेश्च त्रयोदशादौ न मलमासास्त्यगुरुशुक्रमौढ्यादिनिषेधादरोपि॥ तथा च दीपिकायां गर्भाधानमु
ख्यं चौलविधितः प्राग्जातयागं विनेति प्रकृत्योक्तं अधिके मास्येवमाद्याचरेदिति॥ तथा पारिजाते बृह १०७
स्पतिनापि यस्यां क्रियायां यश्चोक्तः कालो मासादिभेरपि॥ तस्यां न दोषो मूढत्वं वक्रं वा जीवशुक्रयोरिति॥
दिनैरिति तृतीयेत्थंभावे॥ मासात्मना दिनात्मना वा यो नियतः कालस्तस्मिन् क्रियमाणायां तस्यां मूढत्वा

दिनदूषणमित्यर्थः॥ एवमुक्तदिनेषु सर्वनिषेधानादरे प्राप्ते तदपवादं तत्रैव गर्गः॥ व्यतीपाते च संक्रांतौ ग्रहणे
वैधृतावपि श्राद्धं विनाशुभं नैव प्राप्तकालेपि मानवः॥ कुर्यादिति शेषः॥ तथा॥ अमासंक्रांतिविष्ट्यादौ प्राप्तका
लेपि नाचरेदिति॥ सर्वदिनेषु विशेषांतरं मुहूर्तसंग्रहे॥ पूर्वाह्णः श्रेष्ठ इत्युक्तो मध्याह्नो मध्यमः स्मृतः॥ अपराह्णं च
रात्रिं च वर्जयेन्नामकर्मणीति॥ अथोक्तदिनेऽकृतस्य नामकर्मणः कालांतरे क्रियमाणस्यापेक्षितास्तिथ्यादिनि
र्णयः॥ पारिजाते नृसिंहः॥ छिद्राख्यां पर्व नवमीं हित्वा शेषाः शुभावहा इति॥ चतुर्थी षष्ठ्यष्टमी द्वादशी चतुर्द
श्यः॥ छिद्राः॥ द्वे पर्वणी नवमी चेत्यष्टौ तिथीर्विहाय शेषास्तिथयो नामकर्मणि शस्ता इत्यर्थः॥ वसिष्ठः॥ बुधें
दुसितजीवानामंशके दिवसोदयो द्रेक्काणे कालहोरायां नामकर्म प्रशस्यत इति॥ षष्ठ्यंतस्य सप्तम्यंतेषु प्र
त्येकं समन्वयः॥ अंशको नवांशो राशेः॥ उदयो लग्नं॥ द्रेक्काणो राशेस्तृतीयांशः॥ कालहोरा वारप्रवृत्तिमा
रभ्याहोरात्रसंबंधिनो भागभेदाः॥ दिवसोदय इत्येकवद्भावः॥ ततश्चत्वारो वासराः प्रशस्ता इत्यर्थः॥ पारि
जाते मित्रादित्यमघोत्तराशतभिषक्स्वातीधनिष्ठाच्युतप्राजेशाश्विशशांकपौष्णदिनकृत्सुपुष्येषु राशौ स्थि
रे छिद्रां पंचदशीं विहाय नवमीं शुद्धेष्टमे भार्गवज्ञाचार्यामृतपादभागदिवसे नामानि कुर्याच्छिशोरिति॥ मि
त्रोनुराधा॥ आदित्यं पुनर्वसुः॥ उत्तरेत्युत्तरात्रयं गृह्यते॥ त्रीण्युत्तराण्याहुरुडूनि नाम्नीति शास्त्रांतरसंवाद
त्॥ अच्युतः श्रवणः॥ प्राजेशं रोहिणी॥ अश्वी स्वाश्विनी॥ शशांको मृगशिरः॥ पौष्णं रेवती॥ दिनकृद्धस्तः॥ रा
शौ स्थिरे वृषसिंहवृश्चिककुंभलग्नेषु तेष्वेवाष्टमस्थाने रिष्टस्य च कग्रहानाक्रमणं शुद्धत्वं॥ ज्ञो बुधः॥ आ
चार्यो गुरुः॥ अमृतपादश्चंद्रः॥ एषां भागाख्यांशदिवसाख्यवासरेष्वन्यैकमन्वयः॥ भागदिवसमित्येकवद्भा

Indira Gandhi National
Centre for the Arts

व:॥ नामानीति बहुवचनमेकस्य शिशोर्बहूनि नामानि कार्याणीति ज्ञापनार्थं॥ प्रथममाह शंखः॥ कुलदेवता
संबद्धं पिता नाम कुर्यादिति॥ कुलपूज्याया देवता तत्संबद्धमित्यर्थः॥ अस्या व्याख्यायामनादिरोचारोमूलं॥ द्वितीय
१०८ माह गार्ग्यः॥ मासनामगुरोर्नाम दद्याद्बालस्य वै पिता॥ कृष्णोनंतोच्युतश्चक्री वैकुंठोथ जनार्दनः॥ उपेंद्रो यज्ञपुरुषो
वासुदेवस्तथा हरिः योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात्॥ अत्र मार्गशीर्षादिः क्रमः॥ चैत्रादिमासनामा
नि वैकुंठोथ जनार्दनः॥ उपेंद्रो यज्ञपुरुषो वासुदेवो हरिस्तथा॥ योगीशः पुंडरीकाक्षः कृष्णोनंतोच्युतस्तथा॥
चक्रधारीति चैतानि क्रमादाहुर्मनीषिण इति मदनरत्नोदाहृतगर्गवचःसंवादात्॥ मासाश्चात्र चांद्राः॥ तेष
व चैत्रादिशब्दानां मुख्यत्वात्॥ ते च शुक्लादिकृष्णांता एव॥ तादृशचांद्रमानस्यैव मुख्यत्वात्॥ आर्हणेन चै
द्वाविशेषेणादरणीयौ॥ अमावास्यापरिच्छिन्नो मासः स्याद्गाहणस्यात्विति वचनात्॥ तृतीयमप्याह बौधा
न:॥ नक्षत्रनामधेयेन द्वितीयं नामधेयं गुह्यमस्यान्यत्॥ अभिवादनीयमुपनयनान्मातापितरौ संविदितौ
नवर्तौ विज्ञायते द्विनामा ब्राह्मण इति॥ अन्यत्व्यावहारिकात्॥ नक्षत्रनामधेयेनेति तृतीययात्रजा
तइत्यधिकारे विहिततद्धितांतेन कृत्तिकादिनाम्नां निष्पन्नमित्यर्थो लभ्यते॥ अत एव नक्षत्रनाम
द्वितीयं स्यादिति हिरण्यकेशिसूत्रव्याख्यावसरे मातृदत्तग्रंथः॥ किं तत्॥ जन्मनक्षत्रप्रकृतिकं तत्र
जातार्थतद्धितांतं यथा रोहिणः अविष्टः आर्द्रक इतीति॥ उक्तश्चास्य नाम्नो विनियोगः॥ सूत्रकारेणाश्व १०८
लायनेन॥ असावसावित्यस्यादिश्य नाम नामीति॥ उक्तं चैतद्व्याख्यावसरे नाम्नः क्रमानियमाय देवत्राते
न॥ तत्रजात इत्यस्मिन्नर्थे तद्धित उत्पद्यते इति यत्कृतस्तस्मादेवं प्रयोगो भवति॥ अनुराधो देवदत्त इति॥

तथा बौधायनेन पुत्रस्य नाम गृह्णातीति प्रक्रम्य रौहिणायति ब्यायेति यथानुशासनं विनियोगोऽभ्यधायि
तथोपनयनप्रकरणस्थस्य कोनामासीति नामधेयं पृच्छति तस्याचार्यः॥ अभिवादनीयनामधेयं कल्पयि
त्वा देवताश्रयं नक्षत्राश्रयं गोत्राश्रयमप्येक इति सूत्रस्य व्याख्यावसरे छंदोगसूत्रभाष्यकृतोक्तं नक्षत्राश्र
यः फाल्गुननामासीति तत्र थोक्तं तद्धितांतानामेव नाक्षत्रनाम्नां संग्रहार्थः श्लोकः सुदर्शनभाष्ये विधारण
भाष्ये च समुदाहृतः॥ रोरेमनज्येचिषु वृद्धिरादौ गत्येववां त्यश्रवणाश्च युक्तु॥ शेषेषु नाम्नोः कपरः
स्वरोत्यः स्याद्घोरदीर्घः सविसर्ग इष्ट इति॥ रो इति रोहिणीग्रहणं॥ आदौ आद्याक्षरे॥ ततश्च रौहिणः रे
वतः॥ माघः॥ मार्गशीर्षः॥ ज्येष्ठः॥ चैत्र इति वर्णसिद्धिः॥ प्रोष्ठपदाप्रकृतिके नाम्नि वकारात्परे पकारे वृद्धि
रित्यर्थः॥ ततश्च प्रोष्ठपाद इति नक्षत्रद्वयसंबंधिनामसिद्धिः॥ अंत्यमयनरणीतैतिरीयाणां नक्षत्रेष्टि
पाठे कृत्तिकाद्यमपभरण्यंत पाठात्॥ ततश्च अपभरणः॥ अपभरणः॥ श्रवणः॥ शातभिषजः॥ शतभिष
क् जातार्थे प्रतिप्रसूतोणाडिद्वावकाम्य इति वाक्यकारोक्तेः शातभिषः इत्यपि॥ अश्वयुक्॥ आश्वयुजः
॥ एवं च चतुर्नक्षत्रसंबंधिनामसिद्धिः॥ शेषेषु उक्तान्यनक्षत्रप्रकृतिकनामसु न वृद्धिः॥ अविष्टाफल्गुना
नूराधेस्वादिसूत्रे तद्धितलुको नियमात्॥ लुक्तद्धितलुकीति॥ अविष्टाफल्गुनीस्वादौ स्त्रीप्रत्ययनिवृ
त्त्या च॥ अविष्टः फल्गुनः॥ अनुराधः॥ तिष्यः॥ आश्लेषः॥ हस्तः॥ विशाखः॥ (विशा) अषाढः॥ कृत्तिकः॥ ब
हुल इति वेति॥ एकादशनक्षत्रसंबंधिनामसिद्धिः॥ आर्द्रारोहिणीमूलयोरंत्यस्वरः ककारपरो भवति॥
रेफग्रहणमाश्लेषाः ग्रहणमाकारेणमान्मृत इति आर्द्रकः मूलक इति॥ स्वाधीः स्वातीपुनर्वस्वोरंत्यः

स्वरः सावित्र्गोज्ञेयः स्वातीः पुनर्वसुरिति॥ केषांचित् स्वातीति सदीर्घपाठात् पुनर्वस्वोर्द्वित्वेन च पुनर्वसू इ
ति सदीर्घत्वं च सञ्जरदीर्घत्वमुक्तं पूर्वैः सदेमानि चत्वारि॥ सप्तविंशति नक्षत्रसंबंधिनाम्नामेवं सिद्धिः॥ तैत्ति
१०६ रीये नक्षत्रेष्टिष्वभिजितः पृथगाम्नाने पि पाणिनि नापि नापि वत्सशालाभिजिदश्वयुगिति तत्स्वकृतिकयोः रभि
जिदाभिजित इति नाम्नो रनुशिष्टयोरपि श्लोके यो ऽनादरः स तस्य नक्षत्रान्तरं तर्भावात् नामैव व्यवहा
रलोकयोर्द्विति बोध्यं॥ आहृतं त्वाभिजित इति नाक्षत्रनाम मातृदत्तेनेति तत्स्वीकारे पि न बाधकं॥ अ
भिजित्स्वरूपं च तैत्तिरीया आमनन्ति अभिजिन्नाम नक्षत्रमुपरिष्टादषाढानामवस्ताच्छ्रोणाया इति वि
त मेतद्वसिष्ठेन अभिजिद्भोगमेतद्धि स्यदेवान्त्यपादमखिलं॥ आद्यात्श्रुतस्त्रोनाड्यो हरिभस्येति वै श्वदेवमु
मुत्तराषाढाः॥ च तस्व इति पंचदशांपलक्षणं द्वयोर्नक्षत्रयोर्द्दिश्यमालोचनेन पादं पंचदशांशावभिजिदि
त्यर्थः॥ उक्तनाक्षत्रनामानि स्त्रीप्रत्ययान्तानि स्त्रीणां मातृदत्तेनैव कार्त्तिकी रोहिणीत्याद्यनुक्रमणात्॥ तूष्णी
मेताः क्रियाः स्त्रीणामिति स्मृत्या हृते वृकुमार्या इति गृह्योणे च मंत्ररहितयथावस्थितसंस्काराणां तास्वपि वि
धानात्॥ उक्तोत्र विशेषो मातृदत्ते नैव॥ पुण्याहादिवाचनं कार्यं नान्यदस्तीति॥ अश्वयुक्॥ अश्वयुज
इति विकल्पे पाठे नियमः परिशिष्टे॥ तदक्षरादिकं नाम यस्मिन्धिष्ण्ये यदक्षरमिति॥ अक्षरं स्वरः॥ अ
क्षरमित्याद्येतथा दर्शनात्॥ ततश्चाश्वयुगित्येवोचितं॥ एवं च ज्योतिर्विदां प्रसिद्धस्वरोदयाभिहितश
तपदचक्रसारोद्धारो यो ज्योतिषार्कभिहितः चूलेचोलापदेशा घेलीलूलेलोयमस्य चेत्यादि॥ तत्रेति यो क्ता १०६
इमे पद्येवर्णा नामादिजाः स्फुटाइत्युपसंहाराद्याद्ये अश्विन्यापदेषु पेच इत्यादयो वर्णास्तदादीनि नामानि च

डामणिश्चेद्विपतिः चोलपतिलाटपतिरित्येवं कार्याणीति प्रतीतेर्विदां नक्षत्रतच्चरणज्ञानफलानि संतुत
न्यपि नामानि॥ यदि नामकरणप्रकरणे क्वचिद्गृह्यग्रंथे तादृशं नाक्षत्रनाम कार्यमिति स्फुटो विधिर्न्न वेतथा
पि सूक्तवाकादिसंबद्धकर्माधिकृतज्ञात्यं यथा विषयो सावितिज्ञेयं॥ तदधिकृतात्स्मृतिव्याकरणानुसारि ना
क्षत्रनाम्नामेवावश्यकतायाः दर्शितत्वात्॥ शांखायनास्तु कारिकास्वत्यं न स्यात्रि शर्मेत्येवं नाक्षत्राणि नाम
नि तत्तद्देवतासंबद्धानि मन्यन्ते॥ उदाहृतं च श्रुतिभाष्यवचनं॥ नक्षत्रदेवता ह्येताः एताभिर्यज्ञकर्मणि॥ यज
मानस्य शास्त्रज्ञैर्नाम नक्षत्रजं स्मृतं॥ शर्मान्तं ब्राह्मणस्योक्तमिति॥ अग्निवादाग्निकं च सूक्तवाके॥ पवनीयंन
क्षत्रादन्यदेवेत्यपि तत्सूत्रभाष्ये॥ कातीया अपि देवतासंबद्धमेव नाम मन्यन्ते॥ नैतदाश्वलायनानां॥ दश
म्यांपुत्रस्य॥ याज्ञिकाः पठन्ति॥ दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यंतरंतस्थमवृद्धंत्रिपु
रुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितामिति इति
भाष्यं दशम्युत्तरकालमिति॥ दशम्या उत्तर इति पंचमीति योगविभागात्समासः॥ ततः कालिशब्दं नबहु
व्रीहिः क्रियाविशेषणं चैतत्॥ दशादिनान्यां शांच भवति इति दशम्युत्तरकालं इत्युक्तं॥ पैविगृह्यकाराः
पठन्ति दशम्यांपुत्रस्येति तैर्द्दशम्यामिति सामीप्यकमाधिकरणे व्याख्येयं॥ घोषवदादीति॥ घोषवतो येव
र्णाः शिक्षायां प्रदर्शितास्तदादि॥ अंतरंतस्थमिति मध्ये परलवायस्थत इत्यर्थः॥ नामकरणे योधिका
पितातस्य ये त्रयः पुरुषास्ताननुकायत्वमिध्यत इति त्रिपुरुषानूकं॥ अन्येषामपि दृश्यत इति दीर्घः॥ इति
केप्यरं०॥ व्यावहारिकं नाम बृहस्पतिः॥ नामाखिलस्य व्यवहारहेतुः शुभावहमिति॥ तत्स्वरूपमाश्व

Indira Gandhi National Centre for the Arts

+ समाक्षरयुतं नाम मन्वेतुं सः सुखं पदं स्यादिति तत्रश्रीस
+ मेतच्च विनिर्द्दिशेत् ७

शर्मवत् आमाणस्य स्यादिति नामकरणप्रकरणे मनुरिति मा० ५
लायनः॥ नाम चास्मै दद्युर्घोषवदाद्यंतरं तस्यमभिनिष्ठानांतं द्यक्षरं चतुरक्षरं वा द्यक्षरं प्रतिष्ठाकामश्चतु
११० रक्षरं ब्रह्मवर्चसकामो युग्मानित्वेव पुंसामयुजानि स्त्रीणामिति॥ वर्गेषु कखचछेत्यादि प्रथमद्वितीयाभिन्न
गघेत्यादयः पंचदश हकाराश्चेत्येते घोषवंतो हलः॥ तदन्यतर आदिर्यस्य अंतस्थोपरलवान्यतरो मध्ये य
स्याभिनिष्ठानो विसर्जनीयोंते यस्य अक्षरं स्वरः स च ऋलृभिन्नः॥ यस्मिन् द्वे अक्षरे चत्वारि वा॥ व्यंजनेषु
नसंख्यानियमः॥ युग्मानित्वेति तदन्यलक्षणानादरेपिन दोष इति ज्ञापनार्थं॥ ततश्च देवदत्त इत्यादिवद्बुद्धुइ ना
त्याद्यपि कार्यं अत्र विशेषं वसिष्ठः॥ तद्व्यक्षरं वा तुरक्षरं वा विवर्जयेदंत्यलकाररेफं॥ तन्नामसु नामादिकमेव
चिंत्यस्फुटवदेद्दक्षिणकर्णं च इति॥ मेधातिथिः॥ याज्ञिकाः पठंति॥ त्रिपुरुषानूकमनरिप्रतिष्ठितं कृतं कुर्या
न्न ताद्धितामिति॥ कृदंतं कुर्यान्न तद्धितांतमिति भावः॥ कपिलसंहितायां देवतानां विशेषेण पित्रोर्वा नाम श
स्यत इति॥ हिरण्यपवोपस्तं वाभ्यां विशेषांतरमुक्तं॥ नामाद्याख्यातांतं नामादिरण्यदा इत्यादिस्थितुपसग
दिवासुश्रीरित्यादीति॥ व्यावहारिकनामाधिकारे यमः॥ शर्मदेवश्च विप्रस्य वर्म राज्ञश्च भूभुजः॥ गुप्तोदत्त
स्य वैश्यस्य दासः शूद्रस्य कारयेदिति॥ मनुः॥ स्त्रीणां च सुखमक्रूरं विस्पष्टार्थं मनोरमं॥ मंगल्यं दीर्घवर्णांत
माशीर्वादाभिधानवदिति॥ प्रासादादीनामपि नाम कार्यमिति स्कांदे॥ देवालयगजाश्वानां वृक्षाणां वापिकूपयोः॥ ११०
सर्वोपणानां पण्यानां चिह्नानां योषितां नृणां॥ काव्यादीनां कवीनां च पुस्त्वादीनां विशेषतः॥ गजप्रासादयज्ञानां
नामकर्म यथोदितमिति॥ नामकर्मणि विप्रेंद्रं पारिजाते भगवान्॥ शिशोर्नामाथ पित्रा द्विदशमेऽह्नि दशमेऽह्नि वा॥
कुर्याद्वा गुणे युक्ते नक्षत्रेनुगुणे शिशोः॥ इदमार्याः कुमारस्य नामोस्य विदधाम्यहं॥ इति विज्ञापिते विप्रैर्विधि

द्भिरनुमोदितं॥ आसप्तेः सार्धमारभ्य पूर्वं पुण्याहवाचनं॥ तत्र पुण्याहपर्यायं यथाविधि समाप्य च॥ स्वस्तिपर्या
यमध्ये तु नामधेयं विधित्सितं॥ चतुर्थ्यंतमुदीर्यादौ पितातन्नामकर्मणि॥ स्वस्तीत्याद्यं ब्रुवंस्त्वेतं भवत्स्वमुदीरयेत्॥
वक्तारश्च तु चतुर्थ्यंतं बालनामोक्तिपूर्वकं॥ स्वस्तीत्येवं प्रतिब्रूयुरिति॥ आद्दतश्चासौ स्वस्तिवाचनगतो विशेषः॥ शौ
नकजयंतकारिकासु पारिजातादिप्रयोगेषु च॥ अभिवादनीयं च नाम न स्त्रीणामित्यकं जयंते नेत्युक्तं॥ अथ
प्रयोगः॥ तत्र गर्भाधानादिसंस्कारातिपत्तौ प्रमादादकरणे जातकर्मणः कालातिपातिनिमित्तकाम्यहोमपूर्व
कं प्रत्येकं पादकृच्छ्रं बुद्धिपूर्वकाकरणे प्रत्येकमर्धकृच्छ्रं गोदानतिलसहस्रहोमाद्यन्यतरप्रत्याम्नायेन कुर्यात्
॥ तद्यथा॥ जातकर्मणः कालातिपातिनिमित्तदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थं प्रायश्चित्तहोमं करिष्य
इति संकल्प्य उपलेपनाद्याज्यभागांतं कृत्वा ॐ भूर्भुवः स्वः स्वाहेत्याज्याहुतिं हुत्वा स्विष्टकृदादि होमशेषं
समाप्य गर्भाधानपुंसवननामवलोभनसीमंतोन्नयनलोपनिमित्तदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्य
र्थं इयनः पादकृच्छ्रान् एतत्प्रत्याम्नायेनाचरिष्ये इति संकल्प्य तान् संकल्पपूर्वकमर्धकृच्छ्रान्वाचरेत्॥ आर
भ्याधानमाचौलात् कालेतीते तु कर्मणां॥ व्याहृत्याज्यं सुसंस्कृत्य हुत्वा कर्म यथाक्रमं॥ एतेष्वेकैकलोपेपि
पादकृच्छ्रं समाचरेत्॥ चूडाया अर्धकृच्छ्रं स्यात् आपदि त्वेवमीरितं॥ अनापदि तु सर्वत्र द्विगुणं द्विगुणं च
रदिति भैगवयुक्तेः॥ कात्यायनः॥ लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते॥ प्रायश्चित्ते कृते पश्चाल्लुप्तक
र्म समाचरेत्॥ स्मृत्यर्थसारे चैवं॥ कारिकायां तु प्रायश्चित्ते कृतेऽतीतं कर्म कृताकृतमित्युक्तं॥ प्रायश्चि
त्ते कृते पश्चादतीतमपि कर्म वै॥ कार्यमित्येके आचार्या नेत्येके तु विपश्चित इति॥ मंडनेन तु कालातीते

Indira Gandhi National
Centre for the Arts

पुसर्वेषु आयश्चित्त कृतेषु च॥ कालातीतानि कृत्वैव विदध्यादुत्तराणि नु जन्मकर्म आसिन् होमे पारिजातमनुस्र
१११ त्य पाकयज्ञतंत्र मुक्तं॥ केचित्तु आज्यं सुसंस्कृत्येति वचनादग्निस्थापनाज्यसंस्कारपात्रे संमार्गातिरिक्तं न कार्य
मित्याहुः॥ अथ देशकालौ संकीर्त्य अस्य कुमारस्य आयुरभिवृद्धिव्यवहारसिद्धिबीजगर्भसमुद्भवैनोनिबर्हण
द्वारा श्रीपरमेश्वरप्रीत्यर्थं नामकर्म करिष्य इति संकल्प्य गणेशपूजनं स्वस्ति वाचनादि कुर्यात्॥ केवलना
मचिकीर्षायां स्वस्ति वाचनमुपक्रम्य पुण्याहत्रयमुक्त्वा मुख्य नाम्नेऽस्मै स्वस्ति भवंतो ब्रुवंत्विति त्रिर्वदेत्॥ ब्रा
ह्मणाश्चैतन्नाम्ने अस्मै स्वस्तीति प्रतिब्रूयुः॥ ततश्च पुण्याहशेषं समापयेत्॥ जातकर्मसहित नामचिकीर्षायां
स्य कुमारस्य जातकर्म नाम कर्मणोः पुण्याहं भवंतो ब्रुवंत्विति त्रिरुक्त्वा त्रिः प्रत्युक्ते॥ अस्य कुमारस्य जातकर्म
णे एतन्नाम्नेऽस्मै च स्वस्ति भवंतो ब्रुवंत्विति त्रिर्वदेत् तदनुसारि प्रति वचनं ब्राह्मणो दत्ते स्य कुमारस्य जातकर्म
नामकर्मणोः ऋद्धिं भवंतो ब्रुवंत्विति त्रिर्वदेत्॥ ऋध्येतामिति ब्राह्मणाः प्रतिब्रूयुः॥ ततः पुण्याहशेषं समाप्य ना
दीश्राद्धांतं कृत्वाचारप्राप्तं नामदेवतापूजनं कुर्यात् आदित्यं तंडुलपूर्णकांस्यपात्रे सुवर्णशलाकया श्रीगणेश
यनम इति लिखित्वा कुलदेवता नाम लिखेत्॥ श्रीनृसिंहभक्त इत्यादि ततो मासनाम कृष्ण इत्यादि ततो माव
त्र नाम कृत्तिक इत्यादि॥ ततो व्यावहारिकं शिवशर्मेति॥ ततो नामदेवताभ्यो नम इति लेख्याक्षरेषु नामदेवता १११
आवाहयेत् तदस्तु मित्रावरुणा गृहावे इति प्रतिष्ठाप्य नाममंत्रेण षोडशोपचारैः संपूज्य बालस्य दक्षिण
कर्णे उपदिशेत्॥ तदित्थं इदमार्याः कुमारस्य विदध्याम्यहमिति प्रार्थित ब्राह्मणैरनुज्ञातः श्रीगणपतये न
म इत्युपनम्य स्य कुलदेवता नाम्नां श्रीनृसिंह भक्तोऽसि मासनाम्ना कृष्णोऽसि ततो नाक्षत्रेण नाम्ना कृत्तिको

नमस्करत्य सीदेव ब्राह्मणेभ्यः पिता वदेत् स्त्रियास्तु प्रतिनामं च ततः स्वाहेति निर्दिशेत् भवतो स्य ब्रुवं प्रतिब्रूयुः ४
स्वाथा द्विजाः तमभिशेषः
शील्य पांशुवदेत् ततो व्यावहारिकेण नाम्ना शिवशर्मासीति॥ तदस्तु मित्रावरुणा गृहावे प्रतिष्ठ ष्टक्त्वा
सु प्रतिष्ठितं नामास्त्विति ब्राह्मणाः प्रवदेयुः॥ ततः कर्ता तिष्ठन् कुलदेवता नाम्ना श्रीनृसिंहभक्तो भव
तः सर्वान् ब्राह्मणान् अभिवादयत इति वदेत् ते चायुष्मान् भव तु श्रीनृसिंहभक्त इति वदेयुः एवं कृष्णाम
स नाम्ना कृष्णो भवतः ते इति वदेत्॥ ते चायु०॥ कृष्ण इति॥ कर्ता पांशुवदेन्नाक्षत्रेण नाम्ना कृत्तिक इति भव
तः सर्वान् ब्राह्मणानभिवादयत इत्युक्ते आयुष्मान् भव तु भवद्कृ नामेति ते वदेयुः॥ कर्ता व्यावहारिकेण ना
म्ना शिवशर्मा भवतः ते इति॥ ते चायुष्मान् भवतु शिवशर्मेति वदेयुः॥ तदस्तु॥ गृहावे० ततः कृतस्य नामकर्मणः
पूर्णतासिध्यर्थं दश ब्राह्मणान् भोजइष्य इति संकल्प्य भूयसीदानं च संकल्प्य स्वस्ति वाचनं कुर्यात्॥ प्रयोगकाले
पि अभिवादनीय नाम्न उपांशुत्वमाह शौनकः॥ अभिवादत नामेदमस्य स्यालोच्य तेत सा॥ उपांशु निर्दिशे
द्वेतन्नजानीयुः परे यथेति॥ अभिवादनीयं च नाक्षत्रमेव पूर्वोदाहृत बौधायन वचनात्॥ तच्च व्यावहारि
कोत्तरं कार्यमिति यद्यपि आश्वलायनीय पाठक्रमादवगम्यते॥ यद्यपि पारिजाते प्रयोगकालेऽयमेव क्र
मोनुसृतः॥ तथापि स्मृत्य वाक्ये देवत्रातेन नाक्षत्रोत्तरं व्यावहारिकविनियोग कथनात् दुदाहृतत साधक न्या
यसद्भूत द्वारा चरणवशात् विपरीत क्रमो मयोदाहृतः॥ नामकर्मणि व्यावहारिकस्यैव शर्मान्तत्वे स्मृतिरि
यस्त्रीणां॥ संकल्पेऽस्याः कुमार्या
ऽपि अभिवादने नाक्षत्रस्य तदंतत्वं वाचनिकं॥ इति पुंसां नाम कर्म॥ अथ स्त्रीणां॥ संकल्पेऽस्याः कुमार्या
इति विशेषः॥ स्वस्ति वाचने एतन्नाम्न्यै अस्यै स्वस्ति भवंतो ब्रुवंत्विति॥ स्वस्ति वाचनांते नामानि लिखे
न्यं तांत्या वंतं कुलदेवता नाम॥ मासनाम सुचक्रिणी वैकुंठी वासुदेवीति त्रीणि डीबंतानि॥ सांकेतिके

Indira Gandhi National
Centre for the Arts

षु अवयवार्थाभावेपि नामत्वात् तत्त्वयोर्जातिव्युत्पत्तिनिमित्तयोरनपायात्॥ हरिरित्यादिकृतसंकेतेनमति
११२ शब्दवत् स्त्रियां सम्भवात्॥ कस्मात् अनन्तेत्येवमवशिष्टान्यावंतानि अदंतत्वात्॥ ननामत्रे मातदन्तोक्तमपि अ
श्वलायनशाखिभिः कार्यं॥ अभिवादनीयनिषेधस्य जयंते नोदाहृतत्वात्॥ व्यावहारिकं च यज्ञशर्मेत्या
दिः पुंसं वस्त्रयोगः॥ नाममंत्रेण पूजादिवैदिकमंत्रवर्जं पुंवत्॥ द्विविधमप्येतस्मिंस्तु रसनिधौ पितामा
हादिः कुलवृद्धः कुर्यात्॥ पिता नाम कुर्यादन्यो वा कुलवृद्ध इति शंखस्मरणात्॥ ॥ इति संस्कारकौस्तुभे ना
मकर्म॥ ॥ अथ दोलारोहणं॥ नविष्णोः अभीष्टपुण्याद्दिवसे चंद्रताराबलान्विते मृदुध्रुवक्षिप्रभेषु म
ता वा कुलयोषितः॥ योगशायिं हरिं स्मृत्वा प्राक्शीर्षं विन्यसेच्छिशुमिति॥ मृदुध्रुवादिलक्षणं श्रीप
तिः॥ रोहिण्युत्तरभं स्थिरं गिरिशमूलेंद्रोरगं दारुणं॥ क्षिप्रं वाश्विदिनेशपुष्यमनलं द्वाग्नीतु साधारणं॥
उग्रं पूर्वमघांतकं मृदु मृगत्वाष्ट्रांत्यमैत्रं चराविष्णुस्वातिशतोडुवस्वदितयः कुर्युः स्वसंज्ञाफलमिति॥ रो
हिणी उत्तरात्रयं चेति स्थिरं॥ आर्द्रामूलज्येष्ठाश्लेषा दारुणानि॥ अश्विनीहस्तपुष्याः क्षिप्राणि॥ कृत्तिका वि
शाखे साधारणे॥ पूर्वात्रयमघाभरण्य उग्राणि॥ मृगचित्रारेवत्यनुराधाः मृदूनि॥ श्रवणस्वातीशततारका
धनिष्ठापुनर्वसवश्चराणि एतेषां संज्ञानुसारिफलं ज्ञेयमिति॥ ईदृशनक्षत्रनियमापवादो ज्योतिर्निबं ११२
धे॥ दोलाशयने तु षोडशो द्वादशो दिवसः शुभः॥ त्रयोदशस्तु कन्यायां न च नक्षत्रविचारणा॥ अन्यस्मिन्नपि दिव
से चेत्स्यान्निर्यगास्य प्रशस्यत इति॥ अन्यदिवसानादयारिज्ञाते बृहस्पतिः॥ दोलारोहस्तु कर्त्तव्यो दशे
पि वा॥ षोडशे दिवसे वापि द्वाविंशे दिवसेपि वेति॥ द्वात्रिंश इति क्वचित्पाठः॥ ॥ इति संस्कारकौस्तुभे

दोलारोहणं॥ अथ दुग्धपानं श्रीधरीये॥ एकत्रिंशे वासरे वा द्वितीये जन्मर्क्षे वा शुद्धलग्नेनुकूले॥ शंखे
क्षीरं सन्निदध्याच्छिशूनां वक्त्रे धात्री पूज्यपूजां विधायेति॥ शंख इति सप्तमी तृतीयार्थे॥ पूज्याः कुलदेवता
विष्वक्सेनसिंहः॥ पूर्वाह्णे वाथ मध्याह्ने कुर्याद्रात्रिं विवर्जयेत्॥ योगिनीराहुलद्वादिमुखं चैवाविवर्जयेदि
ति॥ योगिन्यादिलक्षणं योगिनीनां स्थिरचरभेदस्तु ज्योतिःशास्त्रादवगंतव्यः॥ इति संस्कारकौस्तुभे दु
ग्धपानं॥ अथाचारप्राप्तं जलपूजनं॥ आहुर्ज्योतिर्विदः॥ कवीज्यास्तचैत्राधिमासे॥ न पौषे॥ जलपूज
ये॥ त्स्तुतिकामासपूर्णौ बुधे श्चीज्यवारेष्वरिक्ते तिथौ दिक्षु तीज्यादितीदुर्कनैर्ऋत्यमैत्रेरिति॥ शुक्रगुर्व
स्तयोश्चैत्रे धिमासे पौषे च न कार्यं मासांते बुधसोमगुरुवारेषु रिक्तान्यतिथौ श्रवणपुष्यपुनर्वसुमृग
हस्तमूलानुराधानक्षत्रेषु कुर्यादिति भावः॥ इति संस्कारकौस्तुभे जलपूजनं॥ अथ शिशोस्तांबूलभ
क्षणं॥ सार्धमासद्वये दद्यात्तांबूलं प्रथमं शिशोः॥ कर्पूरादिकसंमिश्रं विलासाय हिताय च॥ सार्धं पुन
कमासे तु पूगस्य प्राशनं शुभं॥ षड्रिखस्य मासे तु भोगी भोगे भवेन्नर इति षड्मासे रत्नस्य भोग इत्य
न्वयः॥ अतो अन्नप्राशनकाले तांबूलभक्षणे विशिष्ट इति प्रतीयते॥ इति संस्कारकौस्तुभे तांबूलभक्षणं॥
अथ सूर्यावलोकनादिसंस्काराः॥ पारिजाते यमः॥ तृतीये मासि कर्त्तव्यमहः सूर्यस्य दर्शनं॥ चतुर्थे
मासि कर्त्तव्यमग्नेश्चंद्रस्य दर्शनं॥ उपनिष्क्रमणं कुर्याच्चतुर्थे मासि सावन इति॥ शौनकः अन्नप्राशन
काले वा कुर्यान्निष्क्रमणक्रियामिति॥ अथ निष्क्रमणकालः॥ मुहूर्तसंग्रहे पूर्वपक्षः शुभः प्रोक्तः
कृष्णश्चांत्यत्रिकं विना॥ तथा रिक्ताषष्ठ्यष्टमी दर्शद्वादशी च विवर्जिता इति॥ वारनक्षत्राणि बृहस्पतिः

Indira Gandhi National
Centre for the Arts

॥जीवमार्गवसौम्यानां शिशुनिष्क्रमणक्रिया॥ दिवसे शस्यते नित्यमायुर्वृद्धिधनप्रदेति॥ अश्विनीरेवती
हस्तधनिष्ठारोहिणी तथा॥ श्रवणं पुष्यसंयुक्तं मृगेणोत्तरफल्गुनी॥ अनुराधोत्तराषाढा तथैव च पुनर्वसुः
११३ ॥इमानि भानि शस्तानि शिशोर्निष्क्रमणे विधाविति॥ योगादिमुहूर्त्तसंग्रहे वर्ज्याश्चाशुभयोगाश्च विष्टि
श्च शकुनादि केति॥ आदिशब्देन निषिद्धकरणान्तरसंग्रहः॥ अथ निष्क्रमणे विशेषविधिर्विष्णुध
र्मोत्तरे॥ चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात्॥ दिगीशानां दिशां तत्र तथा चन्द्रार्कयोर्द्विज॥ पू
जनं वासुदेवस्य गगनस्य च कारयेत्॥ ततस्त्वलंकृता धात्री बालमादाय पूजितं॥ बहिर्निष्कासयेद्देहा
त्शंखपुण्याहनिःस्वनैः॥ ततस्तत्र पठेन्मंत्रं यं तं राम निबोध मे॥ चन्द्रार्कयोर्दिगीशानां दिशां च गगनस्य॥
निक्षेपार्थमिमं दद्मि ते मे रक्षंतु सर्वदा अप्रमत्तं गमा इति॥ स्त्रीणामविधवानां च द्विजानां सुहृदां तथा॥
तदा तु पूजा कर्त्तव्या गीतनृत्यैस्तथोत्सव इति॥ शंखग्रहणं वाद्यान्तरोपलक्षणं॥ तत्र बहिर्देशगमने
मंत्रान्तरमाह आश्वलायनः॥ नयेदाकल्पकैः सम्यग्देवतायजनं गृहात्॥ अभ्यर्च्य देवतामूर्त्तिं पंचघो
षपुरःसरं॥ भोजयित्वा द्विजान् गेहे स्वस्तिवाचनमाचरेत्॥ शाकुंते प्रजपेत्सूक्तं शिशोर्निष्क्रमणे वि
धाविति॥ आकल्पकैः भूषणैः पंचघोषाः पंचविधवाद्यघोषाः॥ शाकुंते सूक्ते कनिक्रददिति प्रदाक्षिणि दि
ति च॥ ततो मंगलदर्शनं कारणीयमित्यपि विष्णुधर्मोत्तरे॥ द्विजोऽश्वा दर्शपूर्वाणि मंगलानि पुरो नये
त्॥ दर्पणः कलशः कन्या तथा सुमनसोऽक्षताः॥ दीपमाला ध्वजो लाजाः संप्रोक्तं चाष्टमंगलं॥ विवा ११३
हे निष्क्रमे काम्ये वृद्धौ पूर्वसमागमे॥ उत्सवेषु च यात्रायां प्रशस्तं चाष्टमंगलमिति॥ शौनकः॥ निर्गम

य्य गृहादेनं नीत्वा चेष्टसुरालये॥ ततः प्रदक्षिणं नीत्वा बालं तद्देवतालये॥ गंधमाल्यादिभिस्तत्र पू
जयित्वा च देवतां॥ प्रणामय्य च तं बालं नतो देवलयस्थितेः॥ विहृद्विज्ञालग्ने राशीर्वादाद्यैरभिवंदितं
॥मातुलादेः समासन्नबंधोः प्रापय्य मंदिरं॥ तत्रोपहारदानाद्यै राशीर्भिश्चाभिलालितं॥ कुमारं पुन
र्गृहेनं प्रापयेत्स्वगृहं ततः इति॥ जपंतः ततो मातृसमे मातुलादिगृहं गत्वा तेषां चाशीर्वचनादिभिर्नं
तो दीर्घायुर्भवतीति॥ बृहस्पतिः॥ स्वस्ति वाच्य समारूढ बालं दत्तं निर्ययेद्गृहात्॥ मातुलो चावदत्तत्र निवी
तनं शिशुं स्वयं॥ शिशुनासहमित्राणि निर्गच्छेयुर्गृहात्स्वयं॥ सहदुंदुभिघोषैश्च वाद्यशब्दसमन्वितैः॥ चतुष्प
थे चौदेशगोमयेनोपलेपिते॥ धान्यपुंजसमासीनं बालं बालामथापि वा॥ अर्चयेद्गंधपुष्पाद्यैर्लासिकंठम
ध्ये ललाटके॥ अस्य रक्षां ततः कृत्वा मृतसंजीवनं जपेत्॥ अर्चयेद्भूतेशानं भूतेशानं तथैव च॥ भक्ष्यैर्वि
चित्रैः सफलैः शिशून संपूर्ज्य बुधः इति॥ कृत्वेति मुखमादाय स्वपितीति व तयो वीपर्यमानिवृत्तिं। शिशु
नेति तद्धस्तेन पूजनं कारयेदित्यर्थः॥ अत्र कर्त्तनिर्णयमाह शौनकः॥ मासे चतुर्थे षष्ठे वापि शोनिष्क्रम
णं गृहात्॥ विदधीतास्य पित्रादिर्द्वितीयश्च रक्षक इति॥ यद्यपि सूर्ययोः कर्मणि पेचतयोः श्राद्धं न वि
धते इति कातीयस्मरणात्तत्र नांदीश्राद्धमिति कल्पतरुणोक्तं तथाप्याश्वलायनशाखिभिरिच्छयानुष्ठे
यं॥ अन्ये षोडशसंस्कारश्रावणवादिधपीप्यत इति कारिकोक्तेः॥ अस्य नित्यकाम्यत्वमाह बृहस्पतिः
॥ अथ निष्क्रमणं नाम गृहात्प्रथमनिर्गमः॥ अकृतायां क्रियायां स्यादायुःश्रीनाशनं शिशोः॥ कृतं संपद्विवृ
द्धिः स्यादायुर्वर्द्धनमेव चेति॥ अथान्नप्राशनकालः॥ विष्णुधर्मोत्तरे। पंचमे च तथा मासे नमोऽन्नमुपवेश

Indira Gandhi National
Centre for the Arts

११४

येत्॥ तिथिं विवर्जयेद्रिक्तां शस्तान्यन्यानि मे॥ उत्तरात्रितयं सौम्यं पुष्यर्क्षं शक्रदैवतं॥ प्राजापत्यं च हस्तं च
आश्वमाश्विनमिच्छतं॥ न च सर्वे ग्रहाः शस्ताः भौमो राम विशेषतः॥ भौमानुकूल्यमत्रावश्यकमिति भावः॥ व
राहं पूजयेद्देवीं पृथिवीं च तथा द्विजः॥ पूजनं पूर्ववत्कृत्वा गुरुदेवद्विजन्मनां॥ देवः कुलदेवता॥ भूभागमुपलि
प्याथ कृत्वा तत्र तु मंडलं॥ शंखपुण्याहशब्देन मूर्ख सौतमुपवेशयेत्॥ मंत्रोऽश्वात्र नवेति मे तन्मे निगदितः श्र
॥ रक्षेमं०॥ ब्रह्मानदनुमन्यतेमिति॥ तस्योपवेशनं कृत्वा नमो ब्राह्मपूजनं॥ ततः कृत्वा ततः कार्यमुत्सवं पूर्ववद्द्विज
इति॥ उत्सवं नीराजनादीति व्याख्यातं पारिजाते एतत्कुमार्यामपि॥ अथान्नप्राशनकालः॥ आश्वलायनः॥ षष्ठे
ज्ञातेषु दंतेषु वेति कौ० मास्यन्नप्राशनमिति॥ पारिजाते नारदः॥ जन्मतो मासि षष्ठे स्यात्सौरेणोत्तममन्नदं॥ तदभावेऽष्टमे मासे नवमे दश
मे पि वा॥ द्वादशे वापि कुर्वीत प्रथमान्नाशनं परं॥ संवत्सरे वा संपूर्णे केचिदिच्छन्ति पंडिता इति॥ सौरेण मानेन ष
ष्ठ इत्यन्वयः नचायमेव नियमः बालान्नभोजनविधौ गुरुशुक्रमौढ्यबाल्यप्रयुक्तमशुभं त्वधिमासदोषः॥ ना
स्त्येव सावनविधावि दमासि षष्ठे युग्मे च मासि परतः शुभचन्द्रपक्ष इति विधिरत्ने सावनमानेनापि षष्ठस्य मा
सस्य विधानात्॥ शुभश्चन्द्रपक्षः शुक्लपक्षः॥ तत्रापि परस्मिन्पंचम्याः परभाग इत्यर्थः॥ पंचम्यतः कृष्णप
क्ष इति शास्त्रान्तरसंवादात्॥ युग्मे मासीति षष्ठासंभवेऽष्टमादियुग्ममास एव पुंसामन्नप्राशने ग्राह्य इति नि
यमार्थं॥ अत एव नारदवाक्ये नवमासविधिः स्त्रीणामन्नप्राशनविषयः॥ तथा च गर्गः॥ नरस्यान्नाशने
युग्मे स्त्रीणामन्नाशयेऽयुजामिति तत्रापि यथा कुलधर्मव्यवस्था॥ यद्वैतं मंगलं कुल इति मनूक्तेः॥ तिथीः प्रा ११४
ह लघुनारदः॥ द्वितीया च तृतीया च पंचमी सप्तमी तथा॥ त्रयोदशी च दशमी प्राशने तिथयः शुभाः॥ पंचपर्व

सु रिक्तायां नंदायामाघभोजनं॥ बलमायुर्यशो हंति सप्तम्यां वेति केचन॥ रिक्ता दिनक्षयं नंदां द्वादशीमष्टमीम
मां॥ त्यक्त्वान्यतिथयः श्रेष्ठाः प्राशने शुभवासरा इति॥ वासरा इत्यनंतरं श्रेष्ठा इत्यनुषंगः॥ वासराणां शुभत्वं फल
द्वारेणाह मार्कंडेयः॥ वाचालो चलवान्दिने दिनपतेरस्पंदी स्यान्नलो दैदीही नहुताशनः शिशिरगौ कौजे रुजापीडि
तः॥ बौधे भोगसुखं प्रियोनवरतं जीवे चिरायुः सुखी शुक्रे चातिबलान्वितोऽतिमलिनो मंदानल इति॥ शिशिर
गुः सोमवासरः॥ कौजो भौमवारः॥ बृहस्पतिः॥ पौष्णादितिं उहस्ताश्वित्वाष्ट्रवैष्णववासवाः॥ रोहिणी मैत्राति
श्च वरुणश्चोत्तरात्रयं॥ श्रविष्ठा च शुभाः प्रोक्ता षोडशान्नाशने शुभा इति॥ पौष्णं रेवती॥ अदितिः पुनर्वसुः॥ इं
दुर्मृगः॥ वासवं धनिष्ठा॥ वरुणः शततारका ज्योतिरर्णवः॥ जन्मर्क्षे श्रीक्षयं विद्यात्कर्मर्क्षे वापि सौख्यहृत्॥ आ
धानर्क्षे च बालानां भोजने रोगनाशनमिति॥ एतान्युक्तानि संग्रहे॥ जन्मभं जन्मनक्षत्रं दशमं कर्मसंज्ञितमेए
कोनविंशमाधानमिति॥ यत्तु नारदेनोक्तं॥ पटबंधनचौलान्नप्राशने चोपनायने॥ शुभदं जन्मनक्षत्रमशुभं त्व
न्यकर्मणीति तत्क्षत्रियविषयं॥ पट्टबंधसाहचर्यात्॥ बृहस्पतिः॥ न वैधृतौ व्यतीपाते विष्ट्यां गंडातिगंडयोः॥ शू
ले वज्रे न परिघे बालान्नप्राशनं शुभमिति॥ लग्ननियममाह कश्यपः॥ गोऽश्विकुंभतुलाकन्यासिंहकर्किमिथुन
काः॥ शुभदा राशयश्चैते न मेषवृषवृश्चिकाः इति अश्विधनुरुच्यते॥ राजमार्तंडः॥ लाभत्रिषष्ठनवमोपग
तास्तु सौम्याः सौम्यग्रहा नवमपंचमकंटकस्थाः॥ लग्नेषु दैत्यसचिवज्ञबृहस्पती नाम न्नोपभोगकरणो विधि
धौ पभोक्तेति॥ कंटकशब्देन प्रथमचतुर्थसप्तमदशमस्थानानि केन्द्रपदवाच्यान्युच्यंते॥ अन्नप्राशनांतकर्म
पारिजाते माधवीये च मार्कंडेयः॥ अग्रतोऽथ परिन्यस्य शिल्पभांडानि सर्वशः॥ शस्त्राणि चैव वस्त्राणि ततः पश्ये

Indira Gandhi National Centre for the Arts

तुलक्षणं॥ प्रथमं यत्सूर्य शिशुर्बालस्ततो मांडं स्वयं तदा॥ जीविकांतस्य बालस्यानेनैव तु भविष्यतीति॥ सू
११५ वंसूर्यावलोकनादीनां भिन्नकालत्वोपदेशविशिष्टेरन्नप्राशनकाल एव प्राल एव प्रायशोनुष्ठानात्
॥ शौनकेन निष्क्रमणान्नप्राशनकालोपदेशात्सो कार्यास्त्वदृष्ट्ययोगोभिधीयते तत्रान्नप्राशनकालावि
रोधेन निष्क्रमणादिकालोपसंहारेण निर्णीते दिने भार्यया सह कृताभ्यंगस्नानो देशकालौ संकीर्त्य मम
स्य कुमारस्यायुरभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं सूर्यावलोकनं॥ आयुःश्रीवृद्धिबीजगर्भसमुद्भवैनो
निवर्हणद्वारा श्रीपरमेश्व॰ निष्क्रमणं॥ आयुरभिवृद्धिद्वारा श्रीपर॰ मातुरुपवेशनं मातृगर्भमल
प्राशनेशुध्यन्नाद्यब्रह्मवर्चसतेजइंद्रियायुरभिवृद्धिफलसिद्धिबीजगर्भसमुद्भवैनोनिवर्हणद्वारा श्रीप
र॰ अन्नप्राशनं च करिष्ये इति संकल्प्य गणेशपूजनादिनांदीश्राद्धांतं कृत्वा निष्क्रमणांगत्वेनेंद्रादिविंशति
देवताउपवेशनांगत्वेन वराहं पृथिवीं च सूर्यावलोकनादि संकल्पितसकलकर्मांगत्वेनेष्टदेवतां च पूज
यिष्य इति संकल्प्य त्रयोविंशतिषु प्रतिमासु धान्यपुंजेषु वा ओं इंद्राय नमः इंद्रमावाहयामीत्येवमिंद्राग्नि
यमादिलोकपालान् प्राच्यै नमः दिग्भ्यो नमः आवाहयामीत्येवं प्राच्याद्येशान्यंतादिक्ष्वग्रं इंद्राय नमो का
न यनमो वासुदेवाय गौरी गणनायन मो वराहाय नमः पृथिव्यै नमः इत्येतैर्मंत्रैः प्रणवाद्यैरमुमावाहयामि इ
त्यंतैश्च प्रादिदेवता अमुष्मै नमोमुमावाहयामीतीष्टदेवं चावाह्य षोडशोपचारैः संपूज्य सूर्यावलोकनं ॥११५
कारयेत्तद्यथा स्वस्ति नः स्वस्त्यात्रेयो विश्वेदेवास्त्रिष्टुप् शिशोरंकारोपणे विनियोगः॥ ओं स्वस्ति नो मि

मीतामीति॥ अंकमारोप्याशुः शिशान इति सूक्तस्य इंद्रोऽप्रतिरथ इंद्रस्त्रिष्टुप् चतुर्थी वार्हस्पत्या त्रयोद
श्यनुष्टुप् जपे वि॰॥ आशुः शिशानः॰ चरं वरं॥ तच्चक्षुर्वसिष्ठः सूर्योऽपुरउष्णिक् शिशोः सूर्यावेक्षणे वि
नियोगः॥ तच्चक्षुर्देवहितं॰ जीवेम शरदः शतमिति॥ अथ निष्क्रमणं॥ पूजितदेवताप्रीत्यर्थं अवर
ब्राह्मणान् भोजयित्वा स्वस्ति कुमाराय स्वस्ति भवंतो ब्रुवंत्विति स्वस्ति वाचयित्वा यथाशक्त्यलंकृतं बालं
धात्री मातुलेन वाहनेनोह्यमानं मंगलवाद्यघोषेण कानिक्रदददिति शाकुनसूक्तद्वयं पठन् ज्ञातिभिः स
हि वह्निं नीत्वा पुरोभागे ब्राह्मणानां दर्पणकलशकन्याघृष्टमंगलानां सूर्याग्निचंद्रधेनूनां च यथासंभ
वं दर्शनं कारयित्वा वह्निदिशश्चोत्थाने सशिशुरूपविश्वदेवताः प्रार्थयेत्॥ चंद्रार्कयोर्दिगीशानां दि
शां च गगनस्य च॥ निक्षेपार्थमिमं दद्मि ते मं रक्षंतु सर्वदा॥ अप्रमत्तं प्रमत्तं वा दिवा रात्रावथापि वा॥ र
क्षंतु सततं सर्वे देवाः शक्रपुरोगमा इति॥ वरुणस्य चेति अपपाठः॥ दिशां चेत्यनुक्तसमुच्चयार्थश्च का
चारणकाने वासुदेवं ध्यायेत्॥ तेमामित्येकारस्थाने दस॥ त्वामित्यपपाठः॥ पारिजातधृतपौराणपाठाद
र्शनात्ततो विष्णुशिवादीष्टदेवालयं नीत्वा स्वशक्त्यस्य देवस्य समीपे वा नीत्वा देवं संपूज्य बालं प्रणमय्य प्रदक्षि
णं च कारयित्वा मातुलादिबंधुगृहं प्राप्य स्वगृहे वा तमानीय मातुलादिभिर्वस्त्रादिभिः संपूजितं सहबा
लं पूजिते स्वगृहे गोमयोपलिप्ते देशे चतुरस्रे धान्यराशीन् विधाय तेषूपविष्टबालस्य शिरसि भाले च
विभूत्यालेपनेन रक्षां कुर्यात्॥ अंबकं वसिष्ठो रुद्रोनुष्टुप् रक्षाकरणे वि॰॥ ओं हौं जुं सः त्र्यंबकं य
जामहे मृतात्सः जुं हौं मिति मृतसंजीवनमंत्रेण॥ ततो गणेशं भूतेशान वसिष्ठहस्तेन सफलापूपाद्यु

Indira Gandhi National
Centre for the Arts

पद्वारे स्तोषयित्वा ब्राह्मणैः सुवासिनीभिश्चाशिषो वाचयेत्॥ इति निष्क्रमणं॥ अथोपवेशनं॥ भौमानु
कूले गुरुशुद्धि जन्मनक्षत्रं संपूज्य कृतकर्मणा ऐशानदेशे उपलिप्ते तंदुलपिष्टेन तंडुलैश्च कृतमंडलोपरि वा
११६ घशब्देन ब्राह्मणकार्त्तिकेणोद्धृतातेव शकुने सामगायसीत्यादि मंत्रघोषेण च बालं पित्रादिरुपवेशयेत्
तस्य मंत्राः रक्षैनं वसुधे देवि सदा सर्वगतं शुभे॥ आयुःप्रमाणं सकलं निःक्षिपस्व हरिप्रिये॥ अचिरादा
युषस्त्वस्य ये केचित्परिपंथिनः॥ जीविताऽऽरोग्यवित्तेषु निर्दहस्वाचिरेण तान्॥ धारिणपोषणं त्वं नाम
तस्त्व माधिकासि॥ अजरा वाप्रमेया च सर्वभूतनमस्कृते॥ त्वमेवाशेषजगती प्रतिष्ठा चाश्रयाह
सि॥ कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतामिति॥ पारिजातानुसारेण पाठः॥ केचित्तु प्रमाणं नि
खिलमिति पठंति॥ अन्ये मातास्त्वमासि कामधुगिति॥ ततो ब्राह्मणानुसंपूज्य बालस्य सुवासिनीनीरा
जनं कारणीयं॥ श्रियेजातइति ब्राह्मणाः॥ इत्युपवेशनं॥ अथान्नप्राशनं॥ दधिमधुघृतमिश्रम
न्नं नवे काचने कांस्यमये वा पात्रे निःक्षिप्य पूजितेष्टदेवं प्रणम्य तत्पुरतः शुभ्रवस्त्रोपरिस्थितमातु
रुत्संगे प्राङ्मुखोपविष्टशिशोः सस्वर्णहस्तेन पात्रादीषदादाय मंत्रेण प्रथमं प्राशनं कारयेत्॥
अन्नपत इत्यस्य नलकूवरो ऽन्नपतिर्जगती॥ अन्नप्राशने विनियोगः॥ ॐ अन्नपतेन्नस्य नो देह्यनमी ।११६
वस्य शुष्मिणः॥ प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इति॥ ततो यथेष्टं भोजयित्वा ततो बा
लस्य मुखं हस्तं च प्रक्षाल्याचामेत्॥ जयं तस्वाह अन्नं संस्कृत्य प्रथमं ब्राह्मणा नाराध्यते शुभो
मनमभिहितवस्तुस्वातमलंकृतं सुकृतं आसने प्राङ्मुखमुपवेश्योक्तविधमन्नं मंत्रेण प्राशयेत्॥

+ शेषमाता प्राश्नीयादिति शौखायनगृह्योक्त + २

ततः पंचहायनस्य स्त्रीप्राशयेदिति॥ ततः कर्पूरैलादिसंयुक्तं तांबूलं प्राशयेत्॥ ततः पुस्तकशस्त्रादीनि शि
ल्पानि बालस्याग्रे निधाय परीक्षां कुर्यात्॥ ततः प्रतिसंस्कारं दश दशेति त्रींस्त्रीनिति ब्राह्मणान् भोजयिष्य इ
ति संकल्प्य निष्क्रमणांगत्वेन यथाशक्ति सुवासिनीर्भोजयिष्य इति च संकल्प्य भूयसीं दक्षिणां च संकल्प्येश्वरा
र्पणं कुर्यादिति संस्कारकौस्तुभे स्मृत्यर्थावलौ च निष्क्रमणोपवेशनान्नप्राशनप्रयोगः॥ अथ कर्णवेधः॥ तत्र रा
जमार्तंडः॥ ताराचंद्रानुकूले द्विशस्ते मास्यतिवाक्यतो॥ अयुक्संवत्सरे प्राहुः कर्णवेधविधिं बुधा इति
॥ मुहूर्तसंग्रहे॥ दशमे द्वादशे वाऽह्नि षोडशे कर्णवेधनं॥ प्रथमे सप्तमे मासि अष्टमे दशमेऽथवा॥ द्वादशे च
तथा कुर्यात्कर्णवेधं शुभावहमिति॥ गर्गः॥ मासे षष्ठे सप्तमे वा अष्टमे मासि वत्सरे॥ कर्णवेधं प्रशंसंति
पुष्ट्यायुःश्रीविवृद्धये इति॥ वत्सर इति प्रथमवत्सरांतर्गतानुक्तमाससंग्रहार्थं॥ तत्र तृतीयादिवत्सरे
॥ नियममाह॥ व्यासः॥ कार्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा॥ कर्णवेधं प्रशंसंति शुक्लपक्षे शुभे दि
ने इति॥ व्यवहारोच्चये तु न जन्ममासे न च चैत्रपौषे न भाद्रसंज्ञे न हरौ प्रसुप्ते तिथौ न रिक्ते न च विष्टिदु
ष्टे कर्णस्य वेधं मुनयो वदंतीति॥ अत्र चैत्रपौषनिषेधो मीनधनुस्थसूर्यविशिष्टकालविषय इति वृद्धाः
॥ बौधिनुत्तर नागविषयश्च कार्त्तिकविधिः॥ भाद्रपदनिषेधश्च दोषाधिक्यार्थः॥ तिथीराह रहस्य
तिः॥ द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी॥ द्वादशी पंचमी शस्ता तृतीया कर्णवेधने॥ नृसिंहः॥ एका
दश्यष्टमी पूर्वरिक्ता वर्ज्या इति॥ वारान्नक्षत्राणि चाह बृहस्पतिः॥ भूमिजार्कात्मजार्काणां दिवसान्परिव
र्जयेत्॥ जीवेंदुज्ञेंदुशुक्राणां दिवसाः पूजिता मता इति॥ सौम्यादित्युत्तरात्रिहस्तचित्राश्विविष्णुमं

Indira Gandhi National
Centre for the Arts

॥ धनिष्ठारेवतीचैवशुभाः स्युः कर्णवेधने इति। आर्यः पुष्यः॥ कश्यपः॥ शुभयोगेषु सर्वेषु कर्णवेधः
शुभावह इति॥ लग्नव्यवस्था नारदः॥ वृषभे मिथुने मीने कुलीरे कन्यकासु च॥ तुलाचापे तु कुर्वीत कर्णवे
११७ धं शुभेह्न्ये॥ मेषश्च मकरश्चैव मध्यमौ गुरुणोदितौ॥ सिंहश्च वृश्चिकः कुंभश्चाधमस्त्वा द्विवर्जिता इति॥ क
र्णवेधविधिर्विप्र धर्मेर्निरे॥ पूर्वाह्णे पूजनं कुर्यात् केशवस्य हरस्य वा॥ ब्राह्मणांश्चंद्रसूर्यौ भूमिं दितीशानौ
तथैव च॥ नासत्यौ च सरस्वत्या ब्राह्मणान् गवां तथा॥ गुरूणामर्चनं कृत्वा तत्र दत्वा वरासनं॥ तथो
पवेशयेत्तत्र धात्री शुक्लांबरा तथा॥ अलंकृतं तदुत्संगे बालं धृत्वा तु सांत्वितं॥ धृतस्य निश्चलं सम्यगल
क्तकरसांकिते॥ विध्येद्देवं कृते छिद्रे सकृदेवात्र लाघवात्॥ आदक्षिणं कुमारस्य भिषग् वामे तु योषितः॥ शि
शोर्विवर्द्धनं कार्यं यावदाभरणक्षमं॥ कर्णवेधे सदा विप्राः सांवत्सरचिकित्सकाः॥ पूज्याश्च विधवा नार्यः
सुहृदश्च तथा द्विजा इति॥ अत्र सूचिव्यवस्थामाह बृहस्पतिः॥ सौवर्णी राजपुत्रस्य राजती विप्रवैश्ययोः॥ शूद्र
स्य चायसी सूची मध्यमाष्टांगुलात्मिकेति॥ बालस्य मध्यमांगुलिमध्यपर्वमितांगुलेनाष्टांगुलेत्यर्थः॥ छिद्र
मानमाह देवलः॥ कर्णरंध्रे रवेश्छाया न विशेदग्रजन्मनः॥ तं दृष्ट्वा विलयं यांति पुण्यौघाश्च पुरातना इति
॥ इति संस्कारकौस्तुभे कर्णवेधः॥ अथ बालस्य दुष्टदृष्टिदोषादौ रक्षाविधिः॥ पारिजाते कपिलसंहि
तायां॥ शिशुसंरक्षणार्थाय शुभग्रहनिवारिणीं॥ रक्षां संध्यासु कुर्वीत निंबसर्षपगंजनैः॥ फलीकरण ११७
संमिश्रैः करंजैरवलोकनैः॥ ववोधरान्नदेशेषु बालग्रहविमुक्तये॥ वासुदेवो जगन्नाथः पूतनातर्जनो ह
रिः॥ रक्षतु त्वरितो बालं मुंच मुंच कुमारकं॥ कृष्ण रक्ष शिशुं शंखमधुकैटभमर्दन॥ प्रातः संगव मध्या

ह्ने सायाह्नेषु च संध्ययोः॥ महानिशि सदा रक्ष कंसारिष्टनिषूदन॥ यद्गोरजः पिशाचांश्च ग्रहान्मात
ग्रहान्मातृग्रहानपि॥ बालग्रहान्विशेषेण छिंधि छिंधि महाभयान्॥ त्राहि त्राहि हरे नित्यं त्वद्र
क्षाभूषितं शिशुं॥ इति मस्माभिमंत्र्यैव भूषयेत्तेन भस्मना॥ शिरोललाटवक्षेषु रक्षां कुर्याद्यथाविधि॥ मं
त्रसंरक्षणादेवं शिशुः संवर्धते न्वहमिति॥ वचन कालेधरारिंगणकाले अन्नाशनकाले च्छादिश्छाया
दिशे च दुष्टद्रष्ट्यवलोकने निमित्ते करं जातद्रव्यैः रक्षां कुर्वीतेत्यन्वयः॥ यद्गोरज इति गोरजसः प्रार्थना
प्रीणीतेर्गोरजः साहितमस्माभिमंत्रणं द्रष्टव्यं॥ इति संस्कारकौस्तुभे दृष्टिदोषरक्षाविधिः॥ बालस्य स्ख
लनादौ रक्षाविधिर्हरिवंशे॥ नंदो कामेन मारोप्य भूरेणुं परिगृह्य च॥ शिरः प्रदक्षिणं कुर्वन्मंत्रमेनं जजा
प ह॥ विष्णुस्ते पूर्वतः पातु रुद्रो रक्षतु दक्षिणं॥ ब्रह्मा च पश्चिमे पायात् चंद्रो रक्षत्वथोत्तरं॥ उपविष्टा तथा
सूर्यः पाताच्चाधश्च वासुकिः॥ पापादूर्ध्वमधो वत्स शिष्टाः काष्टाः समीरणः॥ स्वस्ति करोतु भगवान्विना
कीर्त्यघमध्वजः॥ गावो रक्षंतु सर्वत्र भूमिः पातु सदाशिवा॥ एवमुच्चार्य नंदस्तु स्कंधपस्पर्श सर्वतः॥ एष
मंत्रोदि बालानां रक्षार्थे परिकीर्तितः॥ इति कौस्तुभे स्खलनादौ रक्षाविधिः॥ अथाब्दांते जन्मतिथि
कृत्यं॥ ब्रह्मपुराणगर्गसंहितयोः॥ सर्वैश्च जन्मदिवसे स्नातैर्मंगलपाणिभिः॥ गुरुदेवाग्निविप्राश्च
पूजनीयाः प्रयत्नतः॥ देवः कुलदेवताः सर्वपदे नक्षत्राणामपि संग्रहः॥ स्नानं तिलैः कार्यमित्यावितत्वे
वोक्तं॥ तिलोद्वर्ती तिलस्नायी तिलहोमी तिलप्रदः॥ तिलभुक् तिलपात्री च षट् तिलो नावसीदतीति॥

Indira Gandhi National Centre for the Arts

होमप्रकारश्चतत्रैवोक्तः॥एकैकांदेवतां।समुद्दिश्ययथाविधि॥चतुर्थ्यंतेनधर्मज्ञनाम्नाचप्र
११८ णवादिनेति॥देवता:कादृत्यपेक्षायामुक्तं॥स्वनक्षत्रंचपितरौतथादेव:प्रजापति:॥प्रतिसंवत्सरंचैव
कर्त्तव्यश्चमहोत्सव:॥गुडदुग्धतिलान्नद्याज्यैरग्रेथेश्च।बंधनं॥कुर्यादितिशेष:॥तदुपयोगिद्रव्याणि
पितत्रोक्तानि॥गुग्गुलंनिबसिद्धार्थदूर्वागोरोचनायुतं॥उक्तपंचद्रव्यगर्भपोटलिकाबंधनंदक्षिणहस्ते
कार्यमित्याशय:॥संपूज्यमानुविघ्नेशोमहर्षिंप्रार्थयेदिदं॥चिरंजीवीयथात्वंभोभविष्यमितथा
मुने॥रूपवान्वित्तवांश्चैवश्रिया।युक्तश्चसर्वदा॥मार्कंडेयनमस्तेस्तुसप्तकल्पांतजीवन॥आयुर
रोग्यसिध्यर्थंप्रसीदभगवन्मुने॥चिरंजीवीयथात्वंतुमुनीनांप्रवरद्विज॥कुरुष्वमुनिशार्दूलतथामां
चिरजीविनं॥मार्कंडेयमहाभागसप्तकल्पांतजीवन॥आयुरारिष्टार्थसिध्यर्थमस्माकंवरदोभवे
ति॥श्रीपतिप्रवदारेमार्कंडेयपूजोत्तरमन्येषामपिपूजोक्ता॥ततोदीर्घायुर्व्यासंरामंद्रोणिंकृपं
वलिं॥प्रह्लादंचहनूमंतंविभीषणमथार्चयेत्॥षष्ठीचदधिभक्तेनवर्षेवर्षेपुन:पुनरिति॥ततो
गुडतिलमिश्रपय:पानंसमंत्रंकृत्वागुरुपूजनंचकार्यमित्यप्युक्तं॥अथप्रयोग:॥ममामुकश
र्मण आयुष्याभिवृध्यर्थंवर्षवृद्धिकर्मकरिष्यइतिसंकल्प्यतिलोद्वर्त्तनपूर्वकंतिलोदकेनस्नात्वानव्य ११८
वस्त्रंपरिधायकृतसंध्याविधि:॥दक्षिणपाणौगुग्गुलादिपंचद्रव्यगर्भपोटलिकाबंधंकृत्वागुरुंविप्रां
श्चसंपूज्यप्रतिमासुअक्षतपुंजेषुवा॥ॐकुलदेवतायैनमइत्येवंकुलदेवतांस्वनक्षत्रंप्रकृतिपुरु

षात्मानौपितरौप्रजापतिंभानुंविघ्नेशंमार्कंडेयंव्यासंजामदग्न्यरामंअश्वत्थामानंकृपंवलिंप्रह्ला
दंहनूमंतंविभीषणंषष्ठीचेतिदेवताआवाह्यसंपूजयेत्॥षष्ठ्यैदधिभक्तंनैवेद्यंदद्यात्॥ततोनम
स्कृत्यचिरजीवीत्यादिश्लोकचतुष्टयेनमार्कंडेयंप्रार्थ्यषष्ठींप्रार्थयेत्॥जयदेविजगन्मातर्जगदा
नंदकारिणि॥प्रसीदममकल्याणिनमस्तेषष्टिदेवते॥रूपंदेहियशोदेहिभगंभगवतिदेहिमे॥पु
त्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे॥त्रैलोक्येयानिभूतानिस्थावराणिचराणिच॥ब्रह्मविष्णु
शिवै:सार्द्धंरक्षांकुर्वंतुतानिमेइति॥तत:पूजितदेवताभ्योयथोक्तदेवतानाममंत्रै:प्रणवादिचतुर्थ्यं
तै:प्रत्येकमष्टाविंशत्यवरसंख्यतिलाहुतीर्हुत्वामुव्यापतितिलावापंकृत्वातिगुडसंमिश्रमंजल्यर्द्धमितं
पय:पिवेत्॥तत्रमंत्र:सतिलंगुडसंमिश्रमंजल्यर्द्धमितंपय:॥मार्कंडेयवरंलब्ध्वापिवाम्यायुष्यवृद्ध
यइति॥ततोगुरुंसंपूज्यतस्मैदक्षिणांदद्याद्ब्राह्मणांश्चभोजयेदिति॥तद्दिनेनियमाश्चस्कांदे॥खंडं
नेनखकेशानांमैथुनाध्वानमेवच॥आमिषंकलहंहिंसांवर्षवृद्धौविवर्जयेदिति॥जन्मतिथिद्वैधे
निर्णयोवृद्धगार्ग्यमार्कंडे॥घस्रद्वयेजन्मतिथिर्यदिस्यात्कुर्यात्तदाजन्मभसंयुतांच॥असंगताते
नदिनद्वयेचेत्सूज्यापराथाभवतीदयत्वादिति॥यत्तुशौनक:॥अथस्वजन्मनक्षत्रेस्नात:शुक्लां
वरोनृप:॥कृतकौतुकबंधश्चसर्वाभरणभूषित:॥नक्षत्रदेवतापूजांकुर्याद्गुरुसमन्वित:॥आ
चार्येणैवहोतव्योहोम:सर्वत्रभूपते:॥स्थंडिलाद्याज्यभागांतंकृत्वासर्वंयथाक्रमं॥दूर्वाघृताक्ता

Indira Gandhi National
Centre for the Arts

संकौ० जुहुयाद् दशांतरशताहुती॥ यद्दैवतं च नक्षत्रं मंत्रस्तद्दैवतः स्मृतः॥ ततः स्विष्टकृता सर्वं होमशे
११६ षं समापयेत्॥ गोभूहिरण्यवस्त्राद्यैर्ब्राह्मणान् पूजयेन्नृपः॥ दुःखार्त्तान् सर्ववर्णांश्च मोचयेन्नृप
तिस्ततः॥ द्विजान् सर्वांस्तथाभ्यर्च्य पूजितव्यान् स्वबांधवान्॥ नहि स्यात्सर्वभूतानि तद्दहस्तु विशेषतः
॥ एवं समाचरन् राजा सुखी भवति सर्वदेति॥ तद्राज्ञां नैषत्येव जन्मनक्षत्रमात्रे विहितमिति न ज्ञा
॥ एवं समाचरन् राजा सुखी भवति सर्वदेति॥ तद्राज्ञा नैवत्येव जन्मनक्षत्रमात्रे विहितमिति नज्ञा
सणादीनं प्रत्युद्दीत तिथिकृत्यांतर्गतत्वेन वक्तुमुचितं॥ एवमन्यदप्यूह्यं॥ ब्रह्मपुराणोक्तमृत्युंजयदे
वताकदूर्वाहोमस्यापि जन्मर्क्षे विहितस्य कोटिसूत्रवंधनागकस्य उक्ततिथिकृत्यांतर्गतत्वेन गृह
स्थब्राह्मणं प्रति वक्तुमनुचितत्वात् यत्किंचित्कुरुते कर्म वैदिकं वाप्यतांत्रिकं॥ कटिबंधनसंयु
क्तं तत्सर्वं निष्फलं भवेत्॥ शेष्यं कार्प्यसकं देमंप दसूत्रे कृतं तथा॥ वर्जयेत्कर्मकालेषु कांचं
॥ इति वर्धापनं॥ अथ चौलं तत्राश्वलायनः॥ त
विधो विशेषत इति पारिजाते आश्वलायनोक्तेः॥ इति वर्धापनं॥ अथ चौलं तत्राश्वलायनः॥ त
तीयेपंचमे वाब्दे चौलकर्म प्रशस्यते॥ प्राग्वा समे सप्तमे वा सहोपनयनेन वेति॥ उपनीतेः प्राग
तीयेपंचमे वाब्दे चौलकर्म प्रशस्यते॥ प्राग्वा: समे सप्तमे वा सहोपनयनेन वेति॥ उपनीतेः प्राग
युग्मे वेत्यर्थः॥ वसिष्ठः॥ तृतीये द्वे पंचमे द्वे स्वकुलाचारतोपि वा॥ चौलं शिशूनां यत्नेन स्वगृह्योक्तवि
धानतः॥ आधानतो जन्मतो वा सप्तमाब्दे पि कारयेत्॥ स्वकुलाचारत इति विहितकल्पानां व्यवस्था ११६
र्थं न तु कालांतरं॥ अत एव याज्ञवल्क्येन सामान्यतो प्युक्ताधिचूडा कार्या यथाकुलमिति॥ आधानतः प
गर्भाधानात्॥ अवधिर्वपस्य पूर्वत्राप्यन्वयः॥ नारदः॥ जन्मनस्तु तृतीये च श्रेष्ठमिच्छंति पंडिताः॥ पं

च मे सप्तमे वर्षे जन्मतो मध्यमं भवेत्॥ अधमं गर्भतः स्यात्तु दशमे कादशेपि वेति॥ दैवज्ञातः
॥ अयने चोत्तरे सौख्यं दाक्षिणे त्वशुभमावहमिति॥ तत्र विशेषो ज्योतिरर्णवे॥ मकरे सर्वसंप
त्तिं कुंभः संतानकारकः॥ मीने तु सर्वदा सौख्यं मेषे सर्वार्थसाधनं॥ विजयं वृषभे विंद्यान्मि
थुने वंशवृद्धिकृदिति॥ सारसंग्रहे ज्येष्ठमासि तथा मार्गे क्षौरं परिणयं व्रतं॥ ज्येष्ठपुत्रदुहित्रो
श्च यत्नतः परिवर्जयेदिति॥ हारिकास्थरं विस्त्यक्त्वा ज्येष्ठे ज्येष्ठस्य कारयेत्॥ अधिमासे तु यत्क्षौ
रं जन्ममासे च जन्मभे॥ नभवेत्तत्र कल्याणमिति शंसंति सूरय इति॥ मुहूर्त्तसंग्रहे॥ पूर्वपक्षः
शुभः प्रोक्तः कृष्णे चांत्यत्रिकं विनेति॥ पराशरः॥ पंचमी सप्तमी चैव दशम्येकादशी तथा॥ त्रयोदशी
तृतीया च चौलकर्म शुभावहा इति॥ वसिष्ठोपि॥ द्वित्रिपंचमसप्तम्यामेकादश्यां तथैव च॥ दशम्यां
च त्रयोदश्यां कार्यं क्षौरं विजानता इति॥ पराशरः॥ सितेज्यसौम्यवारेषु चौलं पक्षद्वये हितं॥ इंदुवारः
सितेपक्षे वाराः शेषा न शोभना इति॥ नारदः॥ दस्रादितीज्यचंद्रेंद्रपौष्णभानि शुभानि तु॥ चौलक
र्मणि हस्तर्क्षात् त्रीणि त्रीणि च विष्णुभादिति॥ बृहस्पतिः॥ हस्ताश्विविष्णुपौष्णानि श्रविष्ठादित्य
पुष्यभं॥ सौम्यचित्रेन्द्र चक्षौरे उत्तमान् वतारकाः॥ त्रीण्युत्तराणि वायव्यं रोहिणी वारुणं तथा॥ क्षौ
रे चलमध्यमाः प्रोक्ताः शेषा ह्यदशगर्हिता इति॥ लल्लः॥ हित्वैकं जन्मनक्षत्रं देतारे जन्मसंज्ञिते शुभदे

Indira Gandhi National
Centre for the Arts

सं०कौ० ॥उद्वाहे चोपनये यात्रामन्नभोजने क्षुरकार्यमिति॥राजमार्तंडः॥क्षौरं प्रशस्तं मृगचापमीनेकन्यावि
१२० कुंभे मिथुने वृषे चेति॥अत्र कुंभविधिर्मध्यंतराभावे कुंभः कुलविनाशाय कथितः क्षुरकर्मणि॥कु
भेदृष्टोथ वायुक्तो नक्षुनः कुंभनत्स देति॥भृगुः क्षष्टिः प्रयाणं क्षौरं मध्येवर्त्यं यथाष्टम इति॥क्षष्टिः कथ
णं॥मध्ये द्वितीयादि क्षौरे॥पारिजाते॥नर्मदोत्तरदेशे तु सिंहस्थे देवमंत्रिणि॥शुभे कर्म न कुर्वीतानि
षेधो नास्ति दक्षिण इति॥मातरि गर्भिण्यां व्यवस्था माह नारदः॥सूनोर्मातरि गर्भिण्यां चूडाकर्म न का
रयेत्॥पंचाब्दात्प्राग यो वर्द्धं तु गर्भिण्यामपि कारयेत्॥सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यत इति
॥अत एव केश्चिदुदाहृतस्य सूनोर्मातरि गर्भिण्यां मौंजीचूडे न कारयेदित्यस्य वचसः समूलत्वे पिप्रत्ये त ८
कमेव निषेधो न सहितयोः॥पंचाब्दानि पूर्यंते यस्मिन् दिने सं चाद्यं॥प्रकारांतरेण निषेधापवादम
ह वसिष्ठः॥गर्भे मातुः कुमारस्य न कुर्याच्चौलकर्म तु॥पंचमासादधः कुर्यादत ऊर्ध्वं न कारयेत्॥पंचमा
सा गर्भसंबंधिनः पूर्यंते यस्मिन् दिने तत्पंचमासं॥मातरि रजस्वलायां वृद्धगार्ग्यः॥विवाहव्रतचूडा
सु माता यदि रजस्वला॥तस्याः शुद्धेः परं कार्यं मांगल्यं मनुरब्रवीत् इति॥यदा चौलादि प्रारंभोत्तर १२०
रजः॥प्रारंभात्प्रागपि रजसि मुहूर्त्तांतराभावो वा तदा शांतिं कृत्वा तदैव कार्यं॥यथोक्तं कारिकानि
बंधो स्मृतिकौदकयोः शुभो गां दद्याद्धोमपूर्वकं॥प्राप्ते कर्मणि शुद्धास्यादितरस्मिन्न शुध्यति॥अ

लाभे सुमुहूर्त्तस्य रजोदोषे उपस्थिते॥श्रियं संपूज्य तत्कुर्याद्दत्त्वा रत्नान्ययंकरीं॥हेमा मापमितां प्रा
श्रीसूक्तविधिनार्चयेत्॥प्रसन्नं पायसं हुत्वाग्निं विप्रान् सुभमाचरेदिति॥श्लोकभेदेन प्राप्तपदोक्तार
प्रस्य मुहूर्त्तांतरालाभस्य च श्रवणान्न परस्परसापेक्षत्वं॥प्रकारांतरेण चौलनिषेधं कात्यायनः कुले
स्नतुत्रयादर्वाङ्मुंडनान्न तु मुंडनं॥प्रवेशान्निर्गमो नेष्टो न कुर्यान्मंगलत्रयमिति॥स्नतुत्रयं षण्मासाः
कुलं त्रिपुरुषं॥पुरुषत्रयपर्यंतं प्रतिकूलं स्वगोत्रिणां॥प्रवेशान्निर्गमस्तद्वत्तथा मंडनमुंडने इति मेधाति
थ्युक्तेः॥तथा कुले चतुःपुरुषपर्यंतं सपिंडीकरणं तत्रैव कर्मसमाप्तेः प्रागाभ्युदयिकं कर्म न कार्यमित्यपि स
॥प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियं॥आचतुर्थं ततः पुंसि पंचमे शुभदं शुभदं भवेदिति॥अत एवानिर्वे
र्त्यत्र समानकर्तृकत्वमविवक्षितं पदोर्वशं नरः श्रुत्वा सर्वपापैः प्रमुच्यत इति रत्॥मुंडनादिस्वरूपम
पिकात्यायनः॥पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः॥मुंडनं चौलमित्युक्तं व्रतोद्वाहौ तु मंगलं॥
चौलं मुंडनमेवोक्तं रजेयद्वरणात्परं॥वरणान्तदुपक्रमका वाग्दानादित्यर्थः॥मौंजीचोभयतः कार्यं
यतो मौंजी न मुंडनमिति॥उभयतो विवाहात्प्रागूर्ध्वं चेत्यर्थः॥वृद्धमनुः॥एकमातृजयोरेकवत्सरे पुरुष
द्वयोः॥न समानक्रियां कुर्यान्मातृभेदे विधीयत इति॥तथा रंभोत्तरं स्ततके प्राप्ते विशेषः संग्रहे कूष्मां
डीभिर्घृतं हुत्वा गां च दद्यात्पयस्विनीं॥चूडोपनयनोद्वाहव्रतिष्ठादिकमाचरेदिति॥अथ प्रयोगः॥कर्त्ता

Indira Gandhi National
Centre for the Arts

व्रीहियवानां तिलमाषाणां पात्राणि च पूरयित्वा नडुहं च गोमयं कुशमिश्रं च के
शपिंशिति ग्रहणाया दर्शनवनीतं लोहक्षुरं चोत्तरत उपस्थाप्येति शांग स्थे

पात्रासादनपूर्वं तं कृत्वाधा
न्यानि पूरयेदिति स्मृतिः ८

संकौ० कृतमंगलस्नानं बालं कृत्वा स्वदक्षिणस्थितमात्रंके तमुपवेश्य देशकालौ संकीर्त्यास्य कुमारस्य बीज
१२१ गर्भसमुद्भवैनो निवर्हणबलायुर्वर्चोभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चौलकर्म करिष्येतृतीये वर्षे इति
सद्योपनीतस्येति वा संकल्प्य गणेशपूजादि नांदीश्राद्धांतं कृत्वा अग्निप्रतिष्ठापनं तद्ध्यानांतं कृत्वा आघारा वा
ज्येनेत्यंते त्रिरग्निं पवमानं प्रजापतिं चेति प्रधानदेवता आज्येन शेषेण स्विष्टकृतमग्निमित्यादि ॥ पूर्णपात्र
निधानांते कृते प्रणीतानामुत्तरतो दर्भेषु व्रीहियवमाषतिलैः पृथक् पूरितानि नव निशरावाण्येकैकशः
प्राक्संस्थानि सादयेत् ॥ अथान्यत्स्यादथापरमिति कारिकायामथशब्देनैकैकश आसादनप्रतीतेः ॥ मातु
पूर्वभागेऽग्नेः पश्चादानडुगोमययुतं शरावं शमीपर्णशरावं च निदध्यात् ॥ यवानामसंभवे तत्स्थ इति व्रीहि
भिः पूरयेदिति गोमयमनूमिस्पृष्टमिति च जयंतः ॥ अनड्वान् शकटवहनसमर्थो बलीवर्दः मातुर्दक्षिण
तः पिता ब्रह्मा वा एकविंशति कुशपिंजूलानि धारयन्नास्ते अत्र विशेषं जयंतः ॥ पितुरसंभवे त्वस्मिन्वाक
र्तरि ब्रह्मधारणं वा अपितथ्य इति तदा ब्रह्मानित्य इति प्रतीयते ॥ अस्मिन्नेव काले ताम्रमयक्षुरं परियद २
इत्यपि सः ॥ अतः प्रक्षालितः प्रागग्नेः समीपे निधेयः ॥ ततः कर्ता धारां तं कुमारेणान्वारब्धः कृत्वाग्न आयूं १२१
षीति तिसृणां शतं वैखानसा ऋषयः अग्निः पवमानो देवता गायत्री छंदः चौलप्रधानाज्यहोमे विनियोगः ॥ ति
सृभिर्जुहोति ॥ अग्नये पवमानायेदं ॥ प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् ॥ चौलप्रधाना० प्रजापतइ
[illegible]
[illegible] तरे

[illegible]

+ पश्चात्स्थित्वा पिता शीतजलमादाय पाणिना दक्षिणेनापसव्येन पाणिनोष्णजलं तथा दक्षिणेपरयोस्त+
+ स्यानि नयेत्केशपक्षयोः ॥ उष्णेन वाय मंत्रेण जलधारे तयोश्च तेः इत्याश्वलायनस्य तरे + २
तिजुहुयात् ॥ प्रजापतय इदं ॥ अथ कर्ता शिशोः पश्चिमतः स्थित्वा शीतजलपात्रे दक्षिणवामपाणिभ्यामा
दाय पात्रांतरे प्राङ्मुखो युगपत्सिनयति ॥ ॐ उष्णेन वायउदकेनेहीति ॥ मदानसादुष्णमानीय — रावेष
त्वा शरावांतरे शीत — दायोरूपकारेण शरावांतरे सिंचतीति जयंतः ॥ तासामयामेकदेशं पा
त्रांतरे गृहीत्वा नवनीतेन तद्भावे दधि इत्सेन मिश्रयेत् ॥ दध्नो रसमुपादत्ते नास्ति चेन्नवनीतक
मिति कारिकोक्तेः ॥ ताभिरद्भिः कुमारशिरो वामकर्णमारभ्य प्रदक्षिणं त्रिः क्लेदयति ॥ उं अदि
तिः केशान्वपत्वापउंदंतु वर्चस इति मंत्रं प्रतिक्लेदनमावर्तयेत् ॥ तत एकविंशति पिंजूलमध्ये
त्रीण्यादाय कुमारस्य दक्षिणे केशपक्षे अग्रस्यामयाणि निदधाति ॥ दक्षिणकेशपक्षेऽथ वालस्याग्री
न कुशांकुरात् ॥ बालाभिमुख्यपर्यंतान्पवित्वा मंत्रमोषधे ॥ त्रायस्वेनमिति न्यस्येदिति शौनकः
॥ कुमाराभिमुखं पश्चिमाग्रान् कृत्वा मंत्रेण निधानमिति पारिजाते ॥ केशपक्षे कुमारस्य हृदयंगम
कुशत्रयमिति कारिकाकारः ॥ अग्रैर्हृदयं आलिखन्निव विदधातीति जयंतः ॥ जयंतानुसारिपारि
जातमते कुमाराभिमुख्येन पश्चिमाग्रान् कृत्वा निधानं प्रागग्राणां ॥ तस्य नित्याः प्रांच इति परिभा
षायाः ॥ जयंतानुसारिकारिकामते तु हृदयाभिमुखाग्रत्वं ॥ युक्तं चेतत् ॥ आत्मानं प्रत्यभिमुखत्व
त्र हृदयाभिमर्शनस्येव सर्वयाज्ञिकसंमतत्वात् ॥ तेषु पिंजूलेषु स्वधिते निदधाति आगग्राणि कृत्वा

Indira Gandhi National
Centre for the Arts

संकौ० स्वधिते मैनं हिंसीरिति॥ ॐ येनावपत्सविता क्षुरेण यथा सादिति सकेशान् पिंजूलानि छित्त्वा प्रागग्राणि
१२२ कृत्वा सादितशमीपर्णैरकीकृत्य शिशुमातृहस्ते निदधाति सा नडुद्गोमये निदधाति प्रथमनिधाने प्राग
ग्रत्वनियमोस्ति॥ न द्वितीय इति देवत्रातः॥ ततो मध्यं छित्त्वा केशस्पर्शनिमित्ताशुचित्वनिवृत्त्यर्थो जलस्पर्शः
कार्यः॥ एवमुत्तरछेदनेषु समंत्रकं पिंजूलनिधानादि॥ ॐ येन धाता द्वितीये छेदने मंत्रः॥ ॐ येन भूयश्च रा
त्र्यामिति तृतीये॥ उक्तत्रिमंत्रैश्चतुर्थं॥ चत्वार्येवं दक्षिणतः छेदनानि॥ एवमुत्तरतः प्रत्येकं मंत्रैस्त्रीणि
कृत्वा क्षुरधारामग्रतआरभ्यामूलं मंत्रेणानिमृजेत् यत्क्षुरेण मर्चयता सुपेशसेति॥ ॐ शीतोष्णाभि
रद्भिरवर्थं कुर्वाण इति प्रैषेण नापितमनुशास्य प्रैषार्थमवबोधयेत्॥ ततो नवनीतादिमिश्रितशीतो
ष्णावशिष्टाद्भिरार्द्रीकृतशिरसः प्राङ्मुखस्य कुमारस्य दक्षिणकर्णमारभ्य शिखां तच्छिखामारभ्य वाम
कर्णांतं वपनं कुर्वता नापितेन यथाकुलाचारं शिखास्थापनं कारणीयं॥ उदङ्मुखः प्राङ्मुखो वा वप
नं कारयेत्सुधीः॥ केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत्॥ दक्षिणं कर्णमारभ्य धर्मार्थं पायसं च
त्रि॥ शिखार्थं नवसंस्कारे शिखार्थं तं शिरो वपेदित्यपरा कौस्तिः॥ नवसंस्कारे प्रथमे चूडाकर्मोपनयना १२२
दौ प्रायश्चित्तार्थस्य द्वितीयादिः पापसंचयइत्यनेन संग्रहात्॥ पराशरमाधवीये लौगाक्षिः॥ दक्षिणतः क
मुजा वसिष्ठानामुभयतोत्रिकश्यपानां मुंडा भृगवः पंचचूडा अंगिरसो वाजिमेके मंगलार्थं शिखिनो

न्ये यथाकुलधर्मं चेति॥ कमुजा शिखा॥ वासिष्ठानामेकत्र वरिणामेकैव दक्षिणतो नियम्यते॥ आर्षेयाणां तु ति
स्रः॥ अत्रीणां कश्यपानां च द्व्यार्षेयाणां वामदक्षिणे द्वे शिखे॥ आर्षेयाणां मध्ये एका॥ भृगूणां वंशसमाचा
राविरोधेन मुंडत्वं तद्विरोधे तु आर्षेयाणां तिस्रः पंचार्षेयाणां पंच एवमंगिरसां पंचार्षेयाणां पंच आर्षेयाणां
तिस्रः एके पुनर्वाजिं॥ ललाटकर्णमूलस्पर्शिनीं मालामिव केशपंक्तिं मंगलार्थं कुर्वंति मंगलार्थत्वकी
र्त्तनेन तस्यासत्यामपि तदन्यशिखाधारणमावश्यकमिति ध्वन्यते॥ शिखिनोन्ये इति कुलधर्मत एव ते
षां देशनियमो नान्यः प्रकार इत्यर्थः॥ संख्यानियममाहाश्वलायनकारिकाकारः॥ शिखा अपि च कर्त्त
व्या कुमारस्यार्षसंख्ययेति॥ एवं चौलकालधृतशिखानां मध्ये मध्यशिखेतरशिखानामुपनयनका
ले वपनं कार्यं॥ मध्ये शिरसि चूडा स्याद्वासिष्ठानां तु दक्षिणे॥ उभयोः पार्श्वयोरत्रिकश्यपानां शिखा म
तेति वृद्धोदाहृतवचसि मध्यमशिखायां निमित्तविशेषसंयोगं विना विहितायानित्यत्वेन सदा बद्धशि
खेन चेति नित्यविधिविषयत्वोचित्यादितरशिखानामनुपनीतधार्यत्वेन माधवोक्तेश्चेत्यलं॥ वपनोत्तरं स्ना
पितं भूषितं कुमारं दक्षिणतो मातुरुत्संगे स्थापयित्वा स्विष्टकृदादि होमशेषं समापयेत्॥ व्रीह्यादिपात्रा
णि नापिताय दत्वा दशानां त्रयाणां वा ब्राह्मणानामन्नेन तर्पणं संकल्प्य भूयसीं दक्षिणां दत्वेश्वरार्पणं कुर्या
त्॥ अत्र त्र्यब्राह्मणभोजने नु तत्त्वतः प्रायश्चित्तमाह पराशरः॥ निर्वृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा

Indira Gandhi National
Centre for the Arts

संकौ० ॥चरेत्सांतपनं भुक्त्वा जातकर्मणि चैव हि॥ अतोन्येषु तु भुक्त्वान्नं संस्कारेषु द्विजोत्तमः॥ नियोगादुप
१२३ वासेन शुध्यते निंद्यभोजनादिति॥ चौलोत्तरं विशेषः स्मृत्यर्थसारे॥ विवाहमौंजीचौलोर्ध्वं वर्षमर्द्धं तदर्ध
कं॥ सपिंडाः पिंडान्नो दद्युर्गयायां दद्युरेव त इति॥ एवममंत्रा चौलक्रिया कुमार्या भवति॥ होमस्तु समंत्र
इति पारिजाते॥ होमोप्यमंत्रः कार्यो न वेति वृत्तिकृद्देवत्रातुश्च॥ जयंतस्त्वाह स्त्रिया मप्येवमेव होमक
मग्निस्थापनपूर्णपात्रनिधानांतं कृत्वोदकसमानयनादि क्षुरमार्जनपर्यंतमन्यमंत्रकं भवतीति॥ के
चित्कर्मावबोधनार्थ इति कृत्वाशीतोष्णाभिरिति प्रैषमिच्छंतीति च॥ आश्वलायनसूत्रे तो होमकृत्यं तु पुंव
त्स्यात् स्त्रीणां चूडाकृतावपीति॥ मनुः॥ अयंत्रिका तु कार्येयं स्त्रीणामावृदशेषत इति॥ एवं चामंत्रकं दी
मानुष्टानमुचितमिति प्रतिभाति॥ सूत्रमनुवाक्ययोः संवादात्॥ मंत्राणामपगमेपि तत्प्रमाणकदेवत
नां होमांगत्वसंभवेन तदुद्देश्यकत्यागसंभवात्॥ दक्षिणेत्रो प्राति प्रस्थात् कर्तकेदृशाति मुक्तिहोमा
नां बौधायनीयकल्पभाष्ये प्रसिद्धत्वाच्चेत्यलं॥ शूद्रस्याप्यमंत्रकं चूडाकर्मादिवयम्॥ शूद्रोप्येवंविधः का १२३
र्यो विनामंत्रेण संस्कृतः॥ न केनचित्समसृजच्छंदसा तं प्रजापतिरिति॥ अत एव तदीयचूडाकर्मणि लग्न
विशेषमाह गुरुः॥ चंद्रोदयांगनानां तु प्रशस्तः क्षुरकर्मणि॥ प्रशस्तः कथितस्तद्वच्छूद्राणां यमोदय
इति॥ चंद्रोदयश्चंद्रदेवताकं लग्नं॥ यमोदयः शनिदेवताकं लग्नं॥ न चैवं शूद्रस्य शिखाधारणं स्यात्त

अप्रसुप्ते जनार्द्दने इति मा०

च न शिखा नोपवीतं च नोच्चरेत्संस्कृतां गिरमिति प्रभासखंडवचो विरोध इति शंक्यं॥ पारंपर्येण शि
खाधारणादिसदाचारयुक्तसच्छूद्रविषयत्वाद्विधेः॥ निषेधस्य तदितरविषत्वात्॥ इति कौस्तुभे चौ
लं॥ अथाक्षरस्वीकारः॥ नृसिंहः॥ अक्षरस्वीकृतिः प्रोक्ता प्राप्ते पंचमहायने॥ उत्तरायणगे सूर्ये मा
सं विवर्जयेदिति॥ मुहूर्त्तसंग्रहे॥ उत्तरायणगे सूर्ये कुंभमासं विवर्जयेत्॥ पूर्वपक्षः शुभः प्रोक्तः कृष्णे चां
त्यत्रिकं विनेति॥ बृहस्पतिः॥ विद्यारंभो व्रतोद्देशः क्षौरं चैव विशेषतः॥ गलग्रहे न कर्त्तव्यं यदीच्छेत्सुतजी
वितमिति॥ गलग्रहस्वरूपं राजमार्त्तंडः॥ त्रयोदश्याश्चतुष्कं च सप्तम्यादिदिनत्रयं॥ चतुर्थी चैकतः
प्रोक्ता अष्टावेते गलग्रहा इति॥ त्यक्त्वोपे पंचमी॥ तस्याः प्रतिपत्सवमाह देवरातः॥ त्रयोदश्यन्तरेष्टेति
॥ मार्कंडेयः॥ वारे दिनेशारगुरुसुज्ञबृहस्पतीनां विद्वान् सो भवतीति॥ वसिष्ठः॥ रविवारे तु पूर्वाह्णे विद्या
रंभो विधीयते॥ चंद्रवारेऽपराह्णे तु विद्यागुर्वी विधीयत इति॥ महेश्वरः॥ हस्तादित्रितये तथा निऋर्ते
ति भे पूर्वात्रये श्विभे मित्रर्क्षे च मृगादिपंचसु शुभः प्रारंभ आद्यः स्मृतः॥ विद्यानां हरिभत्रये च दिन
से सूरेभृगो वा दिनेऽनध्यायास्य तदाद्य वर्जिततिथौ केंद्रस्थितैः सद्ग्रहैरिति॥ राजमार्त्तंडः॥ विद्या
रंभः प्रशस्तस्तो भवति मधुरिपौ प्राप्तबोधे शशांके शस्ते॥ तीक्ष्णाग्रुतो चात्रिदशायति गुरावुद्गते चाथ शु
क्रे॥ स्वाध्याये सिद्ध संस्कैरवरकिरणयुतं देवपूज्यं विहाय शुक्रादित्येज्यवारे त्रिदशयति गुरौ केंद्र

संकौ० १२४

स्त्वेरपाये॥ यावेनिषिद्धस्थानस्थिते॥ अक्षरारंभप्रकारस्तु माधवीये मार्कंडेयेनोक्तः॥ पूजयित्वा हरिं
लक्ष्मीं देवीं चैव सरस्वतीं॥ स्वविद्यासूत्रकारांश्च स्वविद्यां च विशेषतः॥ एतेषामेव देवानां नाम्ना तु जुहुया
त घृतं॥ दक्षिणाभिर्द्विजेंद्राणां कर्तव्यं चात्र पूजनं॥ प्राङ्मुखो गुरुरासीत वरुणाभिमुखं शिशुं॥ अध्याप
येत्तु प्रथमं द्विजातिभिः सुपूजितइति॥ अत्र नेन गुरुपूजनमपि कर्तव्यमिति सूचितं॥ सरस्वतीपूजनादि
प्रकारमाह पारिजाते गर्गः॥ स्नात्वाशुचौ समे देशे गोचर्ममात्रमुपलिप्य सैकतं स्थंडिलं कृत्वा पालाश
शाखया मृदं खनित्वा तस्यां सरस्वतीमावाहयेत्॥ भुवनमातः सर्ववाङ्मयस्वरूपेणागच्छगच्छेति ततः
[illegible] चमनीयगंधपुष्पाक्षतधूपदीपपायसगुडौदननैवेद्यसमर्पणनमस्कारान्कृत्वाचार्यं
शक्तितो वस्त्रालंकारादिभिः पूजयित्वा सरस्वतीविघ्नेशौ शार्याभिः प्रदक्षिणीकृत्य प्रणवपूर्वकमक्षर
मारभेत ततश्चाचार्याभिवंदनं कृत्वा सरस्वत्यादीनावाहनक्रमेण ह्रासयेद्विधा वृद्धिर्भवतीति॥ विद्या
रंभेतरे धात्रीपूजनमत्राधिकमुक्तं॥ ब्राह्मणानां च गुरूणां च देवतानामनंतरं॥ ततः संपूज्य विघ्नेन
धात्रीं रामगुरुं तथेति॥ गुरूणां पित्रादीनां गुरुमाचार्यं॥ इति कौस्तुभे अक्षरस्वीकारः॥ अथानुपनीतधर्माः १२४
॥ माधवीये विष्णुयु॰ भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते॥ अस्मिन्काले न दोषः स्यात्स याव
न्नोपनीयत इति॥ एतदपवादस्तत्रैव स्मृत्यंतरे॥ स्यात्कामचारभक्ष्योक्तिर्मदतः पातकादत इति॥ गोत

मः॥ यथोपपादितमूत्रपुरीषो भवति न तस्याचमनकल्पो विद्यते॥ न ब्रह्माभिव्याहरेदन्यत्र स्वधानि
नयनादिति यथोपपादिते स्पनेनादिवासंध्यासूदङ्मुखत्वं रात्रौ दक्षिणामुखत्वमित्यादिनियमाभावो
ज्ञाप्यते॥ कल्पग्रहणाद्धि रुन्मृत्स्यादीति कर्तव्यता निषेधो न त्वाचमनस्येव शुश्रूषेरं स्त्री च शूद्रश्च
सकृत्स्पृष्टाभिरंततइति याज्ञवल्क्यवचोव्याख्यावसरे चकारादनुपनीतोपीति विज्ञानेश्वरेणानुप
नीतस्याचमननिमित्ते स्त्रीशूद्रतुल्याचमनस्वीकाराच्च॥ रजस्वलादिस्पर्शे तु पारिजाते स्मृतिदीपि
कायां व्यवस्थोक्ता॥ शिशोरस्तु स्नानं प्रोक्तं बालस्याचमनं स्मृतं॥ रजस्वलादिसंस्पर्शे स्नानमेव कुमार
के॥ प्राक्चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः॥ कुमारकस्तु विज्ञेयो यावन्मौंजिनिबंधनमिति॥
विज्ञानेश्वरोक्तमनुपनीताचमनमपि कुमारावस्थायां बोध्यं॥ रजस्वलादिस्पर्शनिमित्तस्नानविधेस्त
न्निमित्ताचमनविधेश्च साहचर्यदर्शनात्॥ अन्यत्रेत्यादिना पितृकर्मणि दाहादावनुपनीतस्यापि मं
त्रोच्चारणं भवतीति ज्ञाप्यते॥ तदपि कृतचूडस्य त्रिवर्षस्य वा ज्ञेयं॥ अनुपेतोपि कुर्वीत मंत्रवत्पैतृमेधि
कं॥ यद्यसौ कृतचूडः स्याद्यदि स्यात्त्रिवत्सर इति सुमंतूक्तेः॥ अत्र चूडा प्रथमवर्षातिरिक्तवर्षकृता
ज्ञेया कृतचूडस्तु कुर्वीत उदकं पिंडमेव च॥ स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेदिति व्याघ्रव
चनस्य सुमंतुवचनाविरोधाय प्रथमवर्षकृतचूडविषयत्वात्॥ तथैव माधवादिभिरुक्तेः॥ य

Indira Gandhi National
Centre for the Arts

संकौ०
१२५

नुअसंस्कृतेनपन्यावद्ग्निदानं समंत्रकं॥ कर्त्तव्यमितरत्सर्वं कारयेदन्यमेव हीति तदपि प्रथमव
र्षकृतचूडं प्रत्येवाग्निदाने मंत्रप्रातिषसवार्थं॥ लाघवात् शेषस्याशक्तिप्राप्तार्थनुवादत्वसंभवात्‌नन्व
कृतचूडविषयं अत्यंताप्राप्तविशिष्टविधेरन्याय्यत्वात्॥ नापि सुमंतुवाक्यविषयैव शंकाविषयं॥ अ
ग्निदाने ऽकृतज्ञातिनिषिद्धिनिरासपरत्वकल्पनाया अन्याय्यत्वात्॥ एतच्चौरसविषयं॥ पित्रोरनुपनीतो
पि विदध्यादौरसः सुतः॥ और्ध्वदैहिकमन्ये तु संस्कृताः श्राद्धकारका इति स्कांदात्॥ भिव्याहारये
त्र लयावन्मौंजीन बध्यते॥ मंत्राननुपनीतोपि पठेदेवैकऔरस इति सुमंतूक्तेश्च॥ इति कौस्तुभे
नुपनीतधर्माः॥ अथ बालपितृधर्माः॥ विष्णुधर्मोत्तरे अपथ्यं नच बालानां तथाभार्गवपश्यतां
॥ पश्यद्भिः पित्रादिभिरपथ्यं निवारणीयमित्यर्थः॥ बालकाश्चानुनेयाः स्युर्धर्मकामैः सदा नरैः॥ तेषां
भोज्यप्रदानेन गोदानफलमाप्नुयात्॥ तेषां क्रीडनकं दत्वा मोदते नंदने दिवि॥ तस्मात्सर्वप्रयत्नेन
बालानग्रेतु भोजयेत्॥ अभुक्तवत्सु बालेषु नचाश्नीयात्कदाचनेति॥ कौस्तुभे पितृधर्माः॥ अथो
पनयनं योगरूढमेतत्पदं॥ आचार्यसमीपनयनांगको गायत्र्युपदेशो द्विप्रधानं॥ गायत्र्या ब्रा १२५
ह्मणमसृजदिति श्रुतौ॥ गायत्र्या ब्राह्मणमुपनयीतेति कात्यायवाक्ये तत्र द्वितीयजन्मास्य मौंजी
बंधेन चिह्नितं॥ सातस्यामाता सावित्रीति मनुवाक्ये ऽत्रास्य माता सावित्रीति गौतमवाक्ये चा द्वि

जत्वसंस्कारे गायत्रीहेतुत्वसंकीर्तनस्य गायत्र्युपदेशहेतुकत्वाशयेनैव वर्णनीयत्वात्॥ समिद्धर्शादि
पदस्येवांगवाचित्वेनोप्युपनयनपदस्य तत्संबंधेन प्रधानसंज्ञात्वोपपत्तेः॥ अत एवापरार्केणोक्तं उप
नयनं नाम बटोर्गायत्रीसंबंधकरणं तच्चाचार्यकर्तृकं॥ अधीहि भो रिति बटोराचार्यप्रयोजकव्यापार उप
नयनं अष्टवर्षं ब्राह्मणमात्मानमुपनाययेदिति बुधस्मृतौ स्पष्टाभिधानादिति॥ यद्यपि कल्पतरुणा
ष्टुधवचनं पित्राद्युपनेत्रभावविषयमिति व्याख्यातं॥ यद्यपि च मेधातिथिनापि तुरभावेऽन्यस्य न मति
नामाणवकेनात्मोपनाययितव्यः॥ गौतमं प्रति जाबालस्य ब्रह्मचर्यं भगवति वत्स्यामीति प्रार्थनालिंग
दित्युक्तं॥ तथापि वाद्भिः प्रयोगप्रार्थनादिव्यापारांतरस्याणिजत्वांगीकारेणोपनापनपद एवापरार्को
क्तार्थादतिरिक्तार्थी गीकारस्तु योनेतृपनयनशब्दे तदुक्तार्थत्याग इति मंतव्यं॥ अथोपनयनाधि
कारिणः॥ तत्र वृद्धगर्गः॥ पितापितामहो भ्राता ज्ञातयो गोत्रजाग्रजः॥ उपानयेधिकारी स्यात्पूर्वा
भावे परः पर इति॥ भ्राता पितुर्भ्राता॥ पितैवोपनयेत्पुत्रं तदभावे पितुः पिता॥ तदभावे पितुर्भ्रातात
दभावे तु सोदर इति पितामहस्मरणात्॥ अग्रजा इत्यत्र आकारलोपः छांदसः॥ तथाच ज्ञातिपदोक्ते
षु सपिंडेषु तदतिरिक्तेषु च गोत्रजेषु ये ग्रजा वृद्धा वृद्धोऽपेक्षयेत्यर्थः॥ उपनेयकनिष्ठाचार्यत्वस्य
निषिद्धत्वात्॥ यत्तु असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैरिति योगीश्वरवचः तत्पिताम

Indira Gandhi National
Centre for the Arts

सं०कौ०
१२६
दवचोनुरोधेनपित्व्याभावविषयं॥पित्राद्युक्ताधिकार्यभावेकर्त्तारमाह शौनकः॥कुमारस्योप
नयनंश्रुताभिजनवृत्तवान्॥तपसाधूतनिःशेषपाप्माकुर्याद्विजोत्तमइति॥आचार्यकुर्यादित्यधिक
त्यव्यासोपिवेदैकनिष्ठंधर्मज्ञंकुलीनंश्रोत्रियंशुचिं॥स्वशाखाध्ययनालस्यंविप्रंकर्त्तारमीप्सित
मिति॥श्रोत्रियलक्षणंब्राह्मे॥जन्मनाब्राह्मणोज्ञेयःसंस्कारैर्द्विजउच्यतेविद्यत्वाद्यापिविप्रत्वंत्रिभिः
श्रोत्रियउच्यतइति॥अविद्वत्कर्तृकोपनयनेदोषमाहश्रुतिरुभयोस्तमसोवाएषतमःप्रविशति
यमविद्वानुपनयतेयश्चाविद्वानिति॥नचैतद्वचनेभ्यःकृत्स्नशाखाध्यापिनएवाचार्यत्वंनैकदे
शाध्यायिनइतिशंक्यं।गोमधुपर्कार्हौवेदाध्यापआचार्यस्त्विक्स्नातकोराजाधर्मयुक्तश्चेतिधर्म
प्रश्नव्याख्यावसरेउज्वलाकृताअतएवचैकदेशाध्यायिनाव— त्विगाचार्यौसंभवतइत्यभिधानात्
॥बटूपनेत्रोरधिकारसिद्ध्यैप्रायश्चित्तमाहपार..रजातेवृद्धविष्णुः॥कृच्छ्रत्रयंचोपनेतात्रीन्कृच्छ्रांश्च
वटुश्चरेदिति॥आचार्यस्यगायत्र्युपदेशेयोग्यतासिद्ध्यैजपमप्याहसएव॥सावित्रीमभ्यसेदग्निप
वित्राणिचसंस्मरन्॥सहस्रंद्वादशावृत्तंसावित्रीप्रजपेद्बुधः॥स्वाधिकारार्थमेवास्याःप्रदानार्थं
हितत्स्मृतमिति॥अग्निपवित्राणिअग्निःशुचिव्रततमइत्यादीनि॥संस्मरन्नितिलङादेशेनगायत्री १२६
जपंसंकल्प्यतस्मात्पूर्वंमानसजपएतेषांगायत्रीजपाधिकारसिद्ध्यर्थंकार्यइतिज्ञाप्यते॥इत्थंद्विस

स्मरणस्याप्यसेदित्युक्तभावनासमकालत्वंलभ्यतेसावित्रीपदसमानाधिकरणसहस्रपदस्यसं
ख्याविशिष्टसंख्येयपरत्वाच्चद्वादशावृत्तमित्यस्यनसंख्यायामन्वयः॥पंचपंचाशतस्त्रिवृतइत्यत्रत्रि
वृतामितिपरिणामाभावेपंचसंख्यायाइवपंचाशत्संख्यायांसंभवतितुविशेष्येएकसंख्यापरिच्छिन्ने
पिसंख्यान्तरपरिच्छिन्नान्वृत्तिविशिष्टस्यवक्तुंशक्यत्वात्॥ततश्चद्वादशाधिकसहस्रसंख्योजपःका
र्यइतितात्पर्यार्थः॥गायत्र्याःप्रदानार्थयोग्यताधिकारस्तदर्थमित्यन्यत्यार्द्धयोजना॥इत्युपनयनाधिका
रिनिर्णयः॥अथोपनयनकालः॥याज्ञवल्क्यःगर्भाष्टमेष्टमेवाब्देब्राह्मणस्योपनायनं॥राज्ञा
मेकादशेसैकेविशामेकेयथाकुलमिति॥गर्भाधानमवधिंकृत्वाजन्मतोवाष्टमइतिव्याख्या
माहविज्ञानेश्वरः॥गर्भग्रहणंसर्वत्रानुवर्त्ततेगर्भादेकादशेराज्ञोगर्भात्तुद्वादशेविशइतिस्म
र्त्यंतरादित्यप्याहद्वमाञ्जोपेवीनसिःगर्भपंचमेब्राह्मणमुपनयेद्गर्भाष्टमेवा॥गर्भैकादशेरा
जन्यंगर्भद्वादशेवागर्भद्वादशेवैश्यंगर्भषोडशेवेति॥अत्रकामसंयोगंविनागर्भाष्टमात्पूर्व
पाठेनगर्भपंचमस्यापिनित्यत्वंज्ञाप्यते॥बौधायनः॥गर्भादिःसंख्यावर्षाणांतदष्टमेषुब्राह्म
णमुपनयेत्राजन्यमेकादशेवैश्यंद्वादशइतितदष्टमेषुगर्भाष्टमेषुबहुवचनंषष्ठसप्तयोःसं
ग्रहार्थं॥यस्मिन्वर्षेगर्भीभूत्वाशेतेसगर्भइतिहरदत्तःगर्भसहचरितोहिगर्भशब्देनोच्यतइतिमे

Indira Gandhi National Centre for the Arts

संको
१२७

रुचिः कर्कश्च॥ अष्टमाश्चांद्रश्चैत्रशुक्लप्रतिपदादिरिति केचित्॥ अन्ये त्वष्टममासारंभं गर्भा
धानं वारभ्य वर्षप्रवृत्तिरित्याहुः॥ तस्मात्पंचममिति पंचमीसमासः॥ एवं गर्भाष्टमादिशब्देषु द्रष्टव्यं
॥ उक्तवचनेषु अष्टमवर्षसंबंधेनैवाष्टवर्षत्वं न त्वतीताष्टवर्षत्वेनेति नित्यः कालः॥ अथ काम्यः उश
ना॥ जन्मतः पंचमे वर्षे ब्राह्मणस्योपनायनं॥ राज्ञस्तु षष्ठे वैश्यस्य सप्तमे तु बलार्थिनामिति॥ बौधाय
नः॥ अथ काम्यानि भवंति॥ सप्तमे ब्रह्मवर्चसकाममष्टमे आयुःकामं नवमे तेजस्कामं दशमे नाद्यका
मं एकादश इंद्रियकामं॥ द्वादशे पशुकामं त्रयोदशे मेधाकामं चतुर्दशे पुष्टिकामं पंचदशे भ्रातृव्य
वंतं षोडशे सर्वकाममिति भ्रातृव्यवंतमित्यनेनाभिचारकाममिति धन्यते हेमाद्रौ सप्तम इत्यारभ्य
पशुकाममित्यंतं बौधायनीयसदृशमापस्तंबवच उदाहृत्याद्यवाक्यद्वयम् ब्राह्मणविषयं शेषं व
र्णत्रयसाधारणमित्युक्तं॥ इति काम्यः कालः॥ गौणकालावधीनाह वर्णभेदेन याज्ञवल्क्यः॥
आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात्॥ ब्रह्मक्षत्रविशां काल औपनायनिकः पर इति य
द्यप्ययमाह अभिविधौ षोडशाद्ब्राह्मणविप्रस्येति शंखस्मृतेः तथापि गर्भादिः संख्या वर्षाणामि
त्युपक्रम्य षोडशाद्ब्राह्मणस्यापतिता सावित्रीति गौतमेनाभिधानात् पंचदशवर्षाण्येव गौणः १२७
काल इति मंतव्यं॥ अत एव यमः॥ सावित्री पतिता यस्य दशवर्षाणि पंच च॥ सशिखं वपनं कृ

त्वा व्रतं कुर्यात्समाहितः॥ एकविंशतिरात्रं च पिबेत्प्रसृतिपावकं॥ हविष्यं भोजयेच्चैव ब्राह्मणा
न्सप्त पंच वा॥ ततो पावकशुद्धस्य तस्योपनयनं स्मृतमिति॥ इदं चोक्तावधिगौणकालानंतरसंव
त्सरे संभवदुपनयनस्य ज्ञेयं॥ तदुत्तरोत्तरसंवत्सरेषु तूक्तमेण मनूक्तं कृच्छ्रत्रयमापस्तंबोक्तं द्वैमा
सिकं त्रैविद्यकं ब्रह्मचर्यं वासिष्ठोक्तं त्रिरात्राधिकमासचतुष्टयसाध्यमुद्दालकव्रतं तदुक्तमेवाश्व
मेधावभृथस्नानं॥ तदुक्तमेव व्रात्यस्तोमानुष्ठानमिति व्यवस्थया कृतप्रायश्चित्तानामुपनयनं बो
ध्यं॥ अथोपनयनेऽयनादिनिर्णयः॥ तत्राश्वलायनः॥ उदगयन आपूर्यमाणे कल्याणे नक्षत्रे चौल
कर्मोपनयनगोदानविवाहा इति कल्याणं ज्योतिःशास्त्राविरोधीति वृत्तिकृत्॥ उदगयननियमापवा
दमाह वृद्धवासिष्ठः॥ विप्रस्य क्षत्रियस्यापि मौंजी स्यादुत्तरायणे॥ दक्षिणे तु विशां कुर्यान्नानध्याये न सं
क्रमे इति॥ वर्णविशेषं प्रति ऋतुविशेषप्राशस्त्यमुक्तं श्रुतौ॥ वसंते ब्राह्मणमुपनयीत ग्रीष्मे राज
न्यं शरदि वैश्यं वर्षासु रथकारमिति॥ अत्र माधवेनाकरण्यां तु रथकारः प्रजायत इत्युक्त
रथकारस्य वर्षाविधिः॥ तदीयोपनयने सप्रमाणत्वस्य विज्ञानेश्वरेणोपन्यासात् न तु सौधन्वन
स्य तस्योपनयने प्रमाणाभावात्॥ न चैवं विधिं प्रति वसंतनियमात्॥ विनर्तुना वसंते न कृष्णपक्षे
गलग्रहे॥ अनध्याये चोपनीतः पुनःसंस्कारमर्हतीति बृहस्पतिना वसंताभावे दोषकथनाच्च

Indira Gandhi National
Centre for the Arts

संको० त्तरायणस्य तं प्रति नित्यप्राप्ततया विधिवैयर्थ्यमिति वाच्यं केनापि निमित्तेन वसंतालाभे तदन्योत्तर
१२८ यणप्रापणार्थत्वात्॥ तथाच गर्गः॥ माघादिषु क्रांतकपंचमासाः साधारणा वा सकलद्विजानामिति
ट ॥ वृद्धगार्ग्यः॥ माघादिमासषट्के तु मेखलाबंधनं मतमिति॥ न चैवमेताभ्यामेव शास्त्राभ्यां पौनरुक्त्यं उ
त्तरायणाभावे माघादिमासगोचरत्वेनानयोर्निवृत्ते उत्तरायणविधेरावश्यकत्वात्॥ न चोत्तरायण
विधिनैव माघादिमासप्राप्तेस्तच्छास्त्रं व्यर्थमिति वाच्यं॥ मकरार्कविशिष्टपौषनिषेधार्थत्वात्॥
पंचसंख्याविधेर्मिथुनार्कविशिष्टाषाढनिवृत्त्यर्थत्वाच्च॥ षट्संख्याविधेस्तु वैश्यं प्रति श्रावणादिनि
षेधार्थत्वात्॥ अस्ति हि तं प्रति दक्षिणायनविधिर्बृहस्पतिवृद्धवसिष्ठोक्तः॥ विप्रस्य क्षत्रियस्यापि
मौंजी स्यादुत्तरायणे तु विशां कुर्यान्नानध्याये न संक्रमे इति॥ शारदलाभे श्रावणाद्यन्यदक्षिणायन
प्रापकत्वस्य वक्तुमशक्यत्वाच्च॥ एवं च ब्राह्मणेन दक्षिणायने उपनयनं न कार्यं नापि पौषाषाढयोः
सत्यप्युत्तरायणे॥ उत्तरायणविशिष्टमाघादिपंचमासेषु कार्यं॥ तत्रापि मीनार्कप्रभृतियावन्मि
थुनप्रवेशं प्रशस्तः कालः॥ चांद्रसौरान्यतरवसंतलाभात्॥ मीनमेषयोर्वा वसंत इति बौधायनो १२८
क्तेः॥ मीनमेषयोस्तु प्रशस्ततरः॥ मृगकुंभगते भानौ मध्यमं मीनमेषयोः॥ उत्तमं गोयुगस्थेऽर्केऽध
मं चोपनायनमिति बृहस्पतिवचनात्॥ मृगो मकरः॥ गो वृषः॥ युगं मिथुनं॥ मीनार्कविशिष्टश्चैत्रो

ऽनेकनिषेधापवादकतया प्रशस्ततमः॥ मीनस्थितेऽर्के खलु चैत्रमासे शुभप्रदो ब्राह्मणमौंजिबंध इ
ति बृहस्पतिवाक्यस्य तदर्थत्वात्॥ अत एवोक्तं तेनैव गोचराष्टकवर्गाभ्यां गुरुशुद्धिर्न लभ्यते॥ तदोप
नयनं कार्यं चैत्रे मीनगते रवौ॥ शुक्रेऽनष्टे तथा जीवे दुर्बले चंद्रभास्करे॥ व्रतोपनयनं कार्यं चैत्रे
जीवभार्गवयोरस्ते सिंहस्थे देवतागुरौ॥ मेखलाबंधनं शस्तं चैत्रे॰ अमुमेवाशयेनाह राजमा
र्त्तंडः॥ वसंतसमये कुर्याद्दृष्टे गर्भाष्टमेऽपि वा॥ मेधावी मेखलाबंधं जन्ममासेऽथ जन्मभे इति
॥ अत्र वसंतपदं मीनार्कविशिष्टचैत्रपरं निषेधसामान्यापवादकत्वेन तत्कालस्यैवानि
षेधाविशेषापवादत्वबोधने लाघवात्॥ विप्रत्वेव तद्विशेषप्रशस्ततमत्वज्ञापने लाघवात्॥
गर्भाष्टमेऽपि वेत्यन्यथाभ्यां तदरोधन्यते॥ अत एव शौनकः॥ गर्भाष्टमे गर्गपराशराद्यैः फलं य
दुक्तं व्रतबंधने तु॥ ततोऽधिकं जन्मसुतारकासु मासेऽथवा जन्मनि वाडवानामिति॥ वाडवानां ब्रा
ह्मणानां॥ यन्मीनार्के जन्ममासे जन्मनक्षत्रे चोपनयनं कर्त्तव्यमिति तदनूद्य तद्गर्भाष्टमफलाधि
कफलमिति तात्पर्यार्थः॥ यत्तु राजमार्त्तंडः॥ जातं दिनं दूषयते वसिष्ठो ह्यष्टौ च गर्गो नियतं दशाऽत्रिः
॥ जातस्य पक्षं किल भागुरिश्च शेषाः प्रशस्ताः खलु जन्ममासि॥ जन्ममासे तिथौ भे च विपरीतद
ले सति॥ कार्यं मंगलमित्याहुर्गर्गभार्गवशौनका इति तन्मीनार्कचैत्रान्यकालविषयं॥ त्रिवि

Indira Gandhi National Centre for the Arts

संकौ० ष्युक्तः समये शुक्लः पक्षः प्रशस्ततमः॥ आपूर्यमाणपक्ष इत्याश्वलायनोक्तेः॥ कृष्णपक्षे त्रेधा विभक्ते तृती
१२६ यांशे निषिद्धः॥ मध्यमप्रथमांशो प्रशस्तप्रशस्ततरौ॥ शुक्लः पक्षः शुभः प्रोक्तः कृष्णश्चांत्यत्रिकां विनेति
बृहस्पत्युक्तेः॥ शुक्लपक्षः शुभः प्रोक्तः कृष्णपक्षे त्रिधाकृते॥ अंत्यभागं विनान्यौ द्वौ भागौ तौ मध्यमाधमौ
विति स्मृत्यंतराच्च॥ अथ तिथयो नृसिंहः तृतीया पंचमी षष्ठी द्वितीया चापि सप्तमी॥ पक्षयोरुभयोश्चैव
विशेषेण सुपूजिताः॥ धर्मकामौ सिते पक्षे कृष्णे च प्रथमा तथा॥ कृष्णे त्रयोदशी केचिदिच्छंति मुनय
स्तथा॥ द्वादश्येकादशी चैव मध्यमे च प्रचक्षत इति॥ धर्मो दशमी॥ कामस्त्रयोदशी ते अपि सिते कृष्णे
चेत्यन्वयः॥ प्रथमा तथा कृष्णे कृष्णे त्रयोदशीमिति मध्यमणिन्यायेनान्वयः॥ मध्यमे चैत्रपक्षद्वय इति बो
ध्यं॥ नारदः॥ एकां चतुर्थीं संत्यज्य कृष्णपक्षे तु मध्यमाः॥ आपंचम्यास्तु तिथयः पराः स्युरतिनिंदिता इति
॥ परास्तृतीयांशगताः॥ यस्तु प्रथमा तयेति प्रतिपद्विधिः स कृतप्रायश्चित्तशाल्योपनयनविषय प्रश
स्ता प्रतिपत्कृष्णे कदाचिच्छुभगो विधौ॥ चंद्रे बलयुते लग्ने वर्षाणामतिलंघन इति ज्योतिषोक्तेः॥ एवं चं
द्रे बलयुते लग्ने शुभमंशावेशु मेढिते। चतुर्दशी प्रशंसंति कुमारे वयसाधिक इति॥ चतुर्दशीविधि १२६
रपि॥ अतिलंघनाधिकशब्दाभ्यां गौणकालातिक्रमस्य विवक्षितत्वात्॥ अपराके न ष्टे चंद्रे ष्टमे
शुक्रे निरंशे भास्करे तथा॥ कर्तव्यं नोपनयनं नानध्याये गलग्रह इति निरंशस्वरूपमन्यत्रोक्तं राशेः

प्रथमभागस्थो निरंशः सूर्य उच्यते॥ युगादित्वादिनानध्यायानामपि प्रतिप्रसवमाह भारद्वाजः॥
याचे शाखसिताततृतीया माघस्य सप्तम्यथ फाल्गुनस्य॥ कृष्णे द्वितीयोपनये प्रशस्ता प्रोक्ता भरद्वा
जमुनींद्रमुख्यैरित्यत्र चैत्रसित तृतीया माघशुक्लसप्तम्यो मन्वाद्योः प्रतिप्रसवः॥ मन्वादियुत
योः स्मृत्यर्थसारे पाठात्॥ वैशाखतृतीयाया युगादेरपि॥ ज्येष्ठशुक्लद्वितीयातु आश्विने दशमी सि
ता॥ चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः॥ तासामपि तत्रैवानध्यायत्वमुक्तमिति ता अ
पि वर्ज्याः गलग्रहा उक्ता मुहूर्ततत्त्वे प्रतिपत्पूर्वं चतुष्कं नवमी पूर्वत्रयं चतुर्थी च॥ अष्टौ गलग्रहा
स्त्याज्या गर्गस्य मते तथा षष्ठीति॥ अत्राप्यपवादः षष्ठीसप्तमीत्रयोदशीनां विनियोगोपन्यासेन
दर्शितः॥ स्मृत्यंतरे॥ अनध्यायस्य पूर्वेद्युरनध्यायात्परेहनि॥ व्रतारंभं विसर्गं च विद्यारंभं च वर्ज
येदिति॥ एतदपवादोपि द्वितीया सप्तमी त्रयोदशी विनियोगेन दर्शितः॥ अयं गलग्रहापवादश्च
मृत्काद्युपनयनविषय इति केचित्॥ वासरनियममाह नारदः॥ गुरुशुक्रबुधानां तु वाराः श्रेष्ठ
तमाः स्मृताः॥ अधमः सोमवारस्तु सूर्यवारस्तु मध्यमः॥ वारौ मंदारयोर्वर्ज्यौ कृष्णे वर्ज्यो निशापतेः
॥ अस्तंगतस्य सौम्यस्य वारो वर्ज्यो द्विजन्मनीति॥ तथा शाखाधिपतिवारश्च शाखाधिपबलं तथा
॥ शाखाधिपतिलग्नं च दुर्बलं वर्जितं यत्र तद् इति॥ शाखाधिपवारानाह बृहस्पतिः॥ बह्वृचानां गुरो

Indira Gandhi National
Centre for the Arts

संकौ० रो यजुर्वेदजुषां कवेः॥ सामगानां धरासूनोरथर्वविदुषां रवेरिति॥ अमुनैव वाक्येन वर्कच शाखा
१३० धिपो गुरुरित्यादि ध्वन्यते॥ बलं गोचराष्टवर्गादिशाखाधिपबलासंभवे दोषमप्याह मदनरत्ने वृद्ध
गार्ग्यः॥ शाखाधिपे बलिनि केंद्रगते च मौंजीबंधस्तदीयदिवसेषु शुभाय प्रोक्तः॥ अस्मिन्नबले तरहि
ते तु पुनर्द्विजानां स्याद्वर्णसंकर इति प्रवदंति तद्ज्ञा इति तथा वर्णाधिपबलमप्यपेक्ष्यते॥ सदानुकूले
चेकस्मिन्वर्णेशे बलशालिनि॥ ब्राह्मणादेः प्रकुर्वीत कुमारं व्रतचारिणमिति पराशरोक्तेः॥
पतासिते [illegible] विप्राणां नृपाणां कुजभास्करौ॥ वैश्यानां शशभृत्सौम्याविति वर्णाधिपाः स्मृता इति तेनै
वव्यकस्याप्रदर्शनाच्च॥ मदनरत्ने राजमार्त्तंडः॥ पितुः सूर्यबलं श्रेष्ठं शाखावर्णेशयोर्वटोः॥ सर्वेषां
गुरुचंद्रर्क्षबलं श्रेष्ठं व्रतादिषु॥ मौंजीबंधे विवाहे च प्रतिष्ठायां विशेषतः॥ गोचरेणैव कर्त्तव्यं वेधं
बलमकारणमिति॥ सर्वेषामित्यनेन येषां न शाखाधिपो गुरुः॥ तेषामपि बटूनां तत्पितृणां च गुरु
बलमावश्यकं॥ उभयोरलाभे बटोरावश्यकमिति ध्वन्यते वैधं वामवेधप्रयुक्तं॥ गर्भाष्टमादि
नित्यकाले बटोर्गुरुबलालाभे शांत्या तद्ग्राह्मः॥ अनित्यकाले नैवमित्याह नारदः॥ बालस्य बल
हीनोपि शांत्या जीवो बलप्रदः॥ यथोक्तवत्सरे कार्यमनुक्तेनोपनायनमिति॥ अनुक्ते नित्यत्वे १३०
नेति शेषः॥ केषुचिदुष्टस्थानेषु स्थिते वृहस्पतौ शांत्यापि नोपनयनाधिकार इत्याह वसिष्ठः

॥ बंधोत्तनीये रिपुराशिसंस्थे इष्टतिपूजां दशमे सुरज्ये॥ नेष्टातिपूजां जनिगे व्ययस्थे पुरात
ना अष्टमगेपि सूराविति॥ बंधुश्चतुर्थः रिपुराशिः षष्टः जनिर्जन्मराशिः॥ व्ययो द्वादशो राशिः
॥ अतिसंकटे एतेष्वपि राशिषु पूजाहोमादेर्द्विगुणत्वादिरुद्धे कल्पनयोपनयनं कार्यं न तूक्तसंवत्स
रातिक्रमः कार्यः॥ तथा च गुरुः॥ तस्मात् ग्रहेभ्यः कालत्वाद्बलीसंवत्सरो मत इति॥ राशिविशेषस्थ
स्य गुरोरष्टमादिस्थानस्थितस्यापि नाधिकारप्रतिबंधकत्वमित्याह भरद्वाजः॥ धनुर्मीनकुलीरस्थो
जीवो जन्मोत्यमस्तु गः॥ अतिसौख्यं बटोः कुर्याद्वसिष्ठवचनं यथेति॥ धनुर्मीनौ हि गुरुस्वामिकौ
॥ यथाहुर्दैवज्ञाः॥ पंचानने रविर्विधोस्तु भं कर्कटके तथा॥ मेषवृश्चिकयोर्भौमः कन्यामिथु
नयोर्बुधः॥ गुरुर्धनुषि मीने च तुलायां वृषभे भृगुः॥ शनिस्तु मकरे कुंभे राशीनामधिपाः स्मृता इति
॥ कुलीरः कर्कः॥ स च गुरोरुच्चस्थानं यथाहुः॥ अजवृषभमृगांगनाकुलीरा झषवणिजौ च दिवाकरा
दितुंगा इति मृगो मकरः॥ कुलीरः कर्कः॥ झषो मीनः वणिक्तुला॥ वेदविशेषेण नक्षत्रविशेषविधिमा
तिर्निबंधो॥ मूले हस्तत्रये सार्पे श्रवे पूर्वात्रये तथा॥ ऋग्वेदाध्यायिनां कार्यं मेखलाबंधनं बुधैः॥ पु
ष्ये पुनर्वसौ पौष्णे हस्ते मैत्रे शशांकभे॥ ध्रुवेषु च प्रशस्तं स्याद्यजुषां मौंजिबंधनं॥ पुष्यवासवहस्ता
श्विशिवविष्णुमूलत्रयं॥ प्रशस्तं मेखलाबंधे बटूनां सामगायिनं॥ मृगमैत्राश्विनीहस्ते रेवत्यदिति

Indira Gandhi National
Centre for the Arts

वासवं॥ अथर्वशाखिनां शस्तो मगणोयत्रतार्पणे इति॥ हस्तत्रयं हस्तश्चित्रा स्वातीति॥ पूर्वात्र
यं पूर्वापूर्वाषाढापूर्वाभाद्रपदेति॥ शेवमार्द्रा॥ एषामसंभवे सारसमुच्चये॥ मघाग्नेयविशाखेंद्राश्च
म्यं हित्वा च वारुणं॥ व्रते शस्तानि सर्वेषां चेच्छाखोक्तं न लभ्यते॥ आग्नेयं कृत्तिका इंद्रो ज्येष्ठा॥ याम्यं
भरणी॥ वारुणं शततारका॥ शार्ङ्गधरीये श्रवणादित्यपौष्णादिद्वये हस्तत्रये मृगे॥ सर्वेषां मेख
लाबंधः शुभः प्रोक्तो द्विजन्मनामिति॥ आदित्यं पुनर्वसुः॥ स च सकलामशाखिव्यतिरिक्तविषयः
॥ व्यवस्थावाक्यानुसारेण अरकुसामशाखीतरानुपरस्य प्रवृत्तेन चंद्रतारानुकूलेषु यद्यप्युक्तेषु भेष्व
पि॥ पुनर्वसौ कृतो विप्रः पुनः संस्कारमर्हतीति राजमार्तंडवाक्ये नोक्तशाखिनः प्रत्येवम्यवस्थाव
क्यप्राप्तायाः पुनर्वसुनिवृत्तेः सर्वसाधारणविनियोगविधिनापवादप्रसक्तौ प्रतिप्रसवेलाघवात्
॥ वस्तुतस्तु ज्योतिर्विद्भिः प्रसिद्धवसिष्ठादिसंहितासूक्तं चिदपि पुनर्वसुनिषेधादर्शनात्तासु हेमाद्र्या
दिमहानिबंधेषु च पुनर्वसुविधेरेव प्रतीतेर्दाक्षिणात्यसकलशिष्टानां पुनर्वसावुपनयनाचारस्यो
पलंभाच्च राजमार्तंडवाक्यं निर्मूलं॥ समूलत्वेपि न यजुर्वेदिप्रभृतिविषयं॥ उक्तव्यवस्थौचित्यात॥ १३१
यत्तु विप्रपदोपेते तद्वाक्यबलेन यजुर्वेदादीन्प्रति पुनर्वसुविधिरेव क्षत्रियवैश्यविषय इति॥
तन्न॥ नक्षत्रांतरे वर्णत्रयसाधारणस्य तस्य तथात्वे वैरूप्यापत्तेः॥ जातिवाचकविप्रपदोपेतत्वेन

सामान्यशास्त्राद्व्यक्तिवाचिपदोपेतत्वेन विशेषशास्त्रस्योक्तविधेर्बलवत्त्वात्॥ सावकाशतया उभ
यत्र तुल्यत्वेनाविनिर्गमकत्वात्॥ आदित्यवारनिषेधान्नक्तविधेर्बलवत्त्वे महानिबंधोक्तन्यायेन कल्प
निषेधातत्क्षणविधेः सुतरां प्रबलत्वाच्च प्रतिप्रसवत्वप्रयुक्तलाघवस्य सामान्यप्रवृत्तशास्त्रसंकोचक
तायाः योग्यपेक्षणादोषत्वेन तद्विरुद्धकल्पनाया अन्याय्यत्वाच्च विप्रान्प्रति सर्वथैव पुनर्वसुनिषेधे
सर्वेषां द्विजन्मनामिति वदुत्वोक्तेः द्विजन्मद्वये नुपपत्तेश्च॥ अस्मान्मते तूक्तनिषेधस्य निर्मूलत्वेन्यशा
खिनोपि प्रति अनुकल्पत्वेन पुनर्वसुविधेरंगीकारेण तदुपपत्तेः॥ समूलत्वेपि यजुर्वेदात्मकत्रिवर्ण
विषयत्वात्॥ योगेषु व्यवस्थामाह श्रीपतिः॥ सवैधृतिस्तु व्यतिपातमामासर्वाप्यनिष्टः परिघस्य चार्ध
॥ तिस्रस्तु योगे प्रथमे सवज्रे व्याघातसंज्ञेन व पंच शूले॥ गंडेतिगंडे च षडेव नाड्यः शुभेषु कार्येषु वि
वर्जनीया इति॥ उक्तान्यविषयेत्वाह बृहस्पतिः॥ शिष्टाष्टादशयोगेषु प्रशस्तो ह्युपनायनमिति॥ कर
णे व्यवस्थामाह स एव॥ बवादीनां तु षट्कं स्यादुपनाये सुपूजितं॥ शकुन्यादीनि विष्टिं च वर्जयेच्च विशे
षत इति॥ दिनभागव्यवस्थामाह मनुः॥ सर्वदेशेषु पूर्वाह्णे मुख्यं स्यादुपनायनं॥ मध्याह्ने मध्यमं प्रोक्तं अ
पराह्णे च गर्हितमिति॥ एवं व्यवस्थितेपि शुभकाले निमित्तविशेषेण निषेधमाह॥ गर्गः॥ अदेरविंद्रो
रवनिप्रकंपे वातद्रुमोल्कापतनादिदोषे॥ त्र्यहं तेदशाहानि वदंति तज्ज्ञास्त्रयो दशाहानि वदंति केचित्

Indira Gandhi National
Centre for the Arts

सं०कौ०
१३२

ति॥वर्ज्यानीतिशेषः॥अन्यत्र तु दाहे दिशां चैव धरायाः कंपे वज्रप्रपाते च विदारणे च केतोस्तथोल्कां शुक्रपा(त)
पाते अर्द्धं न कुर्याद्धृतमंगलानीति॥अत्राष्टकाणोतिपदेन निमित्तलाघवपरतदितिसूच्यते॥तथा लल्लः॥व्रते
द्धि पूर्वसंध्यायां वा रिक्तोयदि गर्जति॥तद्दिने स्यादनध्यायो व्रतं तत्र विवर्जयेदिति॥यत्तु ज्योतिर्निबंधे नांदीश्रा
द्धे कृते चेत्स्यादनध्यायस्त्वकालिकः॥तदोपनयनं कार्यं वेदारंभं न कारयेदिति एतन्नवकृचाविषयं॥ते
षामुपनयने वेदारंभाभावे न निषेधासंभवादिति बहवः॥केचित्तु कार्यमित्येतं सर्वसाधारणं निषेधस्तु
संभवत्याश्विकविशेषविषयोस्तु आर्षेयं वृणीत इत्यादेः साधारणत्वेपि याज्ञिकमतेन चतुरोवृणीत इत्या
दिनिषेधयोर्द्धामुष्यायणविषयत्ववदित्याहुः॥उपनयनोत्तरं गर्जितसंभावनायां सति गर्जिते चानुप्र
वचनीयात्प्रं(?)कंप्यत्कार्यं तदवसरे वक्ष्यामः॥अथोपकल्पनं॥सुमुहूर्त्तनिरीक्षणकाल एकमहतं कौपी
नधारणोत्तरमपरं॥अहतस्वरूपमाह प्रचेताः ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं॥अहतं तद्धि जानी
यात्सर्वकर्मसु पावनमिति॥तच्च कार्पासं॥शुक्लमहतं वासो ब्राह्मणस्य कार्पासमिति वसिष्ठोक्तेः
॥शाणं वा॥वसीरं नानुपूर्व्येण शाणक्षौमाविकानि चेति मनूक्तेः॥प्रावरणार्थमैणेयमजिनं
वासो वा॥ऐणेयेन वाजिनेन ब्राह्मणमित्याश्वलायनोक्तेः॥एणी विडरिहिता मृगी॥तत्संबंध्यैणेयं ॥१३२
तदभावे कृष्णदारिणं वा॥दारिणमैणेयं वा कृष्णं ब्राह्मणस्येत्यापस्तंबोक्तेः॥तच्च नोपस्तीर्यासीत

शयीत वा तथैव तदुक्तेः॥तत्परिमाह ऽ(?)शाकलः॥अखंडं वा त्रिखंडं वाष्टाचत्वारिंशदं
गुलं॥चतुरंगुलविस्तीर्णं धारयेदजिनं सदेति॥खंडत्रयमानव्यवस्थापि स्मृत्यंतरे अंगु
लं तु बद्धिर्लोमयद्वास्याच्चतुरंगुलं॥अजिनं धारयेद्विप्रश्चतुर्विंशाष्टषोडशैरिति॥चतुर्विं
शांगुल एकः अष्टांगुलो द्वितीयः षोडशांगुलस्तृतीयः॥एवं त्रिभिः खंडैरष्टाचत्वारिंशद
गुलं परिमंडलं धार्यमित्यर्थः॥उपवीतमाह मनुः॥कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृदिति॥ऊ
र्ध्ववृतमाह संग्रहकारः॥करं दक्षिणेनोर्ध्वंगतेन त्रिगुणीकृतं॥वलितं मानवैः सूत्रं शास्त्रे ऊर्ध्व
वृतं स्मृतमिति॥तन्निर्माणप्रकारः स्मृत्यर्थसारे शुचौ देशे शुचिः सूत्रं संहतांगुलिमूलके॥आवेष्ट्य
षण्णवत्या तत्त्रिगुणीकृत्य यत्नतः॥अब्लिंगकैस्त्रिभिः सम्यक्प्रक्षाल्योर्ध्ववृतं तु तत्॥अथ प्रदक्षिणावृ
तं सावित्र्या त्रिगुणीकृते॥त्रिरावेष्ट्य दृढं बध्वा हरिब्रह्मेश्वरान्नमेत्॥यज्ञोपवीतं परममिति मंत्रेण
धारयेत्॥सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकं॥सावित्र्या दशकृत्वोद्भिर्मंत्रिताभिस्तदुक्षयेदिति॥धारणेपि विशेषः श्रुत्यैवोक्तः॥दक्षिणं बाहुमुद्धरेते वधते सव्यमिति॥तथान्यच्च विच्छिन्नं
चाप्यधोपातं भुक्त्वा निर्मितमुत्सृजेत्॥परिमाणांतरमपि तत्रैवोक्तं यद्वेत्तु पक्रम्य ष्ट ष्ट देशे च ना
भ्यां च यद्भवति विंदते काटिं॥तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितं॥स्तनादूर्ध्वमधो नाभेर्न धार्यं तत्क
थं च न॥ब्रह्मचारिण एकं स्यात्स्नातस्य तस्य द्वे बहूनि वा॥ततीयमुत्तरीयं वा वस्त्राभावे तदिष्यते॥एतच्च

Indira Gandhi National
Centre for the Arts

संको० वस्त्रावरीपाभावेतृतीयोपवीतधारणं कर्मांगं॥ वंहूनि वेतिकाम्यं॥ बहूनि चायुष्कामस्येतिदेवलो
१३३ कः॥ अस्यकंगाङुल्लारणनिषेधं क्षालनार्थंचशाखाविशेषेणतदपवादमाहमनुः॥ मंत्रपूतं स्थितकाये
यस्ययज्ञोपवीतकं॥ नोद्धरेच्चततः प्राज्ञोयइच्छेच्छ्रेयआत्मनः॥ सकृच्चाधारणात्तस्यप्रायश्चित्तीभवेद्वि
जः॥ तैत्तिरीयाः कगाः काण्वाश्वरकावाजसेयिनः॥ कंगाङुल्लार्यसूत्रं तुकुर्युर्वैक्षालनं द्विजाः॥ बह्वृचाः
सामगाश्चैवपेचान्येयजुःशाखिनः॥ कंगाङुल्लार्यसूत्रं तु पुनर्दद्यातिसंस्क्रियां॥ संस्क्रियां मंत्रेणोपवीतांतर
धारणं॥ अभ्यंगे चोदधिस्नाने मातापित्रोर्मृते रुनि॥ कंगाङुल्लार्यसूत्रं तु कुर्याद्धि क्षालतं द्विज इतिएत
द्वाक्यबोधितविषयेष्वेवोक्तव्यवस्था बोध्या॥ मेखलामाहमनुः॥ मौंजी त्रिवृत्समाश्लक्ष्णा कार्याविप्रस्य
मेखला॥ त्रिवृतार्ग्रथिनेकेन त्रिभिः पंचभिरेववेति॥ आश्वलायनः॥ त्रिवृत्त्वा मेखला कार्या त्रिवारं स्या
त्समाहृता॥ तद्ग्रंथयस्त्रयः कार्याः पंचवासप्त वापुनः॥ वेदत्रयेणावृतोहमिति मन्येतसद्विजः॥ तद्ग्रंथयस्तद
गानितइदृस्यानि संस्मरेदिति॥ ग्रंथिसंख्यानां प्रवरसंख्यानुसारेण व्यवस्थितविकल्पो बोध्यः॥ मनुः॥
मुंजाभावे तु कर्तव्याकुशाश्मंतकवल्वजैरिति॥ दंडमाहाश्वलायनः॥ पालाशो ब्राह्मणस्येति केशसं
मितो ब्राह्मणस्येति च गौतमः॥ याज्ञेयो वासर्वेषामिति ऊर्ध्वं ललाटनासाग्रप्रमाणा इति च॥ अतएव के १३३
शांतत्वं मूर्धप्रमाणमिति केचित्॥ त्रिवृत्कटिसूत्रं कौपीनं भिक्षापात्रं कमंडलुमाचाराद्धि वादवदेदि
चसंपादयेत्॥ इत्युपकल्पनं॥ पूर्वसंस्कारातिपत्तौ तत्त्रिभिर्व्याहृतिहोमं कृच्छ्रानुष्ठानं च कृत्वा तंत्रेण नां

दीश्राद्धांतं कृत्वोपनयनांगत्वेन मंडपदेवताप्रतिष्ठापनांते चौलात्प्राचः संस्कारापूर्वेद्युः कुर्यात्॥ चौ
लोपनयने तु परदिनएव कुर्यादितेपारिजाते॥ अथोपनयनांतर्गतपदार्थेषु विशेषाः॥ तत्र वासः परि
धानानंतरं पूर्वोक्तानुपनीताचमने नरीत्या द्विराचमनं कार्यं॥ कारयंति च शिष्टा भोजनरथ्याप्रसर्पण
निमित्ताचमनमनुपनीतावस्थायां उपवीतधारणानंतरं तु तत्र द्वर्णोचितविधिने वाचमनं॥ आचांत
मुत्तरेणाग्निमिति कारिकायुक्तेः यज्ञोपवीतिनं कृत्वा यथाशास्त्रमाचामयतीतिजयंतोक्तेश्च॥ अथजयंतो
क्त आचमनप्रकारः॥ अतर्जानु करः प्राणवसावित्री बद्धशिखो दक्षिण हस्तं गोकर्णाकारं संहतांगुलिं
कृत्वा ब्राह्मतीर्थेन वीक्षितमंबु फेनबुद्बुदाविकृतं गंधरसवर्जितं हृद्गं मात्रिः पिबेत्॥ ऋग्वेदः प्रीयतामिति
प्रथमं॥ यजुर्वेदस्तामिति द्वितीयं सामवेदस्तामिति तृतीयं॥ पाणीप्रक्षाल्यातो मकौ संहताङ्गु
ष्ठौ संहतांगुलिपाण्यंगुष्ठमूलेन द्विः परिमृजति॥ अथर्ववेदस्तामिति॥ इतिहासपुराणानि प्री
यंतामिति द्वितीयं मन्त्रः पाणी प्रक्षाल्य पादौ शिरश्चाभ्युक्षेत॥ विष्णुः प्रीयतामिति॥ अपः स्पृष्ट्वा सं
हता भिरंगुष्ठेन च मुखं स्पृशेत्॥ अग्निः प्रीयतामिति अपः॥ अंगुष्ठप्रदेशिनीभ्यां नासिके॥ प्राणः
प्री० अपः अंगुष्ठानामिकाभ्यां चक्षुषी चंद्रादित्यौ प्रीयेतामिति अपः॥ तथैव कर्णौ दिशः प्रीयंतामि
ति अपः अंगुष्ठकनिष्ठिकाभ्यां नाभिं पृथिवी प्रीयतामिति अपः॥ हृदयं तलेन रुद्रस्तामिति अपः
सर्वाभिः शिरः समस्तषयः प्रीयंतामिति अपः बाहू अग्रेण इंद्रः प्रीयतामिति॥ एवं भोक्ष्यमाणस्य सं

Indira Gandhi National
Centre for the Arts

संको०
१३४

ध्योपासनादौ च द्विराचमनं भवतीति ॥ पारिजाते माध्यपादः ॥ केशवादि त्रिभिः पीत्वा चतुर्थेन
मृजेत्करं ॥ पंचमेन च षष्ठेन द्विरोष्ठावुन्मृजेत्क्रमात् ॥ तौ सप्तमेन च मृजेदेकवारं तु मंत्रवित् ॥
अष्टमेन तु मंत्रेण अभिमंत्र्य जलं शुचि ॥ वामं संप्रोक्षयेत्पाणिं मनुना नवमेन तु ॥ दक्षिणं दशमे
नाघ्रिं वाममेकादशेन वै ॥ मूर्धानं द्वादशेनायस्पृशेदूर्ध्वोष्ठमष्टकं ॥ संकर्षणाय नम इति स्पृशे
दंगुलिमूर्धभिः ॥ अंगुष्ठतर्जन्यग्राभ्यां संश्लिष्टाभ्यां जलेः सद ॥ नासारंध्रे वासुदेवप्रद्युम्ना
भ्यां स्पृशेच्छुभे ॥ अंगुष्ठानामिकाभ्यां च संश्लिष्टाभ्यां जलेः सद ॥ अनिरुद्धाय नम इति संस्पृ
शेदाक्षि दक्षिणं ॥ दाक्षिं पुरुषोत्तममंत्रेण ताभ्यां वामां स्पृशेद्दृशं ॥ तथांगुष्ठकनिष्ठाभ्यां श्लिष्टा
भ्यां जलेः सद ॥ अधोक्षजनृसिंहाभ्यां श्रोत्रे द्वे संस्पृशेत्क्रमात् ॥ नाभिमच्युतमंत्रेण तर्जन्यामे
व स्पृशेद्बुधः ॥ श्रीजनार्दनमंत्रेण तलेन हृदयं स्पृशेत् ॥ उपेंद्रायेति मूर्धानं स्पृशेत्सजलपाणि
ना ॥ सर्वांगुल्यग्रभागैस्तु समाश्लिष्टैर्जलेः सद ॥ भुजौ तु हरिकृष्णाभ्यां संस्पृशेद्दक्षिणोत्तरौ ॥ आ
चामेदपरं वै यो भगवन्नामभिः क्रमात् ॥ सद्यः पूतः सविदितेषूत्तरेष्वधिकारवानिति ॥ प्रकृतमे १३४
व भरद्वाजः ॥ दिव्याः पादैस्त्रिभिः पीत्वा अब्लिंगैर्नवधा स्पृशेत्पुनर्व्याहृतिगायत्र्या शिरो मंत्रैर्द्विधा स्पृ
शेदिति ॥ दिव्याः गायत्र्याः अब्लिंगैरित्यनंतरं पादैरित्यनुषंगः ॥ आपो हि ष्ठेत्यादिभिर्नवभिः पादैर्मु
खघ्राणनेत्रश्रोत्रनाभिहृदयानि नवस्थानानि संस्पृश्य व्याहृत्यादिमंत्रैः शिरो द्विः स्पृशेदित्यर्थः

॥ नायं विधिः प्रकृताचमनोपयोगी ॥ गायत्र्यास्त्र्यस्यगायत्र्युपदेशोत्तरभाव्याचमनविषयतयाऽवचित
त्वात् ॥ इत्याचमनोत्तरं कार्यमुक्तं कारिकायां आचांतमुत्तरेणाज्यं यज्ञपात्राणि वा नयेत् ॥ अंतरेणाग्नि
मात्मानं दक्षिणेत्प्रवेशयेदिति ॥ आदचवृत्तिकारः ॥ ब्रह्मचारी तीर्थेन प्रविश्याचार्यस्य दक्षिणत उप
विशेत् ॥ तीर्थं नाम प्रणीतानां पश्चिमो देशः सर्वत्र तीर्थेनैव प्रविश्य कर्म कुर्यादिति ॥ पश्चिमस्य पूर्वां
णोत्करमपरेण प्रणीता इति सूत्रोक्तोत्कराभावेपि तदुपलक्षणार्थं बोध्यः ॥ एकपुरोडाशायां अग्नीषो
मीयाभावेपि तदुपलक्षितांतरालवत् ॥ ततः कर्त्तव्यं कारिकायां अंतरेणाग्निमात्मानं दक्षिणेत्प्रवेशये
त् ॥ बर्हिरास्तरणादि स्यादिति ॥ आश्वलायनस्मृतौ तु स्रुवसंमार्जनं कृत्वा कुर्याद्यज्ञोपवीतिनं ॥ य
ज्ञोपवीतमितिं एतेन बहूचोप्येरुद्दंकृतिष्टं तमर्भकं ॥ प्राङ्मुखं प्राङ्मुखस्तिष्ठन्कुर्याद्यज्ञोप
वीतिनं ॥ आचार्यणाजिनादीनि दातव्यानि स्थितस्य वै ॥ सम्यगाचमयित्वा तमित्यादिना स्रुवसंमा
र्जनां यज्ञोपवीतदानाद्याचमनांतमुक्तं ॥ अवदारणेविशेषं शौनकः ॥ शिष्यांजलौ स्वांजलिस्थ
मवज्ञायोदकं गुरुः ॥ शिष्यांजलिगतश्चापो वज्ञार्यस्वेन पाणिनेति ॥ कस्येति परिदायेनं प्रजाधिपत
येतत इति ॥ यद्यपि मंत्रस्य परिदाने करणत्वं प्रतीयते तथापि जपोयं परिदानसंकल्पोत्तरं कार्यः
॥ आदित्यमीक्षयेच्छिष्यमथो भावापि पूर्ववत् ॥ तिष्ठन्तामुत्तरेणाग्निमन्यो न्याभिमुखौ ततः ॥ धात्रेपारि

Indira Gandhi National
Centre for the Arts

ददाम्यहमितिसंकल्पपूर्वकं॥कस्यब्रह्मादिकंमंत्रंददाम्यंतंगुरुर्जपेदितिकारिकोक्तेः॥तथैव
जपंतोभिनेत्रोऽस्य॥जपत्वस्यहोत्रिकदुक्तत्वाच्च॥अवज्ञारणादिसमिदाधानांतंगायत्र्युपदेशसन्नि
पात्यंगमितिप्राहाश्वलायनः॥शुचित्वसिद्धयेतस्यसावित्रीग्रहणोगुरुः॥अभिमंत्र्ययथावारिसि
चत्येवतदंजलौ॥दत्तगृहीतशिष्यस्यमंत्रशिष्यत्वसिद्धये॥कर्मसाक्षिणमादित्यंतर्पयेत्तंयथोक्त
वत्ततोव्रतानांपतयेददातिरवयेवटुं॥रवेःसमानमाथापरस्मार्थतद्वरोरपि॥असामर्थ्यात्समादर्द्रे
मात्मनस्तंगुरुःपुनः॥ददातिमंत्रवद्गृह्यप्रजानांपतयेपुनः॥प्रजापतयेसूर्यायताभ्यांदत्तइतिस्मरणं
॥गृहीत्वेवानयोःशिष्यंसमालभ्यात्मसात्करोत॥योमयोनाभ्यांदत्तःसताभ्यांमह्यंपुनर्दत्तइतिस्मर
न्नित्यर्थः॥करोत्करोतु॥कुर्वत्येवात्मसात्ततःसर्वात्पूर्वमुखस्थितान्॥तस्मात्पूर्वमुखंकृत्वागृह्णीया
च्छिष्यमेवतं॥गुरोरग्नेःप्रधानत्वात्प्रागग्नेर्जुहुयाद्गुरिति॥अग्नेर्गुरुत्वोक्त्यागुरोरिवाग्नेरप्यभिव
दनंकार्यमितिसूच्यते॥एतदंतेआचारप्राप्तंगायत्रीपूजनंजान्वाच्योपसंगृह्येतिगृह्योक्तप्रकारक
पदेशश्चाग्नेरुत्तरदेशेकार्यः॥अथास्मैसावित्रीमन्वाहोत्तरतोग्नेःप्रत्यङ्मुखायोपविष्टायोपसन्ना
दक्षिणतस्तिष्ठतेआसीनायैकेइतिपारस्करोक्तेः इत्यमेवकातीयसूत्राच्च॥कल्पसूत्राधिकर १३५
णोक्तरीत्याषडंगमेकइतिवदत्रत्यपैकीयत्वोक्त्यादक्षिणतउपविष्टायोपदेशस्यनाभिमतत्व

स्यचनाच्च॥उत्तरेणाग्निमुपविशतःप्राङ्मुखआचार्यःप्रत्यङ्मुखइतरइतिप्युपदेशपरशांखायन
सूत्रवाक्यशेषस्याप्यासीनोदिशमेकांप्रशस्तांप्राचीमुदीचीमपराजितांवेत्यस्यव्याख्यावसरेएकःप्रोता
दक्षिणतोनिषीदेदित्येतन्निषिध्यते॥नेनसूत्रेणेतितज्ज्ञाप्याच्च॥उदगग्नेरुत्सृप्यप्राङाचार्यउपविश
तिउदगग्रेषुदर्भेषुप्रत्यङ्माणवकइतिछंदोगसूत्रव्याख्यावसरेउत्तरतएवाग्नेरितितज्ज्ञाप्योत्रोऽस्य॥
उत्तरतोग्नेःप्राङ्मुखआचार्योवतिष्ठतेप्रत्यङ्मुखइतरइत्याश्वलायनेनापिगायत्र्युपदेशांगेऽवज्ञा
रणादावुत्तरदेशस्यप्रयोगविषयत्वेनगायत्र्युपदेशेपितद्देशत्वोचित्यस्यचनाच्च॥होमदेशनिरूपि
तोत्तरदेशस्योक्तसूत्रेषुविधिसितत्वेनहोमस्यसत्यप्यंगत्वेतद्देशत्वमनाशंक्यंतत्रहोमसमयेग्ने
पश्चादुभयोर्दक्षिणोत्तरभावेनजयंतादिभिरुपवेशनविधानाच्च॥अस्मादेवब्रह्मचारिणोदक्षि
णदेशस्थितिनियमाद्ब्रह्मचारिकार्तकेसंस्याजपोपस्थाजपोपस्थानादौपरिभाषाप्राप्तेनाग्नेःप्रत्यगु
दग्देशावस्थानंनभवतिअनियतदेशप्राप्तौपरिभाषायानियमार्थत्वात्॥मानांतरनियतदेशबाधे
नापूर्वविधित्वासंभवात्॥योपिजयंतग्रंथः॥अथोनयोरपिअग्नेःपश्चाद्यथोपवेष्टुंशक्यंतथाप
विशत्याचार्यः॥तस्याभिमुखोब्रह्मचारीतिब्रह्मचारिणाग्नेःइष्टतःकरणस्यपरिभाषाविरुद्धत्वादने
कोदाहृतसूत्रानुरोधाच्चाग्नेःप्रत्यगुदग्देशएवपश्चादितितत्रनिर्दिष्टइतिदृष्टव्यं॥अग्नयेसमिधमि

Indira Gandhi National
Centre for the Arts

संको०
१३६

तिमंत्रोऽविज्ञातस्वरत्वात्॥ द्विभाषा छंदसीत्येकश्रुत्यविधानाच्चैकश्रुत्येनेव प्रयोक्तव्योऽतः सर्वत्राप्यवि
ज्ञातस्वरमंत्राणामेकश्रुत्येनैव प्रयोक्तव्या इति जपेत॥ अथोपसंग्रहणं॥ तत्र कारिकाकारः ज्ञात्वास्य
दक्षिणं पादमाचार्यास्योपगृह्य चेति॥ पादावुपसंगृह्णीतेति जपेत॥ उपसंग्रहणं नाम अमुकगोत्रो देवद
त्तशर्माहं भो अभिवादय इत्युक्त्वा कर्णौ दक्षिणोत्तरौ पाणिभ्यां स्पृष्ट्वा दक्षिणेन पाणिना गुरोर्दक्षिणं पा
दं सव्येन सव्यं गृहीत्वा शिरो वनमनमिति॥ अनेनैवाशयेन विष्णुः तस्य च व्यस्तहस्तकरः पादावुपस्प
शेदिति॥ अत्रापि विशेषमाह्निकबोधपारिजाते भरद्वाजः॥ कर्णौ युग्मं स्वपनः॥ श्रोत्रे संस्पृश्य मनः सम
धायास्ताञ्जान्वोरापतत्स्य मम्मोपसंग्रहणमिति॥ अन्यस्य गुरोर्वदेः॥ अत्रापि विशेषमाह्निकपारिजाते भर
द्वाजः॥ कर्णयुग्मं स्वहस्ताभ्यां स्पृष्ट्वाजानुद्वयादिकं॥ चरणांगुष्ठयुग्मां तं संमृज्य तु शनैः शनैः॥ दक्षश्रोत्र
सम बाहुं दक्षिणं तु प्रसार्य च॥ बाहूपरि शिरो नम्रमुक्तं तदभिवादनमिति॥ यद्यपि स्मृत्यर्थसारे गुरुं प्र
पसंग्रहणं वृद्धतरेष्वभिवादनं वृद्धेषु नमस्कारं कुर्यादित्युक्त्वा अभिवादने पादग्रहणं नास्ति पादस्प
र्शनं कार्यं न वेत्युक्तं॥ तथापि अभिवादनविशेषात्मकोपसंग्रहणविषया भरद्वाजोक्तिरिति न
विरोधः॥ गोत्रपरिचयार्थं प्रवरकीर्तनमपि कार्यमिति वृद्धाः॥ यद्यपि सर्वत्र प्रत्युत्थायाभिवाद १३६
नमित्यापस्तंबोक्तिस्तथापीदं ज्ञान्वाच्योपसंगृह्णेति सूत्रादपोद्यते॥ अथ प्रत्यभिवादनं॥ मनुः॥

आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने॥ अकारश्चास्य नाम्नोंते वाच्यः पूर्वाक्षरः प्लुत इति त
या चायुष्मान् भव सौम्य देवदत्तशर्मान् अ इति वाक्यं संपद्यते इति केचित॥ प्रत्यभिवादे शूद्रे
॥ एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ इति पाणिनीयसूत्रयोरनुसरणेन तु अ
कारांतदेवदत्तादिनाम्नोंते विद्यमानस्याकारस्य प्लुतत्वं हरे३ शंभो३ इत्यादौ हराइ शंभाउ इत्येवं संध्यक्ष
रविश्लेषेणाक्षरपूर्वभागाकारस्य प्लुतत्वं विधीयते इति मनुवाक्यार्थः संभवति पूर्वकाय इति वच्च पू
र्वाक्षर इत्यप्यक्षरपूर्वार्ध इत्यर्थः संभवति॥ लभ्यते चैवं मनुवाक्यस्यांशे तेयां स्यः स्वरः सप्लुतः संध्यक्ष
रमप्रगृह्यमाई आऊभावं चापद्यते इति वसिष्ठवाक्यसंवादोपि॥ तस्मादायुष्मान् भव सौम्य देवदत्ताइ
त्येवं प्रत्यभिवाद उचितः॥ संगच्छते चैवं सति देवदत्ताइ अग्निभूता३उ पटा३उ ईदृश प्रत्यभिवादवा
क्योदाहरणं वैयाकरणानां॥ पारिजातादिप्रयोगकाराणां च देवदत्ता इति प्लुतांतप्रत्यभिवादकथनं
॥ संगच्छते चोक्तमनुवाक्यव्याख्यावसरे व्याख्यातॄणां ईदृशग्रंथः॥ अभिवादकस्य यन्नामतस्य योऽका
रादिस्वरः नाम्नामाकारांतत्वनियमाभावात्स प्लुतः कार्य इत्युपक्रम्य पवितः॥ एतच्च प्रत्यभिवादेऽस्त्रीन्द्रि ३

Indira Gandhi National
Centre for the Arts

संको० १३७

नुतं स्मरन् पाणिनिः स्फुटमुक्तवानिति यदि शर्मान्तित्वे वस्तुतो विवक्षितः तदाऽकारांतत्वनियमाभावो
क्तिः पाणिनीयवाक्योदाहरणं च न संभवत् अतश्च स्मृत्यर्थसारे पृथ्वीविवादपक्षेषु बहुषु सत्स्वपि
देवदत्ता इति तु स्यं गीकारपक्ष एव श्रेयानिति मंतव्यं ॥ ब्रह्मचर्योपदेशो वेदमधीष्वेति सूत्रकृते
तिकरणप्रयोगादुपदेशसमाप्तिः ॥ प्रैषार्थमेवमुक्त्वा तु कालमेकं विनिर्दिशेदिति कारिकाया
मपिन्यायप्राप्तं शक्तस्यैवैकालिककालावधारणमुक्तं न तु पूर्वोपदेशवदयं नित्योपदेशः ॥ यस्त्व
स्मिन्नवसरे पारिजातादौ सायं प्रातर्भिक्षेथाः सायं प्रातः समिधमाधेहीत्युपदेशपाठः ॥ सकर्मकृ
द्विस्यनेनैव गतार्थत्वात्स्वमादपाठः ॥ अनुप्रवचनीयार्थं भिक्षां भवान्ददात्विति भिक्षां भवती दद
त्वित्यनुप्रवचनीयमिति भवच्छब्दमध्यकभिक्षावाक्यप्रयोगनियमो न सायं प्रातर्भिक्षायां तत्रत्वा
दिमध्यावसानेषु भवच्छब्दोपलक्षितेति स्मृत्युक्तप्रकारेणैव तद्वाक्यप्रयोग इति भाष्यकारः इ
त्युपनयनपदार्थेषु विशेषकथनं ॥ अथोपनयनप्रयोगं वक्तुं द्वितीयजन्मप्रदत्वेनेतरकर्मा
धिकारसाधकत्वेनेतरसंस्कारेभ्यस्तस्य वैशिष्ट्यात्तत्फलप्राप्तौ विघ्नपरिहाराय विनायकशांति
रुच्यते ॥ तत्र याज्ञवल्क्यः ॥ एवं विनायकं पूज्य ग्रहांश्चैव विधानतः कर्मणां फलमाप्नोति श्रियं चा ॥१३७
प्नोत्यनुत्तमामिति ॥ वृद्धपराशरः ॥ चतुर्थ्यां शुक्लपक्षे तु श्रवणे चोत्तरे तथा ॥ पुण्यार्थं सर्वसिद्ध्यर्थं कु
र्याच्छांतिं विनायकीं ॥ नक्षत्रांतराणि विष्णुधर्मे ॥ इमां शांतिं प्रकुर्वीत ॥ हस्तपुष्याश्वयुक्सौम्यवैष्णवा

न्यतमे शुभे नक्षत्रे च मुहूर्ते च मैत्रे वा ब्रह्मदैवत इति ॥ भविष्ये ॥ शुक्लपक्षे चतुर्थ्यां च वारेण धिषणस्य च
॥ तिष्ये च वीरनक्षत्रे तस्यैव पुरतो नृपेति ॥ एतद्वचनमुदाहृत्यापरार्कः ॥ तच्छ्रीकामस्य विनायकस्नपनवि
षयं ॥ उपसृष्टविषयं तु पुण्याहविधानं उपसृष्टस्य विलंबायोगात् ॥ धिषणो गुरुः ॥ तस्यैव विनायकस
त्यर्थ इति उपनयनादिफलप्राप्त्यै क्रियमाणायामपि विनायकशांतौ उपनयनकालाविरोधेन संभवता
लोपसंग्रहः कार्यो न तु तद्विरोधेनेति बोध्यं ॥ अथ प्रयोगः ॥ उक्तकाले पवित्रपाणिरधिकारी प्राणानाय
म्य देशकालौ संकीर्त्यास्य कुमारस्योपनयनकर्मणो निर्विघ्नफलसिद्ध्यर्थं विनायकशांतिं करिष्य इति सं
कल्प्य तदंगत्वेन गणेशपूजनादिनांदीश्राद्धांतं कृत्वाऽचार्यवरणं कुर्यात् ॥ आचार्यस्तु यथा स्वगृ° चतुर्ण
मृत्विजां चत्रस्य यागस्य नि° पंचानां वस्त्रादिभिः पूजनं ॥ तत आचार्योपि पवित्रपाणिः प्राणानायम्य देशादि
संकीर्त्याचार्यकर्म करिष्य इति संकल्प्य यदत्र संस्थितमिति सर्षपान्विकीर्य शुचीवद्द्रत्यग्निर्मूर्वंत्रोह्यस्य स्न
पनं ताक्ष्यमिति मंत्रद्वयेन प्रार्थ्य प्रतिमाद्वयस्याभ्युत्तारणं कृत्वा मध्ये देशे शुचौ सुलिप्ते स्थंडिले पंचव
र्णैः पिष्टैः स्वस्तिकं कृत्वा तस्मिन् प्राचीनग्रीवमुत्तरलोमानडुहं रक्तमरक्तं वा चर्मास्तीर्य तत्राप्यपर्णीपी
ठं निधाय तच्छुक्लवाससाऽऽच्छाद्य पूर्वादिक्रमेण च तस्मिन्सर्वसु दिक्षु स्वस्तिकानि कृत्वा तेषुभिमान्यदार्थात्कांडान्
समयेन कुर्यात् ॥ महीद्यौः ॥ भुवं स्पृष्ट्वा ॥ ओषधयः ॥ धान्यानि क्षिप्त्वा ॥ आकलशेषु ॥ एकरूपमव्रणं कलशं निधा
य मं मेगंग इति संगमोदकेन ह्रदोदकेन वाऽऽपूर्य ॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके हर मे पापं य

Indira Gandhi National
Centre for the Arts

संकौ० १३८ न्यायाङ्गुष्ठकृतं कृतमिति अश्वस्थानगजस्थानवल्मीकसंगमह्रदमदोनिःक्षिप्य गंधद्वारामिति चंदनाग
रुकेसरकस्तूरिकर्पूरगोरोचनाः प्रक्षिप्य तन्मी गुग्गुलं च प्रक्षिप्य या ओषधीरिति सर्वौषधीः ॥ ओष
धयः संवदन्त ॥ कांडात्कांडादिति दूर्वाः ॥ अश्वत्थे व इति पंचपल्लवान् ॥ याः फलिनीरिति फलं ॥ सहिरत्ना
नीति पंचरत्नानि ॥ हिरण्यरूप इति हिरण्यं ॥ युवा सुवासा इति वस्त्रेणावेष्ट्य चंदनमालाभूषितं कृत्वा पूर्णा
दर्वीति पूर्णपात्रं निधाय कलशस्य मुखे विष्णु० ॥ यजमानस्य दुरितक्षयकारकाः ॥ सर्वे समुद्राः० देवदानव
संवादे मथ्य० इति च पठेत् ॥ दक्षिणपश्चिमोत्तरकलशेष्वित्थं तेकर्मण्याचार्येण कृते चत्वार ऋत्विजः पवित्र
पाणय आचम्य प्राङ्मुखास्तत्त्वायामीति वरुणमावाह्य षोडशोपचारैरभ्यर्च्य पूर्वकलशे ऋग्सूक्तं दक्षिणे महि
म्नां ॥ पश्चिमकलशे नहितेक्षत्रं ॥ उत्तरकलशे वामदेव्यं आ नो भद्रा इति बह्वृचा नमो वाचे शन्नो वातः पवता
मिति तैत्तिरीयाः पठेयुः ॥ तदैवाचार्यो भद्रासनप्राग्देशे होमार्थं स्थंडिलं कृत्वा तद्देशाभ्यां वेद्यां पीठे चावस्त्रादौ प्रतिमा
द्वयं विनायकांबिकयोरावाहनादिभिर्नैवेद्यांतैरुपचारैः पूजां कुर्यात् ॥ तत्र मंत्रौ ॥ तत्पुरुषाय विद्महे वक्रतुंडा
य धीमहि ॥ तन्नो दंतिः प्रचोदयात् ॥ सुभगायै विद्महे काममालिन्यै धीमहि ॥ तन्नो गौरी प्रचोदयात् ॥ अपरार्के
हेमाद्रिमते ॥ प्रतिमयोरुत्तरतो नमोंते नाममंत्रैरन्यादेवता आवाह्य षोडशोपचारैः पूजयेत् ॥ मंत्राः ॥ कौ १३८
मकेशाय नमः ॥ पार्वत्यै० भीमजाय० कृष्णस्पपित्रे० अर्काय० आराय० सिताय० धिषणाय० स्कंदपुत्रा
य० कोणाय० लक्ष्मवते० विधुंतुदाय० केतवे० बाहुलेयाय० नंदकस्यधारिणे० १५ ततो होमार्थं स्थंडिलेय



जमानगृह्योक्तविधिनाग्निं प्रतिष्ठाप्यान्वादध्यात्तत्र चक्षुषी आज्येनेत्यंते तत्र प्रधानं मितसंमितं शालं
कटंकटं कूष्मांडं राजपुत्रं व्योमकेशं नंदकस्यधारिणं एकैकयाचर्वाहुत्याशेषेण त्यादि ॥ निर्वापका
ले मितायत्वे त्यादिभिरष्टाविंशति मंत्रैः प्रत्येकं चतुरावृत्तैश्चतुरष्टाविंशतिरनि रूप्य तथैव प्रोक्ष्य बादि
ष्यासादनांतं कृत्वा गव्याज्यलोली कृतेन सिद्धार्थपिष्टेनोद्वर्तितांगस्य सर्वौषधैः सर्वगंधैश्च विलिप्त
शिरसो यजमानस्य मंगलवेदघोषेण वस्त्राच्छादितोरूपीगात्मक भद्रासनोपर्याचार्येणोपवेशनं कार्यं
॥ उपवेशनोत्तरमुद्वर्तनं मदनरत्नोक्तं तुमितार्क्षरामहार्णवादिनिबंधविरोधादुपेक्ष्यं ॥ सर्वौषधा
नि प्रियंगुनागकेसरादीनीति मितार्क्षराधौ ॥ अपरार्के वृद्धवसिष्ठः ॥ बाला च शंखपुष्पी च कुष्ठं चैव व
चा तथा ॥ नागकेसरचूर्णं सर्वौषधिगणो भृगो इति ॥ छंदोगपरिशिष्टे तु ॥ कुष्ठं मांसी हरिद्रे द्वे मुरा
शैलेयचंदने ॥ वचाचंपकमुस्ता च सर्वौषध्यो दश स्मृता इति ॥ मदार्णवे तु ॥ मुरा मांसी वचा कुष्ठं शैलेयं
रजनीद्वयं ॥ सटीचंपकमुस्ता च सर्वौषधिगणः स्मृत इति ॥ सर्वगंधा मदनरत्ने ॥ कुंकुमागरुकर्पूरक
स्तूरीचंदनं तथा ॥ जातीफलमिति प्रोक्ताः सर्वगंधाः सदा बुधैरिति ॥ हेमाद्रौ गारुडे ॥ कर्पूरं चंदनं दर्पः
कुंकुमं च समांशकं ॥ सर्वगंधमिति प्रोक्तं समस्तसुखवल्लभमिति ॥ भद्रासनमुपविष्टो यजमानऋत्वि
ग्भिर्गृह्योक्तविधिना स्वस्तिवाचनं कुर्यात् ॥ तत्र जीवत्पति पुत्राभिः सुवेषाभिः स्त्रीभिर्नीराजितस्ताभ्यः

Indira Gandhi National
Centre for the Arts

सं॰कौ॰ सकंचुकानिवस्त्राणिदद्यात् शिष्टाचारात्॥ततआचार्योयजमानंदक्षिणतउदङ्मुखस्तिष्ठन्त्विदनपू
१३९ र्वादिकुंभत्रयेणैमणैकैकमंत्रेणस्नपयेत्॥सहस्राक्षंशतधारमृषिभिःपावनंकृतं॥तेनत्वामभिषिंचामिपाव
मान्यःपुनंतुते॥भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः॥भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः॥यत्तेकेशेषुदौर्भा
ग्यंसीमंतेयच्चमूर्धनि॥ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा३उत्तरकलशमंत्रत्रयसमुच्चयइतिहेमाद्रिम
दार्णवमिताक्षराकृन्मतं॥प्रतिकलशंमंत्रत्रयावृत्तिरित्यपराकाः॥ततश्चतुर्भिर्मिलितैःकलशैःऋत्विग्भिःदृढ
त्यराशशेक्तैर्मंत्रैरभिषेकंकारयेत्॥मंत्रान्स्वयंपठेदाचार्यःएतद्वेपावनंस्नानंसहस्राक्षमृषिस्मृतं॥तेनत्वाश
तधारेणपावमान्यःपुनंत्विमाः॥शक्रादिदशदिक्पालाब्रह्मेशानःकेशवादयः॥आपस्तेघ्नंतुदौर्भाग्यंशांतिंद
दतुसर्वदा॥सुमित्रियानआपओषधयःसंतुदुर्मित्रियास्तस्मैसंतुयोऽस्मान्द्वेष्टियंचवयंद्विष्मः॥समुद्रा
गिरयोनद्योमुनयश्चपतिव्रताः॥दौर्भाग्यंघ्नंतुतेसर्वेशांतिंयच्छंतुसर्वदा॥पादगुल्फोरुजंघास्यनितंबोदर
नाभिषु॥स्तनोरोबाहुहस्ताग्रग्रीवाअंसांगसंधिषु॥नासाललाटकर्णभ्रुकेशांतेषुचयत्स्थितं॥तदापोघ्नंतु १३९
दौर्भाग्यंशांतिंयच्छंतुसर्वदेति॥ततआचार्यउपविश्यसव्यपाणिगृहीतकुशत्रयोतर्हितयजमानमूर्धनि
औदुंबरेणस्रुवेणसार्षपतैलंजुहुयात्॥ओंमितायस्वाहा॥ओंसंमितायस्वाहा॰ओंशालाय॰ओंकटंकटाय॰कू
ष्मांडाय॰राजपुत्रायस्वाहेयथामंत्रलिंगंत्यागंयजमानः॥शालकटंकटाय॰कूष्मांडराजपुत्रायेतिसमासांगीका

रणाहुतिचतुष्टयमपराकः॥ततईश्वराधानादि॥मितादिषण्मंत्रैरन्वाववदानधर्मेणहोमः॥सोमकेशायस्वा
हेत्येवंपंचदशाहुतयश्च॥ततःस्विष्टकृदादिपूर्णपात्रनिनयनसंस्राजपांतंकृत्वाचूरुशेषेणाभिषेकशाला
यांलोकपालेभ्योबलीन्दद्यात्॥ओंइंद्रायनमः॥ईशानायनमः॥इत्यष्टदिक्षु॥ब्रह्मणेनमः॥अनंतायनमः॥
इतिईशानपूर्वयोर्मध्येबलिद्वयं॥अथयजमानःसुस्नातःशुक्लानुलेपनमाल्यांबरधरआचार्यसहितःस्त्री
कुशेशूर्पेनिहितमुपहारंगायत्र्याविनायकायेत्तमुपहारंनिवेदयामीत्यंबिकायाविनायकायनिवेदयेत्॥सकृदव
हतास्तंडुलास्तिलपिष्टमिश्रौदनः॥पक्वमत्स्याः३अपक्वाः३माषविकारास्तदाकाराःवा॥पक्वमपक्वंचमां
संतादशमाषविकारोवा॥चित्रंसुगंधिपुष्पंचदनादिसुगंधिद्रव्यं॥त्रिविधासुरा॥गुडमधुपिष्टमिश्राणि॥ससे
यवान्नियावयस्थितानिक्षीराणिवा॥मूलकंदुपूरिकाः३अपूपाः३औंडेरकस्रजः३दध्योदनःपायसंगु
डमिश्रंतंडुलादिपिष्टं॥लड्डुकाइत्युपहारः॥ईदृशमेवोपहारमंबिकागायत्र्यांबिकायेएतमुपहारंनिवे
दयामीत्यंतयांबिकायेनिवेदयेत्ततआचमनफलतांबूलदक्षिणानीराजनपुष्पांजलिभिरभ्यर्च्यशिरसा
भूमिंगत्वोक्तगायत्रीभ्यांविनायकमंबिकांचनमस्कुर्यात्॥गंधपुष्पदूर्वासर्षपयुतेनकुसुममात्रपुतेनवोद
केनांजलिमापूर्यपूर्वोक्तगायत्रीभ्यामर्घ्यंदत्वादूर्वासर्षपपुष्पपूर्णांजलीताभ्यांदत्वाविनायकमुपतिष्ठेत
॥रूपंदेहियशोदेहिभगंभगवन्देहिमे॥पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमेइति॥ततोरूपं॰भगवति

Indira Gandhi National
Centre for the Arts

संक्षो० दद्मि इति यथापाठं मंत्रेणांबिकामुपतिष्ठेतेति महार्णवः॥ वृद्धस्तु राशरेणोमस्थाने मंत्रांतरमुक्तं॥ सौभाग्य
१४० मंबिके देहि रूपं भगं यशो विवं॥ स्त्रियं पुत्रांश्च कामांश्च तथा शौर्यं च देहि मे॥ गणेशमातरं बाले यत्किंचिन्मद्
नीप्सितं॥ एकनाम्नैव तद्देहि देहि गौरि वरान्ममेति॥ ततश्चास्तीर्णकुश शूर्पे सर्वप्रकारमुपहारशेषं निधा
य चतुष्पथमुद्धमुपलिप्य तत्र गुरुः शूर्पं निदध्यात् यजमानः प्रक्षालितपाद आचांतो मंत्रोक्तदेवताभ्यो बलि
दद्यात्॥ मंत्राः॥ बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा॥ मरुतोथाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः॥ असु
न रा यातुधानाश्च पिशाचा मातरो गणाः॥ शाकिन्यो यक्षवेताला योगिन्यः पूतनाः॥ शिवाः॥ जृंभकाः सिद्धगंधर्वा माया वि
द्याधरा नराः॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः॥ मा वि
घ्नो मा च मे पापं मा संतु परिपंथिनः॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहा इति॥ ततो यजमानो गृहमा
गत्य प्रक्षालितपादि आचम्याचार्यं संपूज्य सदक्षिणं वस्त्रयुग्मं तस्मै दद्यादृत्विग्भ्यो पि यथाशक्ति हेमदक्षिणां दत्वान्ये
भ्यश्च भूयसीं दद्यात्॥ स्थापितदेवतानामुत्तरपूजां विसर्जनपूर्वकमाचार्याय समर्पणं विधाय परिस्तरणावि स
र्जनादि विभूतिधारणांतं कृत्वा गच्छ गच्छेत्यग्निं विसृज्य दशावरान्ब्राह्मणान्भोजयेदीश्वरार्पणं कुर्यात्॥ वि वा
हाद्यारंभे विवादकर्मणो निर्विघ्नफलसिध्यर्थमित्येवं संकल्प्य वाक्योहः॥ एवमुपसर्गनिवृत्तिकामः इति श्री १४०
काम इति चात्र तदूहो बोध्यः। इति वैनायकी शांतिः समवादि यथामति॥ अनंतेन भवदेवा गणेशं विमोमु॥ अथ

रार्कमते कलशेषु पूजांते सोमकेशादिदेवतापूजनं॥ ततउत्सादनादि संस्कृतस्योपवेशनं॥ ततः सहस्राक्षमि
ति मंत्रयावृत्या चतुर्भिः कलशैरभिषेकः॥ ततो मितायस्वाहेति चतुर्भिर्मंत्रैस्तैलहोमः॥ तैरेव चतुर्भिर्मंत्रैश्चतु
ष्पथे बलिदानं॥ ततोर्घ्यदानमुपस्थानं॥ ततः शुक्लवस्त्रादिधारणं ब्राह्मणभोजनं गुरवे वस्त्रयुग्मदानं गुरुवत्पूज
नं चेति प्रयोगः॥ अत्रोपकल्पनश्लोका महार्णवे॥ अथोच्यंते त्र संभाराः रोचना पंचमृत्तिकाः॥ अश्वस्थानाद्गजस्था
नाद्वल्मीकात्संगमाद्ध्रदात्॥ चंदनागरुकस्तूरीकर्पूराद्याः सुगंधयः॥ गौरसर्षपकल्कस्तु गव्याज्येन विनिश्रितः
॥ गुग्गुलश्चापि संशुद्धः सर्वौषधिगणास्तथा॥ मुरा० चत्वारः कलशा एकवर्णाश्चास्फुटिता व्रणाः॥ दूर्वोदकं सुताबा
पि निम्नगासंगमोदकाः॥ सग्रीवा पुष्पमारक्तं च मर्चानर्दुद तथा॥ श्रीपर्णीकाष्ठपीठं च सद्कारस्य पल्लवाः॥ अ
श्वत्थपल्लवाश्चास्युः सुगंधि सुमनांस्यपि॥ स्रजः शोभनगंधाश्च विचित्रकुसुमानि च॥ कलशावेष्टनार्थं तु नव व
स्त्रचतुष्टयं॥ पीठस्याच्छादनार्थं तु शुभ्रवस्त्रमथापरं॥ गणेशांबिकयोरर्थं वस्त्रयुग्मं सुशोभनं॥ आचार्य
दक्षिणार्थं तु महार्हं वसनद्वयं॥ पंचवर्णानि पिष्टानि स्वस्तिकस्य विनिर्मितिः॥ तैलं च सार्षपं तद्वत् उदुंबर
विनिर्मितिः॥ स्रुवः कुशाः चरुस्थालीपाकार्थं तंडुलाः शुभाः॥ किंचिद्वदंति क्रियात्कृताः स्तंडुलाश्चापरे तथाप
रे तथा॥ तिलपिष्टेन संयुक्त ओदनः शूर्पमेव च॥ पक्वाश्च मत्स्याश्चापक्वा मांसं पक्वमपक्वकं॥ गौडी पैष्टी च
माध्वी चेत्येवं त्रिविधाः सुराः॥ मत्स्यादिकसुरांतं च निषिद्धं यस्य यच्च तत॥ न ग्राह्यं तु विशेषेण द्विजैः स्पाज्या सु

Indira Gandhi National Centre for the Arts

संकौ॰ १४१

रासदा॥ यजमानस्तुपूर्वस्थे दक्षिणे स्तानि योजयेत्॥ प्रत्यक्षमूलकं चास्यादुतमद्वस्तथाकृतिः॥ अपूपापूरिकाश्चै
व तथैवांडेरकस्रजः॥ दध्यन्नं पायसं चैव पिष्टं च गुडमिश्रितं॥ लड्डुकाश्च तथा दूर्वाः सर्षपा गौरसंज्ञिताः॥ गणेशप्र
तिमा चैवं गौर्याश्च प्रतिमा तथा॥ एवं संभृतसंभारः शांतिं कुर्यात् शुभे दिने॥ इति विनायकशांतिः॥ अथ परिशिष्टोक्तवि
धिना ग्रहमख उच्यते॥ तत्र परिशिष्टं आदित्य इंदुरंगारकः सोम्यो गुरुर्भार्गवः॥ शनैश्चरो राहुः केतुरिति नवग्रहास्ते
हि स्वगत्या जगदभिरक्षंतीति तानयनादिषु पुण्यकालेषु यजेत्॥ शांतये सद्यो हुतेषु चाभ्युदयिकं करिष्यमाणो ग्रहयज्ञं
कुर्यात्॥ अनाभ्युदयिकं हि शांतिकर्म यदि तदानुकूल्यकामः स्यात्कामं प्रागभ्युदयात्तत्राहान्यंतरीत्य कुर्यात्तं दशाव
राहुतिं स्वयमेकः कुर्यात्॥ ऊर्ध्वमापंचाशतश्चत्वार ऋत्विजः शतावराहुता अष्टौ नवम आचार्यः स स्वयमाचार्यः स्या
त्तज्ज्ञागं कल्पविदे दद्यात्॥ तान् विधिवद्वरयित्वार्चयेत्॥ आचार्य आदित्याय जुहुयात्॥ इतरेभ्य इतरे॥ पूर्वोत्तरं तंत्र
माचार्यः कुर्यात्॥ इतरे तमन्वालभेरन्निति॥ आभ्युदयकामं प्रत्ययनादिपुण्यकालनियममुक्त्वा अहुताश्चोत्पातेषु
तच्छांत्यर्थं प्रयोगे नायनादिपुण्यकालापेक्षेति सद्य इत्यनेनोक्तं॥ आभ्युदयिकमित्यादेर्व्याख्यानमुक्तं पारिजाते॥ वि
वाहोपनयनादिष्वाभ्युदयिकेषु कर्मसु आदौ ग्रहयज्ञं कुर्यात्॥ अनाभ्युदयिके श्राद्धातिरिक्तकर्मसु ग्रहानुकूल्यका
मो ग्रहयज्ञं कुर्यादिति॥ आभ्युदयिककर्माण्यवहितपूर्वकालेऽसंभवतो ग्रहयज्ञस्यानियतत्वव्यवहितकालेनानुष्ठ १४१
नमभ्यनुजानाति व्यवहितानुष्ठानेपि सत्तदिनाधिक्यव्यवधानं न कार्यमित्यर्थः॥ होमगतसंख्यानिमित्तां कर्तस

ख्याव्यवस्थामाह दशेत्यादिना ऊर्ध्वमिति दशभ्य ऊर्ध्वं पंचाशतमभिव्याप्य चत्वार ऋत्विजः ततऊर्ध्वं शतपर्यंत
मष्टौ ऋत्विजो नवम आचार्यः स इति आचार्यकर्म स्वयमेव वा कुर्यादित्यर्थः॥ अस्मिन्पक्षे आचार्याय देयां दक्षि
णां ग्रहकल्पविदे दद्यात्॥ इतरेभ्यः सोमादिभ्यः तंत्रानुष्ठानकाले ऋत्विग्भिराचार्यान्वारंभः कार्य इति विधीयते॥ अ
थ प्रयोगः॥ पत्न्या बटुना सह कृताभ्यंगस्नानो यजमानो देशकालौ संकीर्त्यास्य करिष्यमाणोपनयनेन निर्विघ्नेन फल
सिद्धिकामो बह्वृचगृह्यपरिशिष्टोक्तरीत्या ग्रहमखं करिष्य इति संकल्प्य गणपतिपूजनादि आचार्यर्त्विग्वरणांत
पूजनांतं कुर्यात्ततः आचार्यो ग्रहप्रतिमानामग्न्युत्तारणं कुर्यात्तद्विधिः परिशिष्टे॥ ताम्रं स्फटिकं रक्तचंदनं सुवर्णं
तदेव रजतं लोहं सीसं कांस्यमिति नव प्रतिमाद्रव्याणि सुवर्णमेकमेव वा सर्वेषामिति॥ तदेवेति बृहस्पतेरपि
बुधवत्सौवर्णी प्रतिमेत्याशयः॥ अथाचार्यो यजमानानुज्ञयाचार्यकर्म करिष्य इति संकल्प्य हस्तमात्रावरं च
तुरस्रं कुंडं स्थंडिलं वा संस्कृत्य तत ऐशान्यां कुंडवदायतां चतुरस्रां चतुस्त्रिद्व्यंगुलोच्छ्रितत्रिभूमिकां ग्रहवेदिं कृ
त्वा तस्यां शुक्लैर्व्रीहितंडुलैः सकर्णिकमष्टदलमंबुजमुल्लिखेत्॥ आहुतिसंख्यानुसारेण कुंडादौ हस्ताधि
कपरिमाणव्यवस्था संवत्सरकौस्तुभांतर्गतमाघकृत्ये द्रष्टव्या॥ कुंडतुल्यैव ग्रहवेदिर्वृद्धैः कल्प्या॥ कर्णिका
यां ग्रहपीठानि कुर्यात्॥ कर्णिकायामध्ये रक्ताक्षतैर्वर्तुलं॥ आग्नेये दले शुक्लाक्षतैश्चतुरस्रं॥ दक्षिणे रक्ता
क्षतैस्त्रिकोणं॥ ऐशाने हरिताक्षतैर्बाणाकारं॥ उत्तरे हरिताक्षतैर्दीर्घचतुरस्रं॥ पूर्वस्मिन् शुक्लाक्षतैः पंचको
णं॥ पश्चिमे कृष्णाक्षतैश्चापाकारं॥ नैर्ऋते तादृशैः शूर्पाकारं॥ वायव्ये चित्राक्षतैर्ध्वजाकारमिति॥ तत उदीच्यां

Indira Gandhi National
Centre for the Arts

संको०
१४२

रंगवल्ली पद्मे धान्येन कुंभयोर्मध्यपीठं प्रकल्प्य तत्र नवमव्रणं तेजसं मृन्मयं वा नुलिप्तमक्षतपुष्पमालायुतं
कृतं कुंभं स्थापयेत्॥ आकलशेष्वित्यस्य गाथिपुत्रो विश्वामित्रः पवमानसोमो गायत्री॥ कलशस्थापने विनियो
गः ततः कुंभं शुद्धाद्भिः पूरयेत्॥ इमं मे गंगे इत्यस्य सिंधुक्षित्प्रैयमेधो नद्यो जगती उदकपूरणे। नि प्रक्षिप्य दूर्वापल्ल
वैर्मुखमवच्छाद्य वस्त्रयुग्मेन वेष्टयित्वा समुद्रादीनि तीर्थान्यावाह्य कुंभमभिमृश्य आलिंगा वारुणीः पवमानीश्च ज
पेदिति॥ तत्राप्यायस्वेत्यस्य राहुगणो गोतमः सोमो गायत्री क्षीरप्रक्षेपे वि० दधिक्राव्ण इत्यस्य गोतमो वामदेवो द
धिक्रावानुष्टुप्॥ दधिप्र० उक्तमंत्राभ्यां क्षीरदधनी क्रमेण प्रक्षिप्य शुक्रमसि ज्योतिरसीति घृतं॥ गंधद्वारेत्यस्या
नंदः श्रीरनुष्टुप् गोमयप्र० गोमयं॥ गायत्र्या विश्वामित्रः सविता गायत्री गोमूत्रप्र० गोमूत्रं॥ पुनराप्यायस्वेत्या
दिभिस्त्रिभिः क्षीरदधिघृतानि प्रक्षिप्य मधुवाता इति सृणां राहुगणो गोतमो विश्वेदेवा गायत्री मधुप्र० मधु प्रक्षि
प्य स्वादुः पवस्वेत्यस्य रेणुर्भार्गवः पवमानसोमस्त्रिष्टुप् शर्कराप्रक्षेपे विनियोगः॥ शर्करां च प्रक्षिप्य नूतना
नृतपवित्र पर्वताग्रात्॥ नश्वरान्नदयगजवल्मीकह्रदगोष्ठराजद्वारचतुष्पथेभ्यो नूतनाहृतपवित्रमृदश्च
क्षिपेत्॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमिति॥ सहिरण्यानीत्यस्य
श्यावाश्वः सविता गायत्री नूतनाहृतरत्नानि प्रक्षिप्य रूवतिभीमद्दति मंत्रस्य विश्वामित्रो रेणुः पवमानसोमो
जगती त्वक्प्रक्षेपे विनियोगः॥ न्यग्रोधाश्वत्थप्लक्षजंबूचूतत्वचः प्रक्षिप्य या ओषधीरित्यस्य आथर्वण भिष १४२
गोषधयोनुष्टुप् अनंतशतौषधानि तदभावे दशमूलानि सुवर्णं वानि क्षिप्य गंधद्वारामिति गंधं॥ ततः कां

डात्कांडादिति दूर्वाः॥ ततः प्रवो यज्ञेष्वित्यस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप्॥ पल्लवप्रक्षेपे वि० न्यग्रोधाद्युदुंबरप
ल्लवैर्मुखमाच्छाद्य युवं वस्त्राणीति युग्मेन वेष्टयित्वा कुंभे तीर्थान्यावाहयेत्॥ सर्वे समुद्राः सरितस्तीर्थानि जल
दा नदाः॥ आयांतु यजमानस्य दुरितक्षयकारकाः॥ गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्मदे सिंधु कावेरि जले
ऽस्मिन्संनिधिं कुर्विति॥ इमं मे गंगे इति च॥ ततः कुंभमभिमृश्य जपेत्॥ आपो हि ष्ठेति तिसृणां वरीषः सिंधुद्वीप आ
पो गायत्री॥ नहि तेषामिति सृणां माजीगर्तिः शुनःशेपो वरुणस्त्रिष्टुप्॥ स्वादिष्ठयेति सृणां मधुच्छंदाः॥ प
वमानः सोमो गायत्री॥ सर्वासां जपे वि० मूले स्त्रीलिंगबहुवचनात्॥ शांतिसूक्तमेव चर्चां विनियोग श्रुतेः प
चां सूक्तोपन्यासश्चिंत्यः काम्यस्वयमेवायं जप आचार्येण कार्यः नैमित्तिके स्वाशक्तौ मंत्रविदमन्यं नियुंजीत॥
अथ यजमानः प्राङ्मुखः समाहितचित्तः आचार्यत्विक्सहितः पुण्याहवाचनं कुर्यात्॥ अस्य नवग्रहकर्मणः पु
ण्याहं भवंतो ब्रुवंत्विति एवं स्वस्ति ति एवं स्वस्तिम० ऋद्धिम० [illegible] इति॥ ततो ग्रहपूजां करिष्य इति संकल्पः॥ ततः
पूर्वनिर्मितपीठे पुयथास्थानमुखी ग्रहप्रतिमाः स्थापयित्वा तद्दक्षिणवामपार्श्वयोरधिदेवतप्रत्यधिदेवतप्रतिमे
तदभिमुखौ स्थापयेत् तत्प्रतिमानामसंभवे पुष्पाक्षतादिषु तादेवता आवाहयेत्तत्र प्रणवव्याहृतिभिर्वक्ष्यमाण
रीत्या वाह्यावाहने स्वगंते भगवन्नादित्ये त्यादिआवाहयामीत्यंत पारिशिष्टोक्तं गद्यमंत्रं पठित्वा कर्णिकास्थताम्र
प्रतिमायां प्राङ्मुखां पुष्पांजलिं क्षिपेदित्यावाहनं॥ एवं प्रत्यावाहनं पुष्पांजलिप्रयोगो बोध्यः॥ तत्रायं क्रमः॥ अस्य
समस्तव्याहृतीनां अत्रिभृगुभरद्वाजप्रजापतय ऋषयः॥ अग्निवायुसूर्यप्रजापतयो देवता गायत्र्युष्णिगनुष्टुप्बृह

Indira Gandhi National
Centre for the Arts

संको० ह त्य छंदांसि आवाहने वि० ॐ भूरादित्यमावाहयामि ॐ भुव आदित्यमा० ॐ स्वः आदित्यमा० ॐ भूर्भुवः स्वरादित्यमा०
आकृष्णेनेत्यस्य हिरण्यस्तूप ऋषिः॥ सविता देवता त्रिष्टुप् छंदः॥ आवाहने वि० ॐ आकृष्णेन रजसा वर्तमानो निवे
१४२ शयन्नमृतं मर्त्यं च॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्निति मंत्रमुच्चार्य भगवन्नादित्य ग्रहाधिपते का
श्यपगोत्र कलिंगदेशेश्वर जपापुष्पोपमांग घृतेद्विभुज पद्म आभयहस्त सिंदूरवर्णांबर माल्यानुलेपन उज्वलमाणिक्य
रत्नचित सर्वांगाभरणभास्वर तेजोनिधे त्रिलोकप्रकाशक त्रिदेवतामयमूर्ते नमस्ते सन्नद्धारुणध्वजपताको
पशोभितेन सप्ताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छाग्निरुद्राभ्यां सह पद्म कर्णिकायां ताम्रप्रतिमां तां प्रा
ङ्मुखीं वर्तुले पीठे अधितिष्ठ पूजार्थं त्वामावाहयामीत्यादित्यमावाहयेत्॥ तद्दक्षिणपार्श्वे० ॐ भूरादित्याधिदेवम
ग्निमावाहयामि॥ ॐ भुव आदित्याधिदेवमग्निमावाहयामि॥ ॐ स्वरादित्याधिदेवमग्निमावाहयामि॥ ॐ भूर्भुवः स्व पि
रादित्याधिदेवमग्निमावाहयामि॥ अग्निं दूतमित्यस्य काण्वो मेधातिथि ऋषिः॥ अग्निर्देवता गायत्री छंदः॥ आवाह
ने वि० ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं॥ अस्य यज्ञस्य सुक्रतुं॥ इमं मंत्रं उच्चार्य पिंगश्मश्रुकेशपिंगाक्षि
त्रितयं अरुणावर्णांग छागस्थ साक्षसूत्र समार्चिषं शक्तिधर वरद हस्त द्वयमादित्याधिदेवमग्निमावाह
यामि॥ तद्वामपार्श्वे॥ ॐ भूरादित्यप्रत्यधिदेवं रुद्रमावाहयामि॥ ॐ भुवः आदित्यप्रत्यधिदेवं रुद्रमावाहयामि १४२
॥ ॐ स्वरादित्यप्रत्यधिदेवं रुद्रमावाहयामि॥ ॐ भूर्भुवः स्वरादित्यप्रत्यधिदेवं रुद्रमावाहयामि॥ त्र्यंबकमि
त्यस्य वसिष्ठ ऋषिः॥ त्र्यंबको देवता अनुष्टुप् छंदः॥ आवाहने वि० त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं॥ उर्वा

रुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ इमं मंत्रं उच्चार्य त्रिलोचनोपेतं पंचवक्त्रं वृषारूढं कपाल शूल खट्वांग
धारिणं चंद्रमौलिं सदाशिवमादित्यप्रत्यधिदेवं रुद्रमावाहयामि॥ तद्दक्षिणपूर्वदले ॐ भूः सोममावाहयामि० ॐ भु
वः सोममावाहयामि॥ ॐ स्वः सोममावाहयामि॥ ॐ भूर्भुवः स्वः सोममावाहयामि॥ आप्यायस्वेत्यस्य गोतम ऋषिः
॥ सोमो देवता गायत्री छंदः॥ आवाहने वि० ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं भवा वाजस्य संगथे॥ इमं मंत्र वा४
मुच्चार्य भगवन् सोम द्विजाधिपते सुधामयशरीर अत्रिगोत्र यमुनादेशेश्वर गोक्षीर धवलांगकांते द्विभुज ग
दावरदांकितकरयुग्म श्वेतवर माल्यानुलेपन सर्वांग मुक्तामुक्तिकाभरण रमणीय समस्तलोकाप्यायक दे
वतास्वाद्यमूर्ते नमस्ते सन्नद्धधवलध्वजपताकोपशोभितेन दशाश्वेताश्वरथवाहनेन मेरुं प्रदक्षिणीकुर्व
न्नागच्छ अद्भिरुमया सह पद्म आग्नेयदलमध्ये स्फाटिकप्रतिमां प्रत्यङ्मुखीं चतुरस्र पीठे अधितिष्ठ पूजा
र्थमावाहयामि॥ तद्दक्षिणपार्श्वे॥ ॐ भूः सोमाधिदेवता अपः आवाहयामि॥ ॐ भुवः सोमाधिदेवता अप
आवाहयामि॥ ॐ स्वः सोमाधिदेवता अपः आ०॥ ॐ भूर्भुवः स्वः सोमाधिदेवता अपः आ०॥ अप्सु मइत्यस्य सिं
धुद्वीप ऋषिः॥ आपो देवता गायत्री छंदः॥ आवाहने वि०॥ ॐ अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा॥ अग्निं
च विश्वशंभुवं॥ इमं मंत्रमुच्चार्य स्त्रीरूपधारिणीः श्वेतवर्णाः मकरवाहनाः पाशकलशधारिणीः मुक्ताभरणभू
षिताः सोमाधिदेवता अपः आ० तद्वामपार्श्वे ॐ भूः सोमप्रत्यधिदेवतामुमामावाहयामि॥ ॐ भुवः सोम० उमामा० ॐ
स्वः सोम० उमामा० ॐ भूर्भुवः स्वः सोमप्रत्यधिदेवतां० गौरीर्मिमायेत्यस्य दीर्घतमा ऋषिः॥ उमा देवता जगती छंदः॥ आ

Indira Gandhi National
Centre for the Arts

संको० वाहनेवि० ॐगौरीर्मिमाय सलिलानितक्ष्त्येकपदी द्विपदी सा चतुष्पदी॥ अष्टापदी नवपदी बभूवुषी सहस्राक्षरा प
१४४ रमे व्योमन्॥ इमं मंत्रमुच्चार्य अब्जमंत्रकमलदर्पणकमंडलुधारिणीं त्रिदशपूजितां सोमप्रत्यधिदेवतामुमामावा
हयामि २ दक्षिणदेशे ॐभूरंगारकमावाहयामि॥ ॐभुवरंगारक० ॐस्वरंगारक० ॐभूर्भुवःस्वरंगारक० अग्नि
र्मूर्द्धेत्यस्य विरूप ऋषिः॥ अंगारको देवता गायत्री छंदः॥ आवाहने विनि० ॐअग्निर्मूर्धा दिवः ककुत्पतिः पृथि
व्या अयं॥ अपां रेतांसि जिन्वति॥ इमं मंत्रमुच्चार्य भगवन्नंगारक अस्मात्लते भारद्वाजगोत्र अवंति देशेश्वर रक्ता
लापुंजांगद्युते चतुर्भुज शक्तिशूलगदाखड्गधारिन् रक्तांबरमाल्यानुलेपनप्रवालभूषिताभरणसर्वांग दूराल्लोकदीप्तेन
मस्ते॥ सन्नद्ध रक्तध्वजपताकोपशोभितेन रक्तमेषरथवाहनेन मेरुं प्रदक्षिणं कुर्वन्॥ आगच्छ भूमिस्कंदाभ्यां सह प
श्चदक्षिणदलमध्ये रक्तचंदनप्रतिमां दक्षिणामुखीं त्रिकोणपीठे धितिष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे
ॐभूरंगारकाधिदेवतां भूमिमावाहयामि॥ ॐभुवरंगारका० ॐस्वरं० ॐभूर्भुवःस्वरं० स्योना पृथिवीत्यस्य मेधा
तिथि ऋषिः॥ पृथिवी देवता गायत्री छंदः॥ आवाहने वि० ॐस्योना पृथिवी भवानृक्षरा निवेशनी॥ यच्छा नः श
र्म सप्रथः॥ इमं मंत्रमुच्चार्य शुक्लवर्णां दिव्याभरणभूषितां॥ चतुर्भुजां सौम्यवपुषं चंडांशुसदृशांबरां॥ रत्नपा
त्रसस्यपात्रौषधीपात्रपद्मोपेतकरां चतुर्दिग्नागदृष्टगतां अंगारकाधिदेवतां भूमिमावाहयामि॥ तद्वामपार्श्वे ॐ १४४
भूरंगारकप्रत्यधिदेवं स्कंदमावाहयामि॥ ॐभुवरस्वरंगा० ॐभूर्भुवःस्वरं कुमारश्चित्पितरमित्यस्य गृत्समद ऋषिः
॥ स्कंदो देवता त्रिष्टुप् छंदः॥ आवाहने वि० कुमारश्चित्पितरं वंदमानं प्रति नानाम रुद्रोपयतं॥ भूरेर्दातारं सत्पतिं

७५

णीषेस्तुतस्त्वं भेषजा रास्यस्मे इमं मंत्रमुच्चार्य षण्मुख शिखंडकविभूषणं रक्तांबरधरं मयूरयानं कुक्कुटघंटापताका
शक्त्युपेतं चतुर्भुजमंगारकप्रत्यधिदेवं स्कंदमावाहयामि ३ ततः ऐशानुत्तरदले ॐभूर्बुधमावाहयामि॥ ॐभुवर्बुध० ॐस्व
र्बुध० ॐभूर्भुवस्स्वर्बुध० उद्बुध्यध्वमित्यस्य बुध ऋषिः॥ सौम्यो देवता त्रिष्टुप् छंदः॥ आवाहने० ॐउद्बुध्यध्वं समनसः सखायः
समग्निमिंध्वं बहवः सनीलाः। दधिक्रामग्निमुषसं च देवीमिंद्रावतोवसे निह्वयेवः॥ इमं मंत्रमुच्चार्य भगवन्॥ सौम्य सौम्य
रूपे तेसर्वज्ञानमय अत्रिगोत्र मगधदेशेश्वर कुंकुमवर्णाभद्युते चतुर्भुज खड्गखेटगदावरदांकितपीतांबरमाल्यानु
लेपन॥ मरकताभरणालंकृतसर्वांग विबुधपते नमस्ते सन्नद्ध यातध्वजपताकोपशोभितेन चतुःसिंहरथवाहनेन मेरुं
प्रदक्षिणं कुर्वन्नागच्छ विष्णुपुरुषाभ्यां सह ऐशानदलमध्ये सुवर्णप्रतिमामुदङ्मुखीं बाणाकारपीठे धितिष्ठ पूजार्थं त्वा
मावाहयामि॥ तद्दक्षिणपार्श्वे ओं भूः सौम्याधिदेवं विष्णुमावाहयामि॥ ॐभुवः सौ० ॐस्वः सौ० ॐस्वः सौ० ॐभूर्भुवःस्वः
सौ० इदं विष्णुरित्यस्य काण्वो मेधातिथि ऋषिः॥ विष्णुर्देवता गायत्री छंदः॥ आवाहने वि० ॐइदं विष्णुर्विचक्रमे
त्रेधा निदधे पदं॥ समूढमस्य पांसुरे॥ इमं मंत्रमुच्चार्य कौमोदकीपद्मशंखचक्रोपेतचतुर्भुजं सौम्याधिदेवं विष्णुमा
वाहयामि॥ तद्वामपार्श्वे॥ ॐभूः सौम्यप्रत्यधिदेवं पुरुषमावाहयामि॥ ॐभुवः सौ० ॐस्वः सौ० भूर्भुवः सौ०॥ सहस्र
शीर्षेत्यस्य नारायण ऋषिः॥ पुरुषो देवता अनुष्टुप् छंदः॥ आवाहने वि०॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्र
पात्॥ स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं॥ इमं मंत्रमुच्चार्य सौम्यप्रत्यधिदेवं विष्णुवत्पुरुषमावाहयामि॥ ४॥
उत्तरदले ॐभूः बृहस्पतिमावाहयामि॥ ॐभुवः ॐस्वर्बृ० ॐभूर्भुवःस्वः बृ०॥ बृहस्पते अतीत्यस्य गृत्समद ऋषिः॥

Indira Gandhi National
Centre for the Arts

संको० बृहस्पतिर्देवता त्रिष्टुप्छंदः॥ आवाहने विनियोगः॥ बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु॥ यद्दीद
१४५ यच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं॥ इमं मंत्रमुच्चार्य भगवन् बृहस्पते समस्त देवताचार्य आंगिरस
गोत्र सिंधुदेशोद्भव रदीप्त सुवर्णसदृशदीप्त चतुर्भुज दंडकमंडल्वक्षसूत्रवरदांकित पीतांबरमाल्यानुलेपन
पुष्परागमयाभरणरमणीय समस्तविद्याधिपते॥ नमस्ते सन्नद्धपीतध्वजपताकोपशोभितेन पीताश्वरथवाह
नेन मे रुद्र प्रदक्षिणी कुर्वन्नागच्छेंद्र ब्रह्मभ्यां सह पश्चिमोत्तरदलमध्ये सुवर्णप्रतिमामुदङ्मुखीं दीर्घचतुरस्रपीठेधिति
ष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे ॐ भूः बृहस्पत्यधिदेवं इंद्रमावाहयामि॥ ॐ भुवः बृह० ॐ स्वः बृह० ॐ भूर्भुवः
स्वः बृ० उद्बृहस्पते त्र्यपी इंद्र श्रेष्ठानि इत्यस्य गृत्समद ऋषिः॥ इंद्रो देवता त्रिष्टुप्छंदः॥ आवाहने वि० इंद्र श्रेष्ठानि
द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे॥ पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नां॥ इमं मंत्रमु
च्चार्य चतुर्दंतगजारूढं वज्रांकुशधरं शचीपतिं नानाभरणभूषितं बृहस्पत्यधिदेवमिंद्रमावाहयामि॥ तद्वामपार्श्वे
ॐ भूः बृहस्पतिप्रत्यधिदेवं ब्रह्माणमावाहयामि॥ ॐ भुवः बृ० ॐ स्वः बृ० ॐ भूर्भुवः स्वः बृ० ब्रह्मणा ते ब्रह्मयुजा इत्यस्य विश्वा
मित्र ऋषिः॥ ब्रह्मा देवता त्रिष्टुप्छंदः॥ आवाहने वि० ॐ ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू
स्थिरं रथं सुखमिंद्राधितिष्ठन् प्रजानन्विद्वां उप याहि सोमं॥ इमं मंत्रमुच्चार्य पद्मासनस्थं जटिलं चतुर्मुखं अक्षमा १४५
लास्रुवपुस्तककमंडलुधारिणं कृष्णाजिनवाससं पार्श्वस्थितहंसं बृहस्पतिप्रत्यधिदेवं ब्रह्माणं आवाहयामि॥ ततः
प्राग्दले ॐ भूः शुक्रमावाहयामि॥ ॐ भुवः शु० ॐ भूर्भुवः स्वः शु० शुक्रं ते अन्यदित्यस्य भरद्वाज ऋषिः॥ शुक्रो देवता त्रिष्टुप्

छंदः॥ आवाहने वि० शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधा
वो भद्रा ते पूषन्निह रातिरस्तु॥ इमं मंत्रमुच्चार्य भगवन्॥ समस्त दैत्यगुरो भार्गवगोत्र भोजकटदेशोद्भव रजतोज्ज्वला
गकांते चतुर्भुज दंडकमंडल्वक्षसूत्रवरदांकित शुक्लांबरमाल्यानुलेपनवज्राभरणभूषित सर्वांग समस्त नीति
शास्त्रनिपुण महते नमस्ते सन्नद्धशुक्लध्वजपताकोपशोभितेन शुक्लाश्वसहितेन रथेन मे रुद्र प्रदक्षिणी कुर्वन्नागच्छ इं
द्राणीद्राभ्यां सह पूर्वदलमध्ये रजतप्रतिमां प्राङ्मुखीं पंचकोणपीठेधितिष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपा
र्श्वे॥ ॐ भूः शुक्राधिदेवतामिंद्राणीमावाहयामि॥ ॐ भुवः शुक्राधिदेवतामिं० ॐ स्वः शुक्राधिदेवतामिं० ॐ भूर्भुवः शु
क्राधिदेवतामिंद्रा०॥ इंद्राणीमास्वित्यस्य वृषाकपिर्ऋषिः॥ इंद्राणी देवता पंक्तिश्छंदः॥ आवाहने वि० ॐ इंद्राणीमा
सु नारिषु सुभगामहमश्रवं॥ नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिंद्र उत्तरः॥ इमं मंत्रमुच्चार्य संतान
मंजरीवरदानधरद्विभुजां शुक्राधिदेवतामिंद्राणीमावाहयामि॥ वामपार्श्वे ॐ भूः शुक्रप्रत्यधिदेवमिंद्रमावाह
यामि॥ ॐ भुवः शुक्रप्रत्यधिदेवं इंद्र॥ ॐ स्वः शुक्रप्रत्यधिदेवमिंद्र० ॐ भूर्भुवः शुक्रप्रत्यधिदेवमिंद्र० इंद्रमिद्देवता
तय इत्यस्य मेधातिथिर्ऋषिः॥ इंद्रो देवता प्रगाथा बृहती छंदः॥ आवाहने वि०॥ ॐ इंद्रमिद्देवतातय इंद्रं प्रयत्यध्वरे॥ इं
द्रं समीके वनिनो हवामह इंद्रं धनस्य सातये॥ इमं मंत्रमुच्चार्य चतुर्दंतगजारूढं वज्रांकुशधरं शचीपतिं नानाभरण
भूषितं भार्गवप्रत्यधिदेवमिंद्रं आवाहयामि॥ पश्चिमदले ॐ भूः शनैश्चरमावाहयामि॥ ॐ भुवः शनै० ॐ स्वः शनै० ॐ
भूर्भुवः स्वः श० शमग्निरित्यस्य इरिंबिठि ऋषिः॥ शनैश्चरो देवता उष्णिक् छंदः॥ आवाहने वि० शमग्निरग्निभिः कर
च्छन्नस्तपतु सूर्यः॥ शं वातो वात्वरपा अप स्रिधः॥ इमं मंत्रमुच्चार्य भगवन् शनैश्चर भास्करतनय॥ काश्यपगो

Indira Gandhi National
Centre for the Arts

संकौ०
१४६

त्र॥ सुराष्ट्रदेशेश्वर॥ कज्जलमाभांगकांते चतुर्भुज॥ चापतूणीरकृपाणाभयांकित॥ नीलांबरमाल्यानुलेपन॥ नीलर
त्नभूषणालंकृतसर्वांगसमस्तभुवनभीषणामर्षमूर्त्ते॥ नमस्ते सन्नद्धनीलध्वजपताकोपशोभितेन नीलगृध्ररथवाहनेन मेरुं प्रदक्षि
णीकुर्वन्नागच्छ प्रजापतियमाभ्यां सह पश्चपश्चिमदलमध्ये कांस्यप्रतिमां प्रत्यङ्मुखी चापाकारपीठे धितिष्ठ पूजार्थं त्वामा
वाहयामि॥ तद्दक्षिणपार्श्वे॰ ॐ भूः शनैश्चराधिदेवं प्रजापतिमावाहयामि॥ ॐ भुवः श॰ ॐ स्वः श॰ ॐ भूर्भुवः स्वः श॰॥ प्रजाप
तन्नत्वदित्यस्य हिरण्यगर्भऋषिः॥ प्रजापतिर्देवता त्रिष्टुप्छंदः॥ आवाहने॰ प्रजापते नत्वदेतान्यन्यो विश्वाजातानिपरिताबभूव॥ यत्का
मास्तेजुहुमस्तन्नो अस्तु वयंस्यामपतयोरयीणां॥ इमं मंत्रमुच्चार्य यज्ञोपवीतिनं हंसस्थमेकवक्त्रं अक्षमालास्रुवपुस्तककमंडलुमदि
तचतुर्भुजं शनैश्चराधिदेवं प्रजापतिमावाहयामि॥ तद्वामपार्श्वे॥ ॐ भूः शनैश्चरप्रत्यधिदेवं यममावाहयामि॥ ॐ भुवः श॰ ॐ स्वः श॰
ॐ भूर्भुवः श॰ यमायसोमंसुनुतेत्यस्य यमऋषिः॥ यमो देवतानुष्टुप्छंदः॥ आवाहने वि॰ यमायसोमंसुनुतयमायजुहुताहविः यमं
हयज्ञोगच्छत्यग्निदूतोअरंकृतः॥ इमं मंत्रमुच्चार्य द्विभुजाली नेदंडहस्तं रक्तसदृशं पाशधरं कृष्णवर्णं महिषारूढं सर्वाभरणभूषितं शनै
श्वरप्रत्यधिदेवं यममावाहयामि॰॥ प्रत्यक्दक्षिणदलाग्रे ॐ भूः राहुमावाहयामि॥ ॐ भुवः रा॰ ॐ स्वः रा॰ ॐ भूर्भुवः रा॰ कयानश्चित्रइ
त्यस्य वामदेवऋषिः॥ राहुर्देवता गायत्रीछंदः॥ आवाहने विनियोगः॥ ओं कयानश्चित्र आभुवदूती सदावृधः सखा॥ कयाशचि
३ ष्ठयावृता॥ इमं मंत्रमुच्चार्य भगवन्॥ राहो॰॥ रविसोममर्दन सिंहिकानंदन पैठीनसिगोत्र बर्बरदेशेश्वर कालमेघद्युते व्याघ्रव
दन चतुर्भुज खड्गशूलवरदांकित कृष्णांबरमाल्यानुलेपन गोमेदिकाभरणभूषितसर्वांग शौर्यनिधे नमस्ते॥ सन्नद्धकृ
ष्णध्वजपताकोपशोभिते॥ कृष्ण सिंहरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्नागच्छ सर्पकालाभ्यां सह पश्चनैर्ऋतदलमध्ये सी १४६
सकप्रतिमां दक्षिणामुखी शूर्पाकारपीठे धितिष्ठ पूजार्थं त्वामावाहयामि॥ तद्दक्षिणपार्श्वे॥ ॐ भूः ह्वधिदेवान्सर्वानावाहयामि

॥ ॐ भुवः रा॰ ॐ स्वः रा॰ ॐ भुवः स्वः रा॰ आयंगौरित्यस्य सर्पराज्ञाऋषिः॥ सर्पा देवता गायत्रीछंदः॥ आवाहने वि॰॥ ॐ आयंगौः पृ
श्निरक्रमीदसदन्मातरंपुनः॥ पितरंचप्रयन्स्वः॥ इमं मंत्रमुच्चार्य अक्षसूत्रधरान्कुंडिकाकारपुच्छयुक्तान् एकभोगान्त्रिभो
गान्भिषणान्भिषणान्राह्वधिदेवान्सर्पानावाहयामि॥ तद्वामपार्श्वे॥ ॐ भूः राहुप्रत्यधिदेवं कालमावाहयामि॥ ॐ भुवः रा॰
ॐ स्वः रा॰ ओं भूर्भुवः स्वः रा॰ परंमृत्यो इत्यस्य संकुसुकऋषिः॥ मृत्युर्देवता त्रिष्टुप्छंदः॥ आवाहने वि॰॥ परंमृत्यो अनुपरेहि
पंथां यस्तेस्व इतरोदेवयानात्॥ चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान्॥ इमं मंत्रमुच्चार्य करालवदनं नि
त्यगंभीषणं पाशदंडधरं सर्पवृश्चिकरोमाणं राहुप्रत्यधिदेवं कालमावाहयामि॥ च॥ प्रत्यगुत्तरदले ॐ भूः केतुमावाहया
मि॥ ॐ भुवः केतुमावाहयामि॥ ॐ स्वः केतु॰॥ ॐ भूर्भुवः स्वः केतु॰ केतुं कृण्वन्नित्यस्य मधुच्छऋषिः॥ केतुर्देवता गायत्रीछं
दः॥ आवाहने वि॰ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे॥ समुषद्भिरजायथाः॥ इमं मंत्रमुच्चार्य भगवन्॥ केतो॥ कामस
प॥ जैमिनिगोत्र मध्यदेशेश्वर धूम्रवर्ण ध्वजाकृते॥ द्विभुज॥ गदावरदांकित चित्रांबरमाल्यानुलेपन॥ वैडूर्यमयाभर
णभूषितसर्वांग चित्रशक्ते॥ नमस्ते सन्नद्धचित्रध्वजपताकोपशोभितेन चित्रकपोतरथवाहनेन मेरुं प्रदक्षिणीकुर्वन्ना
गच्छ॥ ब्रह्मचित्रगुप्ताभ्यां सह पश्चवायव्यदलमध्ये कांस्यप्रतिमां दक्षिणामुखी ध्वजाकारपीठे धितिष्ठ पूजार्थं त्वामावाह
यामि॥ तद्दक्षिणपार्श्वे॥ ॐ भूः केत्वधिदेवं ब्रह्माणमावा॰॥ ॐ भुवः केत्व॰ ॐ स्वः के॰ ॐ भूर्भुवः स्वः के॰ ब्रह्मजज्ञानमित्यस्य न
कुलऋषिः॥ ब्रह्मा देवता त्रिष्टुप्छंदः॥ आवाहने वि॰ ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः॥ सबुध्न्या
उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥ इमं मंत्रमुच्चार्य पद्मासनस्थं जटिलं चतुर्मुखं अक्षमालास्रुवपुस्तककमंडलु
धरं कृष्णाजिनवाससं पार्श्वस्थितहंसं केत्वधिदेवं ब्रह्माणमावाहयामि॥ तद्वामपार्श्वे॥ ॐ भूः केतुप्रत्यधिदेवं चित्रगुप्तमावाह

Indira Gandhi National
Centre for the Arts

संको० यामि॥ ॐ भुवः के० ॐ स्वः के० ॐ भूर्भुवः स्वः के० स्वचित्र चित्रमित्यस्य भरद्वाज ऋषिः॥ चित्रगुप्तो देवता त्रिष्टुप् छंदः॥ आवाह
ने वि० सचित्र चित्रं चितयंतमस्मे चित्रक्षत्र चित्रतमं वयोधां॥ चंद्रं रयिं पुरुवीरं बृहंतं चंद्र चंद्राभिर्गृणते युवस्व॥ इमं मंत्रमुच्चा
१५७ र्य उदीच्यवेषधरं सौम्यदर्शनं लेखनीयज्ञोयेतद्विभुजं॥ केतुप्रत्याधिदेवं चित्रगुप्तमावाहयामि॥ ८॥ अथ कर्मसाद्गुण्य क
रदेवतावाहनं शुक्लतंदुलपीठेषु कुर्यात्॥ तत्रायं क्रमः॥ ईशाने वीथ्युपदेशे ॐ भूः विनायकं० ॐ स्वः विना० भूर्भुवः स्वः विना०
आ नूनमिंद्र इत्यस्य काण्वः कुत्सादौ ऋषिः॥ विनायको देवता गायत्री छंदः॥ आवाहने वि० ॐ आ तू न इंद्र क्षुमंतं चित्रं ग्रा
भं संगृभाय॥ महाहस्तीदक्षिणेन॥ इमं मंत्रमुच्चार्य चतुर्भुजं त्रिनेत्रं गजाननं॥ नागयज्ञोपवीतिनं चंद्रधरं दंताक्षमालापरशु
मोदकोपेतचतुर्भुजं विनायकमावाहयामि १ तद्दक्षिणतो ॐ भूः दुर्गामावाहयामि॥ ॐ भुवः दुर्गा० ॐ स्वः दु० ॐ भूर्भुवः स्वः दु०
जातवेदस इत्यस्य कश्यप ऋषिः॥ दुर्गा देवता त्रिष्टुप् छंदः॥ आवाहने वि० ॐ जातवेदसे सुनवाम सोममरातीयतो नि
दहाति वेदः॥ स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः॥ इमं मंत्रमुच्चार्य शक्तिबाणशूलखड्गचक्रचंद्रबिंबखे
टकपालपरशुकंटकोयेतदशभुजां सिंहारूढां दुर्गाख्यदैत्यासुदारिणीं दुर्गामावाहयामि॥ २॥ तद्दक्षिणतो ॐ भूः क्षेत्रपालमावा
हयामि॥ ॐ भुवः क्षे० ॐ स्वः क्षे० ॐ भूर्भुवः स्वः क्षे० क्षेत्रस्य पतिनेत्यस्य वामदेव ऋषिः॥ क्षेत्रपतिर्देवता अनुष्टुप् छंदः॥ आवाह० क्षेत्रस्य
पतिना वयं हितेनेव जयामसि॥ गामश्वं पोषयित्न्वा स नो मृळातीदृशे॥ इमं मंत्रमुच्चार्य श्यामवर्णं त्रिलोचनं ऊर्ध्वकेशश्म
दं कुंभ्रुकुटीकुटिलाननं नूपुरालंकृतांघ्रिं सर्पमेखलयायुतं सर्पांगमतिदृढं घंटावद्धगुल्फावलं विकटरोटिमाला १५७
धारिणं मुरगकौपीनं चंद्रमौलिं दक्षिणहस्ते शूलवेतालखड्गडुंडुमीं दधानं वामहस्ते कपालघंटाचर्मचापान् दधानं नील
दिग्वाससं अमितद्युतिं क्षेत्रपालमावाहयामि ३ तद्दक्षिणतो० ॐ भूः वायुमावाहयामि॥ ॐ भुवः वा० ॐ स्वः वा० ॐ भूर्भुवः स्वः

वायु० ॐ आ णा शिशुरित्यस्य त्रित ऋषिः॥ वायुर्देवता उष्णिक् छंदः॥ आवाहने वि० आ णा शिशुर्महीनां हिन्वन्नृत
स्य दीधितिं॥ विश्वा परि प्रिया भुवदध द्विता॥ इमं मंत्रमुच्चार्य धावद्धरिणपृष्ठगतं ध्वजवरदानधारिणं धूम्रवर्णं वायुमा
वाहयामि० ४ तद्दक्षिणतो आदित्प्रत्नस्येत्यस्य वत्स ऋषिः॥ अंतरिक्षं देवता गायत्री छंदः॥ आवाह० ॐ आदित्प्रत्नस्य रेत
सो ज्योतिष्पश्यंति वासरं॥ परो यदिध्यते दिवा इमं मंत्रमुच्चार्य नीलोत्पलाभं नीलांबरधारिणं चंद्रकौयेतद्विभुजं षंड
माकाशमावाहयामि॥ ५॥ तद्दक्षिणतो० ॐ भूरश्विनावावाहयामि॥ ॐ भुवर० ॐ स्वर० ॐ भूर्भुवः स्वर० अश्विनावर्तिरस्म
दा गोमद्दस्रा हिरण्यवत्॥ अर्वाग्रथं समनसा नियच्छतं॥ इमं मंत्रमुच्चार्य प्रत्येकं॥ औषधिपुस्तकौयेतदक्षिणवामह
स्तावन्योन्यसंयुक्तदेहौ एकस्य दक्षिणपार्श्वे अपरस्य वामपार्श्वे रत्नभांडकरश्वेतांबरधारिनारीयुग्मोपेतौ देवौ भिष
जावश्विनावावाहयामि॥ अथ क्रतुसंरक्षकेंद्रादिलोकपालावाहनं पूर्ववत्तंदुलपीठेषु कुर्यात्॥ तत्रायं क्रमः॥ तत्र
प्राग्दलाग्रे॥ ॐ भूरिंद्रमावाहयामि॥ ॐ भुवरिं० ॐ स्वरिं० ॐ भूर्भुवः स्वरिं० इंद्रं व इत्यस्य मधुच्छंदा ऋषिः॥ इंद्रो देवता गाय
त्री छंदः॥ आवाहने वि० ॐ इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः॥ अस्माकमस्तु केवलः॥ इमं मंत्रमुच्चार्य स्वर्णसहस्रा
क्षं वज्रपाणिं शचीप्रियं इंद्रमावाहयामि १ आग्नेयदलाग्रे॥ ॐ भूरग्निमावाहयामि॥ ॐ भुवरग्निं० ॐ स्वर० ॐ भूर्भुवः
स्व० अग्निमील इत्यस्य मधुच्छंदा अग्निर्गायत्री आवाहने वि० अग्निमीळे० इमं मंत्रमुच्चार्य स्वर्णवर्णं सप्तार्चिषं सप्तह
स्तं शक्त्यन्नस्रुक्स्रुववतोमरव्यजनघृतपात्राणि दधानं स्वाहाप्रियं मेषवाहनं अग्निमावाहयामि २ याम्यदलाग्रे ॐ भूः
यममावाहयामि॥ ॐ भुवः य० ॐ स्वः य० ॐ भूर्भुवः स्वः य० यमाय सोममित्यस्य यमो यमोनुष्टुप्॥ आ० ॐ यमाय सोमं० इमं
मंत्रमुच्चार्य रक्तवर्णं दंडधरं महिषवाहनं मिलाप्रियं यममावाहयामि ३ नैर्ऋतदलाग्रे॥ ॐ भूर्निर्ऋतिमावाहयामि॥ ॐ

Indira Gandhi National
Centre for the Arts

संको० गुवर्नि० ॐस्वर्नि० ॐभूर्भुवः स्वर्नि० मोषुण इत्यस्य घोरः कण्वो निर्ऋतिर्गायत्री छंदः॥ आ० ॐ मोषुणः परापरा इमं मं
१४८ त्रमुच्चार्य नीलवर्णं खड्गचर्मधरं ऊर्ध्वकेशं नरवाहनं कालिकाप्रियं निर्ऋतिमावाहयामि ४ पश्चिमदलाग्रे ॐ
भूः वरुणमावाहयामि० ॐभुवः व० ॐस्वः व० भूर्भुवः व० उदुत्तमं मुमुग्धि इत्यस्य शुनःशेप ऋषिः॥ वरुणो देवता गा
यत्री छंदः॥ आवाहने वि० ॐ उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत॥ अवाधमानि जीवसे॥ इमं मंत्रमुच्चार्य रक्त
भूषणं नागपाशधरं मकरवाहनं पद्मिनीप्रियं सुवर्णवर्णं वरुणमावाहयामि ५॥ वायव्यदलाग्रे॥ ॐ भूः वायुमा०
ॐभुवः वा० ॐस्वः वा० ॐभूर्भुवः स्व वा० तव वायो इत्यस्य आंगिरसो व्यश्व ऋषिः॥ वायुर्देवता॥ ५॥ गायत्री छंदः॥ आ
वा० ॐ तव वायवृतस्पते त्वष्टुर्जामातरद्भुत॥ अवांस्यावृणीमहे॥ इमं मंत्रमुच्चार्य श्यामवर्णं ध्वजदंडधरं कृष्णमृ
गवाहनं जगत्प्राणरूपं मोहिनीप्रियं वायुमावाहयामि॥ ६॥ उत्तरदलाग्रे॥ ॐ भूः कुबेरमावाहयामि॥ ॐभुवः कु० ॐ
स्वर्णवर्णं निधीश्वरं कुंतपाणिं अश्ववाहनं चित्रिणीप्रियं वायुमावाहयामि॥ ७॥ ऐशानदलाग्रे॥ ॐ भूः ईशानमावाहया
मि॥ ॐभुवः॥ ई० ॐस्वः ई० ॐभूर्भुवः स्वः ई० कद्रुद्राय इत्यस्य कण्व ऋषिः॥ रुद्रो देवता गायत्री० आ० ॐ कद्रुद्राय प्रचे
तसे मीढुष्टमाय तव्यसे॥ वोचेम शंतमं हृदे॥ इमं मंत्रमुच्चार्य शुद्धस्फटिकवर्णं वरदाभयशूलाक्षहस्तं वृषरंह
षवाहनं गौरीप्रियमीशानमावाहयामि॥ ८॥ एवमेकचत्वारिंशद्देवता आवाह्य कलशे च वरुणमावाह्य पूजयेत्
॥ तत्र चंदनादिषु ग्रहभेदेन व्यवस्था विधिः परिशिष्टे॥ रक्तचंदनो मलयजो देवदारुः कुंकुमो मनःशिला शंखपि १४८
ष्टं तिलपिष्टं केतकीरजः कस्तूरीति नवानुलेपनानि॥ मलयजमेव वा॥ रक्तपद्मं कुमुदं रक्तकरवीरं पाटलं पंकजं कुंद
मिंदीवरं कृष्णधत्तूरं चित्रवर्णमिति नवपुष्पाणि॥ मल्लिके व वा॥ पुष्पवर्णा अक्षताः अहतवस्त्रयुग्मानि च॥ कुं

दरसो मधूकशिखा दशांगः सर्जरसो बिल्वफलं श्रीवासः कृष्णागरुः॥ जटामांसी मधूकामिति नव धूपाः॥ गुग्गु
ल एव वा सर्पिषा दीपस्तिलतैलेन वा॥ हविष्यान्नं पायसं पललान्नं गुडान्नं क्षीरोदनो दध्योदनः कृसरो मासान्नं
चित्रान्नमिति नवोपहाराः स्विष्टदन्नमेकमेव वा॥ माणिक्यं मौक्तिकं प्रवालो मरकतं पुष्परागो वज्रो नीलो गोमेदिकं
वैडूर्यमिति नवरत्नान्येकमेव वा माणिक्यमिति॥ पूजायां विशेषांतरमपि तत्रैवोक्तं॥ पुष्पांजलिप्रयोगेणावाह
नं मंत्रैरावाह्य नमोंतैर्नामभिः क्रमेण धूपदीपांतानुपचारान् तर्पयेदिति॥ नामभिः॥ ॐ आदित्याय नम इत्येवं रूपैः
क्रमेणेति आसनपाद्यार्घादीनां प्रसिद्धक्रमेणैवार्पणं वार्यमित्युच्यते तेन पुष्पानंतरं पठिता नामप्यक्षतवस्त्रा
णां स्वकाल एवार्पणं बोध्यं॥ दीपांतानित्यतद्गुणसंविज्ञानो बहुव्रीहिः॥ पुष्पांतानिति यावत् प्राक् स्विष्टकृतो ग्रहाणां
ट धूपदीपेरुपहारानुपहरेत्येति होमोत्तरं परिशिष्टोक्तेः॥ पारिजातादिप्रयोगेषु होमात्पूर्वं ग्रहाणां पूर्वोक्त
द्रव्यैः पुष्पसमर्पणपर्यंतं पूजां कृत्वाऽन्यदेवता मलयजगंधशतपत्रपुष्पैस्तथैव पूजयेदित्युक्तेः होमोत्तरं च सर्व दे
वतानां धूपदीपप्रभृतिपूजायाएवोपदेशात्॥ अतो होमात्पूर्वोत्तरकालयोर्व्यवस्थया वितता पूजा कार्या॥ तत्र
पूर्वकाले गंधपुष्पेषु यथोपदेशं शक्त्या प्रतिव्यवस्था अशक्तौ प्रत्येकोपदेशः॥ उत्तरपूजायां नैवेद्येषु सपुष्परत्न
निवेदनेषु च तथैवोपदेश इति बोध्यं॥ उत्तरपूजा वस्त्रएव रत्नासंभवे सुवर्णपुष्पाणि दद्यादित्यप्युक्तं परिशिष्टे
॥ एवं ग्रहपीठगतसर्वदेवतानां पुष्पांतपूजां कृत्वा स्थंडिले कुंडे वाचार्योऽग्निं प्रतिष्ठाप्यान्वादध्यात्॥ तत्र परिशिष्टं
अथाग्निमुपसमाधाय सहस्त्रिभिः समिद्भिर्वा ज्यानि प्रत्येकं शतेकावराभिः सहस्रपराभिराहुतिभिर्निमितशांत्यपेक्ष

Indira Gandhi National
Centre for the Arts

संको० याजुहुयात्॥ प्रधानहोमांशेन पार्श्वदेवतयोस्तदर्द्धेनेतरेषां स्वाहांतैर्नामभिर्होमस्तल्लिंगमंत्रैर्वा सकृदव
१४६ दानेन चरुहोमः पाणिना॥ प्रसृतिमितान् व्रीहीस्तिलांश्च व्याहृतिभिर्हुत्वेति॥ स यदि मंत्रे रिष्टस्तदेतेमंत्रामव
त्याहुत्यैनेत्यादि॥ चर्वाहुतिप्रमाणं सिद्धांतशेखरे॥ अन्नं ग्राससमं ग्राह्यमिति॥ होमाङ्गोक्तौ दं॥ अथोत्तरस
हस्रं वा शतमष्टोत्तरं तथा॥ अष्टाविंशतिमष्टौ वा एकैकस्य तु होमयेत्॥ नैवेद्यशेषं हुत्वा च होमं मंत्रैस्ततः परं
॥ अथ व्याहृतिभिर्हुत्वा एकैकस्य यथाक्रममिति॥ पचनाग्नौ पक्वमन्नं गुडादिभिः संहृत्वा किंचित्किंचित्तस्य
दिग्भ्यो निवेद्य तच्छेषं मंत्रैर्जुहुयादित्यर्थः॥ एतद्बहुचान्यविषयं॥ बह्वृचानां तु परिशिष्टहोमानंतरमेव नैवेद्यस
मर्पणस्योक्तत्वात्तथैवानुष्ठानं युक्तमिति पारिजातः॥ अनेनाहुतिसंख्या द्वावपि परिशिष्टोक्तपक्षस्यैव बह्वृचैर
हरः कार्य इत्युक्तं भवति॥ यद्यप्याश्वलायनेनाष्टोत्तरशतं होममष्टाविंशतिमेव वा॥ कुंडे वा स्थंडिले वैकः कुर्यात्
कुर्वन्पृथक्पृथगिति स्मृतिरूपेणोक्तं तत्रैकः कुर्वन्कुर्यादित्येकाचार्यपक्षे नियमपरं॥ प्रधानहोमानंतरं हो
मांतरमाह पारिजाते भगवान्॥ अथ स्रुवेण जुहुयात्सूर्यपावकरुद्रकान्॥ सूर्यातो पंचकं सूक्तमुदुत्यं जात
वेदसं॥ नमो मित्रस्य वरुणस्य चित्रं देवानामित्यपि॥ उद्वेति सुभगः पंचर्चाभिर्त्र्यर्चाभिर्घृताहुतीः॥ त्वमग्ने प्र
थमं सूक्तमित्यष्टादशकर्चकं॥ त्वमग्ने द्युभिः षोडशभिर्घृतेन जुहुयात्ततः॥ अथ रुद्राय जुहुयात्कद्रुद्राय प्र
त्याहुतीः॥ इमा रुद्राय च तथा सूक्तेन च ततः परं॥ आ ते पितर्मरुतामिति सूक्तेन च घृताहुतीरिति॥ आश्व १४६
लायनः पूर्णाहुतिं च वसुं वै ते होमे ग्रहमखे गुरुरिति॥ वसुवं ते होमांते इति व्याख्यातं पारिजाते॥ अतः प्रायश्चि

त्तहोमांते पूर्णपात्रनिनयनात्प्राक्पूर्णाहुतिः कार्येत्यर्थः॥ पूर्णाहुत्यनंतरं प्रणीतानिनयनादि अभ्यर्च सं
तर्क्य त्वा अभिषेकः॥ होमं समापयेद्धीति प्रोक्तं साथ यजमानाभिषेक इति पारिशिष्टात् एवं प्रकृतत्वाद्विधि
रुक्तस्तत्र ब्रह्मदेवेदः प्रागुदीच्यां शुचौ देशे समृष्टालंकृते प्राक्प्रवणे चतुष्पादं दीर्घचतुरस्रं सोन्नरच्छदं पीठं नि
धाय तत्रोदगग्रानमूलान्दर्भानास्तीर्य प्राङ्मुखं कर्तारं सामात्यमुपवेश्याचार्यः सहर्त्विग्भिरभिषेककुं
भमादाय प्रत्यङ्मुखस्तिष्ठन्नोदुंबर्याईया शाखया सपलाशया सहिरण्यपवित्रया सकुशदूर्वापल्लवयांतर्धा
य कुंभोदकं पवित्रैरभिषेचयेत्॥ आब्लिंगाभिर्वारुणीभिरन्याभिः शांतिपवित्रलिंगाभिर्महाभिषेकमंत्रैः सु
रास्त्वाभिति मंत्रैः श्रीसूक्तेनेमा आपः शिवतमा इति त्वचेन देवस्यत्वेति यजुषा भूर्भुवः सुवरिति च व्याहृतिभिरेव
माभिषिक्तस्तेभ्यो ग्रहोक्तां दक्षिणां दद्यात्॥ गोः शंखो रक्तोनड्वान् हिरण्यं पीतं वासः श्वेतोऽश्वः कृष्णा गौः कालाय
सं हस्ती छागो वेति पुनर्हिरण्येन संमिता कुर्याद्वा वे सर्वेषां हिरण्यमेव वा तुष्टिकरं दद्यात् द्विगुणमाचार्या
य त्रिंशत्तानेन ब्राह्मणान्भोजयित्वा शांतिः पुष्टिस्तुष्टिश्चास्त्विति वाचयेत् ज्ञातिसंबंधिबांधवांश्च तोषयेदे
ष ग्रहयज्ञः सर्वारिष्टशमनः सर्वपुष्टिकरः सर्वाभीष्टप्रद इति॥ त्रिष्टतां नेनेति श्रोस्याने घृतान्नेनेति क्वचित्पा
ठः॥ अभिषेकादौ विशेषः पारिजाते वसिष्ठः॥ स्वस्तिके कल्पयेत्पश्चात्कुंडस्यैशानदेशतः॥ यजमानाभिषे
कार्थं तत्र भद्रासनं न्यसेत्॥ प्राङ्मुखस्योपविष्टस्य यजमानस्य तत्र च॥ अभिषेकं ततः कुर्यादाचार्यो ब्राह्मणैः
सह॥ वरुमाणैः स्वमंत्रैश्च आब्लिंगैर्वेदमंत्रकैः॥ स्वमंत्रे ग्रहमंत्रैः॥ कुंभोदकैः पुण्यतमैरुक्तद्रव्यसमन्वितैः॥
ततस्तस्याभिषिक्तस्य रक्षार्थं बलिमुत्क्षिपेत्॥ दिग्विदिक्षु च चित्रान्नैर्दीपैर्नीराजयेत्ततः॥ शुक्लमाल्यांबरधरः शुक्ला

Indira Gandhi National Centre for the Arts

गंधानुलेपनः॥ततो मंडपमागत्य ध्यायेदग्निं ग्रहान् सुरान्॥प्रत्येकं प्रतिमंत्रेश्च दद्यात्पुष्पांजलिं ततः इति॥ उद्वास
न विधिः पारिजाते वामनीये॥प्राणांस्त्वादितः कृत्वा भूर्भुवः स्वस्ततः परं॥ चतुर्थ्यंतनामसंयुक्तं नमस्कारांतयोजि
तं॥अनेनावाहनं कुर्यादनेनैव विसर्जनं॥आचार्यप्रभृतिभ्यश्च ग्रहार्चनफलं ततः॥समिदाज्यचरूणां चतिल
होमफलं ततः॥ब्रह्मत्वे कुंभपूजायां चार्चनस्य फलं च यत्॥लोकपालगणेशाद्याः तत्र याश्चांगदेवताः॥तासां हो
मफलं तद्वत् दद्यात् जलपूर्वकं॥आज्यं निरीक्ष्य दत्वा च ब्राह्मणान् भोजयेत्ततः इति॥ब्राह्मणभोजने शक्ताशक्तभे
दे न्यूनवस्था स्कांदे मात्स्ये॥एकमेकाहुते विंप्रं होमेस्वन्ने न भोजयेत्॥अल्पाहोममध्यमश्चापि विप्रमेकं शताहुते
॥सहस्रस्याहुते वैकं जपन्योपि प्रभोजयेत्॥अन्यथा ददतिक्षिप्रं तद्राष्ट्रं नात्र संशयः॥अनंतः प्रहरेद्राष्ट्रं आमं
त्रश्चर्त्विजो गुरुं॥होमः कारयितारं च सुहृतो यत्त्वदक्षिणः॥तस्माद्दातुमशक्तो यो दक्षिणाश्चान्नमेव वा॥जपैः शो
णमेस्तोत्रैश्च ऋत्विजो गुरुम्॥दातोषयेन्न यद्गृहानिति॥अथान्वाधानादिप्रयोगः॥ऋत्विग्भिरन्वारब्धः समिद्वयमा
दाय चक्षुषी आज्येनेत्यंते आदित्यं प्रत्येकं शतसंख्याभिरर्कसमिच्चर्वाज्याहुतिभिः अग्निं रुद्रं च प्रत्येकं दशसंख्याभि
स्तदाहुतिभिः॥सोमं प्रत्येकं०पलाशस०अप गौरीं च प्र०संख्याभिः अंगारकं प्रत्येकं १०० खदिरस०भिः पृथिवीं स्कं
दं च प्र० १०भिः बुधं प्रत्येकं १०० अपामार्गस०भिः॥विष्णुं पुरुषं च प्र०१०भिः बृहस्पतिं प्रत्येकं १०० अश्वत्थस०भिः॥इंद्रं
ब्रह्माणं च प्र०१०भिः शुक्रं प्रत्येकं १० औदुंबरस०भिः इंद्राणीमिंद्रं च प्र०१०भिः॥शनिं प्रत्येकं १०० शमीस०भिः॥प्रजा
पतिं यमं च प्रत्येकं १०भिः राहुं प्रत्येकं १०० दूर्वा च०भिः सर्पान् कालं च प्रत्येकं १०भिः केतुं प्रत्येकं १०० कुशैश्च०भिः॥ब्रह्मा
णं चित्रगुप्तं प्रत्येकं १०भिः विनायकं दुर्गां क्षेत्रपालं वायुमाकाशमश्विनौ इंद्रमग्निं यमं निर्ऋतिं वरुणं वायुं कुबेरमी १५०

शानं च प्रत्येकं पंचसंख्याभिः पालाशसमिच्चर्वाज्याहुतिभिः अग्निं वायुं सूर्यं प्रजापतिं चैकैकया व्रीहितिलाहुत्या सूर्यं
त्रयोदशवारमाज्येन अग्निं चतुस्त्रिंशद्वारं रुद्रं द्वात्रिंशद्वारं शेषेण स्विष्टकृतमित्यादि॥पात्रासादनकाले वह्नीनो चरुग्रा
सनस्थालीनामाज्यस्थालीनां स्रुवाणां च बहूनामासादनं कार्यं युगपदनेककर्तृकं च वाज्यहोमनिर्वाहाय॥काले लौकि
सिद्धान्नतिलव्रीहिभिः सहाज्यस्थाली पर्यग्निकरणं॥स्रुवाणां संमार्गातिदर्व्याः संमार्गः ततोन्नपात्रांतरे पृथक्कृत्वा आबर्हि
श्रित्यस्रुवेणाभिधार्योदगुद्वास्याज्यादक्षिणे तोयबर्हिर्देशे बर्हिष्यासाद्य प्रत्यग्निं धार्यतदुत्तरतो व्रीहितिलान्आसाद्य ऋत्वि
ग्वारब्धः इध्माधानादि आज्यभागांतं कुर्यात्ततो यजमानस्त्यागं कुर्यात्॥शतशतसंख्या अर्कादिजातीयाः समिधः
दशतरसंख्याहुतिपर्याप्तश्च रुद्दशरसंख्याहुतिपर्याप्तमाज्यं च आदित्याय सोमायांगा०केतवे च न मम॥दशरसं
ख्या अर्कादिसमिधः दशरसंख्याहुतिपर्याप्तश्च रुद्दशरसंख्याहुतिपर्याप्तमाज्यं चाग्नये रुद्राय अग्नौ गौर्यै
पृथिव्यै स्कंदाय विष्णवे पुरुषाय इंद्राय ब्रह्मणे इंद्राण्यै इंद्राय प्रजापतये यमाय सर्पेभ्यः कालाय ब्रह्मणे चित्रगुप्ता
य न मम॥पंचपंचसंख्याः पलाशसमिधः पंचरसंख्याहुतिपर्याप्तश्च रुः पंचरसंख्याहुतिपर्याप्तमाज्यं विनायका
य दुर्गायै क्षेत्रपालाय वायवे आकाशाय अश्विभ्यां इंद्राय अग्नये यमाय निर्ऋतये वरुणाय वायवे कुबेराय ईशाना
य एकैकाहुतिपर्याप्तास्तिलव्रीहयो अग्नये वायवे सूर्याय प्रजापतये त्रयोदशाहुतिपर्याप्तमाज्यं सूर्याय०चतुस्त्रिंशदाहु
तिपर्याप्तमाज्यं अग्नये०द्वात्रिंशदाहुतिपर्याप्तमाज्यं रुद्रायेति॥ततो ऋत्विक्सहिताचार्यपक्षे आचार्य आदित्याय जुहु
यादितरे इतरग्रहेभ्यः ऋत्विक्चतुष्टयपक्षे द्वाभ्यां द्वाभ्यां ग्रहाभ्यामेकैको जुहुयात्॥तत्रांगुष्ठादूर्ध्वं मध्यमानामिकां
गुष्ठैर्मूलमागे समिधमादाय दधिमध्वक्तां जुहुयात्॥पाणिनाग्रासमं चरुं आज्यं स्रुवेण॥तदभावे स्वत्यादियाज्ञियपर्णे

Indira Gandhi National
Centre for the Arts

सं॰कौ॰
१५१

न॥ सर्वे प्राङ्मुखा उदङ्मुखा वा हृदयं निहितोर्ध्ववामपाणयो जुहुयुः॥ आचार्यः प्रभूततिलव्रीहीन्व्यस्तसमस्तव्याहृतिभि
र्हुत्वाऽप्यहोमं कुर्यात् सूर्यान इति पंचर्चसूक्तस्य सूर्यपुत्रश्चक्षुः सूर्यो गायत्री ग्रहमखांग आज्यहोमे विनियोगः॥ उदुत्यमि
त्यस्य काण्वः प्रस्कण्वः सूर्यो गायत्री॥ नमो मित्रस्येत्यस्य सूर्यपुत्रोभितपाः सूर्यो जगती॥ चित्रं देवानामित्यस्यांगिरसः कु
त्सः सूर्यस्त्रिष्टुप्॥ उद्वेति सुभग इति पंचर्चस्य सूक्तस्य मैत्रावरुणो वसिष्ठः सूर्यस्त्रिष्टुप्॥ त्वमग्ने प्रथम इति अष्टादशर्चस्य
सूक्तस्यांगिरसो हिरण्यस्तूपोग्निर्जगती अंत्याष्टमी षोलस्य त्रिष्टुभः॥ त्वमग्ने द्युभिरित्यस्य षोलशर्चसूक्तस्य गृत्समदोग्नि
र्जगती कद्रुद्रायेति नवर्चसूक्तस्य घोरः काण्वो रुद्रो गायत्री॥ इमा रुद्राय तवसे इत्येकादशर्चसूक्तस्य कुत्सो रुद्रो जग
त्यंत्ये त्रिष्टुभौ॥ आ ते पितरिति पंचदशर्चसूक्तस्य गृत्समदो रुद्रस्त्रिष्टुप्॥ एवमेकोनाशीतिमंत्रैः स्वाहांतैस्तावतीरा
हुतीर्हुत्वा ग्रहवेदिस्थदेवताभ्यो वरुणाय घंटाशब्देन धूपदीपनैवेद्यतांबूलादीन् पुष्पांजल्यंतानुपचारान् स
मर्पयेत् धूपदीपनैवेद्येषु पूर्वोक्तव्यवस्थाविधिस्तदसंभवे तूक्तसाधारणविधिः स्वीकार्यः॥ तत्र सूर्याय पद्ममुस्ता
ख्यकंदधूपः सोमाय मयूरशिखा॥ भौमाय दशांगः बुधाय रालाख्यः सर्जरसः गुरवे बिल्वफलं शुक्राय वीडाख्यश्रीव
सः शिष्टेभ्यः क्रमेण कृष्णागरु जटामांसी मधूकानीति धूपाः॥ दीपः सर्पिषा तिलतैलेन वा सर्वेषां॥ षाष्टिकमादित्याय सो
माय पायसं भौमाय पयोमिश्रितौदनः बुधाय गुडमिश्रितः क्षीरमोदनं च पृथक् गुरवे मृगवेदस्यौदनः शनये कृसरः मासस्या
नीय माषविकारमिश्रितौदनो राहोश्चित्रान्नं केतवे इति नैवेद्यानि माणिक्यप्रभृतिरत्नानि सपुष्पाणि पुष्पांजलिस् १५१
पीणादद्यात् माणिक्याद्येव वा तावंति सुवर्णपुष्पाणि वा प्रसीदंतु भवंत इति तान् संप्रार्थ्य ऋत्विग्भ्यो रक्षा ब
ज्यतिलव्रीहिशेषेण स्विष्टकृतं हुत्वा प्रायश्चित्तहोमं कुर्यात्॥ ततः सामात्ययजमानाऽन्वारब्ध आचार्यो द्वादश

गृहीतेन पूर्णाहुतिं जुहुयात्॥ ततः पूर्णपात्रं निनीय संस्रावपरिस्तरणविसर्जनाद्यमर्चनांतं कुर्यात्॥ अथ ग्रह
वेदेः प्रागुदीच्यां शुचौ समे पृष्ठे रंगवल्ल्या स्वस्तिकालंकृते प्राक्प्रवणे चतुष्पददीर्घचतुरस्रं सोत्तरच्छदं पीठं निधाय त
त्रोदगग्रानमूलान्हरितदर्भानास्तीर्य तत्र प्राङ्मुखपरिहितनववस्त्रं विंचेत्॥ आपोहिष्ठेति तिसृणां अंबरी
षः सिंधुद्वीप आपो गायत्री अभिषेके वि॰॥ तत्वा यामीति तिसृणां शुनःशेपो वरुणस्त्रिष्टुप्॥ अभि॰ स्वादिष्ठये
ति तिसृणां मधुच्छंदाः पवमानः सोमो गायत्री॥ शन्न इंद्राग्नी इति सृणां वसिष्ठो विश्वेदेवास्त्रिष्टुप्॥ पवित्रं त
इति तिसृणामांगिरसः पवित्रः पवमानः सोमो जगती॥ ग्रहमंत्रैः॥ ग्रहाणामादिरादित्यो लोकरक्षणकारकः॥
विषमस्थानसंभूतां पीडां दहतु ते रविः॥ रोहिणीशः सुधामूर्तिः सुधागात्रः सुधासनः विषमस्थानसंभूतां पीडां
दहतु ते विधुः॥ भूमिपुत्रो महातेजा जगतां भयकृत्सदा॥ वृष्टिकृद्वृष्टिहर्ता च पीडां दहतु ते कुजः॥ उत्पातरूपो ज
गतां चंद्रपुत्रो द्युतिः॥ सूर्यप्रियकरो विद्वान् पीडां दहतु ते बुधः॥ देवमंत्री विशालाक्षः सदा लोकहिते रतः॥ अ
नेकशिष्यसंयुक्तः पीडां॰ गुरुः॥ दैत्यमंत्री गुरुस्तेषां प्राणदश्च महामतिः॥ प्रभुस्ताराग्रहाणां च पीडां॰ भृगुः॥ सूर्य
पुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः॥ मंदचारः प्रसन्नात्मा पीडां॰ तेर्कजः॥ महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाब
लः॥ अतनुश्चोर्ध्वकेशश्च पीडां॰ तमः॥ अनेकरूपवर्णैश्च शतशोथ सहस्रशः॥ उत्पातरूपो जगतः पीडां दहतु ते
शिखी॥ सुरास्त्वामभिषिंचंतु इत्यादिपौराणमंत्रैश्च प्रतिमंत्रमभिषिंच्य हि समा हिरण्यवर्णां हरिणीमित्यस्य
सूक्तस्यानंदादय ऋषयः श्रीर्देवता अनुष्टुबादीनि छंदांसि॥ प्रत्यृचमभिषिंचेत्॥ आपः शिवतमा इति तेन चैन
देवस्य त्वेति यजुषा भूर्भुवः स्वरिति व्याहृतिभिश्चाभिषिंचेत्॥ ततोभिषेकशालायामेवाभिषिक्तयजमानस्य पू

Indira Gandhi National
Centre for the Arts

संको० दिदिक्षु विदिक्षु चाचित्राग्नेराचार्यो दिग्देवताभ्यो बलिमुत्क्षिपेत् ॰ इंद्राय नमः अग्नये नमः यमाय नमः इत्यादि
१५२ नाममंत्रैस्ततो यजमानस्य सुवासिनीभिर्दीपैर्नीराजनं कारयेत्ततो यजमानोऽभिषेकवस्त्रमाचार्याय दत्वाऽश्व
तावरेयं त्वाश्वेतचंदनश्वेतपुष्पाणि च धृत्वाभिषेकशालातोऽग्निसमीपमागत्याग्नेर्ग्रहपीठदेवतानां च पंचो
पचारपूजां तेभ्यो ग्रहास्तदुपदेवताश्च ध्यात्वा ध्यात्वा अग्नये नमः ॥ आदित्याय नमः इति मंत्रैः प्रणवादिभिः
प्रत्येकं पुष्पांजलिं समर्पयेत् ॥ तत आचार्यो देवतोद्वासनं कुर्यात् ॥ ॐ भूर्भुवः स्व आदित्याय नमः आदित्य
मुद्वासयामीति ॥ एवं सोमादीनामुद्वासनवाक्यम् ॥ ततो ब्राह्मणेभ्यो जपहोमफलं गृहीत्वाचार्यादिभ्यो द
क्षिणां दद्यात् ॥ सूर्यप्रीत्यर्थमाचार्याय गां ॥ अथाल्पिष्टेः सोमप्रीत्यर्थं शंखं ॥ अंगारकप्रीत्यर्थं रक्तमनड्वाहं ॥
बुधप्रीत्यर्थं सुवर्णं ॥ बृहस्पतिप्रीत्यर्थं पीतं वासः ॥ शुक्रप्रीत्यर्थं श्वेतमश्वं ॥ शनिप्रीत्यर्थं कृष्णां गां ॥ राहुप्रीत्य
र्थं कालायसं ॥ केतुप्रीत्यर्थं हस्तिनं छागं वेति तत्तद्धोमकर्तृभ्यो वस्त्रयातां दक्षिणां दद्यात् ॥ तत्र मंत्राः ॥ कपि
ले सर्वदेवानां पूजनीयासि सर्वदा ॥ सर्वदेवमयी यस्मादतः शांतिं प्रयच्छ मे ॥ त्वं पुरा सागरोत्पन्नो विष्णुना
विधृतः करे पांचजन्यं प्रदास्यामि ह्यतः ॰ धर्मस्त्वं वृषरूपेण जगदानंदकारकः ॥ अष्टमूर्तेरधिष्ठानमतः ॰
हिरण्यगर्भगर्भस्थं ॰ पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभं ॥ प्रदानात्तस्य मे विष्णुरतः शांतिं प्रयच्छतु ॥
विष्णुस्त्वमश्वरूपेण यस्मादमृतसंभवः ॥ चंद्रार्कवाहनो नित्यमतः ॰ यतस्त्वं पृथिवी सर्वा धेनोर्वे कृष्णसं १५२
निभे ॥ सर्वपापहरा नित्यमतः ॰ यस्मादायसकार्याणि त्वदधीनानि सर्वदा ॥ लांगलाद्यायुधादीनि तस्मा छांतिं ॰
यस्मात्त्वं छागयज्ञानामंगत्वेन व्यवस्थितः ॥ यानं विभावसोर्नित्यमतः ॰ स इति ॥ एषामर्थानां विषममूल्यक

त्वेऽपि न्यूनलाभवत्त्वः सुवर्णदानेन तलाभसाम्यं संपादनीयं ॥ उक्तदक्षिणानामभावे सर्वेभ्यस्तुष्टिकरं हिरण्यमेव
वा दद्यात् ॥ अतो नात्र मूल्याध्यायोक्तमूल्यदानं ॥ सर्वस्मिन्नुक्ते आचार्याय द्विगुणं दद्यात् ॥ कांस्यपात्रगतमाज्यमवे
क्ष्य सदक्षिणं ब्राह्मणाय दत्वा यावत्यः प्रधानाहुतयस्तावतो ब्राह्मणान्भोजयेत् ॥ यावंति तदाहुतिशतानि तावतो वा
॥ यावंति तत्सहस्राणि तावतो वा ॥ भुक्तवद्भ्यो यथाशक्ति दक्षिणां दत्वा प्रार्थयेत् ॥ शांतिः पुष्टिस्तुष्टिश्चास्त्विति भ
वंत्विति ॥ ते च वदेयुः ॥ शांतिः ॰ स्त्विति ॥ ततोऽच्युतानंतगोविंदेति नामत्रयं जपेदिति पारिजाते ॥ ततो ज्ञातिसंबंधि
बांधवानां भोजनवस्त्रादिदानेन तोषं संपाद्येश्वरार्पणं कृत्वा भुंजीतेति ॥ परिशिष्टोक्तमार्गेण ग्रहयज्ञनिरूपणं ॥ अ
कार्यनंतदेवेन देवेशस्तेन तुष्यतु ॥ इति संस्कारकौस्तुभे नवग्रहमखः ॥ एतदसंभवे उपनयनकाले च बृह
स्पतेरानुकूल्याभावे तच्छांतिः कार्या ॥ उक्तोऽपि वर्षनवत्नीगुरुश्चेच्छांत्या प्रशस्तं व्रतबंधकर्मेति वृद्धवसिष्ठो
क्तेः ॥ तामाह शौनकः ॥ कन्यकोद्वाहकाले तु आनुकूल्यं न विद्यते ॥ ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः
॥ सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत् ॥ ईशान्यां धवलं कुंभं धान्योपरि विधाय च ॥ दमनं मधुपुष्पाणि प
त्रपालाशसर्षपान् ॥ मांसी गुडूच्यपामार्गविडंगशंखिनीवचा ॥ सहदेवी विष्णुक्रांता सर्वौषधिशतावरी ॥ कुंभेनिः
क्षिप्य दिक्षु तिरो वः ॥ कृत्वाऽपांगपर्यंतं सूत्रशाखोक्तविधानतः ॥ ग्रहोक्तमंडले न्यस्य पीतपुष्पाक्षतादिभिः ॥ देव
पूजोत्तरे काले ततः कुंभानुमंत्रणं ॥ अश्वत्थसमिधश्चाज्यं पायसं सर्पिषा युतं ॥ यवव्रीहितिलाः साज्या मंत्रेणो
क्त्वा बृहस्पतेः ॥ अष्टोत्तरशतं सर्वं होमशेषं समापयेत् ॥ पुत्रदारसमेतस्य अभिषेकं समाचरेत् ॥ कुंभाभिमंत्रणा
त्तोऽस्य समुद्रज्येष्ठमंत्रतः ॥ प्रतिमां कुंभवस्त्रं च आचार्याय निवेदयेत् ॥ ब्राह्मणान्भोजयेत्पश्चात्शुभदः स्यात्त

Indira Gandhi National Centre for the Arts

संकौ० संशयः॥ इतिबृहस्पतिशांतिः॥ तथामंदनरस्कंदे गुरुपूजोक्ता॥ कन्याविवाहकालेतु गुरोःशुद्धिर्नविद्यते
१५३ ॥ ब्राह्मणस्योपनयनेयस्यस्याःदुःस्थितागतः॥ दुःस्थितंदुःस्थानमष्टमादि आगतो गुरुरितिशेषः॥ तदापूज
गुरोःकार्याविधिवद्भक्तिभावितैः॥ मदंतिकामपुष्पाणिपत्रंपालाशसर्षपाः॥ मदंतीयूथिकाकामोदमनः॥ गु
डूचीवाप्ययामार्गविडंगंशंखिनीवचा॥ सहदेवीविष्णुक्रांतासर्वौषध्यःशतावरी॥ कुष्टंमांसीहरिद्रेद्वेमुरा
शैलेयचंदनं॥ वचाकचोरमुस्तंच सर्वौषध्यःप्रकीर्तिताः॥ तथैवाश्वत्थमंगांश्च पंचगव्यंजलंतथा॥ नूतनंस
दकुंभंचपीतवस्त्रसमान्वितं॥ पंचरत्नैःसमायुक्तमीशान्यांस्थाप्यचानलात्॥ अनलदेशात् याओषधीतिम
त्रेणसर्वौषधिमिन्विनिःक्षिपेत्॥ कुंभस्योपरिभागेतुस्थापयित्वाबृहस्पतिं॥ सुवर्णपात्रेसौवर्णींप्रतिमांतुयुधि
ष्ठिर॥ कारयेत्तुयथाशक्त्याविलक्षणाद्यविवर्जितः॥ पीतवस्त्रयुगछन्नांपीतयज्ञोपवीतिनीं॥ पूजयेत्कुंकुमैःपुष्पै
र्धूपैर्दीपैश्चभक्तितः॥ तिलव्रीहियवमिश्रंहोतव्यंचयथा
विधिस्ततोहोमंसमाचरेत्॥ समिधोश्वत्थवृक्षस्यहोम्याअष्टोत्तरंशतं॥ तिलव्रीहियवांमिश्रंहोतव्यंचयथा
क्रमं॥ अनेनग्रहमखदृष्टस्यसमिद्धोमानंतरमाविनश्चर्वाज्यहोमस्यानंतरमागंतुअयंहोमःकार्यइति
ज्ञाप्यते॥ बृहस्पतेतिमंत्रेणऋषिछंदःसमन्वितं॥ ततोहोमावसानेतुपूजयेच्चबृहस्पतिं॥ पीतगंधैस्तथापुष्पै
र्धूपैर्दीपैश्चभक्तितः॥ दध्योदनंचनैवेद्यंफलतांबूलसंयुतं॥ नमआंगिरसंनाथवाक्पते [illegible]
[illegible]पुष्टिर्वबृहस्पते॥ क्रूरग्रहैःपीडितानाममृतायनमोनमः॥ पूजयित्वासुराचार्यंपश्चादर्घ्यंनिवेदयेत्॥ गंभी १५३
रदृढरूपांगदेवेज्यसुमतेप्रभो॥ नमस्तेवाक्पतेशांतगृहाणार्घ्यंबृहस्पते॥ अर्घ्यंदत्वासुरेशायजपहोमंसम
र्पयेत्॥ नमस्तायतेसुराचार्यहोमपूजादिसत्कृतं॥ तत्वंगृहाणशांत्यर्थंबृहस्पतेनमोनमः॥ मंत्रेणानेनसंकल्प

पश्चात्संप्रार्थयेन्नृप॥ जीवोबृहस्पतिःसूरिराचार्योगुरुरंगिराः॥ वाचस्पतिर्देवमंत्रीशुभंकुर्यात्सदामम॥ स
र्वोपचारसंयुक्तांप्रतिमांतांयुधिष्ठिर॥ प्रणम्यचगवायुक्तामाचार्यायनिवेदयेत्॥ अथाचार्यस्तुनियतोवेद
वेदांगपारगः॥ यजमानंसपत्नीकंशांतचित्तोजितेंद्रियः॥ कुंभोदकंगृहीत्वाथमंत्रैरेतैःप्रसिंचयेत्॥ इदमा
पःप्रमंत्रेणतामग्निमित्यचातथा॥ याओषधीरश्वावतीःकूष्मांडैश्चाभिषेचयेत्॥ पश्चात्संभोजयेद्विप्रा
न्यथाशक्तियुधिष्ठिर॥ संक्रांतावपिकौंतेयतथास्याभ्युदयेषुच॥ कुर्वन्बृहस्पतेःपूजामभीष्टफलमाप्नुया
दिति॥ संक्रांतौगुरोः॥ इतिस्कांदोक्तागुरुपूजा॥ अत्रचशौनकोक्तौस्कांदोक्तौचशाखाभेदेद्वादशकपाले
कादशकपालादिभेदस्येवयूथिकासदसत्वादिप्रयुक्तेषद्वैलक्षण्यस्यापिकर्मभेदकत्वासंभवादुभयगतगु
णोपसंहारेणकुंभानुमंत्रणादिसाधारणधर्माणांदीर्घचतुरस्रमंडलाद्यसाधारणधर्माणांविनियोगवशेना
पेक्षितानांग्रहमखात्स्वीकारेणतावद्भिरेवग्रहमेधीयवन्नेराकांक्ष्यसंभवेनाविनियुक्ततत्तद्धर्मानाद
रेणप्रयोगंवदामः॥ अस्यकुमारस्योपनयनकालेबृहस्पत्यानुकूल्यसिद्धिद्वारापरमेश्वरप्रीत्यर्थंबृहस्प
तिशांतिंकरिष्यइतिसंकल्प्यगणेशपूजाद्याचार्यवरणांतंकुर्यात्ततः आचार्यः कर्षतदर्धादिपरिमितहे
म्ना यथाशक्तिनिर्मितप्रतिमाया अग्न्युत्तारणंकृत्वायदत्रसंस्थितंभूतमित्यादिदेशसंस्कारांतेहोमदेशा
त्पश्चानदेशे महीद्यौरितिस्पृष्टभुविओषधयःइतिधान्यंप्रक्षिप्याकलशेष्वितिधवलकुंभंस्थाप्येमंमेगंगइ
तितीर्थोदकेनापूर्याश्वत्थेवोनिषदनमितिअश्वत्थपल्लवान्॥ गायत्र्यादिमंत्रैः पंचगव्यं देवस्यत्वा० मनिभि
चामीतिकुशोदकंक्षिप्ययुवासाइतिपीतवस्त्रेणसंवेष्ट्यसहिरत्नानितिपंचरत्नाप्रक्षिप्ययाओषधीरिति

Indira Gandhi National
Centre for the Arts

तत्राष्टदलोत्तरदले द्वरिताक्षतनिर्मितदीर्घचतुरस्रपीठे हैमीं बृहस्पतिप्रतिमां स्थापयित्वा स्थंडिले अग्निप्रतिष्ठापना +४
दिक्पत्राचाया ने
संको० वक्ष्यमाणान्सर्वान्निक्षिपेत॥ यूथिकादमनमधुपुष्पाणि॥ पत्रं भाषायां॥ पत्रजामिति प्रसिद्धं॥ पलाशी सर्षपान्
१५४ जटामांसीगुडूचीअपामार्गविडंगशंखिनीवचासहदेवीविष्णुक्रांताशतावरी॥ कुष्टं हरिद्रे द्वे सुराष्ट्रै
लेपचंदनं॥ वचाकचोरं मुस्ता चेति॥ ततश्चंदनादिना कुंभमभ्यर्च्य पूर्णदर्वीति यथाविभवं सौवर्णादिपू
र्णपात्रं निधाय च सुषीआज्येनेत्यं ते बृहस्पतिमष्टोत्तरशतसंख्याभिरश्वत्थसमिद्भिः तावतीभिराज्याहुतिभि
स्तावतीभिः सर्पिर्मिश्रपायसाहुतिभिः॥ तावतीभिः साज्ययवव्रीहितिलाहुतिभिश्च शेषेण स्विष्टकृतमित्या
दिस्वशाखोक्तविधिनाज्यभागांतं कृत्वा कुंभोपरिस्थापितप्रतिमायामावाहनादिषोडशोपचारैर्बृहस्पति
पूजयेत तत्र विशेषाः पीतवस्त्रयुग्मं पीतं यज्ञोपवीतं पीतं चंदनं पीताक्षतान्॥ चंपकादिपीतपुष्पं॥ बिल्वम
लाधूपं घृतदीपं दध्योदनं नैवेद्यं॥ दक्षिणायां पुष्परागो माणिक्यं यथाशक्ति देयं वा॥ पूजांते॥ भिंगाभिः वा
रुणीभिः पावमानीभिश्च यदमखोत्राभिः कुंभानुमंत्रणं॥ ततो यजमानो यथान्वाधानं बृहस्पतये इदं न मम
ति त्यागं कुर्यात॥ अथाचार्यो बृहस्पतिमित्रेण प्राणवादिनाऽख्यादिस्मरणपूर्वकं दधिमधुघृताक्ता अष्टोत्तर
शतमश्वत्थसमिधो जुहुयात्तावती राज्याहुतीः सर्पिर्मिश्रलोकसिद्धपायसाहुतीः साज्ययवव्रीहितिलाहु
श्च॥ ततः स्विष्टकृदादिहोमशेषं परिस्तरणाविसर्जनांतमर्चनांतं कुर्यात॥ ततो बृहस्पते गंधादिभिः पूर्वो १५४
क्तैः फलतांबूलांतैः पूजनं कृत्वा स यजमानो नमस्कुर्यात्ततस्ताम्रपात्रे शुद्धोदकं प्रक्षिप्य तत्र पीतानि गं
धाक्षतपुष्पाणि फलं च प्रक्षिप्यार्घ्यं दद्यात॥ गम्भीरदृष्टरूपांगदेवेज्यसुमते प्रभो॥ नमस्ते वाक्पते शांत गृ
हाणार्घ्यं बृहस्पते इति॥ ततो यजमानो बृहस्पतये हुतकर्मार्पणं कुर्यात॥ मत्स्या यत्नेसु राचार्यहोमपूजादिस

इंद्र सोममिंद्राबृहस्पती पिबतदाशुषो गृहे। मादयेथां तदोकसा॥

कृतं॥ तत्त्वं गृहाण शांत्यर्थं बृहस्पते नमो नम इति॥ ततः प्रार्थयेत॥ जीवो बृहस्पतिः सूरिराचार्यो गुरुरंगि
रा॥ वाचस्पतिर्देवमंत्री शुभं कुर्यात्सदा मम॥ इति॥ ततो विसर्जनं कृत्वाचार्यं प्राणम्य सर्वोपचारसंयुक्तां इमां
तुभ्यमहं संप्रददे इति॥ दश प्रतिमां दद्यादभिषेकोत्तरं वा प्रतिमादानं॥ कुंभोदकेनाचार्यः पुत्रदारस
मेतं यजमानमभिषिंचेदापो हि ष्ठेति तिसृणां अंबरीषः सिंधुद्वीप आपो गायत्री त्वायामीति तिसृणां शु
नःशेपो वरुणस्त्रिष्टुप् स्वादिष्ठयेति तिसृणां मधुच्छंदाः पवमानः सोमो गायत्री समुद्रज्येष्ठा इति मंत्राणां वसिष्ठ
आपस्त्रिष्टुप्॥ इदं मा पुरुष्यस्येसिंधुद्वीप आपोनुष्टुप्॥ तामग्निवर्णामित्यस्य हिरण्यगर्भो दुर्गा त्रिष्टुप्॥ या
ओषधीरित्यृचस्याभिषग्गोषधयोनुष्टुप्॥ अश्वावतीं गोमतीरित्यस्य वासिष्ठउषसः त्रिष्टुप्॥ यद्देवादेवहेडनंय
ददी व्य मापुष्टविश्वतो दधदित्यापस्तंबशाखोक्तैरनुवाकैश्च तच्छंयोराबृणीमह इति॥ ततो यथाशक्तिब्राह्मण
भोजयेदिति कौस्तुभे बृहस्पतिशांतिः॥ अथोपनयनप्रयोगः॥ उपनयनात्पूर्वेद्युः रहतवस्त्रमजिनं यज्ञोपवी
तं मेखलां दंडं कटिसूत्रं कौपीनमिलेतानुक्तलक्षणानि संपाद्य भिक्षापात्रं जलपात्रे च संपाद्य स्वस्योपनेतृत्वयो
ग्यतायै कृच्छ्रत्रयं संकल्प्य निलसहस्रहोमं गोदानाद्यन्यतरप्रत्याम्नायेन तदाचरणपूर्वकं द्वादशसहस्रं गायत्री
जपं तद्योग्यतायै कृत्वोपनेयत्वयोग्यतायै बटुनापि कृच्छ्रत्रयं कारयित्वा पदिजातकर्मादिसंस्कारा अतीतास्तदा
जातकर्मादिसंस्काराणां कालातिपत्तिप्रायश्चित्तहोमं करिष्य इति संकल्पपूर्वकं पूर्वोत्तराज्यभागांतास्विष्टकृदा
दितंत्रयुता अतिपन्नसंस्कारसमसंख्या भूर्भुवः स्वः स्वाहेत्याज्याहुतीर्हुत्वा प्रमादादतिपन्नो प्रत्येकं पादकृच्छ्रं चौ

Indira Gandhi National
Centre for the Arts

संको० लस्पार्द्दहच्छुं बुद्धिपूर्वका कारणे नूक्त द्विगुणां कुमारेण कारयेत्॥ चौले कुलधर्मप्राप्ततृतीयवर्षादिनियतकाला
१५५ तिपत्तावेतत॥ सद्योपनीत्येत्यस्य कुलधर्मप्राप्तत्वेनैतत्॥ पत्न्या सद्योपविश्य देशकालौ संकीर्त्यास्य कुमारस्य गर्भा
म्बुपानजनितदोषनिर्हरणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिवर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं अतिक्रांतं जातक
बीजगर्भसमुद्भवैनोनिवर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वा० नामकर्म आयुरभिवृद्धिद्वारा० र्थं सूर्यावलोकनं॥ अ
यु:श्रीवृद्धि बीजगर्भसमुद्भवैनोनिबर्ह० र्थं निष्क्रमणं॥ आयुरभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं उपवेशनं मातृग
र्भमलप्राशनशुद्धि अन्नाद्यब्रह्मवर्चसतेजइंद्रियायुरभिवृद्धिबीजगर्भसमुद्भवैनोनिवर्हणद्वारा श्रीपरमेश्वर
प्रीत्यर्थं अन्नप्राशनं चाद्य करिष्ये बीजगर्भसमुद्भवैनोनिबर्हणबलायुर्वर्चोभिवृद्धि० र्थं चौलं द्विजत्वसिध्या वे
दाध्ययनाधिकारार्थं उपनयनं च श्व: करिष्ये इति संकल्प्य तदंगत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदी
श्राद्धं च करिष्ये उपनयनांगत्वेन नंदिन्यादिमंडपदेवतानां पूजनपूर्वकं तासां कुलदेवतादीनां च स्थापनं करि
ष्ये तदादौ निर्विघ्नतासिध्यर्थं गणेशपूजनं करिष्ये इति संकल्प्य तत्रैव नांदीश्राद्धांतं कुर्यात्॥ सर्वेषां सद्य: करणे
सर्वसंकल्पांते अद्य करिष्ये इति संकल्प्य:॥ बहूनां संकल्पे त्वरध्यं तामिति॥ चौलोपनयनयो: संकल्पे त्वरध्ये तामि
ति॥ उपनयनमात्रसंकल्पे त्वरध्यतामिति नांदीश्राद्धांते मातृका आविसर्ज्य यथाचारं वध्वा सुशाखासु नंदिन्यो न १५५
म:॥ नंदिनीमावाहयामि नलिन्यै नम:॥ नमैत्राये० मैत्रा० उमायै० ।उ० पशुवर्द्धिन्यै० प० भगवत्यै० भ०॥ अविघ्न य
गणपतये नम:॥ अ० सापिधानकलशयो:॥ गृहावेशति ष्टसावाहितदेवता: प्रतिष्ठाप्यासनाद्याचमनांतसम

य
र्पणोक्त त्रिसूत्री वेष्टित कुंभचतुष्टयमध्यस्थापितेक पात्रेता: शाखा निधाय पत्नात्नीराजनं श्रियेजातइति का
रयित्वा कनिक्रदद् इति तैलेनाभ्यज्य सुगंधिपिष्टं तासु निक्षिप्योष्णोदकेनाभिषिच्यापो हि ष्ठेति तच्चैनं कुंभचतुष्ट
योदकेनाभिषिच्याचमनादि पुष्पांतोपचारसमर्पणांते दधिक्राव्ण इति द[illegible]धाकांडात्कांडात्प्ररोहंती तिदू
र्वाभिश्चाभ्यर्च्य धूपादिपूजां समाप्य मंत्रहीनमिति संप्रार्थ्य मातृकासहितास्ता: शाखा: स्वयमादत्ते कलशोपूर्ते
॥घंटादिवाद्यघोषेण कनिक्रदतिसूक्तेन च प्रतिष्ठापनदेशं गत्वा स्वपलिप्तेऽलंकृते तस्मिन् देशे गृहवेश प्रति
तिकलशाभ्यां सहिता: शाखा: प्रतिष्ठाप्य पंचोपचारै: संपूज्य स्थापितदेवताप्रीत्यर्थं यथाशक्ति ब्राह्मणान्
सुवासिनीश्च भोजयिष्ये तेभ्यो यथाशक्ति वस्त्रदक्षिणादानं च करिष्य इति संकल्पयेत्॥ ततो नीराजिताभ्यां
दंपतीभ्यां सुहृदो वस्त्राणि दद्यु:॥ युवं वस्त्राणि पीवसा० अभिवस्त्रा सुवसना० भद्रा वस्त्रा समन्या० वसिष्ठा
दि मित्रेयव्यव वस्त्रा० सतु वस्त्रोण्य पेशनानि वसानो अग्निर्नाभा पृथिव्या:॥ अरुषो जात: पद इलाया: पु
रोहितो राजन्यक्षीह देवान्॥ वे दिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये॥ वस्त्रेणेव वासया म
न्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनं॥ प्रसेनानी: शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना॥ भद्रान्कृ
ण्वन्निंद्रहवां त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते॥ उमा उनूनं तदिदर्थयेथे वितन्वाथे धियो वस्त्राप
सेव॥ सध्रीचीना यातवे प्रेमजीग: सुदिनेव पृक्ष आ तंस येथ इति मंत्रान् पठेयु:॥ ततोतिक्रांतजातक
र्मादिसंस्कारानुष्ठानं॥ केचिन्मंडपनिर्माणपूर्वकं देवतास्थापनं कुर्वंति॥ तदित्थं॥ आग्नेय्यां आग्नेणां जंघा

Indira Gandhi National
Centre for the Arts

वास्तंभः। नैर्ऋत्यां खदिरेण धात्र्या वा वायव्यां उदुंबरेण शम्या वा॥ ऐशान्यां बदर्या अश्मंतकेन वा॥ यथाकुलधर्मं
शम्यर्कादिजातीययज्ञियवृक्षस्य वरशाखायुग्मानि सूत्रवेष्टितानि कार्याणि वंशं छुरिकागर्भं देवकमित्युच्यते॥ आधारस्थ
तंभः। शाखादधिकाणा इति या ओषधय इति च मंत्राभ्यां चतुर्णां ब्राह्मणानां हस्ते दत्वा आग्नेयस्तंभे गंगायै नमः॥ गंगामावाह
यामीति॥ आवाहनादिषोडशोपचारैः संपूज्य सुदृढा तिष्ठ चिरायेति प्रार्थयेत्॥ एवं नैर्ऋत्ये गौरी॥ वायव्ये धरणी॥ ऐ
शान्ये लक्ष्मी॥ ततः आग्नेयस्तंभे नंदिनीमावाहयामि गृहा वै प्रतिष्ठा सूक्तमिति शाखायुग्मं प्रतिष्ठापयेत्॥ एवं नैर्ऋ
त्ये नलिनी॥ वायव्ये मैत्रा॥ ईशान्ये उमा मंडपाच्छादनोपरि वंशमध्ये पंचवर्द्धिन्यै नमः इति यथाचारं मुसलमंडकादि
लशाखायुग्मं रोपयेत्॥ सर्वत्र गृहा वै प्रतिष्ठेत्यस्य प्रतिष्ठितिः॥ ततस्तां मंडपदेवताः षोडशोपचारैः संपूज्य मंडपमध्ये आग्ने
यादिक्रमेण कलशस्थापनविधिनोदकपूर्णमाम्रपल्लवादियुतकुंभचतुष्टयं स्थापयित्वा सूत्रयेत्तन्मध्येऽनुपहतपीठे
दंपती देवकस्थापनमित्थं कुरुतः॥ वंशपात्रस्थपूर्वोक्तदेवके भगवत्या आवाहनाद्याचमनांतोपचारार्पणे कृते च
तस्याः सुवासिन्यो नीराजनाभ्यंगोद्वर्तनोष्णोदकशीतोदकस्नानानि कारयेयुः॥ ततः कनिक्रददिति सूक्तेन देवकसहि
तं वंशपात्रमुक्तपीठे स्थाप्य गृहा वै प्रतिष्ठेति प्रतिष्ठाप्य वस्त्राद्युपचारैः पूजयेत्॥ भगवत्यै नमः इति मंत्रे
ण भगवतीपूजनेन सह अविघ्नपगणपतिपूजनं च तत्रैव कार्यं॥ ततो ब्राह्मणभोजनादिसंकल्पः पूर्ववत्का १५६
र्य इति॥ वटुहस्तेन चतुर्हस्ताच्चतुरस्राद्धस्तोच्छ्रितां सुश्लक्ष्णां सोपानां कितां प्रागुदक्प्रवणां कदलीस्तंभतोरणा
पुष्पमालाद्यलंकृतां वेदिः कार्येत्यपि केचित्॥ इति पूर्वदिनकृत्यं॥ परदिनेऽतिक्रांतचौलं कृत्वा प्रागेव जातचौलं

इदं च वपनं भोजनात्पूर्वमेवेत्युक्तं कात्यायनानुसारिगदाधरेण॥ बौधायनस्तु कुमारं भोजयित्वा चौलवत्स्त्रीके शान्तोप्य
तिभोजनानंतरमेवोक्तवान्
कृत्वा प्रागेव जातचौलं त्वभ्यंगस्नानेन स्नापयित्वा मात्रा सह भोजयेत्॥ तदा ब्रह्मचारिभ्योऽन्नदानमाचारात्कार्यं॥
ततो देशकालौ संकीर्त्यास्य कुमारस्य द्विजत्वसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गायत्र्युपदेशं कर्तुं तत्राचार्यागमने तेव
पनादि करिष्य इति संकल्प्य वपनं कारयेत्॥ मुख्यशिखाधिकशिखानां चौलोद्धृतानामत्र वापनं॥ ततः स्नापितम
हतांबरं बद्धशिखं मंगलतिलकं बटुं कुर्युः मौहूर्तिकं संपूज्य तदुक्तशुभमुहूर्ते आचार्यो वेद्यां प्राङ्मुख उपविष्टः
मुखमीक्षेत॥ कृतनमस्कारं तं स्वांके कुर्वीत॥ ततो ब्राह्मणा येयज्ञेनेति मंत्रैर्यथाचारमुभयोः शिरस्यक्षतान् क्षिपेयुः॥
तदस्तं गृहा वै प्रतिष्ठेति च ततः कुमारं दक्षिणत उपवेश्याचम्य प्राणानायम्य देशकालौ संकीर्त्योपनयनहोमं क
र्तुं स्थंडिलादि करिष्य इति संकल्प्य स्थंडिलादि कुर्यात्॥ आघारावाज्येनेत्यंते ते त्रिरग्निं पवमानं प्रजापतिं चाज्येन श
२ तास्विष्टकृतमित्यादि॥ कुमारोऽन्वारब्धः समिद्धोमं कुर्यात्ततो बर्हिः सन्नहनादि आज्योत्पवनांतं कुर्यात्॥ ततस्तद्दक्षिणतः
कुमारं प्राङ्मुखमवस्थाप्याचिरत्कार्यासस्त्रे कटावाबध्यापि कौपीनं परिधाप्याहतं शुक्लं वासः समंत्रं परिधापयेद्युवं व
स्त्राणीत्यस्य औचथ्यो दीर्घतमा मित्रावरुणौ त्रिष्टुप्॥ वासोधारणे वि०॥ वाससैव प्रावरणपक्षे मंत्रावृत्तिः॥ तत उत्त
रतो नीतेन कुमारेणाद्विरं वुमीत्राशनं कारयित्वोपवीतधारणादि॥ अजिनेन प्रावरणपक्षे तदादि वा कुर्यात्॥ मित्रस्य
चक्षुरित्यस्य वामदेवोऽजिनं त्रिष्टुप्॥ अजिनधारणे वि० ॐ मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरं समिद्धं॥ अ
नाहनस्य वसनं जरिष्णु परीदं वाज्यजिनं दधेऽहं॥ उक्तप्रकारमजिनं धारयित्वा गायत्र्या दशकृत्वोऽभिमंत्रितां शुचिरूपवीतं
प्रोक्ष्य तद्धारयेत्॥ यज्ञोपवीतमिति मंत्रस्य परब्रह्म ऋषिः॥ परमात्मा देवता त्रिष्टुप् छंदः श्रौतस्मार्तकर्माधिकारसिध्य

Indira Gandhi National
Centre for the Arts

संकौ०

१५७

र्थं उपवीतधारणे वि० अध्ययनकाले मंत्राक्षराणां संधिवशेन ये विकारास्तान् त्यक्त्वा मंत्रं वाचयित्वा तद्दक्षिणबाहुमुद्धृ
त्योपवीतं धारयित्वा कुमारमात्मनोऽग्नेश्च मध्येन यज्ञपात्रोत्तरभागे नीत्वाज्यं तोक्तेन विधिना परिज्ञातोक्तेन वाचमप्यप्रणीत
पूर्वभागे नीत्वा तस्य पश्चिमभागात्मकतीर्थेन प्रपन्नं पूर्ववदानीतं दक्षिणत उपवेश्य बर्हिष्याज्यमासाद्य स्रुवसंमार्गाग्न्यर्चने
कृत्वा ब्रह्मचार्यन्वारब्ध इध्माधानाद्याज्यभागवर्ज्यं चौलवदाज्याहुतिचतुष्टयं हुत्वाऽऽचार्य उत्तरतोऽग्नेः प्राङ्मुखस्तिष्ठेत् कुमार
स्तयोर्मध्येन गत्वाऽऽचार्याभिमुखस्तिष्ठेत्॥ तत आचार्योऽनुद्धिष्टजलेन शिष्यांजलिमापूर्य स्वांजलिपूर्य स्वांजलिपूरणमन्येन
कारयित्वा तत्सवितुरित्यस्य श्यावाश्वः सविता नुष्टुप्॥ अवक्षारणे वि० ओं तत्सवितु० मंत्रांते स्वांजलिस्थोदकं शिष्यांज
ल्युदके आसिच्य स्वदक्षिणपाणिधृतेन तदंजलिना तज्जलमवक्षारयेत्॥ ततः स्वदक्षिणपाणिना कुमारस्य सांगुष्ठदक्षिण
पाणिग्रहणं कुर्यात्॥ देवस्य त्वा सवितुः० असुकशर्मन्निति आभिवादनिकं नाम शर्मांतं संबुध्यां निर्दिशेत्॥ पुनर्द्विः पू
र्ववत्पूरणादि सविता ते हस्तमग्रभीदिति मंत्रांते पूर्ववन्नामग्रहणपूर्वकं हस्तग्रहणं द्वितीयपर्याये तृतीये तु अग्निराचार्य
स्तवेत्यंते॥ ततो यत्र देशे ब्रह्मचारिण आदित्येक्षणं भवति ब्रह्मचारिणा सह तं देशं गत्वा देव सवितरेष ते ब्रह्मचारी तं गो
पाय समामृत इत्याचार्यो ब्रूयाद् ब्रह्मचारी यथादित्यमीक्षते तथा कुर्यात्॥ ततोऽग्नेरुत्तरतोऽन्योन्याभिमुखौ तिष्ठतः॥ अथाचार्यः प्रजा
पतये रक्षणार्थं मनसा ब्रह्मचारिणं समर्प्य कस्य ब्रह्मचार्यसि॥ प्राणस्य ब्रह्मचार्यसि॥ कस्त्वा कमुपनयते काय त्वा परिद १५७
धामीति जपेत्॥ युवा सुवासा इत्यस्य कौत्सो विश्वामित्रो रूपास्त्रिष्टुप् पूर्वार्द्धर्चस्य प्रदक्षिणावर्त्तने उत्तरार्द्धस्य पाणि
भ्यां वटुहृदयालंभने विनियोगः॥ युवा सुवासा इत्यर्द्धर्चमुक्त्वाचार्यः प्रदक्षिणमावर्त्य प्राङ्मुखमवस्थाप्य कुमारांसयोरुप

यते अग्ने हरस्तेनाहं हरस्वी भूयासं० ८
रि स्वपाणी गमयित्वा ॐ तद्धीरास इत्यर्द्धर्चांते पाणिभ्यां युगपत्तदीयहृदयं स्पृशेत् ततः पूर्वेणेव यथा समानीय स्वदक्षिणत उप
वेशयेत्॥ अथ ब्रह्मचारी अग्नये समिधमित्यस्य हिरण्यगर्भोऽग्निरनुष्टुप् समिदाधाने विनियोगः॥ अग्नये समिधमाहार्षं बृह
स्पते जातवेदसे॥ तया त्वमग्ने वर्द्धस्व समिधा ब्रह्मणा वयं स्वाहेति मंत्रमेकश्रुत्येन पठित्वा समिधमाधायाग्नय इदं० ति त्यागं ते
दक्षिणं पाणिं प्रक्षाल्याग्नौ प्रताप्य ॐ तेजसा मा समनज्मीति संहतौष्ठमुखवाड्भिर्मृजेत्॥ एवं पाणिप्रक्षालनादि मुखनिमार्ज
नांतं पुनर्द्विः कुर्यात्॥ ततः पाणिं प्रक्षाल्य तिष्ठन् हृदि कृतप्रणतिमुद्रायुतकरसंपुट उपतिष्ठेत मयि मेधामिति षण्णां हि
रण्यगर्भऋषिः त्रयाणां मंत्राणां इन्द्रसूर्याः त्रयाणामग्निः॥ गायत्री० उपस्थाने॥ मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु॥ मयि
इंद्र इंद्रियं दधातु॥ मयि मेधातु॥ मयि मेधां० सूर्यो भ्राजो दधातु॥ यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं॥ यत्ते अग्ने वर्चस्तेना
हं वर्चस्वी भूयासं॥ मानस्तोक इति मंत्रस्य कुत्सो रुद्रो जगती॥ भस्मधारणे विनियोगः॥ मानस्तोके० द्वामर्द्दे आयु
षं जमदग्नेरिति भाले कश्यपस्य कंठे॥ अगस्त्यस्य त्र्या०॥ नाभ्यां यद्देवानां० दक्षिणांसे॥ तन्मे अस्तु॥ वामांसे त्र्या
युषं त्रिरसि कृतांजलिरुपतिष्ठेत्॥ तेजश्च मे० तस्मै ते नमः॥ स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं॥ आयुष्य
तेज आरोग्यं देहि मे हव्यवाहन देहि मे हव्यवाहनोन नमः॥ एतत्स्वरान्वितेन गोत्रोस्वरान्वित एतच्छर्माहं भो अग्ने अभिवादय इत्यग्निम
भिवाद्योत्तरत उपविष्टस्य---- आचार्यस्याभिमुख उत्तरत उपविशेत्॥ अथ यथाचारमाचार्येणाज्ञीप्रजनेष्टतेद
क्षिणं जानुं भूतले निपात्य दक्षिणसव्यहस्ताभ्यां सव्यदक्षिणश्रोत्रे संस्पृश्याचार्यस्य दक्षिणसव्यपादौ व्यस्ताभ्यां स्वीयसव्यदक्षि
णहस्ताभ्यां जानुप्रभृति पादांगुष्ठाग्रपर्यंतं स्पृष्ट्वा एतत्स्वरान्वितेत्यादि अमुकशर्माहं भो अभिवादय इत्यंतं पूर्ववदुक्त्वा आचार्यपदयोः
शिरोनिधानेन प्रणमेत्॥ अकारांतस्वरांतिकरोहिणादिनाम्नाभिवादने आचार्य आयुष्मान् भव सौम्य इति का आयुष्मान् भव

Indira Gandhi National Centre for the Arts

संको०
१५८

सौम्य शो हिणा इइत्यादिशिष्टं प्रयुंजीत इकारांतस्वातिनाम्नाभिवादने आयुष्मान्भव सौम्य स्वाता३ इ इति॥ उकारांत पुनर्वसु
नाम्नाभिवादने आयुष्मान्भव सौम्य पुनर्वसा३ उ इति॥ एवमन्यत्रोह्यं ततः सविनयं आधिदिह्नो: सावित्री भो अनिब्रूहि
इत्याचार्यं संप्रार्थयीतानीकृत वामपाणेरंगुष्ठांगुलीर्न्यंञ्चु खीकृत दक्षिणपाणेरंगुष्ठांगुलीभिर्दृढं संयोगिनी कृत्वा तादृशाव
गांजलिं दक्षिणां केनि: क्षिप्यासीत आचार्यस्तजान्वतां यशोंकाकुत्स्थ इत्यादितलक्षण: पादाचिह्नोर्भवदिति॥ यत: ककुत्स्थादा
रभ्योन्नतिः स्थामदाशाया: मंजलिं तत्पधारिनीयवासमाक्षाघ तादृशं स्वपाणिभ्यामादाय सप्रणवव्याहृतिकां सावित्रीमुपदि
शेत्॥ तद्यथा॥ प्रणवस्य परब्रह्म ऋषि:॥ परमात्मा देवता देवी गायत्री छंद:॥ व्याहृतीनां परमेष्ठी प्रजापति: प्रजापतिर्दृ
दतीगायत्र्या विश्वामित्र: सविता गायत्री॥ उपनयन प्रधानोपदेशे विनियोग:॥ सप्रणवव्याहृतिकां सावित्रीं स्वयं पच्छ
उच्चार्य तथैव कुमारं वाचयीत अशक्तो यथायथाशक्ति॥ ततस्तादृशीमर्धर्चशउक्त्वा वाचयीत॥ ततस्तादृशीमनवानमुक्त्वा
वाचयीत॥ यथाशक्ति सर्वत्र वाचयन्संधिकृतं वर्णविकारं नान्यथा कुर्वीत॥ मम व्रत इति मंत्रस्य प्रजापतिर्दृदतीस्त्रि
ष्टुप् अस्य हृदयदेशे ऊर्ध्वरंगुलिपाणेरुपधाने विनियोग:॥ मम व्रते हृदयं ते दधामि मम चित्तमनुचित्तं ते अस्तु॥ मम वाचमेक
व्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति ब्रह्मचारिणो हृदये स्वदक्षिणपाणिमूर्ध्वांगुलिं न्यञ्चुखमुपधाय मेखलाबंधं
कुर्यात्॥ इयं दुरुक्तादिति द्वयोर्वामदेवो मेखला त्रिष्टुप्॥ मेखलाबंधने विनियोग:॥ इयं दुरुक्तात्परिबाधमाना श
र्मवरूथं पुनती न आगात्॥ प्राणापानाभ्यां बलमाभरंती प्रिया देवानां सुभगा मेखलेयं॥ ऋतस्य गोप्त्री तपस: परस्पी १५८
स्त: घ्नती रक्ष: सहमाना अराती:॥ सान: समंतमनुपरीहि भद्रया भर्तारस्ते मेखले मा रिषामेति॥ परेद्दी त्यपपाग:॥ आनुपूर्व्येण
परिगच्छेतिपारिजातकृतव्याख्यानां संगते:॥ कटिदेशे मेखलां त्रिरावृत्य नाभिदेशे ग्रंथित्रयं कुर्यात् तदा ब्रह्मचारी सांग

सरहस्य वेदत्रयेण संवृतो हरिमिति मन्येत॥ अथास्मै दंडं दद्यात्॥ स्वस्ति न: स्वस्त्यात्रेयो विश्वेदेवा स्त्रिष्टुप्॥ दंडदाने विनि
स्वस्ति नो मिमीतां०च तुना॥ अदांतं दमयित्वा मां मार्गे संस्थापयन्स्वयं॥ दंड: करस्थितो यस्मात्तस्मात्त्रायतो भयमिति मंत्रांते ब्रह्म
चारी तं गृह्णीयात्॥ अथाचार्यो ब्रह्मचारिणमाह॥ ब्रह्मचार्यसि॥ बटु वो मिति स्वीकुर्यात्॥ अपोऽशान: मूत्रोत्सर्गादौ निमित्ते शौ
चांते विधिना आचमनं कुर्विति यावत्॥ कर्म कुरु॥ संध्योपासनाग्निकार्यादि सायंप्रात: कुरु॥ दिवा मा स्वाप्सी: दिवा निद्रां मा
कुरु॥ आचार्याधीनो भव॥ तदाज्ञोल्लंघनं मा कुरु॥ वेदमधीष्व॥ द्वादशवर्षाद्यन्यतरपक्षाश्रयणेन वेदाध्ययनं कुर्विति ब्रह्मपदे
शमर्थं बोधयेत्॥ परस्य स्वीकुर्यात्॥ तत: स्विष्टकृदादि होमशेषं समाप्य देशाते ब्राह्मणान्भोजयिष्य इति शतं भो०ति॥ वाय
थाशक्ति वा०ति वा संकल्प्य नाना नामगोत्रेभ्यो भूयसीं दातुमुत्सृज्य इति च संकल्प्य ब्राह्मणेभ्यो वाऽरद्दीयात्॥ ततो ब्रह्मचारी
भूतनभिक्षापात्रे मातरमनुप्रवचनीयकर्मार्थं तंडुलान्याचेत भिक्षां भवती ददात्विति अनुप्रवचनीयं भवती ददात्विति वा
॥ मातुरभावे मातु: स्वसारं स्वभगिनीं ज्येष्ठभ्रातृपत्नीं वाऽप्यत्याख्यायनीमित्थमेव याचेत॥ पितरं वा भिक्षां भवान् ददात्विति
॥ अनुप्रवचनीयार्थं नात्स्य यमिति वा तद्भैक्षमाचार्यायनिवेद्य मध्यात् संध्यामुपास्य गुरुसंनिधौ अचलस्तिष्ठेन् दः शे
षं नयेत्॥ अनुप्रवचनीयारंभात्पूर्वं गर्जितवृष्ट्यादिसंभावनायां दिवेव चरुश्रपणांतं कृत्वाऽस्तमिते होमं कुर्यात्॥
न संध्या गर्जितिकालेन वृष्ट्युत्पातदूषिते॥ ब्रह्मौदनं पचेदग्नौ पक्वं चेन्नानिवर्त्तत इति संग्रहोक्ते:॥ पाकाभावे गर्जिता
दित्रि भितेतु शांतिं कृत्वा पाक: कार्य:॥ यथोक्तं विधानमालायां॥ ब्रह्मौदनविधे: पूर्वं प्रदोषे गर्जितं भवेत्॥ तदा विघ्न
करं ज्ञेयं बटोरध्ययनस्य तत्॥ १॥ तस्य शांतिविधानं तु वक्ष्ये शास्त्रानुसारत:॥ स्वस्तिवाचनपूर्वं तु हवनं कारयेद्बुध:

Indira Gandhi National
Centre for the Arts

संकौ०
१५८

२ प्रधानं पायसं तत्र साज्यं पायसं साष्टशतं यजि:॥ सूक्तं बृहस्पते विद्वान्पवे त्वंज्ञा विवर्धये ३ गायत्री यजने मंत्र प्रायश्चित्तं तुस
र्पिषा॥ धेनुं सवत्सकां दद्यादाचार्याय यशस्विनीं ४ शीलान्होमविधे: पश्चाद्ब्राह्मणान्भोजयेत्ततः॥ शतमष्टोत्तरं धीमान् ततो
ब्रह्मौदनं पचेत् इति॥ अथ प्रयोगः॥ ब्रह्मौदनपाकात्पूर्वं गर्जिते नस्त्वचितस्य ब्रह्मचारिकर्तृकाध्ययनविघ्नस्य निरासद्वा
रा श्रीपरमेश्वरप्रीत्यर्थं शांतिं करिष्य इति संकल्प्य गणेशपूजनस्वस्तिवाचने कृत्वाचार्यवरणं आचार्य पदत्रेतिस
र्षपविकरणादि भूसंस्कारं कृत्वा स्थंडिले ग्निं प्रतिष्ठाप्यान्वाधानं कुर्यात् चक्षुषी आज्येने त्वं ते अत्र प्रधानं सवितारं अ
ष्टोत्तरशतसंख्याभिः साज्यपायसाहुतिभिः शेषेणेत्यादि मरुत्त आज्येने त्वं ते सवितारमाज्येनेति प्रणीताप्रणयनांते आज्य
निर्वापादि आज्येन सह गृहसिद्धपायसस्य पर्यग्निकरणं संमार्गतिपाय समग्रावाघे स्त्रित्याभिघार्यादगुद्धा स्याज्य
स्य दक्षिणत आसाद्याघारार्चनादि॥ आज्यभागांते अष्टोत्तरशतसंख्याहुतिपर्याप्तं साज्यं पायसं सवित्रे न ममेति त्यक्त्वा
चार्यस्तावतीराहुतीर्हस्तेन गायत्र्या जुहुयात्॥ ततो बृहस्पति सूक्तं जपेत्॥ ततः स्विष्टकृदादि॥ यद्योदेवेत्याहुत्यं ते
गायत्र्याहुतिः॥ कर्मशेषं समाप्याचार्याय सवत्सां पयस्विनीं धेनुं संप्रदद इति संकल्प्य अष्टोत्तरशतसंख्यान् सुशीला
न् ब्राह्मणान् भोजयिष्य इति संकल्प्य कुर्यात्॥ यथाशक्ति वा ततः ईश्वरार्पणं कुर्यादिति ब्रह्मौदनपाकात् पूर्वं गर्जितनि १५८
मित्तकशांतिः॥ मेधाजननात्पूर्वकालीनाग्निकार्यपाठवदुपनयनाग्निनात्रोडुपनयनाहुतिभिः कटिसूत्रादिधारणादिमा
णवकसंस्कारणाग्निकार्यगायत्र्युपदेशावर्ज्यपूर्वोत्तरतंत्रसहितानि रग्निमुत्पाद्य तत्रानुप्रवचनीयपूर्वभाव्यग्निका
र्यपूर्वकमनुप्रवचनादि कार्यं अष्टवर्षं ब्राह्मणमुपनयीतेत्यत्र द्वितीयावगतस्य संस्कारस्य होमात्केथं सिद्धिरि

त्याकांक्षायां आज्यसमिधाहुतिसंस्कृताग्नितेजसा तेजसा मासमनूज्मीतिसंमंजनद्वारेणेति सामर्थ्यादवगमात् गायत्र्यु
पदेशपूर्वभाविनः समंजनस्य तद्योग्यतायामिवानुप्रवचनीयान्मेधाजननादेश्च पूर्वमंजनस्य तत्तद्योग्यतायामुपयोग
पदेशात्पूर्वभाविनः ... 
स्याचित्यापातत्वात्॥ मेधाजननांतानां त्रयाणामपि वेदाध्ययनोपयोगित्वेन तद्वारा मीमांसकप्रसिद्धाध्यपनांगत्वो
पपत्तेः॥ अनयैव रीत्या मेधाजननोत्तरभाव्यग्निकार्याणामपि समंजनकरणकाध्ययनयोग्यताद्वारेव नियुक्ताध्यय
नांगत्वोपपत्तेः॥ ज्योतिष्टोमभावनारंभे सं० मुत्पन्नायैस्तद्भावनांतर्गतयोग्यतात्रयधारणमग्निक्षेत्यग्निक्षेत्यग्निषु
क्तेर्मेधाजननपर्यंतमुपनयनाग्निधारणोक्तिसंभवात्॥ एवं वक्ष्यमाणमेधाजननांतानां शेषामुष्टापनसमर्थत्वाच्च
वत्युपनयनाहुतिभिरस्तुत्पत्तिः॥ न च संस्कृतमाणवकस्य संस्कारैः प्रयोजनमिति पुनः संधाने पाणिग्रहणादीनामि
वात्राषिकटिसूत्रधारणादीनां निवृत्तिः॥ नष्टस्योपनयनीग्ने: पुनरुत्पत्तिं करिष्य इति संकल्प:॥ नष्टस्योपनः रु
स्मातिहोमे विनियोग इति विशेषः॥ अथ ब्रह्मचारी सायं संध्यामुपस्थाय मग्निकार्यं चोपनयनाग्नौ कृत्वास्वासीनः प्रा
णानायम्य देशकालौ संकीर्त्य उपनयनांगमनुप्रवचनीयहोमं करिष्य इति संकल्प्य स्थंडिलांतरे होमार्थं चिकीर्षिता
मुपलेपाद्युपनयनाग्निं प्रतिष्ठापनांतं कृत्वा अन्यथा त्वग्निं ध्यात्वा आघारावाज्येनेत्यंते सदस्पतिं सवितारमृषीन्
यान्देवतांश्च रुणाशेषेण स्विष्टकृतमित्यादि समिद्धोयदप इत्यंतमुक्त्वा समिद्भ्याधानादि प्रणयनांतं कृत्वाभिज्ञातं
डुलांस्तूष्णीं देवतात्रयमुद्दिश्य चतुरश्चतुरान्मुष्टीन्निरूप्य ब्राह्मणभोजनयथीत मन्त्रा प्लुतं तूष्णीं प्रोक्ष्यावहत्य त्रि
फलीकृत्य प्रक्षाल्य श्रपयित्वा अतः स्थालीपाक इत्याचार्यायनिवेदयेत्॥ अतो ब्रह्मौदनः अतोनुप्रवचनीय इति व

Indira Gandhi National
Centre for the Arts

संक्षे०
१६०

तिजयंत:॥ बटोरेवं करणाशक्तोऽप्यपणांतमन्येन कारयेत्॥ अथाचार्य आज्यसंस्काराद्याघारांतं कृत्वा वदानधर्मे
णचरुपवदायजुहुयात्॥ सदसस्पतिमित्यस्य काण्वो मेधातिथिः सदसस्पतिर्गायत्री अनुप्रवचनीयचरुहोमे
विनियोगः॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं॥ सनिं मेधामयासिषं स्वाहा॥ बटुः सदसस्पतये इदं॥ तत्सवितुर्विश्वा
मित्रः सविता गायत्री अनु॰ गा॰ तत्स॰ यात् स्वाहा॥ बटुः सवित्र इदं॥ ऋषिभ्यः स्वाहा॥ बटुः ऋषिभ्य इदं॥ ततः स्विष्टकृदा
दि होमशेषं समाप्य तच्चरुशेषेण अवरान् ब्राह्मणान् भोजयित्वा दक्षिणां दत्वाऽस्य वेदसमाप्तिरस्त्विति भवंतो ब्रुवंतु इति प्रा
र्थयेत्॥ ते च वेदसमाप्तिरस्त्विति ब्रूयुः॥ ईश्वरार्पणं कृत्वा साचार्यो भुंजीत इत्यनुप्रवचनीयप्रयोगः॥ अत्र व्रतकारिकायां
॥ क्षीरादिवर्जमश्नीयाद् ब्रह्मचारी दिनत्रयं॥ आपीताथ चतुर्थेऽह्नि मेधाजननमाचरेत्॥ यद्वा द्वादशरात्रं स्यादब्दं व्रत
मथापि वा॥ तदा तदंत एव स्यान्मेधाजननसंज्ञकमिति मेधाजनने विधिश्चोक्त आश्वलायनसंमतो॥ कुर्यात्त्रिमेखलां वेदिं
सर्वतो द्वादशांगुलां॥ शुचौ प्रागुत्तरे भागे तस्यां मेधां समर्चयेत्॥ पलाशशाखां तन्मध्ये पत्रांकुरसमन्वितां॥ आर्द्रां वाथ
कुशस्तंबं समूलं स्थापयेद् गुरुः॥ मेधामावाह्य मतिमान् मेधायै नम इत्यथ॥ गंधपुष्पाक्षतैः सम्यग्धूपदीपादिभिः
गुरु॥ दध्यानि वेदयेदेनां सक्तुमिश्रं सयावकं॥ समोदकं निवेद्यान्ते पुनश्चाभ्यर्च्य पूर्ववत्॥ प्रणम्य तस्यै मेधायै त्रि १६०
भिः सारयेज्जलं॥ उच्चरन् सुश्रवेमंत्रं जलं गृह्य प्रदक्षिणं॥ संस्राव्यतां नमस्कृत्य तथा कुर्यात्पुनः पुनः॥ एवं त्रिवारमाव
र्त्य दंडाजिनकमंडलून् वेद्यां तिः क्षिप्य स्नात्वा वाससी च विनिक्षिपेत् मेखलां चोपवीतं च धृत्वान्येते विनिःक्षिपेत्॥ वासस
ते स्वगुरवे मेधाजननकर्मणि॥ दद्यात् तावत्समंतेव कौपीनेन प्रवर्तते॥ पुण्याहवाचनं कृत्वा ब्राह्मणांश्चापि भोजयेत्॥

तमावदति सा मेधाजननकर्मणः॥ तत्कर्तव्यं प्रयत्नेन व्रतस्य च समाप्तये इति पारिजाते भगवान्॥ गृह्यान्तरी यातगुर्वादी
समस्तै बंधुभिः सह॥ पथि स्वस्त्ययनान्मंत्रान्पठेयु ब्राह्मणाः सह॥ ततः सन्मंगलै दीपैः पूर्णकुंभादिभिर्युतः॥ प्रापयद्गृहमाचा
र्यः पुण्याहं वाचयेत्ततः अथ प्रयोगः॥ व्रतसमाप्तिपरदिने स्वगृहान्नैर्ऋते तद्दक्षिणे वा यथादिगन्यदिक्स्थमनुष्ठां तदभावे
क्षयं सशाखं वा पलाशं तदभावे कुशं वा यत्र क्वापुत्य न्यं कस्य मातारीस्या पूजयेत्॥ तदभावे स्वगृहस्योपनयनवेद्यां वेद्याम
दक्षि सर्वतो द्वादशांगुलां त्रिमेखलां वेदिं कृत्वा तस्यां सपत्रांकुरां मार्द्रां समूलां पलाशशाखां कुशस्तंबं वा प्रतिष्ठा
प्य ब्रह्मचार्यन्वारब्धा स्तिथ्यादि संकीर्त्य अस्योपनयनव्रतसमाप्ति वेदधारणसामर्थ्य लक्षण मेधासिद्धिद्वारा श्री
परमेश्वरप्रीत्यर्थं मेधाख्य सावित्री पूजनमहं करिष्ये इति संकल्प्य तत्र मेधायै नम इति मंत्रेणावाहनप्रभृत्युपचा
रार्पणं कुर्यात्॥ वैवेद्य समये यावक संक्तु मोदक सहित मोदनमर्पयेत्॥ एतत्पूजाते पुनः पंचोपचारैः पूर्वोक्तनैवे
द्यसहितैः संपूज्य ब्रह्मचारिणा प्रणामं कारयित्वा प्रादक्षिण्येन त्रिः शुद्धोदकेन परिषिंचंतं वाचयति सुश्रवः सुश्र
वा असि यथा त्वं सुश्रवः सुश्रवा असि एवं मां सुश्रव सौश्रवसं कुरु यथा त्वं देवानां यज्ञस्य निधिपोऽस्येवमहं मनुष्या
णां वेदस्य निधिपो भूयासमिति प्रदक्षिणं मंत्रावृत्तिः॥ अंते प्रणामावृत्तिश्च॥ ततो दंडाजिनकमंडलून् मेधासमीपे वे
द्यां निःक्षिप्य स्नात्वा मंत्रस्नानं वा कृत्वा वाससी तत्रैव निःक्षिप्य नूतनान्वासो जिनोपवीत मेखलादंडान् क्रमेणोक्त
सा विधिमंत्रैर्धृत्वा मेखलोपवीते जीर्णे तत्रैव निःक्षिप्य निःक्षिप्त वाससी गुरवे दत्वा पुण्याहं वाचयेत्॥ अस्य मेधाज
ननकर्मणः पुण्याहं भवंतो ब्रुवंत्विति॥ यदि गृह्यादिभ्यः मेधापूजनं कृतं तदा स्वस्तिन इंद्रो वृद्धश्रवा इत्यादि स्वास्त्यय

Indira Gandhi National Centre for the Arts

संकौ० नमंत्रान्पवह्निर्वौधवेत्रीव्हणः स्वद मंगलदीपपूर्णकुंभमेर्यादिनाद्वेरेनं गुरुगृहं प्रापयित्वा पुण्याहं वाचयेदिति त
१६१ तो मेधासूक्तपाठ॥ मा चारात्केचिदिच्छंति॥ ॐ मेधां मह्यमंगिरसो मेधां सप्तर्षयो ददु:॥ मेधां मिंद्रश्चाग्निश्च मेधां धा
ता ददातु ते॥ स्वधयाप्रयोग इति मेधाजननं॥ अथ मंडपदेवता: पंचोपचारैरभ्यर्च्य वेदेऽग्नंतरमानीय पत्न्या ब्रह्मचारि
णा च सह द्वाङ्मुख उपविश्य देशकालौ संकीर्त्य उपनयनार्थं स्थापितदेवतानां षोडशोपचारैः पूजनं पुनर्विसर्जनं त
दंगत्वेन पुण्याहवाचनं च करिष्य इति संकल्प्य गणेशमभ्यर्च्य षोडशोपचारैः देवता: पूजयेत्॥ तत्राभिषेककाले
ना राजनं कनिक्रदेदिति तैलाभ्यंगसुगंधिद्रव्यार्पणोष्णोदकस्नादि पूर्ववत्तत॥ उत्तिष्ठ ब्रह्मणस्पते अस्मात्स्थाना
द्व इति विसर्जनं तत: पुण्याहवाचनं॥ तत्रास्य मंडपदेवतोद्वासनकर्मणः पुण्याहं भवंतो ब्रुवंत्विति वाक्यप्रयोग:॥ समुद्र
ज्येष्ठा इति अभिषेकांते पुरोहितोऽन्यो वा मान्यपठनमुक्तसूत्रा: शाखा: वंशपात्रे निधाय तदुपरि क्षिप्ताभिषेकजलं सपत्नी
क सा पत्न्य यजमान शिरसि किंचित्स्रावयेत् येन चेतिचेत्यत द्वे सर्वस्वस्त्ययनं पत्नेति स्वास्ति पुनरागच्छतीति॥ तत:
क्षीर सुषट सुमासेध्र स्पद्धोत्रे यज्ञनानि नर्वं त्विति प्रार्थयेत्॥ ते पि तथास्त्विति प्रतिब्रूयु:॥ ततउन्मुक्तं कृत्वा सतपूग
फलयुक्तं तद्धस्ते आदाय पतिर्भार्यामादद्भ्य गृहाणेति॥ सा वदेत्क्रियते ति पति: प्रसादस्त्रते: सदस्वेरिति॥ एवं त्रि
॥ तत्सूत्रं वस्त्रादिधनपेटिकायां स्थापनीयं ततस्ता: शाखास्तदभिषेकजलं गृहोपरि शुचि देशेनि: क्षिप्यांगणे वि १६१
तानस्पे शानकोणे विमोचंच कृत्वा यथाशक्ति ब्राह्मणभोजनं संकल्प्य भूयसी दक्षिणां संकल्प्य पूर्वक ब्राह्मणेभ्यो
दत्वा परमेश्वरार्पणं कुर्यादिति॥ अत्र कालविधि मादुर्वृद्धा:॥ समे च दिवसे कुर्याद्देवकोत्थापनं बुध:॥ षष्ठं च

विषमं नेष्टं मुक्त्वा पंचम सप्तमाविति॥ समेषु षष्ठं विषमेषु पंचम सप्तमतिरिक्तं निषिद्धमित्यर्थ:॥ अथ नांदीश्राद्धोत्तरं दे
वतोद्वासनपर्यंतं निषेधा:॥ गार्ग्य: नांदीश्राद्धे कृते पश्चाद्यावन्मातृविसर्जनं॥ दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदके
न चा अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च॥ ब्रह्मयज्ञं चाध्ययनं नदीसीमातिलंघनं॥ उपवासव्रतं चैव श्राद्धभोजन
मेव चानेव कुर्यु: सपिंडाश्च मंडपोद्वासनावधीति॥ अत्र नित्यश्राद्धनिषेधेन तत्कार्यविदितापित यज्ञ॥ न षेधसिद्धे:
स्वधाकारग्रहणं तत्सहचरितवैश्वदेवनिषेधार्थमाचारसंवादलाभाच्चेति वदंतु:॥ तथान्यत्र अभ्यंगे सूतके चैव
विवाहे पुत्रजन्मनि॥ मांगल्येषु च सर्वेषु न धार्यं गोपिचंदनमिति॥ अवादिविप्रतुष्ट्यर्थ मोपनायनिको विधि:
द्रष्टव्यं स वोष्यनं तेन तथायातु मुदं हरि:॥ इति कौस्तुभे उपनयनं॥ विकलांगविषये उक्तं स्मृत्यर्थसारे॥ षंढांधव
धिरस्तब्धजडगद्गदपंगुषु॥ कुब्जवामनरोगार्त शुष्कांगविकलांगिषु॥ मत्तपुंस्त्वे पिचेतेषु संस्कारा: स्युर्यथोचितं॥ म
त्तोन्मत्तौ न संस्कार्याविति के॥ कर्मण्यनधिकारात्पतितत्वं नास्तीति तदपत्यं संस्कार्यं ब्राह्मणादुत्पन्नो ब्राह्मण एवे
ति श्रुते:॥ अन्ये संस्कार्या इत्याहु:॥ होममाचार्य: करोति॥ उपनयनं चाचार्यसमीपे नयनं॥ अग्निसमीपे वा॥ सावि
त्रीवाचनं वा अन्यदंगं यथासंभवं कार्यमिति॥ त्र्याणां पन्नानामन्यतमे न प्रधानसिद्धिरित्याशय:॥ मूकबधि
रादे: सावित्रीवाचनासंभवे स्पृष्ट्वा सावित्रीजपो वा कार्य:॥ संस्कारमंत्रहोमादीन् करोत्याचार्य एव तु॥ उपने
यांश्च विधिवदाचार्य: स्वसमीपत:॥ आनीयाग्निसमीपं तु सावित्री स्पृष्ट्वा जपेदिति॥ कन्यास्वीकरणादन्यत्स
र्वं विप्रेण कारयेदिति पारिजाते त्रालोक्ते:॥ संस्कारमंत्रा उपनेयस्य वास: परिधानादिषु ये मंत्रास्तानाचार्य

Indira Gandhi National Centre for the Arts

संकौ० एवमपवेदित्यर्थः॥ बौधायनस्त्वीदृशोपनयनप्रकरणे तूष्णीं वासः परिधापयति॥ तूष्णीं मेखलां तूष्णीमजिनं प्र
१६२ तिमुंचति॥ तूष्णीं दंडं प्रयच्छतीति प्रकृत्य सर्वान्मंत्रानाचार्य एव जपेत् इत्येके इत्याह॥ इति विकलोपनय
नं॥ नत्वोमामाधवौ देवौ ब्राह्मणप्रीतिसिद्धये॥ अनंतदेवतनुजे पुनःसंस्कारपद्धती॥ पुनःसंस्कारः पुनरुपन
यनं॥ तच्च त्रिविधं॥ प्रत्यवायनिमित्तप्रायश्चित्तत्वेन विहितं॥ निमित्तविशेषेण कृतोपनयनस्य दृष्टाचेष्टत्वापत्ती
तत्फलार्थत्वेन विहितं॥ वेदांतराध्ययनचिकीर्षायां तदर्थत्वेन विहितमिति॥ तत्राद्यं तावद्बौधायनः॥ अमत्यासु
रापाने कृच्छ्रं द्वादशाब्दं चरित्वा पुनरुपनयनमिति॥ औषधांतरानारूपव्याध्युपशमनार्थं पैष्टीपाने एतदिति पद
नरत्ने॥ वसिष्ठः मत्या मद्यपाने त्वसुरायाः सुरायाश्चाज्ञाने कृच्छ्रातिकृच्छ्रौ घृतप्राशनं पुनःसंस्कारश्चेति॥ अत्रासुरा
याश्चेति सुराशब्दो न पैष्टीपरः॥ तदज्ञानपाने द्वादशाब्दोक्तेः॥ शूलपाणौ यमः अज्ञानाद्वारुणीं पीत्वा प्राश्य मू
त्रपुरीषयोः॥ पुनःसंस्कारमर्हंति त्रयो वर्णा द्विजातय इति॥ यद्यपि संस्कारशब्दो जातकर्मादिसाधारणस्तथा
पीह विधिषु संस्कारशब्देनोपनयनमेवोच्यते तस्य द्विजत्वसंपादनरूपातिशययोगेन बुध्यारोहात्॥ अनंतर
वक्ष्यमाणमनुवचसि वाक्यशेषेण तथा प्रतीतेश्च॥ भविष्ये अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति॥ तप्त
कृच्छ्रान्वितेनेह केवलेन तु शुध्यति॥ तदप्युक्तव्याध्युपशमनार्थपान एवाज्ञातकृते बोध्यं॥ स्मृत्यंतरे रेतोमूत्र
पुरीषाणां गौडीमाध्वीश्च प्राशने॥ क्रव्यादपशुविष्टानां संस्काराच्छुद्धिरिष्यते॥ मनुः॥ अज्ञानात्प्राश्य विण्मूत्रं १६२
सुरासंस्पृष्टमेव च॥ पुनःसंस्कारमर्हंति त्रयो वर्णा द्विजातयः॥ वापनं मेखला दंडो भैक्षचर्या व्रतानि च॥ निवर्तंते

द्विजातीनां पुनःसंस्कारकर्मणीति॥ एतदतीतसुरासंपर्कविषयं॥ तत्र कृच्छ्रपूर्वकत्वे चैष विधिर्ज्ञेयः॥ वक्ष्यमाणगौत
मस्मृतिनिर्दिष्टविण्मूत्रसाहचर्यात्॥ विष्णुः॥ मलानां मद्यानामन्यतमस्य प्राशने चांद्रायणं कुर्यात्॥ लशुनप
लांडुगृंजनतंडुलिविड्वराहग्रामकुक्कुटनरगोमांसभक्षणे च सर्वेष्वेतेषु द्विजातीनां प्रायश्चित्तांते पुनःसंस्कारं कु
र्यादिति॥ ज्ञानतः सकृद्भक्षणे एतदिति शूलपाणिः॥ तत्रैव शातातपः॥ उष्ट्रीक्षीरमानुषीक्षीरप्राशने पुनरु
पनयनं॥ तप्तकृच्छ्रं चेति॥ पानाभ्यासे एतदित्यपि शूलपाणिः॥ मिताक्षरायां पैठीनसिः॥ आविखरोष्ट्रमानु
षीक्षीरप्राशने तप्तकृच्छ्रं पुनरुपनयनं चेति॥ बृहस्पतिः॥ रेतोमूत्रपुरीषाणां शुध्यै चांद्रायणं चरेत्॥ ततः कृच्छ्र
पूर्वकं पुनःसंस्कारं प्रकृत्य गौतमः॥ मूत्रपुरीषकुणपरेतसां प्राशने चैवमिति॥ अत्र चांद्रायणतप्तकृच्छ्रयो
र्ज्ञानाज्ञानाभ्यां व्यवस्था॥ संस्कारस्तूभयत्र तुल्य एवेति शूलपाणिः॥ हेमाद्रौ वितत्राप्याघातियाद्वा पुनःसंस्कारम
र्हतीति॥ आचारोद्योते ह मनुः॥ जीवन्यदि स आगच्छेद्घृतकुंभे नियोजयेत्॥ उद्धृत्य स्नापयित्वास्य जा
तकर्मादि कारयेत्॥ द्वादशाहं व्रतं चर्या त्रिरात्रमथवास्य तु॥ स्नात्वोद्वहेत तां भार्यामन्यां वा तदभावतः
॥ अग्नीनाधाय विधिवद्व्रात्यस्तोमेन वा यजेत्॥ अथैंद्राग्नेन पशुना गिरिं गत्वा तु यत्र तु॥ इष्टिमायुष्म
तीं कुर्यादीप्सितांश्च क्रतूंस्तथा॥ प्रायश्चित्तोद्योते॥ सिंधुसौवीरसौराष्ट्रांस्तथा प्रत्यंतवासिनः॥ अंगवंग
कलिंगांध्रान्गत्वा संस्कारमर्हति॥ एतच्च तीर्थयात्रां विना गमने सति बोध्यं॥ तीर्थयात्रां विना गत्वा पुनःसं
स्कारमर्हतीति प्रयोगपारिजाते॥ बौधायनस्मरणात्॥ मनुः॥ चांडालान्त्यं द्विजो भुक्त्वा सम्यक्चांद्रायणं च

Indira Gandhi National Centre for the Arts

संको॰ रेत॥ बुद्धिपूर्वं तु कृच्छ्राब्दं पुनः संस्कारमर्हति॥ अभ्यासविषयमेतदिति मदनरत्ने॥ पाराशर्यप्रायश्चित्तकां
१६३ डे॥ अजिनं मेखला दंडो भैक्षचर्या व्रतानि च॥ निवर्तंते द्विजातीनां पुनःसंस्कारकर्मणीति॥ ब्रह्मचारिणां पुनःसं
स्कारत्वपेगीनास्तिः॥ मधुमांसाशनेत्रिरात्रमुपवासः पुनस्त्वनयनं चेति॥ अयं च त्रिरात्रोपवासः प्राजापत्याशक्तौ से
स्तुकं मदनरत्ने॥ एवं योरज्ञातमक्षणे कृच्छ्रमत्यापराकः॥ अभ्यासे द्विगुणं॥ पुनःसंस्कारश्चेति स्मृत्यर्थसारे॥ तथात्
त्रैव॥ मातापितृगुर्वाचार्योपाध्यायेभ्योन्यप्रेतसंस्कारे ब्रह्मचारिणः पुनरुपनयनं कार्यमिति॥ तथा रेतो विण्मूत्रक
र निर्मथितदधि वदि वैदि पुरोडाशाभक्षणे नाम स्वंताभ्यासे तिकृच्छ्रः॥ पुनःरूपनयनं चेति॥ परस्मार्यः प्रत्य
सितो विप्रः प्रव्रज्यातो विनिर्गतः॥ अनाशकानिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति॥ स चरेत्त्रीणि कृच्छ्राणि त्रीणि चांद्रा
यणानि च॥ जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात्॥ वसिष्ठः॥ सुन्यस्य दुर्मतिः कश्चित्प्रत्यापत्तिं व्रजेद्यदि॥
स कुर्यात्कृच्छ्रमश्रांतः षण्मासान्प्रत्यनरमिति॥ अत्र विप्रस्य षाण्मासिकः कृच्छ्रः क्षत्रियस्य चांद्रायणमिति मिताक्ष
रायां॥ पृथ्वीचंद्रोदये॥ कर्मनाशाजलस्पर्शात्करतोयाविलंघनात्॥ गंडकीबाहुतरणात्पुनःसंस्कारमर्हतीति॥ इत्यं विहि
ते प्रायश्चित्ते तु पुनरुपनयने विशेषः पारिजातमदनरत्नयोः कल्पपः॥ चीर्णप्रायश्चित्तः प्राच्यावादि[illegible]ग्गत्वा
यत्र ग्राम्यपशूनां शब्दो न श्रूयते तस्मिन्देशेऽग्निं प्रज्वाल्य ब्रह्मासनमास्तीर्य प्राक्प्रणीतेन विधिना पुनःसंस्कारम १६३
र्हतीति ब्रह्मासनमिति ब्रह्मनियमार्थं॥ अथ द्वितीय उपनयनप्रकारः॥ समयो धौते॥ विमृत्तुनावसंतेन ह्यस्य
पक्षे गलग्रहे॥ अपराह्णे चोपनीतः पुनःसंस्कारमर्हति॥ तथा दक्षिणोत्तराभ्यां पाणिभ्यां पाणिभ्यां कुमारस्यांसाभि

मर्शनपूर्वकं समीपानयनविधाय कहिर एणकेशिस्त्रैमात्य दत्तः॥ इदं प्रधानकर्मास्य विस्मरणे सर्वमावर्ततइति॥
अनध्यायेचोपनीतः पुनःसंस्कारमर्हतीति इति॥ अत्र चानध्याय
वशिष्ठः॥ पापांशाकगते चंद्रे अरिनीचास्थिते पच॥ अनध्याये चोपनीतः पुनःसंस्कारमर्हतीति इति॥ अत्र चानध्याय
शब्देनानध्यायाः सर्वेपि सर्वाञ्जातिपुनःसंस्कारनिमित्तत्वेन सर्वदशेषु विवक्षिताः यतोदेमाद्रिरनध्यायस्त्वं तरागम
नेपु चेति॥ शिष्टास्त्वधिकलोपुरुषान दुर्मेधान्मन्यमान॥ उक्तवाक्यवशेन वेदाध्ययने एतानेवानध्यायान्वर्जयंतो द
ते॥ उचितं च दुर्मेधत्वांगीकारेणैव तेषां स्वस्वगृह्योक्तपौषादिकालेध्ययने संकोत्सर्जनानुष्ठानं॥ पुष्ये तूत्सर्जनं कुर्यात्तद
पाकर्मदिनेपि चेति छंदोगशाखीयरवादिरगृह्यानुसारेण चोपाकर्मदिनेऽनुष्ठान॥ एवं च यएतेरपिणांमहाव्रते प्रक
रणे त्रिरात्रानध्यायः पव्यते अपर्वी वर्षे त्रिरात्रं वैदिकेनाध्याये नांतरियादिति॥ तथा आपस्तंबाय धर्मप्रश्नेपि
विद्युत्स्तनयित्नुवृष्टिश्चापतौ यत्र सनिपतत्युस्त्र्यहमनध्यायोपावद्भूमिर्बुदकेत्येक इति॥ यच्च मनुनाऽकालि
कानध्याय उक्तः विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे॥ आकालिकमनध्यायमेतेषु मनुरब्रवीदिति॥ तथा
कानध्याय उक्तः विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे॥ आकालिकमनध्यायमेतेषु मनुरब्रवीदिति॥ तथा
॥ प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने॥ सःज्योतिः स्यादनध्यायः शेषरात्रौ यथा दिवेति॥ यच्चस्मृत्यर्थसा
आकालिकानध्याय उक्तः॥ अर्द्धरात्रादूर्ध्वं गर्जने अर्द्धरात्रे वाकालिकोऽनध्यायः संध्यागर्जितेत्वहोरात्रमिति इ
दृशा सर्वानध्यायानां प्रतिपत्त्वेवैत्यिव कारणात्र ह्वेवापवेपतीति वन्निर्दृष्ट्वोतपरिसंख्यापादुर्मेधानुज्ञातिनि
षिधेनाध्ययनेचतुर्दश्यादिवदितरानध्यायानां नित्यत्वाभावनिर्णये सातिनित्यचतुर्दश्याद्यनध्याय ग्रहणे नोपप
त्त्यपुनःसंस्कारविधिगतानध्यायशब्दस्यानित्यानध्याय ग्राहकत्वासंभवात्॥ उक्तं हि पंचमे अश्मीषोमीययागे

सं०कौ० त्कर्षपरतया प्रतीयमानेन यदेवाद:पौर्णमासं दद्विरिति वचनेनाग्नीषोमीयस्य पुरोडाशस्याग्नेयवोत्कर्षेनाग्नी-
१६४ षोमीयोपांशुयाजस्यानित्याग्नीषोमीय ग्रहणायोगादिति॥ किंचोज्ज्वलायां हरदत्तेन धर्मप्रश्नगतोदाहृतवाक्य-
स्येत्थं व्याख्यानं कृतं यस्मिन्देशे यो वर्षाकालस्ततोन्यस्तत्रापर्तुरिति॥ नचात्र वर्षाशब्दो वर्षर्तुपर: तस्य सर्वदेशेष्व-
सद्व्यात्मकत्वात्॥ तथैवोक्तश्रुतिमाध्ये ऽक्षत्वाच्च किंतु वृष्टिपर:॥ एवं च यस्मिन्मघादिकाले वृष्टिर्यत्र नियता
नासावपर्तु: दृश्यते च यथा वृष्टिकालो दक्षिणापथे एकस्त थोदगपथे ऽपरइत्यस्य ज्ञापकं महाभारते वैराटप-
र्वणि वृहन्नडावाक्यमुत्तरं प्रति गांडीवमेतत्पार्थस्य लोकेषु विदितं धनुरिति प्रकृत्य एतद्वर्षसहस्रं तु ब्रह्मा-
पूर्वमधारयत्॥ ततोनंतरमेवाथ प्रजापतिरधारयत्॥ त्रीणि पंचशतं चैव शक्रोऽशीतिं च पंच च॥ सोम: पंच-
शतं राजा तथैव वरुण: शतं॥ पार्थ: पंच च षष्टिं च तथैव श्वेतवाहन इति अत्र च खांडवदाहानंतरलब्धनुष:
पार्थकर्तृधारणे पंचषष्टिवत्सरात्मकवर्षाणां बाधितत्वाद्वर्ष...शब्दं वृष्टिकालपरस्वीकृत्यैवैकास्मिन्वत्स-
रे द्वौ द्वावृतू रीत्या वृष्टिकालाविति चेत्सार्द्धद्वात्रिंशत्संवत्सरा: पंचषष्टिवर्षशब्देविवक्षिता इत्यवरुंधाना अ-
न्यथा ऽतीतानागतवत्सरान्प्राय व्याख्याने नूतानि दिशानुपपत्ते:॥ किंच यावद्भूमिर्बुद के ति धर्मप्रश्नएवपठितां-
रस त्वान्त्रिरात्रानध्यायस्यानित्यत्वं॥ नापि मनूक्ताकालिकस्यानित्यत्वं उक्तमनुवाक्ये एतेषु मनुरब्रवीदिति चतु- १६४
र्थपादस्य पश्लोकपूरणार्थत्वे ऽनुशायं मन्यमानो मेधातिथिर्यतआह॥ मनुरब्रवीदित्युक्ति र्विकल्पार्थत्वान्यइति॥
किंच प्रादुष्कृतिवाक्यशेषादपि तद्दिने प्रात:सन्निपात एवाकालिकानध्यायनिमित्तं न पूर्वदिने सायंसंध्यागतो

पातिप्रतीपते गतोत्र व्याख्यातृभिरेवं व्याख्यातं शेषतौ वृष्टिकालाभिन्नकाले ऽक्रनिमित्ते चरणत्रयोक्त सज्योति-
रनध्यायवशेन यथा दिवानध्यायस्तथा रात्रावपीति॥ सायंसंध्यागतनिमित्तवशेन सज्योतिरनध्याये च दिवान-
ध्यायस्यानुवादासंभव: रात्रावनध्यायस्य च प्रातस्यविध्यसंभव:॥ प्रात:संध्यानिमित्तं च तयो: संभव इति श-
ब्द न्यायविज्ञिरालोचनीयं॥ अतोपि न मनूक्ताकालिकस्य नित्यत्वं॥ नापि स्मृत्यर्थसारोक्ताकालिकानध्यायस्य
नित्यतया पुन:संस्कारविधिगतानध्यायदेन ग्रहणं यतोस्ति वसिष्ठवचोलक्षणादि निबंधोदाहृतं॥ व्रत्ये द्विपूर्वसंध्या-
यां वारिदो यदि गर्जति॥ तद्दिनेस्यादनध्यायो व्रतं तत्रापि वर्जयेदिति तन्निषेधमुखपरिसंख्यां कुर्वत् प्रात:संध्यान्यका-
लीनगर्जनानिमित्तानध्याये नोपनयने विवर्जयेदित्यर्थपरं भवति नभूपालेरनुत्सव इतिवत्॥ नचदुर्मेधान्प्रति-
प्रातर्गर्जितनिमित्तानध्यायप्रतिप्रसवार्थमेतदिति शंक्यं॥ त्रिपाद्यै तदुपपन्नौ चतुर्थक्यापते॥ नापि दोषाधि-
क्यार्थ नष्टोत्रियो हंतव्यइत्यत्रेव दोषाधिक्यतात्पर्यग्राहकस्य प्रायश्चित्तोपदेशाभावात्॥ अत: सर्वान्प्रति अनध्या-
यत्वं त्रिपादीसिद्धं देतुत्वेनादाय चतुर्थपादेन परिसंख्यां कुर्वता ऽर्द्धरात्रादिगर्जनानिमित्तानध्यायस्यापनपुन:सं-
स्कारविधिगतानध्यायशब्देन ग्रहणमिति दर्शितं भवति॥ सर्वत्र त्रिरात्राकालिकाद्यनध्यायागर्जितादिनिमि-
त्ततया प्रतीयमाना: पौषादिमुख्यकालीनोत्सर्जनसापेक्षगर्जनादिनिमित्ता इति कात्यायनसूत्रसंवादिनोक्तश्रु-
तिभाष्येणलभ्यत इति न तस्योपनयकाले प्रसक्तिर्नतरां पुन:संस्कारनिमित्तत्वं॥ अत:सिद्धमेतत् प्रातर्गर्जित-
निमित्तानध्याय: प्रतिपदाद्यनध्यायाश्च पुन:संस्कारविधिगतानध्यायशब्देन गृह्यंत इति॥ अथ तृतीयप्र-
कार:॥ तत्र जयंत: यजुर्वेदं चाधीत्य ऋग्वेदमध्येतुकामस्यैतदेवोपनयनमलंकारवर्जं भवतीति॥ अलंकार-

Indira Gandhi National Centre for the Arts

सं॰कौ॰ रिकायां॥ वेदांतरमधिगत्यैवमृग्वेदं पत्न्याचीयते॥ उपनीतिरियं तेषामलंकरणवर्जितेति॥ पारिजाते भगवान्॥ द्वि
तीयामिममृग्वेदं मध्येतुमभिवाञ्छया॥ एतद्गृह्योक्तविधिना पुनश्चैवोपनीयत इति॥ इति तृतीयः प्रकारः॥ अथैच
१६५ प्रकारो नतैत्तिरीयाणां यथोक्तमापस्तंबेन धर्मप्रश्ने॥ सर्वेभ्यो वेदेभ्यः सावित्र्यनूच्यत इति हि ब्राह्मणमिति
॥ व्याख्यातमेतदि त्वे: ज्वलायां॥ त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्॥ तदित्यृचोस्याः सावित्र्याः परमेष्ठी प्रजा
पतिरिति मनुः॥ ततश्चोपनयनसावित्र्या अनुवचनं तन्मुखेन सर्ववेदा अनूक्ता भवंति॥ अतो गृह्यमाणविशे
९ षत्वादेकमेवोपनयनं सर्वार्थं॥ आथर्वणार्थं तु पृथगुपनयनं कार्यं नान्यत्र संस्कृतो भृग्वंगिरसोधीयते नियुक्तेः॥
भृग्वंगिरसमाथर्वणमिति॥ पुनरुपनयने विशेषमाह आश्वलायनः॥ अथोपेतपूर्वस्य कृताकृतं केशवप
नं मेधाजननं चानिरुक्तं परिदानं कालश्च तत्सवितुर्वृणीमह इति सावित्रीमिति॥ अनिरुक्तं न भवति॥ इ
दं च वृत्तिकारिकाजयंतपर्यालोचने प्रायश्चित्तभूतपुनरुपनयनपाक्षावेवं कुर्यादिति वृत्तिकृतैतद्व्याख्या
भिधानात्॥ जयंतेन प्रायश्चित्तनिमित्तं यस्य पुनरुपनयनं क्रियते तस्यायं विधिरुच्यत इत्युपक्रम्यैतत्सूत्र
व्याख्यानात्॥ यदैतदुपनीतस्य प्रायश्चित्तं तदा भवेत्॥ कृताकृतं च वपनं मेधाजननमेव च॥ मेधाजननसङ्ग्र
वे व्रतचर्या भवेदिह॥ अनुप्रवचनीयाश्च तदभावे द्वयेन च॥ परिदानं न कार्यं स्यात् निमित्तानंतरं त्विदं॥ पूर्व
स्य वा चये स्थाने तत्सवितुर्वृणीमहे॥ भणितोत्र विशेषोयं समानमितरद्भवेदिति कारिकोक्तिश्च निमित्तानं १६५
तरं त्विदमित्युक्त्या च नैमित्तिके निमित्तानंतर्यस्योचितत्वान्न्यायमूलकं कालश्चेति सूत्रे निमित्तानंतर्यासंभवे
तु जातेष्टिवदुदगयनादिकालोपेक्षणीय एवेति सूचितं॥ परिदानं कस्य ब्रह्मचार्यसीत्यादेः परिददामी

त्यंतस्य मंत्रस्योच्चारणं॥ भणितोत्रेति प्रायश्चित्तार्थपुनरुपनयन एव गायत्र्याः स्थाने एषा ऋग्भवति॥ न तु तद
नंतरभाविषु ऋग्यजुरादिष्वपि तत्र पूर्वविहितगायत्रीवाचमानाभावादिति दर्शयति॥ मात्सौपि॥ अत्र सा
वित्रीवाचयति यदि पुरस्तादुपेतो भवति तर्ह्यनुपेतेन स्यादेप्रायश्चित्तार्थपुनरुपनयनांतर्गतसावित्रीवाचनं
गत्वेन परिदानानंतर्यं कालविधिं वदंस्तस्मिन्नेव प्रकरणे परिदानसूत्रे पुनयनविषयत्वमेव दर्शितत्वात्॥ तस्मि
न्नेव प्रकरणे तत्सूत्रव्याख्याकाले अहतवासो मेखलाजिनभैक्षचर्यादंडानामत्र निवृत्तिः पुनरुपनय इत्यादि॥
हरदत्तेन तु॥ अथोपेतपूर्वस्येति सूत्रीयव्याख्यावसरे उक्तं॥ अथानंतरं वेदांतरमुपेतपूर्वो यदि वेदमध्ये
तुमिच्छति तस्योपनयने विशेषो वक्ष्यत इति॥ अस्ति च तदनुसारिणी स्मृतिः पारिजाते: अध्वर्यूणां सामगा
नामेवमध्येतुमिच्छतां॥ क्रियास्यात्परिदानांतादीक्षादि न विधीयते॥ त्रसोदनं च मेधा चौदीक्षा च न॥ वधीयते
॥ ऋचमध्येतुकामानां दीक्षामिच्छंति केचनेति॥ अत्राध्वर्युसामग्रहणस्यायमाशयः॥ ऋग्वेदाध्ययनांगभू
तैवोपनयनमाश्वलायनोक्तेतिकर्तव्यताकं भवति सत्यप्युपनयनैक्ये तत्तदाम्नायाध्ययनांगभूत एवास्मिंस्तत्त
द्गृह्योक्तेतिकर्तव्यता भवतीति स्मृतिपादन्यासुधायामुक्तेः॥ न च ऋग्वेदिनां तदध्ययनार्थपुनरुपनयनं भवति॥
ति: प्रथमोपनयनानंतरमेव तदध्ययनस्योचितत्वात्॥ अतोन्यवेदिनामेव ऋग्वेदिनां तदध्ययनार्थपुनरुपय न
नं भवति॥ ~~ते: प्रथमोपनयनानंतरमेव तदध्ययनस्योचित~~त्वा अतोन्यवेदिनामेव ऋग्वेदार्थं पुनरुपनयने परिवि न
धिरिति॥ अत एव पूर्वोदाहृतजयंतकारिकयो: ऋग्वेदग्रहणं कृतं॥ पश्चात्तत्र हरदत्तीये च ऋग्वेदाध्ययनपूर्व

Indira Gandhi National
Centre for the Arts

सं.कौ॰ क एवं वेदांगैराध्ययनेषु पुनरुपनयनकथनं॥ तेन युगपदनेकवेदारंभेनोपनयनादित्यपेक्षेति सूचितं॥ अस्ति
१६६ ह्यन्यवेदिनां क्रामिकवेदारंभपक्षो युगपतदारंभः पक्षश्च॥ तथा च हरिहरेणोपनयनानंतरं वेदारंभसमये
तुल्का वेदारंभाग भूताः कात्यायनोक्ता आहुतीर्दर्शयथोक्तं॥ यदि ऋग्वेदमारभ्यते तदा पृथिव्यै स्वाहा अग्न
ये स्वाहा॥ यदि यजुर्वेदः॥ अंतरिक्षाय स्वाहा॥ वायवे स्वाहेति॥ यदि सामवेदः॥ दिग्भ्यः स्वाहा॥ चंद्रमसे स्वा
हेति॥ यद्येकदा सर्वे वेदारंभः प्रतिवेदं वेदाहुतिद्वयं हुत्वा प्रायश्चित्ताहुतीर्जुहुयादिति अतश्च युगपदनेक
वेदारंभेषु सकृदुपनयनेनैव सकलवेदारंभसिद्धिः इत्यभिप्रेत्योक्तमापस्तंबेन सर्वेभ्यो वेदेभ्यः सावित्र्य
नूच्यत इति संक्षेपः॥ वेदांतराध्ययनपूर्वकं त्वृग्वेदाध्ययनं चिकीर्षता आश्वलायनोक्तेति कर्तव्यताकं पु
नरुपनयनं कार्यं॥ तत्र जयंतकारिकामते लंकारमात्रवर्जं॥ हरदत्तमते सूत्रोक्तसकलपुनरुपनयनग
तविशेषविशिष्टं भवति॥ स्मृतिमते तु दीक्षापि वैकल्पिकी॥ द्वितीयपुनरूपननिमित्ते त्वविकृतपुनरुपयं न
नकार्यं॥ गार्हपत्याधानात्प्राक् सूर्योदये विकृताधानवत् तत्र पुनरुपनयनेकाचिदपि ग्रंथविशेषानुक्तेः॥
अथोपेतपूर्वस्येति सूत्रात्प्रवृत्तेश्च प्रायश्चित्तभूतपुनरुपनयने तूक्तवचनेभ्यो नेकविशेषावगते स्तत्प्रयोगो
लिख्यते॥ तत्र यत्र प्रायश्चित्तांतरसहितं॥ तत्र निमित्तानंतरकरणपक्षे पुरुषपुनस्त्राद्यनालोभ्यपर्षदुपदेशे १६६
न चौलांतसंस्कारान् कृत्वा कार्यं॥ अन्यथोचितनसत्राद्याधानरूपकं॥ कर्ता चापित्र सत्त्वे स एव॥ तदभावे पितृ
व्यादिः सपिंडः तदभावे कश्चित्॥ पुनरुपनयनं पञ्चचिकीर्षितं तत्रैव देशे जातकर्मादयः कार्याः अस्य कृते

र्ध्वदेहिकस्य पुनः संस्कारद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्मादीन्युपनयनांतानि कर्माणि करिष्य इति सं
कल्प्य सर्वादृशेन स्वस्तिवाचनादि श्रुवापनानंतरं चौले केशवापनमिति विशेषो मदनरत्ने॥ विवाहसंकल्प
तदर्थं स्वस्तिवाचनादिकं तु स्वयमेव पृथक् कुर्यात्॥ एवं निमित्तांतरेपि संकल्पः ऊह्यः॥ यत्र तु पुनरुप
नयनमात्रं प्रायश्चित्तत्वेन विहितं तत्र पर्षदुपदिष्टविधिना तदेव कार्यं॥ तत्राचार्यः कृच्छ्रत्रयं द्वादशास
हस्रं तत्सवितुर्वरेण्यमिति इत्यस्य जपं कुर्वीत॥ संस्कार्योनि॰ तांतरोपनयने प्रायश्चित्तं कुर्यात्॥ कालांतरोप
नयने त्वेवं संस्कुर्यात्॥ ततो ग्रामात्प्राच्यामुदीच्यां वा दिशि गत्वा यत्र ग्राम्यपशुशब्दो न श्रूयते तावद्देशं गत्वा
जीर्णोपलेपनाभ्यां शोधयित्वा तत्र कृतनित्यक्रियः॥ आचार्यः स्वदक्षिणतः संस्कार्यं उपवेश्य पात्यप्रत्यंत देशम
ममजनितदोषनिरासनेन पुनः संस्कारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुनरुपनयनं करिष्ये इत्येवंत न्निमित्त
मनजनितदोषनिरासनेन पुनः संस्कारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुनरुपनयनं करिष्ये इत्येवं तन्निमित्ता
नुसारिसंकल्पं कृत्वा तदंगभूतेत्यादि संकल्पपूर्वकं मंडपदेवताप्रतिष्ठापनांतं कुर्यात् स्वस्तिवाचने गृह्यशा
पितिविशेषः॥ पुनरुपनयने थिरिति बौधायनोक्तेः॥ कृतमंगलस्नानं संस्कार्यं भोजयित्वा वपनपक्षे संकल्पपू
र्वकं वपनं स्नाने कारयित्वा अन्यथा कारयित्वा नित्योपनयनवदन्वाधानात् प्राक् तंत्रं कृत्वा स्यप्रायश्चित्तार्थं
पुनरुपनयनहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ अस्मिन्नन्वाहिते ग्नौ इत्यादि प्रोक्षणांतं नित्यवत्कु
र्यात्॥ ततो ब्राह्मणमुपवेश्य प्रणीतापात्रप्रणयनाद्याज्यभागांतं कृत्वा वासोधारणपक्षे नित्यवत्समंत्रं धार

Indira Gandhi National
Centre for the Arts

णं तयोः कुर्यात्॥ तदभावपक्षे पूर्वमेव कुमारेण परिहितवस्त्रेण भवितव्यं॥ ततो ब्रह्मचारिणः पुनरुपनयने तु
१६७ वस्त्रादि नित्ययज्ञोपवीतधारणादि आदित्येक्षणांतं नित्यवत्कुर्यात्॥ ततो युवा सुवासा इत्येतन्मंत्रेण प्रदक्षि
णामावर्तनादि वासस्सापाणिभ्यां तदंजलिग्रहणांतं कृत्वा प्राणव्याहृती नामध्यादिस्मरणांते तत्सवितुः इत्या
स्य: सवितानुष्टुप्॥ पुनरुपनयने विनियोगः॥ प्रथमं पादशः स्वयमुक्त्वा वाचयेत्॥ ततोऽर्धर्चशः॥ ततः सर्वां॥
ततो मेखलादंडदानपक्षे समंत्रकं तद्दानं कृत्वा ब्रह्मचर्यमादिशेत्॥ यदि ब्रह्मचारिणोऽसमापितवेदस्य पुनरु
पनयनं नित्यवत्॥ अन्यथा स्यात् तादृशस्य पुनरुपनयने तु अपोशान कर्म कुरु दिवा मा स्वाप्सीः वेदमधीष्वेति
॥ समापितवेदस्य तु स्वाप्सीरित्यंतमेव ततः स्विष्टकृदादि होमशेषं समापयेत्॥ मेधाजननकरणपक्षे तत्त्र्यहं तम
ग्निं रक्षेत्॥ व्रतचर्यां च कुर्यात् उपनयनदिने भिक्षायाचनपूर्वकमनुप्रवचनीयं च॥ तत्र गायत्र्याः स्थाने तत्स
वितुर्वृणीमहे इति एतां पठित्वा द्वितीयामाहुतिं जुहुयात्॥ उक्तमृष्यादि नित्यस्त्यागः स्यात् समापितवेदस्य पुनरु
पनयनं वेदसमाप्तिवाचनं कुर्यात् नान्यथा॥ ततस्त्रिरात्रं द्वादशरात्रमहं वा व्रतचर्यां तत्कृत्वा यामे धाजननं॥ तत्र
यदि पुनरुपनीतो ब्रह्मचारी तदा यस्य पलाशस्य कुशास्तंबस्य वा वाससणं कृतं तत्रैव मेखलादीनि मुदस्य नव्यानि धा
रयेत्॥ अन्यस्तु पुनरुपनीतो यो विहितमेखलादिः स पूर्वस्य नान्यानि धारयेत्॥ यस्मिन्नाश्रमे पुनरुपनयनं प्राप्तं १६७
तदाश्रमधर्मान् कुर्यात्॥ यत्र तु पुनरुपनयनानंतरमाश्रमांतरस्वीकारः श्रूयते॥ यथा स्नात्वोद्वहेत् ततो भाय

वाचनादिकं तु स्वयमेव पृथक् कुर्यात्॥ एवं निमित्तांतरेऽपि संकल्प ऊह्यः॥ यत्र तु पुनरुपनयनमा
त्रं प्रायश्चित्तत्वेन विहितं तत्र यथर्तु उपदिष्टविधिना तदेव कार्यं॥ तत्राचार्यः कृच्छ्रं वा यद्वा दश सहस्रं त
त्सवितुर्वृणीमह इत्यस्य जपं कुर्वीत॥ संस्कार्यो निमित्तांतरेऽपनयने प्रायश्चित्तं कुर्यात्॥ कालांतरोप
नयने त्वेवं संस्कुर्यात्॥ ततो ग्रामात् प्रागुदीच्यां वा दिशि गत्वा यत्र ग्राम्यपशुशब्दो न श्रूयते तादृश
देशं मार्जनोपलेपनाभ्यां शोधयित्वा तत्र कृतनित्यक्रियः॥ आचार्यः स्वदक्षिणतः संस्कार्यं उपवेश्य अपा
त्यं तदेशागमनजनितदोषनिरासनेन पुनः संस्कारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुनरुपनयनं
नि करिष्ये इत्येवं तामितिनु सारिसंकल्पं कृत्वा तदंगमन्यत्स्यादि संकल्पपूर्वकं मंडपदेवताप्रतिष्ठापनांत
कुर्यात् स्वस्तिवाचनेऽग्निः प्रीयतामिति विशेषः॥ पुनरुपनयनेऽग्निरिति बौधायनोक्तेः॥ कृतमंगलस्ना
नं संस्कार्यं भोजयित्वा वपनपक्षे संकल्पपूर्वकं वपनस्नाने कारयित्वा अन्यथा कारयित्वा निस्योपन
यनवदन्वाधानात् प्राक्तंत्रं कृत्वा स प्रायश्चित्तार्थं पुनरुपनयनहोमे देवतापरिग्रहार्थमन्वाधानं क
रिष्ये॥ अस्मिन्नन्वाहिते मे इत्यादि प्रोक्षणांतं नित्यवत्कुर्यात्॥ ततो ब्राह्मणमुपवेश्य प्रणीतापात्रप्र
णयनाद्याज्यभागांतं कृत्वा वासो धारणपक्षे नित्यवत्समंत्रं धारणं तयोः कुर्यात् तदभावपक्षे पूर्व
मेव कुमारेण परिहितवस्त्रेण भवितव्यं॥ ततो ब्रह्मचारिणः पुनरुपनयने तु वस्त्रादि नित्ययज्ञोपवी
तधारणादि आदित्येक्षणांतं नित्यवत्कुर्यात्॥ ततो युवा सुवासा इत्येतन्मंत्रेण प्रदक्षिणमावर्तन

Indira Gandhi National
Centre for the Arts

दिवासखापाणिभ्यां तदंजलिं ग्रहणांतं कृत्वाग्नएव आहुतीनामृष्यादिस्मरणांते तत्सवितुः इत्यावाश्वःसवि-
तानुष्टुप् नरूपयने विनियोगः॥ प्रथमंपादशः स्वयमुक्त्वावाचयेत्॥ ततोर्द्धर्चशः॥ ततः सर्वां॥ ततो मेख-
१६८ लादंडदानपक्षे समंत्रकं तद्दानं कृत्वा ब्रह्मचर्यमादिशेत्॥ यदि ब्रह्मचारिणोऽसमापितवेदस्य पुनरु-
पनयनं निस्यचेत्॥ अन्यथास्य तादृशस्य पुनरुपनयने तु अयोशान कर्मकुरु दिवामास्वाप्सीः वेदमधी-
ष्वेति॥ समापितवेदस्य तु स्वाप्सीरित्यंतमेव ततः स्विष्टकृदादि होमशेषं समापयेत्॥ मेधाजननकरण-
पक्षे तत्त्वेयं तमग्निं रक्षेत्॥ व्रतचर्यां च कुर्यात् उपनयनदिने दिक्षा याचनपूर्वकमनुप्रवचनीयं च॥ त-
त्र गायत्र्यास्थाने तत्सवितुर्वृणीमहे इति एतां पठित्वा द्वितीयामाहुतिं जुहुयात्॥ उक्तमृष्यादि नित्यस्य-
गः स्वयं समापितवेदस्य पुनरुपनयने वेदसमाप्ति वाचनं कुर्यात् नान्यथा॥ ततस्त्रिरात्रं द्वादशरात्रम-
ब्दं वा व्रतचर्यां तत्कृतायां मेधाजननं॥ तत्र यदि पुनरुपनीतो ब्रह्मचारी तदा यस्य पलाशस्य कुशस्तवस्य
वोच्छ्रणं कृतं तत्रैव मेखलादीनि अप्सु दस्यन्यानि धारयेत्॥ अन्यस्तु पुनरुपनीतो योपि धृतमखलादिः स-
प्सु दस्य नान्यानि धारयेत्॥ यस्मिन्नाश्रमे पुनरुपनयनं प्राप्तं तदाश्रमधर्मान् कुर्यात्॥ यत्र तु पुनरुप-
नयनानंतरमाश्रमांतरस्वीकारः श्रूयते॥ यथास्मीत्योद्वहे ततो भार्यामित्यादौ॥ तत्र मेखलादीनि अप्सु ॥१६८
दस्य पुनस्तानि धारयित्वा ब्रह्मचारिव्रतचर्यामुचितकालेन समाप्य विधिनाऽऽश्रमांतरं स्वीकुर्या-
त्॥ इति बह्वृचानां पुनःसंस्कारविधिः अथ यजुःशाखिनां॥ तत्र बोधायनः अथोपनीतस्य व्रता-

निमर्वंति॥ नान्यस्योच्छिष्टं भुंजीतान्यत्रापितुर्ज्येष्ठाभ्यां न स्त्रिया सह भुंजीत मधुमांस श्राद्धसूतकान्ना-
नि द्दशाहसंधिनीक्षीरं छत्राकि निर्यासो विलेपनं गणान्नं गणिकान्नमित्येतेषु पुनःसंस्कारः प्रतिषि-
द्धदेशागमनमित्येकेषाम् अथाप्युदाहरंति सुराष्ट्रं सिंधुसौवीरमवंतीं दक्षिणापथं एतानि ब्राह्मणो गत्वा
पुनःसंस्कारमर्हतीत्यथ पुनःसंस्कारं व्याख्यास्यामोऽथ देवयजनोल्लेपनप्रभृत्याग्निमुखात्कृत्वापा-
लाशां समिधमाज्येनां हुत्वाथाज्याधायवाचयति पुनस्त्वादित्या रुद्रा वसवः कामाः स्वादेत्यथ व्रतस्य प्राय-
श्चित्ते जुहोति यन्म आत्मनो मिंदाभूत् पुनरग्निश्चक्षुरदादिति द्वाभ्यां अथ पक्वाज्जुहोत्सप्त मे अग्ने
घृतेन स्वाहेत्यथाज्याहुती रूपजुहोति येन देवाः पवित्रेण तितिसृभिरनुच्छेदं संस्विष्टकृत्प्रभृति सिद्ध-
माधेनुवरप्रदानात्॥ अथापरमापरिधानात्कृत्वापालाशीं समिधमाधायाथाव्रतस्य प्रायश्चित्ते जुहो-
सि॥ अथ व्याहृतिर्जुहोति अथापरो ब्राह्मणवचनादेव सावित्र्या शतकृत्वो घृतमभिमंत्र्य प्राश्य
कृत प्रायश्चित्तो भवति गुरोर्वाप्युच्छिष्टं भुंजीताप्युदाहरंति वपनं दक्षिणादानं मेखलां दंडमजिनं भै-
क्षचर्यां व्रतानि चैतानि निवर्तंते पुनःसंस्कारकर्मणि इत्येतेन पुनःसंस्काराः व्याख्याता इति॥ अत्र श-
क्तिदेशगुरुलघुकल्पव्यवस्था बोध्या॥ ब्राह्मणप्रीतये कारि पुनःसंस्कारपद्धतिः॥ प्रीतस्तत्प्रीतितः
कुर्याच्छन्नो विष्णुरुरुक्रमः॥ इति श्रीमदनंतदेवकृता पुनःसंस्कारपद्धतिः॥ अथ ब्रह्मचारिधर्माः॥

Indira Gandhi National
Centre for the Arts

मनुः॥ प्रतिगृह्येप्सितं दंडं उपस्थाय च भास्करं॥ प्रदक्षिणं परीत्याग्निं परिचर्यं भैक्षं चरेद्‍ चरेद्भैक्षं यथाविधि॥ इति
॥ एतद्व्याख्यामाह माधवः॥ दंडं प्रतिगृह्य तमुपनयनं प्राप्य गायत्र्यर्थं भास्करमुपस्थाय सोदमिति ज्ञात्वाग्निं
१६६ परिचर्य भैक्षं चरेदिति॥ परिचर्यार्थं समिदाहरणमाह वैजवापः॥ पुरस्तान्मयात्वाकृ उदीचीं दिशं गत्वा द्वि
सन्न रण्यात्समिधमाहरेत् शुष्कां ब्रह्मचर्यसकाम आर्द्रा अन्नाद्यकाम उभयीरुभयकाम इति॥ ज्ञातिनियमो वा
युपुराणे पालाशः समिधः कार्याः खादिर्यस्तदलाभतः॥ शमीरोहितकाश्वत्थास्तदभावे र्कवेतसाविति
॥ याज्ञवल्क्यः॥ आदिमध्यावसानेषु भवच्छब्दोपलक्षिता॥ ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रममिति
॥ व्यासः॥ ब्राह्मणक्षत्रियविट्शूद्रेषु भैक्षमन्वहं॥ सजातीयगृहेष्वेव सार्ववर्णिकमेव वेति॥ अत्र द्विती
यपक्ष आपद्विषयः तदुक्तं भविष्ये॥ चातुर्वर्ण्यं चरेद्भैक्षं अलाभे कुरुनंदनेति॥ आपद्यपि न शूद्रात्पक्वं
गृह्णीयात्॥ आममेवाददीतास्माद्रवत्त्वावेकरात्रकमित्यंगिरोवचनात्॥ मनुः॥ वेदयज्ञैरहीनानां प्रशस्ता
नां स्वकर्मसु॥ ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोन्वहं॥ समाहृत्य तु तद्भैक्षं यावदर्थममायया॥ निवेद्य
गुरवेश्नीयादाचम्य प्राङ्मुखः शुचिः॥ भैक्षेण वर्तयन्नित्यं नैकान्नाशी भवेद्द्विजः॥ भैक्षेण व्रतिनो वृत्तिरु भै
पवाससमा स्मृता॥ व्रतेवादेववदैवत्येपित्र्ये कर्मण्यथर्षिवत्॥ काममभ्यर्थितोश्नीयात् व्रतमस्य न लुप्य १६६
त इति॥ भैक्षचर्यायानित्यत्वमाह स एव अग्नींधनं भैक्षचर्यामधः शय्यां गुरोर्हितं॥ आसमावर्तनात्कुर्यात्कृतो

पनयनो द्विज इति॥ सुमंतुरपि ब्रह्मचर्यं तयोर्भैक्षं संध्यायोरग्निकर्म च॥ स्वाध्यायो गुरुवृत्तिश्च चर्येयं ब्रह्मचा
रिण इति॥ स्वाध्यायो ब्रह्मयज्ञः स चोपाकरणात्पूर्वमपि गायत्र्या कार्यः अनुपाकृतवेदस्य कर्तव्यो ब्रह्म
यज्ञकः॥ वेदस्थाने तु सावित्री गृह्यते तत्समीपत इति॥ कौर्मे॥ नादर्शं चैव वीक्षेत नाचरेद्दंतधावनं॥ गुरू
च्छिष्टं भेषजार्थं प्रयुंजीत न कामत इति अत्र मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं॥ भास्करालो
कनाश्लीलपरिवादादि वर्जयेदिति याज्ञवल्क्येन निषिद्धमध्वादेस्तदन्यानिवृत्त्यर्थरोगपरिहाराय्या
वश्यकमज्ञानप्रसक्तौ गुरूच्छिष्टतन्निह्नवणप्रतिप्रसवः क्रियते तदन्यगुरूच्छिष्टभोजनस्य पुनरपि जनकत्वा
त्॥ पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यमित्यादिस्मृतिपौराणवाक्यैस्तथाबोधनात्॥ तांबूलादिवर्जनमा
हाप्रचेताः॥ तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं॥ यतिश्च ब्रह्मचारी च विधवा च विवर्जयेदिति॥ मा
धवीये मनुः॥ सदोपवीतिना भाव्यं सदा बद्धशिखेन च॥ विशिखो व्युपवीतश्च यत्करोति न तत्कृतमिति॥
यमः॥ दंडं कमंडलुं वेदं मौंजीं च रशनां तथा॥ धारयेदततं युक्तं चाभिसान्नाशी गुरौ वसन्॥ मेखलामजिनं दं
डमुपवीतं च नित्यशः॥ कौपीनं कटिसूत्रं च ब्रह्मचारी च धारयेदिति॥ वेदो दर्भमुष्टिरिति माधवः॥ त्रुटि
तानां प्रतिपत्तिं मनुः॥ मेखलामजिनं दंडमुपवीतं कमंडलुं॥ अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रत
इति॥ उपनयनप्रकरणोक्तैर्मंत्रैरित्यर्थः॥ उपवीतनाशे विशेषं हारीतः॥ मनोज्ञातपती भिश्च तत्तद्धुत्वा
पुनः प्रतीयादिति॥ मनोज्योतिरित्येका॥ ज्ञातपतीभिस्तिस्र इत्यर्थः॥ व्यासः॥ जघन्यशायी पूर्वस्यादुत्था

यौ गुरुवेश्मनि॥ यज्ञशिष्टेन कर्तव्यं यज्ञदानेन वा पुनः॥ कृतमित्येव तत्सर्वं हित्वा तिष्ठेत्तु पार्श्वत इति॥ त
था अभुक्तवति नाश्नीयादपीतवति नो पिबेत्॥ न तिष्ठति तथासीत नासुप्ते प्रस्वपेत्तथेति॥ इदं च गुरुशुश्रूषा
१७० वावर्त्मानेवनिर्विघ्नतयो वेदविद्यासमाप्तिं करोतीति जैमिनीयतंत्रे आचाराध्यमाणे तथा स्यादित्यादि
प्रदेशोपपादितं तदीयैः॥ इति ब्रह्मचारिधर्माः॥ अथ तदतिक्रमे प्रायश्चित्तं॥ स्मृत्यर्थसारे संध्याग्निका
र्यलोपे स्नात्वाऽष्टसहस्रजपः॥ भिक्षालोपे ष्टशतं॥ अभ्यासे तु गुरोः पुनः संस्कारश्चेति जपश्चात्र
गायत्र्याः॥ यः संध्यां चैव नोपास्ते अग्निकार्यं यथाविधि॥ गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहित इति शा
तातपः॥ ब्रह्मचारी तु योऽश्नीयान्मधुमांसं तथैव च॥ प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेदिति॥ मनुः॥ अ
वकीर्णी तु काणेन गर्दभेन चतुष्पथे॥ पाकयज्ञविधानेन यजेत निर्ऋतिं निशीति॥ एकानेकव्रतलोप
साधारणं प्रायश्चित्तमुक्तं मृग्विधाने॥ तं बोधि या जपेन्मंत्रं लक्षं चैव त्रिवालये॥ ब्रह्मचारी स्वधर्मेषु न्यू
नं चेत्पूर्णमेति तत इति॥ इति ब्रह्मचारिव्रतलोपप्रायश्चित्तं॥ उपाकर्मकालनिर्णयस्तत्प्रयोगश्च संव
त्सरकौस्तुभे निरूपित इति नेह निरूप्यते॥ तथापि धारंतकालस्तत्र विहितो हरिलक्ष्मीपूजादि गुरुपू
जां तत्प्रकारश्चात्र सारभागत्वेन प्रागुपन्यस्तो वेदारंभेपि द्रष्टव्यः॥ अथानध्यायाः॥ माधवे हारीतः॥ प्रतिप १७०
त्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः॥ श्वोऽनध्यायेऽद्यशर्वर्यां नाधीयीत कदाचनेति॥ श्व इति उदयानंतरमन
ध्यायतिथिसत्त्वे॥ तदनंतरं स्वाध्यायतिथिसत्त्वे तु न पूर्वशार्वर्यामनध्याय इति शिष्टाः॥ उक्ततिथीनाम

होरात्रानध्यायनियामकपरिमाणं स्मृत्यर्थसारे॥ उदयेऽस्तमये चापि मुहूर्तत्रयगामि यत्॥ तद्दिनं तदहोरात्र
मनध्यायविदो विदुरिति॥ दिनं चार्द्धं तिथिरिति यावत्॥ यद्यस्मिन्नहोरात्रे॥ अनध्यायत्वेन तद्विदुरित्यर्थः॥
तत्रैव कौर्मे॥ उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतं॥ अष्टकासु त्वहोरात्रमृत्वंतासु च रात्रिषु॥ अत्र चर्तवः
सौराः तदंतरात्रीणामप्यानध्यायत्वप्रापणोऽर्थवत्त्वात् गौतमः॥ कार्तिकी फाल्गुन्याषाढीपौर्णमासी तिस्रो
ष्टकास्त्रिरात्रमिति उक्तपौर्णमासीरारभ्य त्रिरात्रं तथा तिस्रोऽष्टकाः सप्तम्यादयोऽष्टकासंबंधिन्यस्तिथयस्ता
स्वनध्ययनमिति माधवव्याख्यातं॥ तत्रैव नारदः॥ अयने विषुवे चैव शयने बोधने हरेः॥ अनध्याय
स्तु कर्तव्यो मन्वादिषु युगादिषु॥ एते कालाः संवत्सरकृत्यगततत्रनिर्णयानुसारेण बोध्याः॥ आपस्तंबः
श्रावण्याः पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीतेति॥ प्रदोषश्चाह्ने नात्र पूर्वरात्रिर्विवक्षितेति
माधवः॥ त्रयोदश्यादिषु प्रदोषेष्वपि नाध्येयमित्यस्मिन्नर्थे पौराणं वाक्यं तत्रैवोदाहृतं॥ मेधाकामस्त्रयोदश्यां
सप्तम्यां च विशेषतः॥ चतुर्थ्यां च प्रदोषे तु न स्मरेन्न च कीर्तयेदिति॥ न स्मरेदित्यनध्यायेऽप्यत्र दोषाधिक्यं
ध्वन्यते॥ त्रयोदश्यादिद्वैविध्ये निर्णयं तत्रैव प्रजापतिः॥ षष्ठी च द्वादशी चैव अर्द्धरात्रोननाडिका॥ प्रदोषे
नत्वधीयीत तृतीया नवनाडिकेति अनेनेदमास्थलेपूर्वदिन एव प्रदोषप्रयुक्तोऽध्ययननिषेधो न तूत्तरत्र
रात्रिमुखे सप्तम्यादिसत्त्वेपीति नियम्यते॥ याज्ञवल्क्यः॥ अहं वेतेष्वनध्यायः शिष्यर्त्विक्गुरुबंधुषु उपाक
र्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा॥ संध्यागर्जितनिर्घातभूकंपोल्कानिपातने॥ समाप्य वेदं द्युनिशमार

एपक्रमधीत्य च॥ पंचदश्यां चतुर्द्दश्यां अष्टम्यां राहुसूतके ऋतुसंधिषु भुक्त्वा च श्राद्धिकं प्रतिगृह्य च॥ श्राद्धिक
मित्यस्य पूर्वोत्तरक्रियाभ्यां संबंधः॥ एतावर्णविषयं॥ एकोद्दिष्टान्नभोजनादौ तु अहमिति मत्स्यादयः॥ पशु
१७१ मंडूकनकुलश्वादिमार्जारमूषके॥ कृतेंतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये इति॥ तात्कालिकानध्याय
नापि स एव॥ श्वक्रोष्टृगर्दभोलूकसामबाणार्तनिःस्वने॥ अमेध्यशववृषूद्रांत्यश्मशानपतितके॥ देशेष्वशुचावात्म
नि चाविद्युत्स्तनितसंप्लवे॥ भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमारुते॥ पांसुप्रवर्षे दिग्दाहे संध्यानीहारभीतिषु॥ धा
वतः पूतिगंधे च शिष्टे च गृहमागते॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे॥ सप्तत्रिंशदनध्यायानेतांस्ता
त्कालिकान्विदुरिति॥ विद्युति विशेषं गौतमः॥ विद्युति नक्तं चापररात्रात् त्रिभागादिप्रवृत्तौ सर्वमिति॥ पूर्वरा
त्रौ विद्युति अपररात्रावधिरनध्यायः॥ दिनतृतीयांशोत्तरं तस्या रात्रिसमाप्तिपर्यंतं॥ एतद्वर्षातिरिक्तवि
षयं॥ वर्षासु तु तात्कालिक इति व्यवस्था॥ गर्जिते विशेषं हारीतः॥ सायंसंध्यास्तनिते रात्रिः॥ प्रातः संध्यास्त
निते ऽहोरात्रमिति॥ विष्णुः॥ न वादित्रशब्दे नृशूद्रपतितयोः समीपे॥ न देवतायतनश्मशानचतुष्पथरथ्या
सु नोदकांतः॥ न पीठोपाहितपादः न हस्त्यश्वोष्ट्रनौगोयानेषु न वांतो न विरिक्तो नाजीर्णी न पंचनखांतराग
मन इति॥ पीठेति तदुपरिस्थापितपादतल इत्यर्थः॥ यानेष्विति पन्ति विशेषः॥ वांतः कृतवमनः॥ विरिक्तः
कृतविरेकः॥ अजीर्णीति यावत् भुक्तस्य पाकपर्यंतं॥ पंचनखाः श्वादयः॥ तदंतरागमने विशेषः स्मृत्यर्थसारे १७१
॥ आरण्यमार्जारसर्पनकुलनं चनखादेरंतरागमने त्रिरात्रं॥ आरण्यश्वशृगालवानरादेरहोरात्रं॥ खर

राहो शूद्रचंडालसूतिकोदक्यादेर्मासं॥ गोगवयाजनास्तिकादेस्त्रिमासं॥ अश्वमेषश्वपाकादेः षण्मासं
॥ गजसारससिंहव्याघ्रमहापातकिकृतघ्नादेरब्दं॥ अन्नदिने वानध्यायः॥ विवाहप्रतिष्ठोत्थापनादिष्वा
समाप्तेः सगोत्राणामिति॥ अन्येष्वनध्यायास्तत्रैव॥ श्रवणद्वादशी महानवम्योः शेतद्वितीयायां रथसप्तम्या
माकाशेश्वरदशीने वाहोरात्रंमिति॥ महानवमी महालयांतर्गता॥ शेतद्वितीया यमद्वितीया॥ अयने वि
षुवे प्रदक्षिणीति च॥ मनुः॥ शयानः प्रौढपादस्तु कृत्वा चैवावसक्थिकं॥ नाधीयीतामिषं जग्ध्वा सूतकान्ना
द्यमेव चेति॥ माधवीये॥ श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च॥ कदाचिदपि नाध्येयं कोविदा
रकापित्थयोरिति॥ निर्णयामृते चातुर्मास्यद्वितीयासु मन्वादिषु युगादिषु॥ अनध्यायस्तु कर्त्तव्योप
वसोपपदातिथिरिति॥ उक्तद्वितीया आह गर्गः॥ शुचौ ऊर्जे तपस्ये च या द्वितीया विधुक्षये॥ चातुर्मास्यद्वि
तीयास्ताः प्रवदंति मनीषिण इति॥ सोपपदाः पूर्वमेवोक्ताः॥ इत्यनध्यायाः॥ अथाध्ययनधर्माः॥ ॐका
रं प्रथमं कृत्वा ततो ब्रह्म प्रवर्त्तयेत्॥ ॐकारं च पुनः कृत्वा भूमिं स्पृष्ट्वा विरामयेत् इति॥ विष्णुः॥ शिष्येण
ब्रह्मारंभावसानयोर्गुरोः पादोपसंग्रहणं कार्यं॥ नापररात्रमधीत्य शयीतेति वा मनुः॥ प्रदोषपश्चिमौ
यामौ वेदाभ्यासे न योजयेत्॥ यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पत इति॥ विष्णुः॥ अननुज्ञातश्चान्यस्मा
अधीयानान्न विद्यामादद्यात्॥ य आवृणोत्यवितथेन कर्णावदुःखं कुर्वन्नमृतं प्रयच्छन्॥ तं वै मन्येत पि
तरं मातरं च तस्मै न द्रुह्येत् कृतमस्य जानन्नित्यध्ययनधर्माः॥ अथ व्रतानि॥ तदुपयोगिकालनिर्णयः॥ श्री

Indira Gandhi National Centre for the Arts

घरीयेतिथिनक्षत्रवारांशावर्गोदयनिरीक्षणं॥ चौलप्रत्सर्वमाख्यातं सगोदानव्रतेषु च॥ व्रतानांचरणं
त्वेवं कृत्वास्नानं समाचरेदिति॥ सगोगोदानेति गोदानेन सहितेषु महानाम्न्यादिव्रतेष्वित्यर्थः॥ कृत्वेति यद्य
१७२ पिव्रताचरणस्य स्नानाधिकारहेतुत्वं प्रतीयते तथापि नैतन्निरूपितस्यावसरस्यात्र॥ अथ महानाम्नीव्र
तं॥ जन्मप्रभृति त्रयोदशे वर्षे चौलोचितोदगयनादिकाले पूर्वदिने ब्रह्मचारिणा सहाचार्यः सुस्नातो देश
कालोच्चारणांते एवं ब्रह्मचारिणं महानाम्नीरध्यापयिष्यमाणो महानाम्नीव्रतसिद्धार्थं श्रीपरमेश्वरप्रीत्यर्थं
होमं करिष्य इति संकल्प्य तदंगत्वेन गणपतिपूजनादिनांदीश्राद्धांतं कृत्वा परेद्युः कारितवपनस्नानं ब
टुमिखं ब्रह्मचारिणं सुमुहूर्ते स्वदक्षिणत उपवेश्य विधिवदग्निं प्रतिष्ठाप्य महानाम्नीव्रतांगहोमे देव
तापरिग्रहार्थमित्यादि कायेत्वा परिदधामीत्यंतमुपनयनवत्कुर्यात् तत्र कृष्णावरणं काषायवास इति पारि
जातेः॥ प्रधानहोमे च महानाम्नीव्रतप्रधानाङ्गहोमे विनियोग इति विशेषः॥ परिददामीति प्रजापतये मन
सा बटुं समर्प्य आसने उपविश्योपनयनोक्तविधिना मेखलादण्डधारणं कारयित्वा पुराणयज्ञोपवीतादी
नि जले निःक्षिप्य स्विष्टकृदादिहोमशेषं समाप्य ब्रह्मचारिणं प्रतिवदेत् महानाम्नीव्रतं संवत्सरं चरेति स
चरिष्यामीत्युक्त्वा संवत्सरं केशादिधारणभिक्षाचरणादिव्रतं चरेत् पूर्णे वर्षे उदगयने शुक्लपक्षे बटुसहि
तो गुरुर्विविक्तदेशं गत्वा तिथ्यादि संकीर्त्य अस्य बटोर्महानाम्नीश्रवणांगभूतपरिसमाप्तिद्वारा श्रीपरमेश्वर १७२
प्रीत्यर्थं होमं करिष्य इति संकल्प्य उपलेपादि अग्निप्रतिष्ठापनांतं कुर्यात् चक्षुषी आज्येनेत्यंते अत्र प्रधानं अ

ग्निं १ संराधनीं २ अग्निं ३ अग्निं ४ अनुमतिं अनुमतिं ५ प्रदातारं ६ अग्निं ७ वायुं ८ सूर्यं च॥ एता देवताः कृसर
न्नेन शेषेण इत्यादि पूर्णपात्रनिधानांतं कुर्यात्॥ ततो बटुर्होमाय स्वभोजनाय च पर्याप्ततंडुलान् भिक्षार्जिता
न् स्थालीपाकविधिना तस्मीषट् त्रिंशत्संख्ययानिरूप्य तथैव प्रोक्ष्य स्थाल्यां प्रक्षिप्य तंडुलेषु तिलानोप्य श्र
पयित्वा पुनः श्रतः स्थालीपाक इति ज्ञापयेत्॥ तत आचार्यो बटुं प्रतिव्रतलोपान् पृच्छेत्॥ ते वोक्तरे दत्ते लोप
गौरवे प्रायश्चित्तं कारयित्वा पुनः संवत्सरं व्रतं कारयेत्॥ आपस्तंबयुक्त तथा लोपलाघवे दानजपादिप्रा
यश्चित्तेन सद्यः शुद्धिं संपाद्य न व्रतमावर्त्तयेत् इति पारिजातादयः॥ बहवो व्रतलोपाश्चेत्तु न रावर्त्तयेद्व्रतं
॥ लोपे श्चापस्तंबयुक्ते पुनर्नावृत्तिरिष्यत इति कारिकोक्तेः लोपलाघवे व्रतानावृत्तिवत्प्रायश्चित्ताभावो
प्युचितः॥ आपदा कारिताश्चेद्यावग्निरित्यादिभिर्जुहुयात् न प्रायश्चित्तांतरं कर्त्तव्यमिति वृत्तिकृताश्व
लायनमहानाम्नीव्रतसूत्रव्याख्यायामभिधानात् शुचिनातेनान्वारब्धः आज्यसंस्काराद्याज्यभागांतं कृ
त्वा वदानधर्मेण च बहुती जुहुयात् नवाग्निमं त्रैरेकस्रुत्येन॥ अग्नावग्निश्चरति प्रविष्टऋषीणां पुत्रो अ
धिराज एष मु तस्मै जुहोमि हविषा घृतेन मा देवानां मोमुहद्भागधेयं मो अस्माकं मोमुहद्भागधेयं स्वाहा॥ अग्न
ये यातिरश्चीनिपद्यते हं विधरणी इति॥ तां त्वा घृतस्य धाम्या पजे संराधनीमहं स्वाहा॥ संराधन्या इदं॥ य
षोत्वाकामा य वयं सम्राज्य जामहे॥ तमस्मभ्यं कामं दत्त्वाथेदं त्वं घृतं पिब स्वाहा॥ अग्नये॥ अयं नो अग्निर्व रि
वः कृणोत्वयं मृधः पुर एतु प्रभिंदन्॥ अयं शत्रून् जयतु जर्हृषाणोऽयं वाजं जयतु वाजसातौ स्वाहा॥ अग्नये

॥अस्तयंत्यै चानुमत्यै च स्वाहा॥ असयंता अनुमत्या इदं॥ प्रदाजे स्वाहा॥ प्रदाजइदं॥ भूः स्वाहा॥ अग्नय०भुवः स्वा
हा॥ वायव०॥ स्वः स्वाहा सूर्या०॥ ततः स्विष्टकृदर्थं स्रुचं अवदाय तां बर्हिषि निधाय ब्रह्मचारिणमादाय तं स्थालीपाकं
१७३ सर्वमन्नानेति ब्रह्मचारी सर्वमश्नीयात्॥ भुक्तवंतमाचांतं तं प्रति ब्रूयात् उपतिष्ठस्वादित्यमिति ब्रह्मचारी त
तो पूर्णमंजलिं सिंचेत् त्वं व्रतानां व्रतपतिरसि व्रतं चरिष्यामि तच्छकेयं तेन राध्यासमित्युपति
ष्ठमानः॥ तत एकरात्रं संमीलिताक्षो वाग्यत आसित्वा तदनंतरदिने आचार्येण सह समवायं गमिष्याम
ति ध्यायेत् यद्येकरात्राध्ययनेन महानाम्नीरध्यापयितुं शक्नुयात् ब्रह्मचारी यो बहुभिरेवाहोभिः शक्नुयात्॥ स
उक्तसंकल्पकाले एकरात्रस्थाने त्रिरात्रं ध्यायेत्॥ उक्तादित्योपस्थानानंतरमेवैतद्ध्यानं न मध्ये कालविक्षेपः का
र्य इति वृत्तिसिद्धांतभाष्यकृतौ॥ ततश्चाचार्यः मीलिताक्षं वाग्यतं तस्य मुखसहितं शिरो वामकर्णदेशमारभ्य वि:
प्रदक्षिणं तत्परिहितादहतवाससा संवेष्ट्य यथा न तद्वासः पतेत् तथोपायं कृत्वा ब्रूयादाचार्यः॥ एतं कालमेवं भू
तास्त्वं पन्नगवेति एतस्मिन् स्य स्थाने ब्रह्मचर्या यादिसंकल्पानुसारेण एकरात्रमित्यादि चरेत्॥ न कालमित्यस्य लो
पः॥ ब्रह्मचारी उक्तकाले ऽवश्यकर्तव्यसंध्यावंदनादेरितरत्स्नानभोजनस्वापगमनादि न कुर्यात्॥ आचार्यः
शेषांते स्विष्टकृदादिहोमतंत्रशेषं समापयेत् संकल्पितकालांते आचार्यो ऽनुवक्ष्यतीति निश्चयोत्तरं बहिर्ग्रामादे १७३
रण्यादि दिशो स्त्रीसंचाररहिते शुचौ देशे उल्लेखनादि कृत्वा अग्निं प्रतिष्ठाप्य तस्योत्तरतो सिमुदककमंडलु
यवमानं च निधाय तस्यैव पश्चात् गुदेशे वस्त्रांतरी तथा बध्नीयात्॥ यथाग्निसमीपे उच्चार्यमाणः शब्दो वत्सतर्यान

स्य कृष्णूयते॥ सा च रम्यात् द्विवर्षा रक्तात तदग्नौ वेष्टितेति पारिजातः॥ एतावत्कर्म ब्रह्मचारिणः कश्चित्कारो ती
तिवृत्तिहृत्॥ अत एवाग्नौ ब्रह्मचारी कुर्यादिति परिजातः॥ एतावत्कृतमित्याचार्याय वेदयीत संस्कार्यः॥ ए
तदनंतरं आचार्य एवोल्लेखनाद्यग्निप्रतिष्ठापनांतं कुर्यादिति पारिजातादयः॥ तस्मादग्नेः पश्चात्प्रागग्रे
षु दर्भेषु आचार्येशानदिगभिमुख उपविशेदिति वृत्तिकृत्पारिजातादयः॥ पश्चादग्नेस्तृणेषु तु ईशान्याग्रेषू
पविशेदीक्षमाणस्तु तां दिशमिति कारिकायां॥ ततः शिष्यो मुखदेशाद्वस्त्रमपसार्य मुखं प्रक्षाल्य कं च स्नानं
कृत्वा चम्याग्निमाचार्यं च प्रदक्षिणीकृत्याचार्यविधिवदुपसंगृह्य पश्चादाचार्यस्य तदासनप्रागग्रदर्भेष्वेवमल
दक्षिणस्व ष्टमाचार्यदिष्टेन संधाय प्रत्यग्दक्षिणादिशमाभिसमीक्षमाणो कुर्यात् एयोपविशेत् ततो मनसा गुरुं
वदेत्॥ ओं महानाम्नीर्मे अनुब्रूहीति॥ गुरुरियता कालेनानेनैतदुक्तामिति ज्ञात्वा तदद्वर्जितलोपान् इच्छात
तापिने श्रद्धानाय ब्रह्मचारिणे स्वयं निमीलिताक्षो महानाम्नीर्विदामघवन्विदेत्याद्या नवर्चः एवाहेवे
वाद्यग्न्यादुत्पादीनि नवपुरीषपदानि च प्रणवादीनि त्रिरुपदिशेत्॥ शिष्यो पि त्रिः पठेत्॥ ततो गुरुः शिरोवेष्ट
नं शिष्यस्योन्मुच्य ब्रूयात्॥ आदित्यमीक्षस्वेति वदुर्मित्रस्य त्वा चक्षुषा प्रतीक्षे मित्रस्य त्वा चक्षुषा समीक्ष इति मं
त्रद्वयेन नादित्यमवेक्षेत॥ ततो मित्रस्य चक्षुषानुवीक्ष इति ससंभारादिशो ऽवेक्षेत पुनरादित्यमीक्षस्वेति उक्त
स्तमीक्षेत पित्रस्य त्वा चक्षुषा प्रतिपश्यामि यो स्मान्द्वेष्टि यं च वयं द्विष्मस्तं चक्षुषो हेतुर्ज्योतिषि॥ ततोष्टाभिर्भ
र्भैर्भुवमभिमृशेत्॥ अग्नदुला० सं ह शि॥ म दं कर्णाभिरित्यस्य राहुगणो गौतमो विश्वेदेवास्त्रिष्टुप्॥ भूमिस्पर्श

Indira Gandhi National
Centre for the Arts

ने विनियोगः॥ महं करोभिः २ आ तं इंद्राग्नि वसिष्ठो विश्वेदेवास्त्रिष्टुप्॥ आ न इंद्रा ग्ना० ३ स्तुषेजनमित्यस्य अत्
रिश्वा विश्वेदेवास्त्रिष्टुप्॥ स्तुषेजनं सुव्रतं॥ कयानइतित्यस्य वामदेव इंद्रो गायत्री कयानः ५ कस्त्वा सत्यो३ त्र
१७४ मीषुणाः ७ स्योना पृथिवी त्यस्य मेधातिथिर्भूमिर्गायत्री॥ स्योना पृथिवि० ॥ ततो वत्सतरीं गुरवे दत्वा ईश्वरार्प
णं कृत्वा तंडुलभिक्षापूर्वकमुपनयनवद्विवेव ब्रह्मौदनहोमं कुर्यात॥ तत्र महानाम्न्यध्ययनांगभूतमनुप्रवच
नीयहोमं करिष्य इति संकल्प्याघारा वाज्ये नेत्यंते सदसस्पतिमहानाम्नीः अर्थाश्चचरुणात्रो षेरोत्यादिपूर्णपा
त्रं निधानांते कृते भैक्ष तंडुलानां तुष्णीं निवापादिश्रपणांते शृतो ब्रह्मौदन इति निवेदयेत्॥ ततो गुरुः शिष्येणान्वा
रब्ध आज्यसंस्कारादि आघारांतं कृत्वा सदसस्पतिमित्यस्य काण्वो मेधातिथिः सदस्पतिर्गायत्री॥ महानाम्न्यध्य
नांगभूतानुप्रवचनीयहोमे वि०॥ ॐ सदसस्पतिमद्भुतं० सदसस्पतये १ महानाम्नीभ्यः स्वाहा॥ महानाम्नीभ्य इदं
१ ऋषिभ्यः स्वाहा॥ ऋषिभ्य इदं॥ इत्यवदानधर्मेण तिस्र आहुतीर्हुत्वा कर्मशेषं समाप्य च रुणा षोषो ब्राह्मणान् भो
जयित्वा तेभ्यो दक्षिणां दत्वा वेदसमाप्तिरस्त्विति भवंतो ब्रुवंत्विति वदेत्॥ ते च वेदसमाप्तिरस्त्विति वदेयुः॥ ईश्वरार्प
णं कृत्वा ततो भुंजीतेति महानाम्नीव्रतं॥ अथ महाव्रतं॥ उदगयनादिकाले प्रथम होमांते पूर्ववज्ज्ञाते संवत्स
रं महाव्रतमाचरेति प्रेषितेन वटुना संवत्सरं व्रते कृते याम्यादिः शुचिदेशे प्रागग्रदर्भेषु प्राङ्मुख उपविशेत् शि
ष्यो विधिवदभिवादनपूर्वकं महाव्रतं भो अनुब्रूहीति वाचा वदेत॥ अथ तं प्राङ्मुखमुपवेश्य अथ महाव्रतमित्य १७४
धारण्यकं त्रिर्ब्रूयात॥ शिष्यो पित्रिः पठित्वा पूर्वबन्मंत्र हृदयेनादित्यमासेतनल्लतीयेन संभारान्॥ ततः पूर्वव

दग्न इडले स्यादिभिर्भूमिस्पर्शनं॥ ततः शिष्यकर्तृकं निवेदनांतमाचार्यकर्तृकश्च होमः पूर्ववन्महानाम्नीभ्यः स्वा
हेत्यस्य स्थाने महाव्रताय स्वाहेत्याहुतिः शेषं महानाम्नीवत्॥ इति महाव्रतं॥ अथोपनिषद्व्रतं॥ सर्वं महाव्रतव
त्संवत्सरमुपनिषद्व्रतं चरेति बटुं प्रति प्रेषः॥ उपनिषदं भो अनुब्रूहीति तदुक्तिः॥ अनुप्रवचनीयहोमे उपनि
षदे स्वाहेति मध्यमाहुतिः॥ आचार्याभावे शिष्यः स्वयमेव महाव्रताद्यध्ययनादिकं कुर्यादिति पारिजाते॥ व्र
तकालीनश्रावणेनैवाध्ययनसिद्धिरिति तदाशयः॥ अतो महानाम्नीश्रावणोत्तरमध्ययनमाचार्याधीनमे
व॥ त्रयाणामध्ययनं श्रवणोत्तरं पूर्वमनधीतवद्भिः फाल्गुनमारभ्य श्रावणीपर्यंतं कर्तव्यं॥ अधीतपूर्वैस्तु पौ
षीमारभ्य श्रावणीपर्यंतमिति कालनियम उक्तः स्त्र त्रकृते तूपनिषद्व्रतं॥ अथ गोदानव्रतं॥ तच्च जन्मतः षो
डशे वर्षे चौलवदुत्तरायणादिकाले तद्वदेव कार्यं॥ अस्य ब्रह्मचारिणो गोदानिकं व्रतं करिष्य इति संकल्प्यः॥
तदंगगणेशपूजनादिनांदीश्राद्धांते अग्निप्रतिष्ठापनादि॥ नांके संस्कार्योपवेशनं॥ मातुरुत्तरतो वटुः तदु
त्तरस्तदन्वारब्ध आचार्य आज्यहोमांतं कृत्वा शीतोष्णजलानयनादि कुर्यात॥ अदितिः श्मश्रूणि वपत्वि
त्यादि तमंत्रेण वामश्मश्रुदेशमारभ्य दक्षिणं श्मश्रूणामेव त्रिः॥ कुंदनं दक्षिणोत्तरश्मश्रुभागयोरेव कुशाप्र
निधानादीनि सप्त छेदनादि स कुशाश्मश्रूणामेव छेदनादि गोमयनिधानांतं॥ क्षुरावमार्जनमंत्रे वप्ता वपसि श्म
श्रूणि॥ शुधि शिरो मुखं मास्यायुः प्रमोषीः॥ नापित प्रैषे विशेषः॥ अत्र एव केशाली के श्मश्रुलोमनखान्युद
संस्थानि कुर्विति॥ नापितस्तान्निरद्भिः श्मश्रूणामुदक्संस्थं वपनं कृत्वा तथैव शिरसि केशानामुपपक्षादिलो

ष्टिं कुर्यात्॥ गृह्याग्निमान्प्राजापत्यं चरुं॥ अनग्निस्त्वरूपेण स्मृतौ॥ अश्वप्रतिग्रहे हुत्वा चरुस्त्वौ जायेण त्रयं॥ लक्षत्रयं वा
गायत्र्या जपे २
ग्नां वपनं नखनिकृंतनं च कुर्यात् ततः स्नातं वटुं दक्षिणत उपवेश्य होममंत्रशेषं समाप्य पात्रदानांते गुरुणा कृत्ते
दं: त्रोषं वाग्यतो वटुस्तिष्ठन्नेव नयेत्॥ संभाषदनाते गुरोरंतिके वरं ददामीति वाच्यं विसृज्य गोमिथुनं दक्षिणां द
१७५ द्यात्॥ गोमिथुनं वरं ददातीति ज्ञेयं ततः॥ ततः परे द्युर्गुरुणा गोदानव्रतमाचरेत् इत्युक्तः केशादिधारणं कु
र्वन्संवत्सरं ब्रह्मचारिव्रतं कुर्यादिति गोदानव्रतं॥ अथ समावर्तनं॥ तत्र याज्ञवल्क्यः॥ गुरवे तु वरं दत्वा स्नायी
त तदनुज्ञया॥ वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वेति वरस्वरूपं मनुः॥ स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थ
माहरेत्॥ क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमंततः धान्यं वासांसि शाकं वा गुरवे प्रीतिमावहन्निति॥ प्रीतिमि
॥ एतेषु मध्ये यदेव गुरोः प्रियं तदेव दद्यादित्याशयः॥ स्नानमंतरेणैव गुरोः प्रीतावनुज्ञयैव समावर्तनं कुर्यादि
त्यपि सूच्यते॥ अत एवोक्तं संग्रहे॥ तेनोक्तं च तथा कृत्वा स्नानं शिष्यः समाचरेत्॥ अलमर्थेनमेव स्वत्वक्तु
णोरस्मि तोषितः॥ गृहान्गच्छ नुजानामीत्यनुज्ञातोऽथ वाचरेदिति॥ छत्रोपानहौ सहितयोर्द्वंद्वं हिरण्यादानां
त्॥ वासांसि त्रीणि॥ गुरुप्रीत्यर्थमेतद्दानं न विद्यानिष्क्रयः॥ एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्॥ पृथिव्यां
नास्ति तद्द्रव्यं यद्दत्वा त्वनृणी भवेत् इति॥ अश्वप्रतिग्रहे तान्निष्क्रयस्य पक्षेऽष्टाशीं द्वादशांशं वा ब्राह्मणाय दत्वा २ १७५
हिताग्निः प्राजापत्यं हित्वा नु समाहितः॥ त्रिगुणं वाचयेद्वेदं शतविप्रांश्च भोजयेत् इति॥ ब्राह्मणभोजनमुक्तोप
यत्रयेष्वत्रैकं संबध्यते॥ वेदमित्यनेन त्रिविधः स्नातक उच्यते॥ तत्र वेदशब्देन सार्थवेदाधिगम उच्यते॥ वेदं वेदौ
यान्वेदान्वेदान्वा चतुरो द्विजः॥ अधीत्य चाधिगमार्थं ततः स्नायाद्द्विजोत्तम इति माधवीये कौर्मोक्तेः वेदानिति त्रि

त्वाभिप्रायं॥ उक्तस्यार्थज्ञानं विनाध्ययनमात्रेण समावर्तनाधिकाराभावः प्रथमस्त्रएव जैमिन्यादिभिः॥
अतश्च विद्यास्नातकोभयस्नातकयोरुभयोरपि स्नानात्पूर्वं वेदार्थज्ञानमावश्यकमिति सिद्धं॥ व्रतशब्दे
न च उपनयनव्रतसावित्रीव्रतवेदाख्यव्रतोपनिषद्व्रतान्युच्यंते इति माधवादयः॥ तत्रोपनयनानंतरं त्रि
रात्रं द्वादशरात्रं संवत्सरं वा मेधाजननात्पूर्वं विहितमक्षारालवणशीलत्वादिरूपं गृह्ये प्रसिद्धमुपनयनव्र
तं॥ तदुत्तरमुपाकरणांतं अग्निकार्यादिब्रह्मचारिधर्मानुष्ठानं सावित्रीव्रतं॥ तदुत्तरं वेदाध्ययनं कुर्वतो
यत्तदनुष्ठानं तद्वेदाख्यव्रतं॥ वेदाध्ययनांगभूतसंख्यापरिछिन्नवर्षसाध्यत्वात्॥ तत्संख्यागतविकल्पमा
ह मनुः॥ षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैविद्यकं व्रतं॥ तदर्धपादिकं वापि ग्रहणांतिकमेव वेति॥ स्पष्टीकृतमे
तद्दीपिकायां॥ प्रतिवेदं ब्रह्मचर्यं वर्षाणि द्वौयुदशाथवा॥ षट्त्रीणि ग्रहणांते चेति॥ वेदाख्यव्रतांते आरण्य
कव्रतानीति स्मृत्यर्थसारे॥ आश्वलायनसूत्रस्य वृत्तिभाष्यकाराभ्यां तु द्वादशवर्षादिपरिछिन्नं वेदाध्य
यनांगभूतं ब्रह्मचर्यमेव व्रतं तादृशब्रह्मचर्येण यो वेदं समापयति स विद्याव्रतस्नातकः तादृशब्रह्मच
र्यसमाप्तेःपि यस्य वेदसमाप्तिर्न जाता स व्रतस्नातकः तादृशब्रह्मचर्यसमाप्तेः प्रागेव यस्य वेदसमाप्ति
र्जाता स विद्यास्नातक इत्युक्तं॥ अस्मिन्मते चात्रिविधमपि स्नातकत्वं तादृशब्रह्मचर्यसमाप्त्युत्तरकालीना
श्रिमतमहानाम्न्यादिव्रताधीनं न भवति॥ भवति तु माधवादिमते॥ मतद्वयेपि व्रतस्नातकत्वे नापि उपनिष
द्विशेषाध्ययनं कृत्वैव समावर्तनं कर्तव्यं॥ तेन विना तादृगधिकाराभावादित्युक्तं सुस्थैव॥ नेदमनधीयन्स्ना

Indira Gandhi National
Centre for the Arts

तकोभवतीति॥ अतएवविद्यांते गुरुमाभंत्र्येतिसूत्रेस्नातकविध्यानुरोधेन वेदांत्यभागरूपोपनिषदध्ययने
सत्येवसमावर्त्तनाधिकार इत्याशयेनैव व्याख्यातं वृत्तिकृता॥ आश्वलायनस्याखिलविषयं चैतत्॥ कूर्मसंवि
धानियमेलाघवात्॥ येन वेदमागमनधीत्वापि समावर्तनं कृतं तदुत्तरमपि अध्ययनांगनियमविशिष्टेन तद
१७६ ध्ययनं कार्यं॥ समावृत्तोब्रह्मचारिकल्पेनेतिसूत्रात्॥ स्वाध्यायकाले विहितायेधर्मा मधुमांसस्त्रीगमनखट्वा
दिशायनादिवर्जनादयस्तेयुक्तोधीयीत समावृत्तः॥ मेखलादयस्तु न भवंति अस्वाध्यायधर्मत्वादितिवृ
त्तिकृदुक्तोर्थः॥ अतोभार्योपगमनं तु तेनापि कार्यं जायोपेयीत्येके प्राजापत्यं तादिति सूत्रस्य वृत्तिकृतैवतादृशा
शयेनव्याख्यानात्॥ अधीत्य वेदं स्नानमितिहिरण्यकेशि सूत्रव्याख्यावसरे मातृदत्तः॥ अतिक्रांते प्युक्तका
लेसति संभवे धीत्येवस्नातव्यं॥ अत्यंताशक्तावेव व्रतमात्रेणस्नातव्यमिति व्रतमात्रस्नानं गर्हितमितिच॥
कामंतुयाज्ञिकस्येतिसूत्रव्याख्यावसरे कर्कः॥ यज्ञं वेदेति याज्ञिकस्तस्य कामंस्नानं भवति षडंगमर्थतोनाधि
गम्यापीति तथाहरिहरः॥ मंत्रब्राह्मणात्मकं वेदमधीत्यावबुध्य स्नायादित्येकः पक्षः॥ सांगवेदमधीत्यावबु
ध्यस्नायादित्यपरः॥ ग्रंथमात्रमप्यधीत्य यज्ञविधांचावगम्य स्नायादितितृतीयः॥ यज्ञविद्याविरहेण ग्रंथ
मात्रेऽधीते न स्नायादिति निषेध इतिच॥ संहितापदवाच्यमंत्राध्ययनेतु कल्पांतराणि शांख्यायनः॥ आ
द्योत्तमेकामसूक्तेवानुब्रूयात् अपरेरनुवाकस्यवैकैकांसूक्तादाविति रेषाप्रभृतिरितिकामंसूक्तादावाचा १७६
र्यइति॥ अविदस्य मंत्रजातस्यानुवाकस्य वा आद्योत्तमेसूक्ते अनुब्रूयात् प्रतिसूक्तं प्रथमामृचं वा यथेच्छं

कतिपयसूक्तानामेव प्रथमामृचं वेत्यर्थः॥ तच्चसमावर्तनं ब्रह्मचारिव्रतलोपप्रायश्चित्तं कृत्वैव कर्त्तव्यं तदाह प
रिजाते बौधायनः॥ शौचाचमनेत्यादीनि ब्रह्मचारिव्रतान्यनुक्रम्य तल्लोपजनितसकलदोषपरिहारार्थं ब्रह्मचा
रीकृच्छ्रत्रयं चरेत्॥ महाव्याहृतिहोमं च कुर्यात् प्रथमं व्यस्तसमस्तव्याहृतिभिश्चतस्र आज्याहुतीर्हुत्वा भूरग्नये
चेतिमहाव्याहृतिभिश्चतसृभिर्हुत्वा यज्ञं पाहि विभावसो॥ स्वाहा सर्वं पाहि शतक्रतो स्वाहा पुनरूर्जान्स्वदसःस्व
हा॥ सहरय्या॰ स्यरिस्वाहा॥ पाहिनोअग्न एनसेस्वाहा॥ पाहिनोअग्ने विश्ववेदसे स्वाहा व्याहृतिभिरंते चतस्र आ
हुतीर्जुहुयादिति॥ केचित्पाहिनोअग्न इत्याहुतिद्वयांते यज्ञं पाहीत्याहुतिचतुष्टयं प्रमंति॥ एतदल्पधर्मलोपे॥
बहुधर्मलोपेतु पारिजाते एवं अग्निधानेंते बोधियाजपेन्मंत्रं लक्षं चैव शिवालये॥ ब्रह्मचारी स्वधर्मं चेन्न्यूनं चे
त्पूर्णमेव तदिति न्यूनं चेज्जानीयाज्जपेत्॥ तत्तेन जपेन न्यूनमपि धर्मं पूर्णमेव जानीयादित्यर्थः॥ यत्तु स्मृत्यर्थसारे
हानाम्यादिव्रतेषु लुप्तेषु तारतम्येन त्रीन् षट् द्वादश वा कृच्छ्रान् कृत्वा पुनर्व्रतमारभेतेति तद्व्रतस्नातकस्य वि
द्याव्रतस्नातकस्य वा माधवादिमते वृत्तिकारादिमते त्रिविधस्यापि स्नातकस्यारब्धव्रतस्य मध्ये विच्छेदे ज्ञेयं॥ पु
नर्व्रतमारभेतेति वचसस्तथैव साफल्यात्॥ विद्यास्नातकस्य तु न व्रतलोपप्रायश्चित्तं स्नानाधिकारसिद्ध्यर्थम
पेक्षितं मतद्वयेपि॥ इति समावर्त्तनाधिकारः॥ अथैतत्कालनिर्णयः॥ आश्वलायनः॥ विद्यांते गुरुमर्थेन निमंत्र्य कृ
तानुज्ञातस्य वा स्नानमिति॥ पारिजाते श्रीधरीये॥ नागीशादिति सोम्ये पोष्ण दिनकृन्मैत्रोत्तरादिणी गोविंदेषु शांवा
भानुगुरुविक्रांशावारादिषु॥ रिक्तां पर्व तथाष्टमीं प्रतिपदं मेषं च कीटं हरिं हित्वा॥ अद्विपुतेऽष्टमे द्विविमले कुर्या

त्समावर्त्तनमिति॥पुष्यपुनर्वसुमृगरेवती॥हस्तानुराधाउत्तरात्रयरोहिणीश्रवणेष्विकादशान्नक्षत्रेषुसोमादि
१२७ त्यबृहस्पतिबुधशुक्रवारेषुतदीयांशहोरासुरिक्तात्रयपर्वदर्शाष्टमीप्रतिपद्भिन्नतिथिषुदृश्चिसिंहभिन्नल
ग्नेषुअष्टमस्थानेग्रहविशेषाक्रमणदोषशून्येद्विविमलेगुरुशुक्रास्तादिदोषशून्यइत्यर्थः॥तथाचमदनर
त्ने नारदः॥अथोत्तरायणेजीवशुक्रयोर्दृश्यमानयोः॥द्विजातीनांगुरोर्गेहान्निवृत्तानांयतात्मनां॥मित्रोत
रादितीज्यांत्यहरीदुरविधातृषु॥नेत्रवर्के डुशार्यशुक्राणांवारलग्नांशकेषुच॥अथवाबीजनक्षत्रमरिलंवा
वा:केषांचि॥प्रतिपत्पर्वरिक्ताख्यामष्टमींचदिनत्रयं॥हित्वान्यदिवसेकार्यंसमावर्त्तनमंडनमिति॥बीजन
क्षत्राणिबीजावापनक्षत्राणि॥सुदर्शनस्तुउदगयनेकृतसमावर्त्तनस्यदक्षिणायनेविवाहप्रसक्तो॥अनाप्र
मीनातिष्ठेतेतिनिषेधातिक्रमापत्तेः॥आश्वलायनेनचौलविकोरेगोदानेप्राप्तोदगयनस्यपुनर्विधानेन
तद्वि[illegible]कारेसमावर्त्तनेउदगयननियमाज्ञापनात्बौधायनेनापिसमावर्त्तनेचौलविकारत्वे
नेवशुक्लपक्षप्राप्तौपुनःतत्रतद्विधानेनोदगयनानियमज्ञापनान्नसमावर्त्तनेउदगयननियमइत्याह॥हि
रण्यकेशिनांतुचित्रायांविशाखयोर्वेतिनक्षत्रद्वयमधिकमुक्तं॥इतिसमावर्तनकालः॥आश्वलायनः
॥अथेतान्युपकल्पयीतसमावर्तमानोमणिंकुंडलेचवस्त्रयुगंछत्रमुपानद्युगंदंडंस्रजमुन्मर्दनमनु १२७
लेपनमांजनमुष्णीषमित्यात्मनेवाचार्यायचयद्यभयोर्नविंदेताचार्यायैवेति॥अथप्रयोगः॥पूर्वेद्युस्तद्दिनएव
वादेशकालौसंकीर्त्यममशौचाचमनादिब्रह्मचर्यनियमलोपजनितसंभावितदोषपरिहारेणसमावर्त्तना

धिकारसंपादनद्वारापरमेश्वरप्रीत्यर्थमाज्यहोमपूर्वकंकृच्छ्रत्रयमाचरिष्यइतिसंकल्प्यस्थंडिलसंस्कारा
द्यग्निध्यानांतेन्वाधानंकुर्यात॥चक्षुषीआज्येनेत्यंतेअत्रप्रधानंअग्निंवायुंसूर्यंप्रजापतिंचतस्रोदेवताश्च
तस्रभिराज्याहुतिभिः॥अग्निंपृथिवीमहांतमेकयाज्याहुत्यावायुमंतरिक्षंमहांतमेकया॥आदित्यंदिवंमहांतमेक
या॰चंद्रमसंनक्षत्राणिदिशोमहांतमेकया॰द्विरग्निमाज्येन॥विमावसुंशतक्रतुं॰अग्निं॰अग्निं॰अग्निं॰वायुं
सूर्यं॰प्रजापतिं॰चेत्यष्टौदेवताएकैकयाज्याहुत्याशेषेणेत्यादि॥षट्पात्रासादनंप्रणीताप्रणयनांतेआज्यस्थानि
र्वापादिबर्हिषिसादनांतंस्रुवसंमार्गश्च॥ततोग्नचर्नाद्याज्यभागांतेव्यस्तसमस्तव्याहृतिभिश्चतस्रआहुतीर्हुत्वाग्नि
र्नरयेचपृथिव्यैचमहतेचस्वाहा॥अग्नयेपृथिव्येमहतइदं॥भुवोवायवेचांतरिक्षायचमहतेचस्वाहा॥वायवें
तरिक्षायमहतेइदं॥सुवरादित्यायचदिवेचमहतेचस्वाहा॥आदित्यायदिवसेमहतइदं॥भूर्भुवःसुवश्चंद्रमसे
चनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहा॥चंद्रमसेनक्षत्रेभ्योमहतइदं॥पाहिनोअग्नएनसेस्वाहा॥अग्नय॰पाहि
नोअग्नेविश्ववेदसेस्वाहा॥अग्नयइदं॰यज्ञपाहिविभावसोस्वाहा॥विभावसवइदं॥सर्वंपाहिशतक्रतोस्वाहा
॥शतक्रतवइदं॥पुनरूर्जानिवर्तस्वपुनरग्नइषायुषा॥पुनर्नःपाह्यंहसःस्वाहा॥अग्नयइदंसहारय्यानिव
र्तस्वाग्नेपिन्वस्वधारया॥विश्वप्स्नियाविश्वतःपरिस्वाहा॥अग्नयइदं॥पुनःव्याहृतिभिःआहुतिचतुष्टयंहु
त्वाकृच्छ्रप्रत्याम्नायत्वेनगोदानाद्यनंतरंचरित्वास्विष्टकृदादिहोमशेषंसमापयेत्व्रतचतुष्टयलोपेप्रत्येकम
ष्टोत्तरशतमष्टाविंशतिमष्टौवाज्याहुतीर्हुत्वाएकैकंकृच्छ्रंचरित्वापुनर्व्रतानिकुर्यादितिवृद्धाः॥अग्निमीन्धेषयेको

धायनीयगृह्यसूत्रे अन्यथा आम्नानं दृश्यते तद्यथा ब्रह्मचारिब्रह्मचारिव्रतविपर्यासे मेखलायज्ञोपवीतानां छेदने
कृष्णाजिनस्याधारणे कमंडलुधारणे दंडभंगसंध्यालोपे स्वाध्यायलोपे भिक्षाचरणलोपे शुश्रूषाभ्रंशे॥ एतेष्वान्ये
१७८ ष्वानाम्नायेषु प्रायश्चित्तमग्निमुपसमाधाय संपरिस्तीर्य प्रायश्चित्तं जुहोति॥ पाहि नो अग्न एनसे स्वाहा॥ पाहि नो विश्व
वेदसे स्वाहा॥ यज्ञं पाहि विभावसो स्वाहा॥ सर्वं पाहि शतक्रतो स्वाहा पाहि नो अग्ने एकया पाह्युत द्वितीयया पाहि
तिसृभिरूर्जां पते पाहि चतसृभिर्वसो स्वाहेति॥ अथ विवाहे चतुर्थसंधिकालब्रह्मचर्यविच्छिन्ने प्रायश्चित्तानि
आरभ्यास्यामश्च तुर्दीनां सारस्वतो होमो भवतो दुर्गीमनस्वतीमिंदाहुती महाव्याहृती व्याहृतयश्च प्रायश्चित्तं जु
हुयादिति॥ व्याहृतिभिः पुरस्ताच्चोपरिष्टाच्च सानुक्रमणं यथापूर्वकरणं अविच्छिन्नं सततं भवतीति॥ अन
न्तरोक्ते स्थित्यनंतरं प्रायश्चित्ते विशेषः॥ अत्र च ब्रह्मचारिधर्मलोपप्रायश्चित्तं विवाहचतुर्थदिनगतब्रह्मच
र्यभ्रंशप्रायश्चित्तं च प्रकृत्य आम्नातं व्याहृतिभिः पुरस्ताच्चोपरिष्टाच्चेति सूत्रेण द्विविधप्रायश्चित्तस्यापि
पक्रमसमाप्त्यो व्याहृतिभिश्च तस्यः चतस्र आहुतयो विहिता भवंति तत्त्व ब्रह्मचारिधर्मलोपे त्रयोदशे वर्ष
यानाहुतयः सिद्धा भवंति॥ महानाम्न्यादिव्रतलोपप्रायश्चित्तपूर्वकं पुनः करणं तु विद्यास्नातके न नैव कार्यं
इतरास्मामपि आरब्धव्रतस्य मध्यभ्रंशविषयमिति प्रागेवोक्तं॥ अथ समावर्तनप्रयोगः॥ ब्रह्मचारी कृताग्नि १७८
कार्यो नित्यक्रियो गुरवे संतोषावहं द्रव्यं दत्त्वा देशकालौ संकीर्त्य ममगृहस्थाश्रमार्हतासिद्धिद्वारा श्रीपरमे
श्वरप्रीत्यर्थं समावर्तनं करिष्य इति संकल्प्य गणेशपूजानादिनांदीश्राद्धांतं कुर्यात् जीवत्पितृकश्चेत्पितुर्मा

त्रादीनुद्दिश्य श्राद्धं कुर्यात् ब्रह्मचारिणोऽशक्तौ तद्धारा सकल्पं कारयित्वा पित्रादिस्तत्प्रतिनिधित्वेन तान्नेवोद्दिश्य कु
र्यात्॥ ततो यज्ञियस्य वृक्षस्याश्वत्थादेरुत्तरदिग्निर्गतां शाखां आर्द्रां सपर्णां आर्द्रशुष्कां वा यथाकामं प्रादेशमितां
माहृत्योपरि निधाय करिष्यमाणसमावर्तनांगत्वेन त्रिभ्यो ब्राह्मणेभ्यो भोजनपर्याप्तमन्नं गवां तत्रत्याम्नायद
क्षिणां वा सद्दितं संप्रदद इत्येवं संकल्प्योल्लेखनाद्यग्निप्रतिष्ठापनांतं कृत्वाग्निध्यानांते देवतां करिष्ये॥ आधारा
वाज्येनेत्यंते त्रिरग्निं पवमानं प्रजापतिं चाज्येन॥ अग्निमूर्ध्वसमिधा विश्वान्देवान्द्वासमिद्भिः शेषेण स्विष्टकृत
मित्यादि पूर्णपात्रनिधानांते उत्तरतोग्नेर्दर्भेषु व्रीहियवमाषतिलैः पूरितानि शरावपात्राण्येकैकशः प्राक्संस्था
न्यासाद्याग्नेः पश्चान्मातुरग्नेः शमीपर्णयुक्तमेकं शरावमानडुहं गोमययुक्तं चापरमासाद्य व्रीह्यादिपात्रा
णामुत्तरतस्तानप्रक्षुरं शीतोष्णे उदके नवनीतं दधि द्रप्सान्वा मणयादेकादशाङ्गुलाणि चसादयति॥ ब्रह्मोद
क्षिणतएकविंशतिकुशपिंजूलानि धारयन्नास्ते॥ ब्रह्मचारी आघारांते चौलवच्च तस्त्र आज्याहुतीर्जुहुयात्
समावर्तनप्रधानाज्यहोमे विनियोग इति विशेषः॥ ततो ब्रह्मान्योन्यस्मिन्वाय उदकेनेहीति चौलवत् शी
तोष्णे उदके सुगपन्निनीय नवनीतेन दध्ना वा तदेकदेशं पात्रं पात्रांतरे मिश्रयित्वादितिः श्मश्रूणि पिंज
लानि चौलवन्निधाय सर्वैर्मंत्रैश्चतुर्थमित्यंतानि चत्वारि छेदनानि कुर्यात् मंत्रेषु विशेषः॥ ओषधे त्राय
स्वमां॥ स्वधिते मामाहिंसीः येनावपत्सविता॥ यथा सं॥ तेन म आयुष २ वाम भागेप्येवं भूतमंत्रे स्त्रीणे व छेद
नानि॥ यत्क्षुरं वपसि श्मश्रूणि॥ शुंधि शिरो मुखं मा म आयुः प्रमोषीरिति क्षुरावमार्जने विशेषः॥ अत्रैव

Indira Gandhi National
Centre for the Arts

नक्षुःशालीकेशश्मश्रुलोमनखानुदकंसंस्थानिकुर्वितिप्रैषविशेषः॥नापितःपूर्वविशिष्टादकैःशीतोष्णैःश्म
श्रुकेशलोमानुदकसंस्थानिवापयित्वातत्संस्थमेवनखनिकृंतनंकुर्यात्॥तस्मैव्रीह्यादिपात्रचतुष्टयंदत्वाक
रंजफलंयदेकवीजंतत्पेषयित्वातेनांगोद्वर्तनंकुर्यादितिवृत्तिकारः॥करंजफलंकोशेयंचैकबीजंतत्पेषयि
१०६ त्वेतिजयंतः॥ततःपूर्वावशिष्टाभिःशीतोष्णाभिरद्भिःस्नात्वाद्विराचम्याग्रेरंतिकंगत्वाग्रुवंवस्त्राणीत्यस्योच
थ्यादीर्घतयामित्रावरुणोत्रिष्टुप्।अनेनमंत्रेणैकंवस्त्रंपरिधायेतदावृत्त्याद्वितीयंप्रावरणंकुर्यात्॥द्विवच
नस्यदेवतापरत्वादितिवृत्तिकृत्॥द्विवचनलिंगत्वान्मंत्रःसकृदेवभवतीतिजयंतः॥पुनर्द्विराचम्यदक्षिणव
रांगुल्यांजनमादायअश्मनस्तेजोसिचक्षुर्मेपाहिइतिमंत्रमावर्तयन्नक्रमेणसव्यदक्षिणेचक्षुषीआंजयीत
॥अश्मनस्तेजोसिश्रोत्रंमेपाहीत्यावर्तयन्नक्रमेणदक्षिणसव्यश्रोत्रयोःकुंडलेआवघ्नीतकुंकुमाद्यनुलि
प्ताभ्यांमुखमग्रेनुलिप्यपश्चादितरांगान्यनुलिप्यॐअनार्तास्यनार्तोहंभूयासमितिशिरसिस्रजंबध्नीत
नमालेतिकेनाप्युक्तेस्रगित्यभिधायबध्नीत॥देवानांप्रतिष्ठस्थःसर्वतोमापातेमंत्रांतेयुगपदुपानहावास्थ
यदिवष्णुश्मासीतिछत्रंधृत्वावेणुरसिवानस्पत्योसिसर्वतोमापाहीतिवैणवंदंडमादायआयुष्यमितिसूक्ते
नसोवर्णमणिंकंठेबध्नीयात्॥आयुष्यमितिसूक्तस्यसनप्रजोसिसर्वतोमापाहीतिवैणवंकादयऋषयः
२ हिरण्यंदेवताअनुष्टुबादीनिछंदांसि०कंठेमणिधारणेविनियोगः॥आयुष्यंवर्चस्यंरायस्पोषमौद्भिदं॥इदंहि १०६
रण्यंवर्चस्वज्जैत्रायाविशतादुमां॥उच्चैर्वाजिपृतनाषाट्सभासाहंधनंजयं॥समग्राऋद्धयोहिरण्येस्मिन्समा

भा

हिताः॥शुनमदंहिरण्यस्यपितुर्नामेवजग्रभ॥तेनमांसूर्यत्वचमकरंपूरुषुप्रियंसम्राजंचविराजंचाभिष्टिर्या
वमेध्रुवा॥लक्ष्मीराष्ट्रस्ययामुखेतयामामिंद्रसंसृज॥अग्नेःप्रजातंपरियद्धिरण्यममृतंदध्रेअधिमर्त्येषु॥यएन
द्वेदसदिदेनदर्हतिजरामृत्युर्भवतियोबिभर्ति॥यद्वेदराजावरुणोयदुदेवीसरस्वतीइंद्रोयद्वृत्रहावेदतन्मेवर्च
सआददे॥नतद्रक्षांसिनपिशाचास्तरंतिदेवानामोजःप्रथमजंह्येतत्॥योबिभर्तिदाक्षायणंहिरण्यंसदेवेषुकृ
णुतेदीर्घमायुःसमनुष्येषु०॥यदाबध्नन्दाक्षायणाहिरण्यंशतानीकायसुमनस्यमानाः॥तंनआबध्नामिश
तशारदायायुष्मान्जरदष्टिर्यथासत्॥घृतादुल्लुप्तंमधुमत्सुवर्णंधनंजयंधरुणंधारयिष्णु॥ऋणक्सप
त्नादधरांश्चकृण्वदारोहमांमहतेसौभगाय॥प्रियंमाकुरुदेवेषुप्रियंराजसुमाकुरु॥प्रियंविश्वेषुगोप्तेषुमयिधे
हिरुचारुचं॥अग्निर्येनविराजतिसूर्योयेनविराजतिविराट्येनविराजतितेनास्मान्ब्रह्मणस्पतेविराजस
मिमंकुरुइतिसूक्तांतेकंठेमणिंबध्नीयात्॥ततउष्णीषंशिरसिप्रादक्षिण्येनसंवेष्ट्यउपानहौसत्यजउप
रिनिहितांसमिधमादायतिष्ठन्नेववक्ष्यमाणमंत्रांतेस्वाहाकारेऽग्नावादध्यात्॥स्मृतंचमेअस्मृतंचमेत
न्मउभयव्रतं॥निंदाचमेअनिंदाचमेतन्मउभ०विद्याचमेअविद्याचमेतन्म०श्रद्धाचमेअश्रद्धाचमेतन्म०
प्रज्ञाचमेअप्रज्ञाचमेतन्म०इष्टंचमेऽनिष्टंचमेतन्म०दत्तंचमेअदत्तंचमेतन्म०अधीतंचमेअनधीतंच
मेतन्म०कृतंचमेअकृतंचमेतन्म०सत्यंचमेअसत्यंचमेरतन्म०श्रुतंचमेअश्रुतंचमेतन्म०॥व्रतंचमेअव्रतं
चमेतन्म०यदग्नेसेंद्रस्यसप्रजापतिकस्यसऋषिकस्यसऋषिराजन्यस्यसपितृकस्यपितृराजन्यस्यसमनुष्य

Indira Gandhi National
Centre for the Arts

स्य सुमनुष्यराजन्यस्य साकाशस्य सात्॥ काशस्य सानू काशस्य सप्रतीकाशस्य सदेवमनुष्यस्य सगंधर्वाप्सरस्कस्य
सहारण्यैः पशुभिर्ग्राम्यैश्च यन्म नः आत्मनि व्रतं तन्मे सर्वव्रतमिदमहमग्ने सर्वव्रतो भवामि स्वाहा॥ अग्नये इदं
१८० ॥ अथोपविश्य ममाग्न इति सूक्तस्य विहव्य ऋषिः॥ विश्वेदेवा अग्निस्त्वा जगती अन्त्या त्रिष्टुप् समिदाधाने वि० व
स्य मामध्दशस्वाहाकार समकालं दश समिधो जुहुयात्॥ ममाग्ने० तन्वं पुषेम० जयेम स्वाहा॥ मम० इंद्रवंतो मरु
तो० मुरुलोकः अस्मिन्स्वाहा॥ मयि देवा द्रोतारो वनुषंत॥ तन्वास्सुवीराः स्वाहा॥ मह्यं यजंतु० अधिवोचता नः
स्वाहा॥ देवीः षळुर्वीः राजन्स्वाहा॥ अग्ने मन्यु० परेषा० स्ते उग्रबुधा विनेशत्स्वाहा॥ धाता धातॄणां० देवं त्राता
र० षाहं इमं यज्ञमः० नो गाः० न्स्थान्स्वाहा॥ उरुव्यचा नो पुरूहूः० ऋतये० परादाः स्वाहा० येनः मरुन्स्वाहा॥ अ
र्वाकुत्यो दारवो० स्वाहा॥ सर्व अविश्वेभ्यो देवेभ्य इदं॥ प्रत्यृचग्रहणं व्याख्यातमित्यत्र प्रकरणेऽग्निहोत्रोक्तं गृ
ह्य एव ज्ञानीपहोम प्रकरणे तु प्रत्यृचग्रहणं व्याख्यावसरे स्वाहाकारं पठन् जुहुयादित्युक्तं॥ जयंतेनापि ऋगं
ते स्वाहाकारं कुर्वन्दश समिध आदधातीत्युक्तं॥ कारिकायां तु ममाग्ने दशाग्निर्दुत्वा स्वाहाकारमृगंततः॥
परिषेचनपर्यंतं कुर्यात्स्विष्टकृदादिकमित्युक्तं॥ अत्रापि ऋगंततः इत्यनंतरं पठन्निति चाध्याहारः॥ स्व
त्पादिमूलानुसारात् ऋगंते स्वाहाकारयोरविच्छेदाच्च एवं सत्यत्रावादध्याप्यस्वाहाकारमुच्चारयेदिति वद १८०
द्भ्यो न मीमांस्यम्॥ विभूतिधारणं तेहृतसमावर्तनसंगतासिध्यर्थं दश ब्राह्मणान्भोजयिष्ये इति संकल्प
येत्॥ असंभवे त्रीनितिवा तदशितमन्नोतदर्द्धनुज्ञातः तदीश्वरार्पणं कुर्यात् कौपीनं मेखलां च विसृज्य केशश्मश्रु

लोमनखान्यपसर्जितायां दिशि निखनेत् यत्र स्वस्य मधुपर्कादिना पूजास्पं भाव्यते तत्र समावर्तनानंतरं रात्रौ
वासः तदनंतरं व्रतस्वीकारः॥ दास्यंति मधुपर्कं ये तत्रैतां रजनीं वसेत्॥ ततः संकल्पेनोक्तं नस्नामीत्युत्तराग्ण
पीतिकारिकोक्तेः॥ तत्रैतां रात्रिं वसेत्॥ अथ व्रतानि न नक्तं स्नायादित्येवमादीन्याप्य अोघ्रानीति जपंतो के
श्च अतश्च सूत्रस्त्रुक्तव्रतवत्सूत्रोक्तान्यपि पुरुषार्थान्येव न समावर्तनांगानीति भ्रमितव्यं समावर्त्तनभिन्नदेश
कालत्वेन कारिकाकारादिभिः प्रतिपादनात् अनंगभूतवासस्वाय पागात्॥ आद्यंतयोस्तस्येति मद्दैवभूतंस्ना
तक इति च सूत्रकृदुक्त्या स्नातकपुरुषार्थत्वप्रतीतेश्च स्नातकशब्दस्य वृत्तिकृतो गृहस्थपरत्वेनाभिप्रेतत्वप्र
तीतेश्च न संज्ञायमन्यापद्येते त्यैस्य न संज्ञायं प्रपद्यते त्यनेकमूलत्वलाघवाच्च॥ अतोऽशक्तः सूत्रोक्तान्येव व्र
तानि कुर्यात् बहूलं वा स्वगृह्योक्तमिति ज्ञास्यात्॥ इत्थं च संकल्पान्कुर्यात्॥ न नक्तं स्नास्यामि न नग्नः स्नास्या
मि॥ न नग्नाः स्त्रियमीक्षिष्ये अन्यत्र मैथुनाद्वर्षति न धाविष्ये॥ न वृक्षमारोक्ष्ये न कूपमवरोक्ष्ये न बाहुभ्यां न
दीं तरिष्ये॥ न संज्ञायमन्यापत्स्य इति नदीग्रहणं तडागाद्युपलक्षणं बाहुग्रहणं तु विवक्षितमिति हरदत्तादयः
स्मृतिव्याख्यातारः॥ शास्त्रस्त्वन्यान्यपि॥ यथोक्तानि माधवीये कौर्मे॥ यज्ञोपवीतद्वितयं सोदकं च कमंडलुं॥ छ
त्रं चोष्णीषममलं पादुके वाप्युपानहौ॥ रौक्मे च कुंडले वेदं कृत्तकेशनखः शुचिः॥ स्वाध्याये नित्ययुक्तः स्या
द्बहिर्माल्यं च धारयेत्॥ शुक्लांबरधरो नित्यं सुगंधः प्रियदर्शनः॥ न जीर्णमलवद्वासा भवेत्तु विभवे सति॥ न
रक्तमुल्बणं चान्यधृतं वासो न कुंडिकामिति॥ नित्यमित्यस्य प्रत्येकमन्वयः॥ अतो वेदमित्यंतपुनित्यं धारयिष्ये

Indira Gandhi National
Centre for the Arts

इति प्रत्येकं संकल्पः॥ वेदोदकेन शुद्धिः॥ एवं बहिर्माल्यं धारयिष्ये रक्तं वासो न धारयिष्ये इत्येवं रक्तादिकं यां तेषु
१८१ संकल्पः॥ माल्यं निर्माल्यं स्वशरीराद् उद्धृतं चंदनपुष्पादि पुनर्न धारयेत् किंतु बहिस्त्यजेदित्यर्थः॥ न धारयेदिति
पावे तु शिखावेष्टनादिरूपेण पुष्पमालां न धारयेदित्यर्थः॥ छत्रेत्यादिषु श्लोकस्यादिषु च प्रथमांते षष्ठ्यंतस्य से
के स्वामिस्यान्वयेन संकल्पः॥ छत्रं कर्तनेन तु स्वतां नीतं न तु वपनेन॥ न समाचरेन्मुंडयेदन्निति आपस्तंबोक्ति
संवादात्॥ केशाग्रदर्शनं समश्रूपलक्षणार्थं॥ लोमकेशान् खंडमश्रूश्रुरिति मनूक्तिव्याख्यावसरे कृतं कर्तनात् द
स्वतां नीतं न तु मुंडितमिति नारायणादिभिर्व्याख्यानाच्च॥ विभवे सति जीर्णमलवद्वासा न स्यामिति संकल्पः॥
॥ उल्बणं शरीरपीडाकरं॥ बहुमूल्यं वा॥ एवं याज्ञवल्क्येन न साध्यायविरोध्यर्थमीहेतेत्यादौ शूद्रेषु दासगोपा
लकुलमित्रार्धसारिणः॥ भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेदित्यंते ग्रंथे उक्तव्रतानुसारि संकल्पाश्च
पि शक्तौ न कार्याः॥ तत्र पश्चेति चकारेण कुंभकारस्यापि संग्रहः॥ अत्रत्यहृदविशेषस्य भोज्यान्नत्वोक्तिरस्यंता
पद्विषयेति हरदत्तः॥ कंडुपकं स्थूलपक्वं पायसं दधिसक्तवः॥ एतानि शूद्राद्ग्राह्याणि भोज्यानि मनुरब्रवीत्
विशेषवचनात् विशेषविषयैवेति नारायणः॥ कलौ तु नैतद्विषयचिंतायाः प्रयोजनं॥ शूद्रेषु दासगो
पालकुलमित्रार्धसीरिणां॥ भोज्यान्नतेति कलिवर्ज्यमध्ये पाठादिति बोध्यं॥ एवं मनुनापि स्वर्गायुष्ययश
स्यानि व्रतानीमानि धारयेदित्युपक्रम्य प्रबोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती॥ स्नातकव्रतकल्पश्च १८१
सत्यवृत्तिकरः शुभः॥ अनेन विप्रो वृत्तेन वर्तयन् वेदशास्त्रवित्॥ व्यपेतकल्मषो नित्यं ब्रह्मलोके महीय

ते इत्यनेन ग्रंथेनोक्तानि व्रतान्यपि शक्तेन विप्रेणानुष्ठेयानि कल्प इति विप्र इति च पदद्वयात्॥ यत्तु तत्रै
वपवितं॥ न लंघयेद्वत्सतंतीं न प्रधावेच्च वर्षति॥ न चोदके निरीक्षेत स्वरूपमिति धारणा नाश्रीयाज्जायया
सार्द्धमिति॥ तत्र वत्सतंती गोवत्सबंधनदामेति नारायणः॥ नोपरि वत्सतंतीं गच्छेदिति गौतमोक्तिव्याख्यावसरे व
त्सशाट्यो गोजातेरुपलक्षणमिति हरदत्तः॥ सार्द्धमेकपात्रे इति नारायणः॥ एकस्मिन् काले इति व्याख्यांतरं हरदत्तः
॥ एतदपवादं माधवीये गिरः॥ ब्राह्मण्या सह यो ऽश्नीयादुच्छिष्टं वा कदाचन॥ न तस्य दोषमिच्छंति नित्यमेव मनीषि
णः इति तद्विवाहविषयमिति स्मृत्यर्थसारादयः॥ दोषाल्पत्वपरमिति माधवः॥ यच्च न शूद्राय मतिं दद्यान्नोच्छि
ष्टं न हविः कृतं॥ न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेदिति॥ तत्र मतिर्नीतिशास्त्रादिविषया॥ धर्माद्युपदे
शनिषेधस्य पृथगाम्नानात्॥ गृहस्थः शूद्राय नोच्छिष्टं दद्यादिति विवक्षितः उच्छिष्टमन्नं दातव्यं शूद्रायाः गृहमेधि
ने॥ गृहस्थाय तु दातव्यमनुच्छिष्टं दिने दिने इति व्यासवचनादिति हरदत्तः॥ शूद्रायोपदेशनिषेधोपि साक्षादुपदे
शविषयः॥ श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रत इति ब्राह्मणद्वारकोपदेशस्वीकारविधानात्॥ न चेदं व
क्तारं प्रति ब्राह्मणद्वारकवचनाभ्यनुज्ञाशास्त्रं॥ तमध्यायपीतमेतयान्नाद्यकामं याजयेदिति वत्॥ प्रयोजक
व्यापारेण प्रयोज्यव्यापारं लक्षयित्वा शूद्रं प्रत्येव ब्राह्मणद्वारकश्रवणविध्युपगमात्॥ एवं गौतमीयनववमाध्या
ये पिंडक्तानि उक्तव्रतभिन्नानि स्नातकव्रतानि तान्यपि शक्तेनानुष्ठेयानि यथा॥ न रक्तमुल्बणमन्यधृतं वा वासो बि
भृयात्॥ न स्वगुपानहौ निर्णिक्तमशक्तौ॥ न तिष्ठन्नुद्धृतोदकेनाचामेत॥ न शूद्रादशुच्येकपाण्यावर्जितेन॥ नाक

त्वान्यारीमभिगच्छेत्॥ पादपादधावनासंदीस्थोभोजनानि वर्जयेत्॥ नप्राहृत्याशिरोदानिपर्यटेत् प्राहृत्यरा
१८२ त्रौम्लेच्छाश्च॥ सोपानत्कश्चाशनाभिवादननमस्कारान् वर्जयेत्॥ नपदासनमपकर्षेत नशिश्नोदरपाणिवाक्
चक्षुश्चापलानिकुर्यात्॥ नकुलंकुलःस्यादिति नस्वगित्यत्रान्यध्यतेइतिविपरिणतानुषंगः॥ अत्राक्तस्त्वन्यधृतम
पिवासःप्रभृतिनिर्णिज्यधारयेत्० उद्धृतेतिजानुमात्रेतदधिकेवाजलेतुतिष्ठं नाप्याचमेदित्याशयः॥ शूद्रेणानी
अशुचिनावाब्राह्मणेनाशुचिनावातेनएकहस्तेनानीतं॥ यत्कुलंतेनमाचामेत्॥ पादेनपादधावनंनकुर्या
त्॥ प्राहृत्येवरात्रौपर्यटचप्राहृत्येवमूत्रादिकुर्यात्॥ ननकुलमितिकुलमेवकुलंयस्यसकुलंकुलः॥ स्वकु
लएवाध्येतव्यमितिनियमंपरित्यज्यविद्यालाभायाकुलांतरमपिगच्छेदित्याशयः॥ एवंचसूत्रोक्तावाये
संकल्पाःकृतास्तदुल्लंघनेज्ञानतोवाकृते गौतमायुक्तमहमेकरात्रंवाभोजनंप्रायश्चित्तंबोध्यं॥ इतिस्ना
कव्रतानि॥ अथब्रह्मचारिणःआतुरतादशायामुक्तसमावर्त्तनासंभवेसंक्षेपप्रकारात्कार्यं॥ संक्षेपप्रकारमाह
प्रस्तवः॥ अथेतदपरंतूष्णीमेवतीर्थेस्नात्वातूष्णींसमिधमादधाति॥ अत्रशुल्कदर्शनः॥ अथापरमेतद्वि सुदर्शनः १
धानमुच्यतेइतिशेषः॥ तीर्थपुण्यनद्यादौ समिधंपालाशीएवकरास्मिन् विधौनान्यत्किंचिदनुष्ठेयमिति॥
प्रयोगस्तुब्रह्मचारिलिंगानिमेखलादीनित्यक्त्वावासोंतरपरिधानादिकृत्वाश्रोत्रियागारादग्निमाहृत्ययत्र
कचनाग्निविधिनोपसमाधायतत्रप्रजापतिंमनसाध्यायन्तूष्णीमेवसमिधमादधाति॥ केशश्मश्रुवपना १८२
दिकंअन्यदपिअविरोधितूष्णीमेवकर्त्तव्यमिति॥ अत्रक्रमः संकल्पमेखलादीनित्यक्त्वावपनंततःतीर्थे

स्नानमिति॥ परिधानादीन्यादिपदेनद्विराचमनंतिलकधारणंचवपनादिकमित्यादिग्रहणेनखनिकृतनंइतिस
मावर्त्तनानुकल्पः॥ ब्रह्मचारिदशायांमृतसपिंडानांसमावर्त्तनानंतरंउदकदानपूर्वकंत्रिरात्रमतिक्रांताशौचं
कार्यं॥ आदिष्टीनोदकंकुर्यादाव्रतस्यसमापनात्॥ समाप्तेतूदकंदत्वात्रिरात्रमशुचिर्भवेदितिमनुवचनात्
आदिष्टीब्रह्मचारीतिमिताक्षरायां॥ ततश्चब्रह्मचर्यदशायांसपिंडमरणेसतिसमावर्त्तनानंतरंत्रिरात्रमध्येवि
वाहोनकार्यः॥ जननेतुसत्यपिकार्यएवजननेअतिक्रांताशौचाभावात्॥ इतिस्मृतिकौस्तुभेसमावर्त्तनं॥ अथ
विवाहः॥ मनुः॥ गुरुणानुमतःस्नात्वासमावृत्तोयथाविधि॥ उद्वहेतद्विजोभार्यांसवर्णांलक्षणान्वितामिति॥ लक्ष
णान्यप्याह॥ अव्यंगांगींसौम्यनाम्नींहंसवारणगामिनीं तनुलोमकेशदंतां मृद्वंगीमुद्वहेत्स्त्रियमिति॥ एतानिचा लानि७
राशि सानि॥ अग्रेत॥ अष्टौपिंडान्कृत्वेत्यादिआश्वलायनगृह्योक्तविधिनाज्ञेयानि॥ कन्यागतविशेषणांतरमाहया
ज्ञवल्क्यः॥ अनन्यपूर्विकांकांतामसपिंडांयवीयसीं॥ अरोगिणींभ्रातृमतीमसमानार्षगोत्रजामिति॥ अनन्यपूर्वि
काःसप्तविधाःपुनर्भ्वः॥ वाचादत्तामनोदत्ताग्निंपरिगतासप्तमंपदंनीताभुक्तागृहीतगर्भाप्रसूताचेतिबौधाय
नोक्ताः॥ एतानविवाह्याइत्येवमर्थमनन्येतिविशेषणं॥ प्रथमवरस्यपातित्यादिवलवद्दोषनिर्णयेत्वाद्यानांतिसृ
णांअन्येनपरिणयनंभवतीतिअवसरेवक्ष्यामः॥ कांतांवरस्यचक्षुर्मनसोरानंदकारिणीमितिविज्ञानेश्वराद
यः॥ तेनश्वश्रुरादिचक्षुरादेस्तुत्कारित्वाभावेपिनदोषः॥ एकस्यापिंडदानक्रियायांदातृत्वेपिंडभाक्लेपभाक्त्वा ले२
न्यतरसंबंधेनान्वयःसापिंड्यं॥ तथाचमात्स्येलेपभाजश्चतुर्थाद्याःपित्राद्याःपिंडभागिनः॥ पिंडदःसप्तमस्तेषां

Indira Gandhi National
Centre for the Arts

सापिंड्यं साप्तपौरुषमिति पिंडदद्वत्वेकवचनांते नापियजेतेतिवत् आसन्नवृत्तिकर्तृत्वान्निप्रायेणान्निसाध्यश्राद्धे
षुदंपत्यात्मकर्तृनिर्द्देशाकेत्यल्पा आपि सापिंड्यसिद्धिः॥ एकस्यामिति चोद्देश्यदेवतायाः केल्पा अव्यभेदेन पिंडदा
१०२ नक्रियाया अभेदो विवक्षितः॥ ननु क्रियाव्यक्त्यैक्यं तेन चेत्रस्य स्वीयपितृव्यादिभिः सापिंड्यसिद्धिः॥ अस्ति हि चैत्रीय
श्राद्धोद्देश्यतास्पितामहादेः तस्पितृव्यकर्तृकश्राद्धेपि तत्त्वेनोद्देश्यता॥ न चैवं गयाश्राद्धादौ यज्ञमानापातृपेस्त्रिंडे तन्मये
द्वतृत्याश्वतमिति शास्त्रेणोद्देश्यतायामित्यादि साधारणत्वात्तत्कन्यामैयामपि सापिंड्येनाविवाह्यतापत्तिः॥ अवयवानु
वृत्तिः सपिंड्यमिति ते विधात्रवयवानुवृत्त्यातिप्रसंगस्येवास्याप्यतिप्रसंगस्य सप्तमात्पंच मादूर्ध्वं मातृतः पितृतस्तथेत्या
दिवचोनुरोधेन पित्रादिसंबंधिषु केषुचिदेव सपिंडशब्दस्य योगरूढ्यंगीकारेणपरिहारसंभवात्॥ इदमासापिंड्या
रहिताश्च सपिंडेति केचित्॥ अस्मिन्मते श्वश्रूणां तासाप्येवयवानुवृत्तिसापेक्षप्रतीतिकल्पितत्वादेवरूढिविषय
त्वात्॥ अवयवानुवृत्तिः सापिंड्यमित्येव मतं लाघवाद्युक्तं॥ न हि तत्र मते रूढिविषये पिंडदानक्रियायाः प्रवेशोस्ति
॥ अतः समानः एकः पिंडः कूटस्थदेहः आरंभको यस्याः सा सपिंडा तद्भावः सापिंड्यं॥ तच्च द्विविधं मुख्यमारोपितं च॥ अ
त्र द्वि विधं साक्षादेकशरीरावयवानुवृत्त्या यथा भ्रात्रोर्भगिन्योः भ्रातृभगिन्योश्च॥ परंपरया पौत्रयोर्दौहित्रयोश्च॥ अत्र द्वि
पितृमातृद्वारकेकशरीरावयवानुवृत्त्या सापिंड्यं॥ उक्तयाज्ञवल्क्यवचनाच्च वधूवरयोः पितृकुले सप्तशीर्षपर्यंतं कूट
स्थावयवानुवृत्तेः सपिंडपदरूढिविषयः॥ मातृकुले च पंचमपर्यंतं तदनुवृत्तिः तद्विषयः पंकजशब्द इव [redacted] १०२
पञ्चत्वैकार्थसमवायिपंकजनिकर्तृत्वमित्यंगीकारेण नातिप्रसंगदोषः॥ तथा च शास्त्रांतरं वध्वा वरस्य वात

त: कूटस्थाद्यदि सप्तमः॥ पंचमी चेत्तयोर्मातासापिंड्यं विनिवर्त्तत इति॥ अतश्च पितृद्वारकसापिंड्यविचारे सप्तमा
दूर्ध्वं सापिंड्यनिवृत्तिः॥ मातृद्वारकतद्विचारे तु पंचमादूर्ध्वमिति निर्णयः॥ एवं च वरादेः पितृद्वारकसापिंड्यचिं
तासमये शीर्षगणनायां पंचम्यां स्त्री व्यक्तौ सत्यामपि तत्पुत्रकन्या नैव विवाह्या॥ शास्त्रबलेन मंडूकप्लुत्या तत्र रू
ढिविषयसापिंड्यानुवृत्त्यनुपगमात्॥ यद्वसिष्ठेनोक्तं पंचमी सप्तमी चैव मातृतः पितृतस्तथेति॥ उद्वहेदिति शेषः॥ य ५
च्च पैठीनसिना॥ त्रीनतीत्य मातृतः पंचातीत्य पितृत इति तदर्वाङ्‌विषयार्थमिति विज्ञानेश्वरः॥ अनुकल्पपरमिति माध
वः॥ युक्तं चैतत् अश्रुतनिषेधपरत्वात् अनुकल्पतया विस्वार्थपरतायाः प्राप्तत्वात् दशभिः पुरुषैः ख्याता च्छ्रो
त्रियाणां महाकुलात्॥ उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीं॥ पंचमीं तदभावे तु पितृपक्षेप्ययं विधिः॥ सप्तमीं
चतथा षष्ठीं पंचमीं च तथैव च॥ एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः॥ तृतीयां वा चतुर्थीं वा पक्षयोरुभयोर ५८
पि॥ विवाहयेन्मनुः प्राह पाराशर्यो गिरा यमः॥ असपिंडा च या मातुरसगोत्रा च या पितुः॥ सा प्रशस्ता द्विजातीनां
दारकर्मणि मैथुने यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत्॥ नित्यं स व्यवहार्यः स्यादेदा चैतत्सतीयते इति चतु
र्विंशतिमताच्च॥ तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा॥ विवाहयेन्मनुः प्राह पाराशर्यो गिरा यम इति॥ चंद्रि
कापारिजातीदाहृतषट्त्रिंशन्मताच्च॥ पूर्वस्मृतौ सप्तमीमित्यादिषु चतुर्थीमित्यंतेषु द्वितीयांतेषु प्रत्येकं महा
कुलादित्यंतार्द्धस्यानुषंगः॥ ततश्च महाकुलानुरोधेन सापिंड्यसंकोचः स्वीकार्यो न तद्भीत्या अधमात्कुलात्
कन्या स्वीकार्येति विधीयते॥ अत एवाश्वलायनेन प्रथमं कुलपरीक्षैवोक्ता॥ कुलमग्रे परीक्षेत ये मातृतः पितृ

Indira Gandhi National
Centre for the Arts

तच्चैतिथ योक्तं पुरस्तादिति॥एतद्व्याख्यावसरे वृत्तिकृतोक्तं अग्रवचनं वधूवरगुणेभ्यः कुलमेव कथं प्रथमं तस्मा
दिति॥पुरस्तादिति श्रौतसूत्रे नवमाध्याये दशपेयप्रकरणइत्यर्थः॥ दशपुरुषोक्तमिति प्रतीकं गृहीतं च तत्रेत्थं सूत्रं पवि
१८४ तं येमातृतः पितृतश्च दशपुरुषं समनुष्ठिता विद्यातपोभ्यां पुण्यैश्च कर्मभिर्येषामुभयतो ब्राह्मण्यमिति॥ विद्यादिगुणसंप
न्नामातृकुले पंच पितृकुले च पंच पुरुषाः विद्यंते तत्कुलमिति दशपेये ऋत्विक्स्वीकाराय यथाकुलपरीक्षोक्ता सा कन्या
स्वीकाराय कार्येत्याशयः॥मनुरपि महांत्यपि समृद्धानि गोजाविधनधान्यतः॥ स्त्रीसंबंधे दशैतानि कुलानि परिवर्जये
त्॥ हीनक्रियं निष्पुरुषं निश्छंदो रोमशार्शसं॥ क्षयामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि चेति॥ हीनक्रियं वि श्रि८
हितक्रियारहितं॥ निष्पुरुषं पुंप्रसवरहितं निश्छंदो वेदाध्ययनरहितं॥ रोमशं सर्वांगारूढरोमकं॥ अर्शस
मित्यादिपदेस्तत्तद्रोगवंति कुलान्युच्यंते॥ दारसंग्रहफलभूतसंततौ दोषानुवृत्तिपरिहाराय चैषां कुलपरिक्षोक्ता
ते॥ कुलानुरूपाः प्रजाः संभवंतीति हारीतवचनात्॥ इत्थं चोक्तस्मृतौ कुलानुरोधे नानुकल्पविधिः स्त्रीनेव व
र्णान्प्रति स्वीयदेशकुलाचाराविरोधे नोच्यते॥ श्रोत्रियाणामित्युपक्रमात्॥ असपिंडेति श्लोके सा प्रशस्ता द्विजा
तीनामिति महाकुलीनायाः सप्तपुरुषसापिंड्यसामान्य॥ प्रावचनाद्विजान्प्रति मुख्यकल्पत्वोक्त्यात दभाव
विहितानां अनुकल्पानामिति द्विजविषयत्वज्ञापनाच्च॥ मुख्यकल्पानुकल्पयोरेकविषयत्वनियमात्॥ य
स्तु देशेति श्लोके च अव्यवहार्यत्वेन वेदसंमतत्वेन चोक्तानुकल्पेषु निर्दोषता या देशकुलपरिग्रहेणैवोपन्य १८४
सात्॥ अतश्चासपिंडेति श्लोके द्विजातिग्रहणात् सापिंड्यसंकोचविधयः शूद्रविषयाः पंचमे सप्तमे चैव येषां



वैवाहिकी क्रिया॥ क्रियापरा अपि हि ते सर्वे ते शूद्रतां गता इति मरीचिवाक्ये शूद्रे शूद्रतापत्तेरसंभवाच्चेति वृ
त्तो निरस्तानी अतेः शूद्रत्वमसच्छूद्रत्वं तस्य सच्छूद्रस्यापत्तिसंभवात्॥ यच्चोदाहृतं चतुर्विंशतिमतस्थश्लोके वे
दाश्चैतत् प्रतीयतइत्युक्तं॥ तस्यायमाशयः॥ तृतीयचतुर्थादिविषये अनुकल्पतया स्वकुलदेशाविरोधेन प
रिणयनमुक्तं तदेव वेदात्प्रतीयते॥ तथैवाशतपथे दार्शिकप्रकरणे पठ्यते॥ तस्मात्समानादेव पुरुषात् अत्ता साना
त्वौघश्च जायते॥ उत तृतीये संगच्छावहै चतुर्थे संगच्छावहा इति॥ अत्र व्याकूटस्थादुत्पन्नयोः भोक्तृभोग्ययोर्मि
थः संकल्पोक्तिः तृतीयइत्यादिकात्तद्दर्शनाच्च सापिंड्यसंकोचविधिकल्पनमिति माधवः॥ एवं आयाहीन्द्र पथि
~~स्वैकपथि~~ भिरिति वह्वृचमंत्रे प्राजदुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिवेति मातुलकन्यादेः भागिने
यादिप्रति भागत्वोक्त्या परिणयनसूचनात्॥ सापिंड्यसंकोचांगीकारे कारण मातुलकन्यादिपरिणयने इ
दं मंत्रलिंगमपि साधकं॥ इदं च मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च॥ समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरे त्यक्ता६
दिति स्मृत्यपेक्षया बलवदिति बलाबलानुसारेण एव सापिंड्यसंकोचस्य परामर्शोस्ति तदनुसरणमपि वेदोक्तमि
ति ज्ञाप्यते॥ तथा चामनंति वह्वृचा मंत्रेतेन स्वाध्वं तेऽवततउतो अधिवोचता मानः पथः पित्र्यान्मानवादधि दूरं
नैष्ट परावतइति॥ अत्र हि पित्र्यात्पितुरागतात् मानवात् मनुसंमतात्॥ उक्तं हि तेन येनास्य पितरो याता येन या
ताः पितामहाः॥ तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यतीति पथो मार्गाच्च दतिक्रमेण नोस्मान्दूरं मानयतेति देव
प्रार्थनया तादृशमार्ग एवावस्थानमुचितमिति ज्ञाप्यते॥ इति स्तुतासो असथा रिशादसो ये स्थ त्रयश्च त्रिंशच्च



Indira Gandhi National Centre for the Arts

तनं ३

॥मनोर्द्वैवायज्ञिज्ञो सइतिपूर्वर्चिप्रकृतदेवानामेवनेष्टेति भव्यमपुरुषेकर्तृत्वानुवादे ननिषेधसंभवात्॥अ
१८५ तएववेदाश्चेतिचकारेणमनुस्मृतेरितिसमुच्चीयते॥अनेनचयथामभक्ष्यभक्षणनाद्येश्चदृष्टस्यमरणंतथेति
सत्यपिकलिवर्ज्येषुपाठेयेवैर्न्यांविसर्जनीतिश्रुतिस्मृतिसिद्धत्वाच्छ्रेणीप्रवेशस्यतद्भिन्नस्यैवजलप्रवेशस्य
कलिवर्ज्यत्वंस्वीक्रियतेतथास्वकुलदेशाविरोधिनोमातुलदुहितृपरिणयनादेरुक्तविषयान्येश्रुतिस्मृतिसिद्ध
त्वाद्गोघ्नात्मातुःसपिंडाश्चविवाहोगोवधस्तथेतिमाधवोदाहृतब्राह्मणवचनेनप्रतीयमानंमातुलकन्यापरिणय
लिंद नादेःकलिवर्ज्यत्वमपिस्वकुलदेशाविरोधितादृशपरिणयनविषयमितिज्ञाप्यते॥यच्च बौधायनः॥पंचधाविप्रतिपत्ति
र्दक्षिणतस्तथोत्तरइत्युपक्रम्यदक्षिणतःपर्युषितभोजनादिभिःसहमातुलकन्यापरिणयनाद्युपन्यस्योत्तरतश्चो
र्णाविक्रयाद्युपन्यस्याहातत्रतदितरस्मिन्कुर्वन्दुष्यतिइतरदितरस्मिंस्तत्तद्देशप्रामाण्यान्मिथ्येतदितिगौतमः
उभयमेवनाद्रियेतशिष्टस्मृतिविरोधदर्शनादिति॥तत्रापिप्रामाण्यादिसंतोषंयोमिथ्येतदिनायपर्युषितभोजनसौ त्याद
र्द्प धुपानादेर्व्यावर्त्तमातुलकन्यादिपरिणयनादिविषयतयाव्यवस्थाप्यतेवेदाचेतस्प्रतीयइतिस्मृत्याश्रुतिस्मृति
सिद्धत्वेनोपन्यस्तोक्तपरिणयनस्मृतेरितिविरोधोपन्याससंभवात्पर्युषितभोजनादेःकर्त्तव्यतास्मृचकश्रुते
र्विशेषतःस्मृतेश्चाभावेनस्मृतिविरोधहेतूपन्याससंभवेनचमिथ्येतदितितद्विषयमेवेत्यादिसुधीभिरूह्यं॥
अतःसिद्धमेतत्कलावपियेषांकुलेदेशेनुकल्पत्वेनसापिंड्यसंकोचःपरंपरयासमागतः॥तेषांतादृशसंकोचे १८५
नविवाहेनदोषः॥अस्तिचभार्यात्वोत्पत्तिः॥अन्येषांतेःसदृव्यवहारेनैवदोषःस्वयंतुस्वदेशकुलविरुद्धसापिंड्य
६

६७

संकोचेनविवाहेभवत्येवदोषः॥नचभार्यात्वोत्पत्तिः॥इत्यंपैतृहिस्वयंउक्तविधसापिंड्यसंकोचेनविवाहमकुर्व
तोपितादृशसंकोचेनासदृशजातविवाहेभ्यःकुलेभ्यःकन्यास्वीकुर्वतस्तत्कुलीनानांश्राद्धादौभोजयंतश्चवदेवःशिष्टाः
॥अतएवमातुलकन्योद्वाहिनांदेःमाश्राद्धादौश्राद्धनिषेधोपिस्वकुलदेशपरंपर्यानागतसापिंड्यसंकोचेनकृतवि
वाहविषयएवेतिबोध्यं॥दत्तसापिंड्यंतुदत्तकनिर्णयेप्रागेवोक्तमितिनेहलिख्यते॥मुख्यावयवानुवृत्तमावेपि ७५
द्वितीयसापिंड्यप्रकारस्तुमंतुःपितृपत्न्यःसर्वामातरस्तद्भ्रातरोमातुलास्तद्भगिन्योमातृस्वसारस्तदुहितरश्च
भगिन्यस्तदपत्यानिभागिनेयानि॥अन्यथासंकरकारिणःस्युरिति॥मदनपारिजातेसप्तमादिपर्यंताविभा
धवीयेचतद्भगिन्यइतिनपठितंअन्यग्रंथेषुतुपठ्यते॥अत्रयावद्वचनंवाचनिकमितिन्यायेनपरिगणितेष्वे
म.१ वसापिंड्यंनतुसप्तमादिपर्यंतमितिभेदःचरणप्रमतयोवदंत॥अन्येतुदेशपतावच्छेदकानांपितृपत्नीत्वत
ज्ञातृत्वादीनांभेदेनवाक्यभेदात्तन्निष्टसैलक्षण्यासपत्नमातामहकुलेचतुःपुरुषंसापिंड्यमातिदेशिकंवि
धीयते॥अतश्चमातुलादिदुहितृष्वितततपुत्रेष्वपिसापिंड्यात्कन्यायांसापत्नमातुलपुत्रेणनविवादइत्याहुः॥
तन्न॥यत्रादिश्रुतयावहूद्दानामेकस्मिन्नर्थेनात्पर्यलक्षणोत्परंचैकरूपेणप्रामाण्यबोध्यव्याप्तसंभवति
तत्रैवलक्षणयावाक्यभेदपरिहारः॥यथार्द्धमेतवेदीतादोअत्रचापितृपत्न्यइति॥प्रथमवाक्यमेवन
सपत्नमातरिउक्तविधसापिंड्यपरं॥नहितस्याविवाहप्रसक्तिरास्तियेनविवाहप्रतिबंधायसापिंड्याति
देशःक्रियेत॥किंतुसपत्नमातृस्त्वस्वमातृत्वातिदेशोनतत्भ्रात्रादिषुतन्निरूपितमुख्यभ्रातृत्वादेरेवविवा

Indira Gandhi National
Centre for the Arts

दप्रतिवंधकतापरं॥ मदनपारिजातेहि॥ असपिंडा च या मातुरसगोत्रा च या पितुरिति मनुवाक्यव्याख्या
वसरे॥ असपिंडा च या मातुरित्यस्य फलप्रदर्शनायोक्तं॥ सपत्नमातृकुलजास्वासपिंडामात्रसगोत्रामा
१०६ तृसपिंडा चेति तत्र विवाहप्रसक्ताविदमुच्यते॥ असपिंडा च या मातुरिति॥ तथा च सपत्नमातुः सापिंडे प्र
पि मातुलादिव्यवहारं दर्शयति सुमंतुरित्युक्त्वा पितृपत्न्यः इत्याद्युदाहृतं॥ एवं च दत्तादिग्रंथकारेण सर्वे
षां वाक्यानां पृथक्श्रुतेर्थ एव तात्पर्यं प्रदर्शितं लक्षणे तरं च भवन्मते सापत्नपुत्रं प्रति मातुलादिसापिं
ड्योक्तिस्तादृक्कन्यां प्रति दुहितृषु सापिंड्योक्तिरफलेति नैकरूप्येण प्रामाण्यसंभवः॥ लक्षणतः पूर्वं च
प्रतिवाक्यं मातृत्वमातुलत्वाद्यतिदेशो योग्यतया त्रेधीवधे ब्रह्महत्याप्रायश्चित्तस्येव मातृगमनप्रायश्चि
त्तस्य भागिनेयीपरिणयनतदुपगमनादिप्र[illegible]श्चित्तस्य चातिदेशो व्यवस्थया कुर्वन्नैवैरूप्यमावहतीति
न लक्षणोचिता॥ नहि गुणभूतवाक्याश्रितदोषभयात्सधानप्रयोजनबाध उचितः॥ उदाहृतश्लोकाद्य
मं तु वाक्येषु प्रतिवाक्यप्रयोजनभेदाभियुक्तैः सुरूपमात्रादाविव सपत्नमात्रादौ अभिवादनसंमानता
द्यतिदिश्यते॥ तदुपगमनेवधेवा तद्दुहित्रादिपरिणये प्रायश्चित्तं वा॥ तादृशो मातुलादिमरणे आशौ
चविशेषाचेति॥ किंच अंतर्वेदिदेशमात्रविधाने॥ न वाक्यभेदपरिहारः॥ वहिर्वेदिदेशो नियोगे नार्द्धं १०६
तराप्राप्तिरिति वार्तिकादौ स्फुटं॥ अत्र तु तदपत्यानि भागिनेयानीत्येतावतैव तच्छब्दः॥ हिमात्पूर्ववाक्याधि
गम्यसापिंड्यप्राप्तेः॥ पूर्ववाक्यान्यविधायकानि स्युरिति कथं वा वाक्यभेदः॥ किंच तादृग्भगिन्यो मातृस्वसार इति

ति१ घ१

न च उदाहृतपाठे तदनर्थकं भवन्मते स्यात् तृतीयचतुर्थस्थाने द्वितीयस्थानेप्येकशीर्षसंकीर्तनेनैव चतुःपु
रुषसापिंड्यलाभात्॥ अनर्थकं च भ्रातरो मातुलाइत्यपि स्यात् पितृपत्न्यः सर्वा मातरस्तद्भागिनेयो भागिन्य इत्येता
वतावपि तल्लाभात्॥ एवं श्रीमतां लक्षणांगीकरणं स्वसिद्धांतविरुद्धं तथाहि॥ अभ्युदयेष्टिवाक्ये दृष्टविष्टदध्नो
र्दयोरुद्देश्यतानिमित्तो वाक्यभेदो भट्टैरंगीकृतः॥ अंगीकृतश्च पंचशरावे वाक्ये द्रव्यदेवताविधिनिमित्तो वाक्य वतार्थ
भेदः॥ अनयोर्वाक्यभेदयोः कर्मभेद इति केचित्तत्कृताक्षेपनिरासः श्रीमद्भिरित्थं कृतः सदृश्यप्रयतीति वाक्यानर्थ
कयाद् अभ्युदयेष्टिवाक्ये तदंगीकार उचित इति एवं सति प्रकृते ऽनेकवाक्यार्थकल्पनयाल्कथं न तदंगीकारे श्रीम
तामौचित्यवुद्धिः॥ अस्तु वाक्यभेदभयाच्चतुःपूरुषसापिंड्यनिषेधलक्षणा॥ चतुर्थं तु नव्यन्तं च पेक्षां भ्रातृभगि
न्यादीनामानंत्यात्॥ किंतु सप्तपदार्थवाक्ये यथा घटादीनां रूपादीनां च यथाक्रममेकत्वापादकद्रव्यत्वगुण
त्वादिसमान्यगोचरापेक्षावुद्ध्यात्मकं सप्तत्वं तादृशवुद्धिजन्यं वा स्वीक्रियते तथा प्रकृतेपि तत्रात्वतद्दुहि
तृत्वादिसामान्यविषयापेक्षावुद्ध्यात्मकं तज्जन्यमेव वा चतुष्ट्वादिस्वीकार्यं॥ न त्वनुपस्थिततदपत्यत्वादिवि
षयतादृशवुद्ध्यात्मकं॥ उपस्थितस्यापि ऽनुपस्थितस्वीकारे च मानाभावात्॥ किंच माधवेनासपिंडा च या
मातुरसगोत्रा च या पितुरिति मनुवाक्यव्याख्यावसरे ब्राह्मादिषु विवाहेषु यात ऊढा कन्या कार्ये वेत॥ भर्तृगोत्रे
ण कर्तव्यास्तस्याः पिंडोदकक्रिया॥ गांधर्वादिविवाहेषु पितृगोत्रेण धर्मविदिति॥ मार्कंडेयपुराणमुदाहृ
त्योक्तं मातुलकन्यादिनिषेधवाक्यानि गांधर्वादिविवाहोढोत्पन्नविषयाणि॥ तत्र सापिंड्यनिवृत्तेरित्युक्तं

Indira Gandhi National Centre for the Arts

तादृशानिषेधप्रदर्शनावसरे मातुलस्यसुतामूढ्वेत्यादि प्रायेपितृपत्न्य इत्यादिसुमंतुवाक्यमुदाहृतं॥ तद्यथा॥ शा
तातपः॥ मातुलस्यसुतामूढ्वा मातृगोत्रां तथैवच॥ समानप्रवरांचैवत्यक्त्वाचांद्रायणंचरेत्॥ पैठीनसिः॥ पितृमातृ
१८७ स्वसृदुहितरोधर्मतस्ताभगिन्यस्तावर्जयेदिति॥ सुमंतुरपिपितृपत्न्य इत्यादि॥ व्यासः॥ मातुः सपिंडायत्नेन वर्ज
नीयाद्विजोत्तिभिरिति ततोऽविशेषप्रवृत्तानामेषांवचनानांकथंविशेषविषयेत्वांशंक्य विशेषवचनबला
क५ दिति ब्रूम इति धृतिज्ञाय मनुवाक्यमुदाहृतं॥ पैतृष्वस्रेयींभगिनींस्वस्रीयांमातुरेवच॥ मातुश्चभ्रातुराप्तस्यग
त्वाचांद्रायणंचरेत्॥ एतास्तिस्रस्तुभार्यार्थेनोपयच्छेत्तुबुद्धिमानिति॥ अत्रचभगिनीपदंपूर्वोत्तरद्वितीयांता
भ्यांसंबध्यते॥ आप्तपदंचमातुर्गांधर्वादिविवाहप्रयुक्तसापिंड्यपरं पैतृष्वस्रेयीगांधर्वविवाहोढैवविज्ञे
ता॥ अतोभगिन्यादिपदसार्थकत्वानुरोधेनमनुवचनादितरेषांविशेषविषयत्वमित्युक्तंस्वीकृतश्चास्यमनुवा
क्यस्यभगिन्याप्तपदमहिम्नेदृशोभिप्रायोन्यायसुधाकरेबलाबलाधिकरणे॥ एवंचमाधवेनसुमंतुवाक्य
ता५ स्यपूर्वोत्तरदेशोदाहृतशातातपपैठीनसिमनुवाक्येषुमातुलसुतात्वमातृगोत्रत्वाद्युद्देश्यपतनैच्छेदकभेदेनवा दश्म
क्यभेदस्यपरिहारायलक्षणीयेकोद्देश्यतावच्छेदकस्यवक्तुमशक्यत्वात्तस्यपुंसाधारण्येचद्विजश्चांद्रायणंच
रेदितितामगिन्य इतिएतास्तिस्रस्तुभार्यार्थेनोपयच्छेत्तेतितेनेमितिकविधेयसर्पकपदानन्वयापत्तरपरि
हार्योवाक्यभेदः॥ तथाचतत्समानविषयतयामाधवोदाहृतेसुमंतुवाक्येपिवाक्यभेदएवमाधवसंमत इतिस्वी १८०
कर्तुमुचितंप्रायपाठभंगस्यान्याप्यत्वात्तगांधर्व [illegible] विवाहप्रयुक्तत्वंतुमाधवसंमतसापिंड्येनैवसकल
६४

कल्पनाया अन्याय्यत्वाच्चत्स्यविधिविषयस्यसापिंड्यस्यापिगौणत्वेनाविधेयमुख्यत्वालाभाच्च॥ अस्मन्मतेतुमातृत्वा
धातिदेशेनविधिवि+२
सुमंतुवाक्यानासंभवेश्रुत्यंतरकल्पनापादकचतुःपूरुषापूर्वपरिणेत्वनिरूपितसापिंड्यविधिविषयस्य
समानप्रायश्चित्तादेर्मुख्यत्वात्॥ नचसापिंड्यबोधनएवसंकरकारित्वापादनरूपवाक्यशेषोपपत्तिरिति
पित्रांक्यं॥ अवश्यकर्तव्यसंमाननाशोचातिक्रमस्यानाचारसंकरापादकत्वसंभवात् प्रायश्चित्तनिमित्तनिषे
ध्यातिक्रमस्यतुतदापादकतायामतद्वयेपितुल्यत्वात् नन्वेवंमदनपारिजातोक्तावसिष्ठवाक्यव्याख्यासंगच्छ
ते॥ तेनद्विपंचमीं [illegible] सप्तमीचैवमातृतः पितृतस्तथेतिवसिष्ठवाक्यमुदाहृत्योक्तंतत्सवर्णसापत्न्यमाताम
हकुलविषयंब्राह्मणादीनांज्ञातियादिदानसमुत्पन्नपितृकुलविषयेचएकत्रावयवानुवृत्तेरभावादन्यत्रसा
वर्ण्याभावाच्चेतिसुमंतुवाक्यस्यसापिंड्यविषयत्वेतदवधिप्रदर्शनार्थवसिष्ठवाक्येपंचमीमितिसंगच्छते॥
अन्यथानुपपन्नंस्यादितिचेत्॥ नाईदृशवाक्यानांचतुर्विंशतिमतायनुसारेणानुकल्पार्थतरंतात्पर्य
गो६ स्यप्रार्थवदर्शितत्वात्पारिजातव्याख्यायामपि॥ तदपत्यानिभागिनेयानीतिभागिनेयित्वेनासिद्धायाइवतत्
त्कन्याया अपियुक्त्याभासेनप्रसिद्धभागिनेयीकन्यायाइवापरिणेयत्वेप्रसक्तेतन्निवृत्त्यासर्वसुमंतुवाक्यानां
यथाश्रुतेर्थतात्पर्यार्थत्वसंभवात्॥ यथाहिसपत्नमातरिमातृत्वातिदेशपरेप्रथमवाक्येयन्निरूपितंसप
त्नमातृत्वं॥ तंप्रत्येवजनकन्मतेपि सापिंड्यातिदेशोविधीयतेनतुतत्पुत्रेप्रत्यपि॥ यथाचास्मन्मतेमातुलत्वाध
तिदेशोपितंप्रत्येवधीयतेनतुमातुलकन्यादौपितुर्भगिनीत्वातिदेशेनपुत्रंप्रत्यपियौक्तिकः पितृस्वसृत्वाद्यति
देशाः सिध्यति॥ यथाचतदपत्यानां अस्मिंवाक्येनभागिनेयत्वातिदेशोपितृत्कन्यायांनयौक्तिकोभागिनेयीक
त

न्यात्वातिदेशः पुत्रत्वाभासस्येदृशविषयासाधकतायां वसिष्ठेनापि पारिभाषितोऽक्षरीत्या प्रदर्शनात्॥ तथा मातुल
कन्याया भागिनीत्वातिदेशो पितृमातुलसुतभ्रातृत्वातिदेशोऽपि॥ यावद्वचनं वाचनिकमित्येवाभियुक्तस्वीकारो
१८८ चेत्यादिस्पष्टं सवर्णसपत्नमातृकुले सापिंड्यविचारेण॥ असवर्णमातृकुलेतु तद्विचारस्यानकलोपप्रयोजनं
॥ असवर्णविवाहस्य कलिवर्ज्यत्वात्॥ वध्वा वरस्य वामुख्यपितृद्वारक सापिंड्यं तु कूटस्थमारभ्य सप्तमा
दूर्ध्वं निवर्त्तते तयोरेव मुख्यमातृद्वारके तु तमारभ्यैव पंचमादूर्ध्वं निवर्त्तत इति सिद्धं॥ ततश्च मुख्यकल्पे
न कुलद्वये वर्जनीयकन्यानामभियुक्तोक्तसंख्योपपन्ना भवति यथाहुः॥ उद्वोढुः पितरो पितुश्च पितरो तज्जन्मत
द्दंपतिद्वंद्वं तस्य चतुष्कमष्टकमतोऽप्यस्य क्रमात्षोडश॥ वंशारंभकदंपतिप्रमिति रित्या सप्तकद्वंद्वदा एकैकान्व
यकन्यकाः पितृकुले त्वासप्तकद्वंद्वं तु वै॥ यद्यप्येकस्य वद्वोऽपि सुताः स्युस्तदपीदृतु॥ संबंधसाम्यादेकैव गणि
तेत्यवधार्यतां २ एकस्मान्मिथुनात्सुतोथदुहिता द्वंद्वयं तद्द्वयात्तस्माद्द्वंद्वचतुष्कमष्टच ततोतः षोडशातोरदाः
॥ यावत्सप्तमकद्वयमप्रिजतः तव कन्याइदेकान्वयेतादंते गुणितार्स्सेकख द्वयोर्वंशो सपिंडाः पितुः मातुर्जन्म
ददंपती च मिथुनद्वंद्वं तयोः सागरात स्याः पंचमकद्वयमश्च मितिरित्येकान्वयेपुंसुते॥ द्वंद्वाद्वंद्वयुगं ततो ५५४
यद्वत्तो पंचकद्वंद्वशारक्षोएपः सप्तगुणाः शरात्रविधवोमातुः सपिंडाः कुले ४ कुलद्वयस्य कन्यका युगाग्नि
यः सपिंडिकाः॥ द्विमांशुद्दग्ध रादृशो २१२१ विवाहकर्मवर्जिताः ५ अत्र प्रथमश्लोके वरस्य पितृपक्षे सापिं १८८
ड्ये नाविवाह्यकन्यानां संख्यादर्शी। येतु पत्येकं एकैकन्यायाः पितरावेकं द्वंद्वमित्येवमेकीकृत्य सप्तकद्वयं

घ१ क१

+ न्व५

द्वंद्वानां संख्यामुक्त्वा पितृपक्षे एकैकद्वंद्वकुले॥ तावत्कन्यानां संख्योक्तिप्रतिज्ञा क्रियते॥ तथाहि॥ वरः प्रथमः द्विती
यस्थानस्थितं वरपितरौ द्वंद्वं॥ तृतीयस्थाने पितुः पितरौ द्वंद्वं॥ चतुर्थस्थाने तयोः प्रत्येकं जनकद्वंद्वे २ पंचमस्थाने
तद्द्वंद्वद्वयघटकचतुर्णां प्रत्येकं द्वयजनकद्वंद्वानि ४ षष्ठस्थाने तद्घटकाष्टसंख्यस्त्रीपुंव्यक्तिजनकानि द्वंद्वानि सप्त
८५ मस्थाने तत्घटकषोडशव्यक्तिजनकानि द्वंद्वानि १६ अतोऽपीति तासिः षष्ठ्यर्थे॥ तज्जन्मकृदिति समासांतर्गततज्ज
न्मकृत्पदस्य तस्येत्यादिषष्ठ्यंतेषु निष्कृष्य प्रत्येकमन्वयः ततश्च तस्य जन्मकृत् द्वंद्वानां चतुष्कमित्येवं वाक्यार्थ ऊन्ने
यः॥ इत्यासप्तकद्वंद्वमित्यास्यमध्यमणिन्यायेनान्वयः॥ दंपतिशब्दे न द्वंद्वमुच्यते॥ रदशब्दे न द्वात्रिंशत् संख्योच्यते॥
ततश्चेति प्रमितिः सिद्धा॥ तथा चापेक्षाबुद्ध्या उक्तसंख्यासिद्धेत्याशयः॥ ननु नोक्तद्वंद्वसंख्यानापि सैवप्रमाणकन्यासं व१
ख्यापि संभवति॥ द्वंद्वद्वयघटकयोः स्त्रियोरेकद्वंद्वजन्यत्वसंभवात्॥ एकस्माद्द्वंद्वादनेककन्यानामपि संभवात्॥
अत उक्तं यद्यपीति॥ एकस्य द्वंद्वस्य स्युरित्यंतेन शंकाद्वयानुवादः॥ इदृद्वंद्वसंख्यायां तु शब्दस्तद्विषयप्रथमशं
कानिरस्यर्थः॥ साम्यादित्यनंतरं एकस्मादिति सामर्थ्यलभ्यं॥ ततश्च गणनासौकर्याय जन्यकन्याभेदेन जनक
द्वंद्वभेदमारोप्य जनकद्वंद्वैक्येन च जन्यास्वभेदमारोप्य संख्याद्वयोपपत्तिरित्याशयः॥ उक्तद्वात्रिंशत् द्वंद्वानां मध्ये
एकद्वंद्वकुले उद्वोढुः सपिंडकन्यानां त्रिषष्टिरूपामवांतरसंख्यां तावदाह एकस्मादिति॥ प्रथममेकं मिथुनं त
तः पुत्रः कन्या चेति द्वंद्वं द्वितीयस्थाने॥ ततः प्रत्येकं ताभ्यां कयाचित्केनचिन्मिथुनभावं गताभ्यां पुत्रः कन्या चेति
द्वंद्वद्वयं तृतीये॥ ततो द्वंद्वद्वयात्तयैव रीत्या द्वंद्वचतुष्टयं चतुर्थे॥ ततश्च तुष्टयात्तयैव रीत्या द्वंद्वाष्टकं पंचमे॥ ततो

Indira Gandhi National Centre for the Arts

ष्टकानि नैवप्रकारेण षोडशद्वंद्वानि षष्ठे॥ तेभ्यः षोडशभ्यो नैनैव प्रकारेण द्वात्रिंशद्द्वंद्वानि सप्तमेस्थान इति द्विती
१८६ यस्थानप्रभृति षष्ठपर्यंतमेकत्रिंशद्द्वंद्वांतर्गताएकत्रिंशत्कन्याः सप्तमस्थानगतद्वात्रिंशद्द्वंद्वांतर्गताभिस्ता
वताभिः कन्याभिः त्रिषष्टिः संपद्यंते इयं संख्या भिऋतवइति पदेनाभिधीयते॥ अभियस्त्वयः ऋतवः षट्गण
करीत्याशातिलोम्येनांकप्रक्षेपेण संपन्नः पूर्वोक्तद्वात्रिंशत्द्वंद्वेषु प्रत्येकं त्रिषष्ठं गीकारेण पितृवंशेषोडशाभिरभि
क५ कादिषाद स्त्रीकन्यानां संपद्यते इयं संख्या रसैकखदशा इति पदेनाभिधीयते रसाः षट्॥ खं शून्यं दशौ द्वे उत्क्रीत्या
२०१६ इदशांकसिद्धेः वरस्य मातृवंशे उत्क्रीत्यैव आरंभकद्वंद्वसंख्योपन्यासपूर्वकं कन्यानां पंचोत्तरशतसं
ख्यां वक्तुमादमातुरिति॥ अत्रापि वरः प्रथमेस्थाने तस्य पितरौ द्वितीये मातुः पितरौ तृतीये द्वंद्वमेकं तयोः प्र
त्येकं द्वंद्वद्वयं चतुर्थे॥ तत्पितरकाणां च ततस्रुणां भक्तीनां प्रत्येकं जनकद्वंद्वचतुष्टयं पंचमे॥ एतेषां॥ सप्तद्वंद्वानां
मध्ये एकैकान्वये पंचदश सपिंडाः कन्या भवंति॥ यत्किंचिदेकं द्वंद्वं कूटस्थं प्रथमेस्थाने॥ ततः पुत्रो दुहिता चे
ति द्वंद्वं द्वितीये॥ प्रत्येकं ताभ्यां जातद्वंद्वयुगं तृतीये॥ ततः पूर्वोक्तरीत्या द्वंद्वचतुष्टयं चतुर्थे॥ ततस्तयैव रीत्या
द्वंद्वाष्टकं पंचमे॥ एवं पंचदशद्वंद्वप्रविष्टाः पंचदश कन्याः संपद्यंते॥ इयं संख्या संपत्तिः॥ सा च शराभ्रविध
वइत्यभिधीयते॥ शराः पंच अभ्रं शून्यं॥ विधुरेक इति॥ कुलेतियंच मध्ये एक पूर्वोक्तरीत्या पितृवंशागताया षो
डशाधिकद्विसहस्रसंख्यायां मातृवंशागतया पंचोत्तरशतसंख्यया मेलने नमःद्वासंख्या एकविंशतिसहितश १८६
ताधिकद्विसहस्रीरूपोच्यते॥ द्विमांशुदृगधरादस्रा इति॥ द्विमांशुरेकः दृशौ द्वे धरैका॥ दस्रौ द्वे उत्क्रीत्या २१२१

ईदृशांकसिद्धेः॥ ततश्चैतावत्यः कन्याः कुलद्वयगता मुख्यकल्पे न विवाहकर्मणि वरेण वर्जनीया इत्यर्थः॥ ॥
अवादीत्यमनं तेन सापिंड्यस्य विनिर्णयः॥ निर्मत्सराये विद्वांसस्तोषं यांतु तेमुना १ इत्यनंतदेवीये संस्कारदीधितौ
सापिंड्यनिर्णयः॥ अथ गोत्रप्रवरनिर्णयो मदनुजजीवदेवकृत एवास्मिन्नवसरे प्रदर्श्यते॥ तत्र गोत्रलक्षणं बौ
धायनआह॥ विश्वामित्रोजमदग्निर्भरद्वाजोथगौतमः॥ अत्रिर्वसिष्ठः कश्यप इत्येते सप्तऋषयः॥ सप्तानामृषी
णामगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्याचक्षत इति सप्तर्षिशब्दः॥ प्रत्येकं रूढः पंचजनशब्दवत्॥ एतत्स्वरूपानुसा
+ यदप६ रेणागस्त्याष्टमसप्तर्षयस्तं गोत्रमिति स्वरूपार्थसारादयः॥ केचित्तु अगस्त्याष्टमसप्तर्षय एव स्वापत्यानां गोत्रं व
सिष्ठगोत्रावयमित्यादिव्यवहारादित्याहुः॥ तन्न॥ तदपत्येषु वत्सादिषु गोत्रव्यवहारस्योपचारिकत्वप्रसंगात्॥ गो
त्राणामष्टसंख्यात्वापत्त्या गोत्राणां च सहस्राणि प्रयुतान्यर्बुदानि चेति बौधायनसूत्रविरोधाच्च॥ न च भवन्मतेपि व
सिष्ठादिगोत्रव्यवहारस्योपचारिकत्वमिति वाच्यं॥ बौधायनोक्तसमानगोत्रत्वलक्षणगोत्रलक्षणसंख्यानुरोधेन
तस्य स्वीकारात्॥ कौंडिन्यादीनां स्वस्वगणे एकगोत्रत्वेन अविवादप्रयोजकत्व वसिष्ठादीनां सर्वस्वगणेषु सदृशगो
त्रत्वप्रयोजकत्वेन अविवादप्रयोजकतया सादृश्याच्च॥ यद्वा अनादौ संसारे तिर्यगधिकरणस्थतंत्ररलोकन्यायेन
पूर्ववसिष्ठाद्यपत्यत्वेनोत्तरोत्तरेषु वसिष्ठादिषु लक्षणानुगमान्मुख्य एव गोत्रव्यवहारः॥ अगस्त्याष्टमसप्तर्षीणां तु
गोत्रत्वे तदपत्येषु गोत्रव्यवहारः सर्वथानुपपन्न इत्यपत्यान्येव गोत्रं॥ अत्र केचित्॥ तानि पूर्वेषां सप्तर्षीणां परेषां स्वा
पत्यानां च गोत्राणि॥ इदानींतनेषु वत्सगोत्रावयमिति बहुव्रीहिणा व्यवहारात्॥ वत्सश्च जमदग्निगोत्रं वत्स इति तत्सुत

Indira Gandhi National
Centre for the Arts

पेण व्यवहारात्॥ वत्सइदानींतनानां जामदग्न्येष्वगोत्रमित्याहुः॥ तन्न॥ जामदग्न्यगोत्रो वत्स इति बहुशो दृष्टेन व्यवहा
१८० रसंभवात्॥ जमदग्नेर्गोत्रत्वस्य पूर्वोक्तरीत्योपपत्तेः॥ अनादौ संसारे जमदग्नेरपि पूर्वजमदग्न्यपत्यवत्साद्यपत्यत्वसंभवेन गो
त्रे संबंधसंभावना जामदग्न्यगोत्रं येषामिति व्युत्पत्तिरित्याहुः॥ एवं व्यवहारोपपत्तौ सप्तर्षीणां यदपत्यं तद्गोत्रमित्यपत्य
शब्दान्वितसप्तर्षिपदस्य पुनर्गोत्रशब्दान्वयकल्पनानुपपन्नात्रतीत्य नारूढा च॥ तदपत्यानां तु सोपपन्नेति सप्तर्ष्यप
त्यानि स्वापत्यभूतानां परेषामिव गोत्राणीति दृष्टाः॥ न च परेषां तदपत्यानां अत्रानुपस्थितिः॥ प्रकरणानुवृत्तौ मार्क
ण्डेयाद्यपत्यादिशब्दगत लुप्त तत्स्वरूपांशो नत्समर्पणात्॥ न च सप्तर्ष्यपत्यत्व गोत्रत्वे स्मदादीनामपि परंपरया तदपत्यत्वा
दतिप्रसक्तिः॥ प्रसिद्धेनैव तन्निरासात्॥ तथा च गोत्रत्वेन प्रसिद्धं यदगस्त्याष्टमसप्तर्ष्यपत्यं तद्गोत्रं॥ अत एव विज्ञाने
श्वरमाधवमदनपारिजातेषु गोत्रं वंशपरंपराप्रसिद्धमित्युक्तं॥ उक्तं च॥ मदनपादेरपि समाने पिण्डात्मस्ये कुंडिनोऽत्रि
रिति स्मरणलक्षणं गोत्रमिति॥ न त्वेतावता प्रसिद्धिमात्रं लक्षणं॥ माथुरादि प्रसिद्धेरिव गोत्रप्रसिद्धेरपि प्रामाण्यनि
श्चयस्य स्मृत्यधीनत्वात्॥ ननु केवलभृगुगणेषु यस्कादिषु केवलांगिरोगणेषु हरितादिष्वव्याप्तिः॥ तेषां सप्तर्ष्यप
त्यत्वाभावात्॥ न च तेषां गोत्रत्वं नास्तीति वाच्यं तथा सत्येकएव ऋषिर्यावत्प्रवरेष्वनुवर्तेत तावत्समानगोत्रत्व १८०
मन्यत्र भृग्वंगिरसां गणादिति बौधायनोक्तपर्युदासानुपपत्तेः॥ प्राप्तिसंभावनायां हि पर्युदासो भवति यथा यजतिषु
येयजामहं करोतीति सामान्यवाक्याद् अनुयाजेषु येयजामहप्राप्तिसंभावनायां नानुयाजे इति अनुयाजव्यतिरिक्ते
ष्विति पर्युदासः॥ केवलभृग्वंगिरोगणेषु सप्तर्ष्यपत्यबाह्यत्वेन गोत्रत्वप्राप्तिसंभावनाया अभावात्॥ कथमयं

पर्युदासः॥ भृग्वंगिरोगणव्यतिरिक्तेष्वेकप्रवरानुवृत्त्या समानगोत्रत्वमिति॥ ननु नायं केवलभृग्वंगिरोगणवि
षयः पर्युदासः॥ किंतु जामदग्न्यभृगुगणगौतमभारद्वाजांगिरोगणविषयः॥ तेषां सप्तर्ष्यपत्यत्वेन गोत्रत्वात्॥ तथा
चैतेष्वितरगणवदेव प्रवरानुवृत्त्या समानगोत्रत्वसंभावनायामयं पर्युदासः॥ तेन तेषां शास्त्रांतरबोधितद्वित्रि
प्रवरानुवृत्त्या समानगोत्रत्वं नैकप्रवरानुवृत्त्येति चेत्॥ न॥ तथा सति केषुचित्तेष्वेकप्रवरसाम्ये समानगोत्रत्व
मविवादप्रयोजकं नास्ति नापि समानप्रवरत्वं तेष्वविवादप्रयोजकमस्ति॥ पंचानां त्रिषु सामान्यादविवादस्त्रि
द्वयोः॥ भृग्वंगिरोगणेष्वेवमिति स्मृत्या द्वित्रिप्रवरसाम्यस्यैव तेष्वविवादप्रयोजकत्वात्॥ तथा च तेष्ववि
× भा१ वादप्रयोजकाभावाद्विवादप्रसंगः॥ न चेष्टापत्तिः॥ भृगूणां वत्सा विदा आर्ष्टिषेणा इत्येषां सर्वेषामविवा
दः॥ गौतमानां सर्वेषामविवादः इति बौधायनसूत्रविरोधात्॥ तस्मात्तेष्वेकप्रवरानुवृत्त्या समानगोत्रत्वम
विवादप्रयोजकमस्तीति स्वीकार्यं तथा चायं पर्युदासः केवलभृग्वंगिरोगणविषय एव॥ न च तेष्वप्येक
प्रवरसाम्ये संगोत्र स प्रवरत्वयोरुभयोरुक्तन्याये नाभावाद्विवादापत्तिः॥ इष्टापत्तेः॥ स चायं पर्युदासो
ऽसति गोत्रत्वे तूपपन्न इति तेषां गोत्रत्वं स्वीकार्यं॥ तस्माद्गोत्रलक्षणे दृष्टाव्याप्तिरिति॥ अत्रोच्यते॥ प्रवरमं
जरीस्मृत्यर्थसारादिप्रामाणिकनिबंधलिखितत्वेनेदं लक्षणमवश्यं स्वीकार्यं॥ तस्य च केवलभृग्वंगिरोग
णेष्वभावान्न तेषां गोत्रत्वं॥ पर्युदासानुपपत्तेस्तु समाधानमाश्वलायनसूत्रवृत्तिकार आह एषां गोत्रसंदेश
पाता जामदग्न्यादिभृग्वंगिरोगणानां च गोत्रत्वात्तत्साहचर्येण गोत्रत्वभ्रांतिर्भवति॥ तादृशभ्रांतिप्रसक्तिमपेक्ष्य

Indira Gandhi National Centre for the Arts

वादप्रयोजकं केवलेषु गोत्रसूत्रेऽप्यस्ति॥ तेनै केवलानामगोत्रत्वेपि समानप्रवरत्वस्याविवादप्रयोजकत्वमस्ति गोत्र +ता-६
यं पर्युदासः॥ श्राद्धे कुंडगोलकादिनिषेधवदिति॥ स्मृतिचंद्रिकाकारस्त्वाह॥ नास्मिन्बौधायनसूत्रे एकप्रवरा
नुवृत्त्या समानगोत्रत्वमुच्यते॥ किंतु समानप्रवरत्वमेव॥ प्रवरसाम्यस्यैव प्रागुपक्रमात् गोत्रलक्षणस्य त्वनुक
१६१ थनात्॥ प्रवरर्षीणां गोत्राणस्त्वाच्च गोत्रशब्दे न प्रवरलक्षणा॥ सगोत्रसप्रवरत्वयोरविवादप्रयोजकत[illegible] ग्रा२
द्रूपात् गौणी वा॥ तथाचार्यपर्युदासार्थः॥ भृग्वंगिरोगणव्यतिरिक्तेषु एकप्रवरानुवृत्त्या समानप्रवरत्वमवि
वादप्रयोजकमिति॥ अत एवात्र ऋषिशब्दः प्रवरर्षिमात्रपरः॥ न तु गोत्रर्षिपरः॥ भृग्वंगिरोगणेषु तु द्वित्रि
प्रवरसाम्येन समानप्रवरत्वमविर्भृग्वंगिरोगणेषु तु द्वित्रिप्रवरसामानप्रवरत्वमपि अतोयमुक्तः पर्यु
दासइति॥ न च यस्कगोत्रावयं हरितगोत्रावयमित्यादिव्यवहारविरोधः॥ गोत्रसंदंशपाठाद्गोत्रसूत्रभृ
ग्वंगिरोगणसादृश्याच्च भाक्त्या तत्प्रवृत्तेः॥ तस्मादुक्तगोत्रलक्षणं निर्दोषं॥ केचित्तु केवलभृग्वंगिरोगणेषु
महर्षिषु च गोत्रव्यवहारोपपत्तये प्रवरऋषिसंबद्धा ऋषयो गोत्रमिति तल्लक्षणं॥ ते गोत्राणीति सप्त गो६
पाठवचनात्॥ प्रवरर्षिभिर्गोत्राणि वोढव्यानीति तस्यार्थादित्याहुः॥ तन्न॥ अगस्त्याष्टमानामपत्यं गोत्रमि
त्या४ त्यग्निमसहैर्षापाटोक्तिविरोधादस्यान्यथार्थो व्याख्येयः॥ प्रवरैः समानैः गोत्राणि समानानि वोढव्यानीति
॥तथैवादतट्टीकाकारः॥ प्रवरैर्गोत्राणां गणव्यवस्था समानताचेति॥ क्वापि निबंधे अदर्शनादिदं निर्मूल
मिति केचित्॥ अन्ये त्वाहुः॥ यमधिकृत्य येषां प्रवराम्नानं स तेषां गोत्रं बौधायनोक्तिः स्वनुवादत्वादुपलक्षण १६१
॥ अतः केवलानामपि गोत्रत्वमुपपन्नमिति॥ तदपि न तर्कितलक्षणानुरोधेन वाचनिकलक्षणस्य बाधकत्व

स्यानापत्तेः॥ प्रवरघटितगोत्रलक्षणांगीकारे प्रवरो गोत्रप्रवर्तकस्य मुनेर्व्यावर्तको मुनिगण इति माधवाद्युक्त
गोत्रघटिते प्रवरलक्षणे अन्योन्याश्रयापत्तेश्च केवलभृग्वंगिरोगणेषु महर्षिषु च व्यवहार उपपादित एवेति संक्षेपः
॥ तच्च विवादप्रयोजकं सगोत्रत्वं द्विविधं॥ एकगोत्रत्वं सदृशगोत्रत्वं चेति॥ तत्राद्यमेकैकगणांतः॥ पातिषु त
त्रमूलभूतस्य वत्सादेरेकस्यैव गोत्रत्वात् आपिगणावांतरऋषीणां गोत्रत्वं तत्रापि तदपत्यातिप्रातितेषामे
कत्वमेव द्वितीयं तु भिन्नभिन्नगणांतःपातिषु॥ वत्सबिदयोरपि गोत्रयोरेकसप्तर्ष्यपत्यत्वेन सादृश्यात्
एकसप्तर्ष्यपत्यत्वं च तदनुवृत्त्याज्ञायते तदनुवृत्तिरपि द्वेधा॥ क्रियमाणतया सत्तया च॥ आद्या वत्सादिषु
जमदग्न्यादेः॥ तत्प्रवरेषु जामदग्न्यादिपदसंकीर्तनाभावात्॥ केवलं सत्त्वादिगतानुक्रमणेषु भरद्वाजगोत्रस
दंशपाठेन तदनुवृत्तिः प्रतीयते॥ तदुक्तं स्मृत्यर्थसारे॥ क्रियमाणतया वापि सत्तया वानुवर्तनं॥ एकस्य
स्यते यत्र तद्गोत्रं तस्य कथ्यते इति॥ एकस्यागस्त्याष्टमसप्तर्ष्यन्यतमस्य महर्षेरपत्यस्य॥ यत्र कुले तदप
तत्कुलसंबंधि गोत्रं कथ्यत इति वंशपत्वेन पुराणाभिधानात ऊर्णबद्धः सत्तयानुवृत्तेरत्रिगोत्रत्वप्रसंगः॥ कि
तु क्रीयमाणत्वेनैव॥ कपिषु चातादृशी भारद्वाजानुवृत्त्यभावान्न तस्य गोत्रत्वं॥ तथा च तेषां भारद्वाजैः सह
विवाद एव॥ यथाहाश्वलायनः॥ एतेषां तु विशेषोयमसमदप्याभिधानकैः॥ उरुक्षयैश्च कपिभिर्विवादः स्त्रि
भिरिष्यत इति॥ एतेषां भरद्वाजगणानां॥ यत्तु स्मृत्यर्थसारः॥ भारद्वाजाश्वकपयो गर्गाः शैशा इति॥ चत्वारोपि
भरद्वाजो गोत्रे कर्यान्नान्वयुर्मिथ इति तद्गोत्रांतर्गतकपिविषयकमित्याहुः॥ तच्च अविशिष्टस्मरणपरं परान्
+ वणा२

Indira Gandhi National Centre for the Arts

लकैः॥ गोत्रप्रातिपादकैः कल्पसूत्रादिभिर्द्योतितैवसतमानुवृत्तिः सगोत्रत्वप्रयोजिकां गीक्रियते॥ नचैतैर्विश्वा
मित्रगणेष्वत्रः साद्योतिता॥ द्योतिता चापस्तंबादिभिः सर्वैः कपिषु भरद्वाजस्य॥ अतश्च गर्गसंदेशेनपागात्॥ अन्यथा
१६२ क्रियमाणतयानुवृत्त्यावप्यनाश्वासः स्यात्॥ तत्र कल्पसूत्रप्रामाण्यमिति॥ तत्प्रकृतेपि तुल्यं॥ आश्वलायनश्लोक
स्तु निर्मूलएवन्नाष्यकारादिभिरव्याख्यानात्॥ स्मृत्यर्थसारादिप्रामाण्येनैव विरोधाच्च॥ गर्गांतर्गतकपि
विषयत्वाविवादनिषेधस्य न युक्तं॥ गर्गतुल्यकत्वतया निर्देशो न स्वतंत्रकपिप्रतीतेः॥ गर्गांतर्गतकपीनाम
भावाच्च॥ कात्यायनादिभिः कपिन्नमीनां तदंतर्गतत्वेनोक्तत्वात्॥ यत्त्वाश्वलायनसूत्रे मुद्गलादीनां केवलां
गिरसांभारद्वाजगर्गादिसंदंशपाठात्तत्र भारद्वाजस्य सततयानुवृत्तिप्रसंग इति॥ तदपि न बौधायनादिभिः
सर्वैः केवलांगिरोमध्ये तेषांपाठात् आंगिरसत्वमात्रेण चाश्वलायनीयसंकरपाठोपपत्तेः॥ तस्मात्सत्य
नुवृत्तिरपि सगोत्रत्वप्रयोजिकेत्यलं प्रपंचेन॥ तत्सिद्धं गोत्रलक्षणं॥ अथ प्रवरलक्षणं॥ तत्र प्रवरणा
निआर्षनानि प्रवरा इति निबंधकारैर्व्याख्यातं॥ कस्य प्रार्थनानीत्यपेक्षायां बौधायनादिसूत्रेषु एकार्षेयः
प्रवर इत्याद्युक्ता तद्धितवृत्त्यस्ययांतप्रयोगादृषिसंबंधेनाग्नेः प्रार्थनानीति ज्ञायते॥ होतृमंत्रेऽपि अग्ने म
हां असीत्यादिनाग्निप्रार्थनेकृते तद्धितांतभार्गवादिशब्दप्रयोगः क्रियते॥ पुनश्च देवेद्धो मविद्ध इत्यादि
नाग्नेः प्रार्थनं क्रियते॥ तत्संदंशपाठाद्भार्गवादिपदैरपि ऋषिसंबंधेनाग्नेः प्रार्थ्यते॥ यथायं यजमानोऽस्य १६२
वंशोत्पन्नत्वाद्भार्गवः॥ तथात्वमप्यादित्वात्स्वमपि भार्गव इति॥ अस्य फले यथा भृग्वादीनां प्रसिद्धब्राह्मणा

नांहविस्त्वपादेवा अतिनियतेतथा तद्वंश्यस्यास्य यजमानस्य प्रसिद्धब्राह्मणस्य हविर्देवान् प्रतिनेयमिति स्व
चनं॥ आध्वर्युमंत्रेपि ऋषिसंबंधेनाग्नेः प्रार्थनं क्रियते॥ एवं द्विमंत्रः॥ अग्निर्देवोद्धो ता देवान्यक्षद्विद्वांश्चिकित्तुमनु
ष्यवद्भरतवदित्याद्युक्त्वा जमदग्निवदित्यादिहोतृविपरीतक्रमेणवत्यस्ययांतप्रवरपदानुच्चार्य ब्रह्मण्वदाच वक्ष
द्ब्राह्मणा अस्य यज्ञस्य प्राविता रो मु कृशर्मार्हानुष इति अस्यार्थः॥ हे अग्ने प्रमुखाः ब्राह्मणाः यथाग्निर्देवसंबंधी
होता चिकितमनुभरतानामेतद्यजमानपूर्वजानां जमदग्न्यादीनां ब्राह्मणाश्च यज्ञदेवताः यज्ञमानांश्चाधिकारिणो
विद्वान् देवानिंद्रादीन्यक्षदावक्षच्च॥ तथामुकशर्मापि मानुषोपिहोतातदपत्यत्वेनतत्सदृशस्यास्य यजमान
स्य यज्ञे देवहोत्रभ्यधिष्ठानबलेन विद्वान् देवान्यजत्वावदतु चेति॥ तिनोभयत्रापि अग्नेरेव प्रार्थनाख्यवरणकर्म
त्वं॥ ऋषीणां तु विशेषणत्वेन तत्संबंधः॥ एतत्संबंधविवक्षयैव ऋषेरिदमार्षं नाम प्रवर इति मिताक्षरायामुक्तं॥ न
तु प्राधान्येनतत्प्रकाशनमुभयमंत्रान्वयापत्तेः॥ केवलप्रातिपदिकनऋषिप्रकाशनसंभवात्तद्धितवत्य
यांततावैयर्थ्याच्च॥ अत्रकेचित्॥ मंत्रकृतो वृणीत इति विधौ मंत्रकृतां कर्मत्वप्रतीतेर्नप्रत्रीयंत इति व्युत्पत्त्या ऋ
षीणामेव प्रवरत्वं॥ मत्स्यपुराणे॥ गुरुणा वनाश्रिशाद्वान्ग्ययुश्च इत्येते प्रवरा मता इति कीर्तनात्॥ अतो नाग्नेर्वर
णकर्मत्वं॥ उक्तविध्यनुसारेण मंत्रान्वयानां जस्यनदोषाय॥ ऐंद्रीवत्॥ तद्धितादेश्च स्वार्थपरत्वादिनायोजना
दित्याहुः॥ तन्न॥ तद्धितवत्यस्ययांतत्वस्याग्निप्रकाशकमंत्रमध्यपाठस्य ऋषिपरत्वे आनर्थक्यप्रसंगेना
नर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेन विधीनामेवानांजस्य कल्पनस्योचितत्वात्॥ मंत्रकृतः सं

Indira Gandhi National Centre for the Arts

कौसीग्निं वृणीत इत्यथ्याहारेणाविषयो व्याख्येयाः॥ यद्वाग्निनैवाध्याहारं ऋषीणामग्निविशेषणत्वेन वरणं प्रसन्नी
१६३ सितकर्मत्वाभिप्रायेण व्याख्येयाः॥ एवं मत्स्यपुराणमपि कर्मानुसत्ता करणानुसत्ता वा व्याख्येयमिति दिक्॥ तत्सिद्धं
प्रवरणान्यग्निप्रार्थनानि प्रवरा इति प्रवरलक्षणं॥ तत्राविवादप्रविवादप्रयोजकं समानप्रवरत्वं द्वैवि
ध्यं॥ एकप्रवराणां द्विप्रवरसाम्यमविवादप्रयोजकमिति मंतव्यं॥ पंचानां त्रिषु साम्यादविवादस्त्रिषु द्वयो:
॥भृग्वंगिरगणेष्वेवं शेषे ष्वेकोपि वर्जयेत् इति वचनात्॥ शेषेष्वेकोपि प्रवर: समानश्चेत् विवाहं वारयेदित्य ष्ठ-
र्थ:॥ इदं चासंकीर्णकेवलभृग्वंगिरोगणेष्वविवादप्रयोजकं॥ तेषां गोत्रत्वाभावेनासमानगोत्रत्वस्याप्रस
क्तेः॥ अत एव तेषु द्वित्रिप्रवरसाम्याभावे विवाह एव नेति॰ समानगोत्रत्वं वा संकीर्णकपीनां भरद्वाजगणे
सदाविवादप्रयोजकं॥ तेषामेकप्रवरसाम्येपि अंगिरोगणत्वेनावेक्षितद्वित्रिप्रवरसाम्यस्याभावात्॥ संकी
र्णत्वे तु प्रायेणा: सर्वत्रैवेत्यलं भूयसा॥ गोत्रप्रवरसंबंधिपरिभाषानिरूपणं॥ कृते गोत्राणि तेषां च प्रवरा
न् गणयाम्यहं॥ तत्र भृगवो द्विविधा:॥ जामदग्न्या: केवलाश्च द्वौ जामदग्न्यौ॥ वत्सविदौ॥ केवलास्तु॥ वत्सा:
॥आर्ष्टिषेणा: यास्का:॥ मित्रयुव:॥ वैन्या: शुनका इति॥ तत्र द्विविधा अपि वत्सास्ते च गणं उच्यंते॥ मार्कंडेया:॥
मांडूकेयो॥ माडव्या:॥ कासय:॥ आलेखना: दार्भिषणा:॥ शार्कराक्षा:॥ देवतायना: शौनकायना:॥ माध १६३
केया:॥ पार्षिका:॥ सांका:॥ प्रातायना:॥ पैला:॥ पैंगलायना:॥ दाध्रेषका:॥ वास्रकय:॥ वैश्वानरयो वैदि
नरय:॥ वैरोहिता:॥ वाला:॥ बभ्रा:॥ गौष्टायना:॥ टीकय:॥ काश्यकृत्स्ना:॥ वाह्नूतका:॥ कृतनागा:॥ एतिशा

य:॥ सादना:॥ सोषा:॥ स्पंदनय:॥ करेरणय:॥ लवेरणय:॥ सौगोलय: सोजमाध्योदा:॥ मात्स्यौ नाडायनो वैरायणो॥ वै-२
यना:॥ जानायना:॥ पाणिनि:॥ वाल्मीकि:॥ स्थौलपिंडय:॥ सौषातवा:॥ जिह्वीतय:॥ सावर्णि:॥ वाकायना:॥ व
लायना:॥ सौकृतयो मंडव:॥ सौविष्ट:॥ योदस्ताश्रय:॥ शौद्धकयो॥ शौद्धाकयो॥ वैकर्णा:॥ द्रोणकजिह्वयो॥ और
सय:॥ कंबलोदरय:॥ वाकारकृतो॥ वैदलयो॥ सांकवा:॥ कास्तंबरा:॥ काखा:॥ तामसा:॥ विरूपाक्षा:॥ हकाश्व:
उत्ते मैन्यवो॥ द्विमत्या:॥ आर्पायणा:॥ पार्कायणा:॥ कादूायणौ:॥ वायनय:॥ वायनिन:॥ शार्ङ्गरवा:॥ चांद्र
मसा:॥ गांगेया:॥ नैपेया:॥ याज्ञिया:॥ वाबालि:॥ वाद्रुमित्रायणा:॥ आपिशलयो॥ बैष्टपुरयो॥ लोहितायना:
॥ उद्धाक्षा:॥ मालायना:॥ एतावंतो बौधायनोक्ता:॥ कात्यायनलौगाक्षिभ्यामभ्युक्ता: नालायना:॥ वागायना:
॥ अनुपातकयो॥ जैह्नतयो॥ जीवंतय:॥ कांबलोदरयो॥ वैरायना:॥ रेखायनय:॥ पार्षतप:॥ पार्णिलय:
॥ उज्वयमाना:॥ सात्यकर्णयो॥ वालाकय:॥ तौलकेशिन:॥ जरत्नागा:॥ आर्तनागा:॥ आजिह्वीता:॥ अतिथय:
॥ स्थौमोगिरय:॥ स्थौला:॥ सोरवा:॥ बर्हिषो॥ देवमतयो॥ गार्ग्यायणा:॥ गेह्वायना:॥ गौष्टायना:॥ वैशंपायना:
॥ गालवा:॥ सांकृतय:॥ वाणकेय:॥ एतिकायना:॥ आग्नेया:॥ आत्रेया:॥ लाक्षेया:॥ लौकुचय:॥ लालाटय:॥ आ
वय:॥ आगावय:॥ सौषिकय:॥ सात्यकायना:॥ नैकर्षय:॥ शाकल्या:॥ पाकानुमतयो॥ जैकजिह्वयो॥ जै
ह्याप्पनय:॥ आश्मकमा:॥ कौचहस्तयो॥ अनुलोमिन:॥ क्रौंचा:॥ वैक्षा:॥ क्रौचासष:॥ सौरध्वजय:॥ वाध्य
क्षेया:॥ निरीणय:॥ वासन्यो॥ रौहित्यायनि:॥ कृपानीलु:॥ सावर्णि:॥ विकस्वरु:॥ विष्णु:॥ तौलकेशि:॥ ज
ह्दिन:॥ वीतिन:॥ फेनपा:॥ तलिन:॥ शिखापति॰ र्जलधि:॥ सेनाजित्॥ कृत्स्न:॥ पैंगलायनि: दिव:पति: त्र्यष

Indira Gandhi National
Centre for the Arts

न: सुत: पलव:॥कोपियज्ञ:॥मित्रयज्ञ:॥आमिलायन:॥आपति ध्वे कार्णिमालुकायनि॥लास्पण:॥शाल्ययनि:
॥माल्यायनि:॥कौटलि:॥सौक्ति:॥कोवर:॥साङ्गी॥सांद्मणि:॥नैकजिह्व:॥जिह्वास्थूल्य:॥कैललेटि:॥हिकश्वरि:॥
१६५ सारध्वजि:॥नैमिरेपा॥लौष्टाक्षि:॥गरेवणि:॥पौर्णसौगंधि:॥काशीकृत॥विलकृत॥विलम्रत॥सोमदायना:॥स्वानुभ
तयो॥मंडचित्रा:॥शौक्रायणा:॥त्वाष्ट्र्या:॥कोवर्दुडय:॥शौमायना:॥शौकपौर्णयो॥श्रीदिमतय:॥मायामति:॥शा
वाकि:॥कौशनो॥मौद्गल्य:॥कारकारवच:॥सांतपनायना:॥गेल्द:॥भेढ्ढि:॥किरूष:॥स्तन्वत:॥श्रौलंधि:॥वापर्गिर
णि:॥रूपनपागति:॥नैकषि:॥शौद्रकार्णि:॥निडायन: २०५ इत्येते वत्सा:॥तत्र ये जामदग्न्या वत्सा: तेषां पंच प्रवरा:॥
भार्गवच्यावनाप्नवानौर्वजामदग्न्येति॥त्रयो वा॥भार्गवौर्जमदग्न्येति॥ये त्वजामदग्न्या वत्सा:॥तेषां त्रय:॥भार्गव
च्यावनाप्नवानेति॥अथ जामदग्न्या विदा:॥वैधायना विदा: शैला:॥अवटा:॥प्राचीनयोग्या:॥अन्नयदाना:
॥कांडरथयो॥वेनन्न त:॥पुलस्त्य:॥आर्कायना:॥जैंजायना: २० इत्यादयो विदा: तेषां पंच प्रवरा:॥भार्गवच्या
वनाप्नवानौर्ववैदेति॥त्रयो वा भार्गवौर्वजामदग्न्येति॥अजामदग्न्य विदानां भार्गवौर्वजामदग्न्येति त्रय इति का
त्यायना:॥वत्सानां भार्गवच्यावनाप्नवानेति त्रय इत्यपि तेनैवोक्तं॥पंचप्रवरेषु विदेषु जमदग्ने: सत्त्वयानुवृ
+ णा।३ त्ति:॥आर्ष्टिषेण:॥नैऋरथयो॥ग्राम्यायणाय:॥कार्णायनाश्वी ऋायणा:॥पौषकलायना: सिद्धा:॥सुमनायना: १६६
॥गौराग्नि:॥राग्नि:॥मन्थंदीयो॥मार्गपथ्यो॥नैकर्षि: आपस्तंवि:॥वाल्वि:॥कार्दयापनि:॥गार्द्दग्नि:॥अनूप:॥व
द्रायनि:॥कवि:॥आश्वग्नि:॥२१ इत्यार्ष्टिषेणा:॥तेषां पंच प्रवरा:॥भार्गव० च्यावन० प्नवार्ष्टिषेणानूपेति॥
+ जंभा६ आ१

॥त्रयो वा० भार्गवार्ष्टिषेणानूपेति॥केचिदेष्वपि जमदग्ने: सत्त्वयानुवृत्तिमाश्रित्य जामदग्न्यत्वमाहु:॥तस्मात्सर्वसाराद्वि
विरुद्धं॥पंचावत्तिता त्वेषामजामदग्न्यत्वेपि च निकीएते पंचावत्तिन इति वौधायनवचनात॥अविवादो वत्सविदाभ्यां
सह त्रिप्रवरसाम्यात॥यद्यपि त्रिप्रवरार्ष्टिषेणानां नान्ये:॥सह द्विप्रवरसाम्यं॥तथापि पंचार्षेयसंगतमपि प्रवरसाम्य
मेषु अविवाद प्रयोजकं॥वत्साविदार्ष्टिषेणा इत्येतेषामविवाद इति वौधायनवचनादिदं ह्या:॥न च पंचप्रवरेषु वि ति४
देष्वपि जमदग्ने: सत्त्वयानुवृत्तो मानाभाव:॥तत्र जामदग्न्यत्वप्रयुक्तो विवाद समन्वयात॥यथादाश्वलायनसूत्रवृत्ति
+ म्प६ कृत॥औवजमदग्निश्रा इष्टो जामदग्न्यत्वप्रयुक्ताविति॥त्रिप्रवरेषु तदनुवृत्त्या ऽन्यत्रापि तद्वृत्त्यनसंभवाच्च॥अतो जाम
दग्न्य वत्स विदयो: सगोत्रत्वसप्रवरत्वाभ्यामविवाद:॥अजामदग्न्य वत्सार्ष्टिषेणाभ्यां सप्रवरत्वाच्चेति दिक्॥वात्सानां त्रय:
॥भार्गवच्यवनाप्नवानेति॥वत्सपुरोधसयो: पंच॥भार्गवच्यावनाप्नवानवात्सपौरोधसेति॥वेजवनिपथितयो: पंच॥
भार्गवच्यावनाप्नवानवेजवनमथितेति॥एतेपि केचित॥एतेषां परस्परं पूर्वोक्तैश्चाविवाद:॥प्रवरसाम्यात॥यस्का:॥मौ
नोभू कौवाधुलो वर्षपुष्पो भागलेयो भागवित्तेयो दुर्दिनो भास्करो देवतायनो वा कैलेयो मोघमेयो: वासय:॥कौशेप
या:॥कौविल्या:॥सत्यकाय:॥चित्रसेना:॥भागुरि:॥छ्य:॥वादव्या:॥माधूल:॥मोसला:॥जीवंत्यायना:॥अर्थलेय
योष्ठकारस कयो मदाकधौवोरेया॥गौरिशिता:॥दैधीचिता: पंचालवा: पौष्मावता:॥गोदायना:॥चंडमोदनो भागलि
भागवित्ति: पिलि:॥खलि:॥कारूपपि:॥वालेपि:॥समदागायि: सौरित्वरि:॥भागंतप:॥सानुष्टयो मादायना: शालंकाय
ना:॥ताकी: धावरेया: शार्कराक्षि: कौटिल्यो विलेमि वाढ्डियो दालेयो दीर्घचित:॥इत्येयस्का:॥पञ्चैते तद्वा इति केचित
॥एषां त्रय:॥भार्गववैतहव्य सावेदसेति॥मित्रयुव:॥रंध्यायना:॥सापिंडिना:॥सुरभिनेया:॥माल्या: मद्रावाल्मी:
+ यो४ धा१ ते२

१६५ ॥ तार्क्ष्यायणाः ॥ कैतवायनाः ॥ खालायनाः ॥ शाकटाक्षाः ॥ मैत्रेयाः ॥ जैणायनाः ॥ रौक्ष्यायनाः आपिशालाः ॥ आदित्य
यनाः ॥ हंसजिह्वाः ॥ रौप्यायणाः ॥ सात्यदिनः ॥ पिंडिकाक्षाः मोदायनाः ॥ कापिशायनाः ॥ शाडेयाः ॥ साहितामित्रयुजः ॥
आपिशायनाः ॥ पाविकायनाः ॥ वाध्र्यश्वो दिवोदासः ॥ ३१ ॥ इत्येते मित्रयुवः दिवोदासा इति केचित् ॥ एषां त्रयाः ॥
भार्गववाध्र्यश्व दैवोदासेति ॥ अंत्योपांत्ययोर्मंत्ययो वा ॥ एको वा ॥ वाध्र्यश्वेति ॥ भार्गवच्यावन दैवोदासेति वा ॥ वे
न्याः ॥ पार्थाः ॥ मवाष्कलाः ॥ वैपेनाः ४ इत्येते वैन्याः ॥ वैपेता इति केचित् ॥ तेषां त्रयः ॥ भार्गववैन्यपार्थेति ॥ शुनकाः ॥ गा
र्त्समदाः ॥ यज्ञपतयः ॥ सौगंधयः ॥ खार्दमायनाः ॥ गार्ग्यायणाः ॥ मत्स्यगंधाः ॥ श्रोत्रियाः ॥ तैत्तिरीयाः ॥ सौकराः ॥ मौ
र्णायाः ॥ प्रत्यूषाः ॥ कार्दमायनाः ॥ चौक्षाः ॥ श्रौण्याः ॥ शाम्भवायनाः ॥ राजवाधनाः १७ इत्येते शुनकाः ॥ एषामेकः शौ
नकेति ॥ गार्त्समदेति वा ॥ द्वौ वा भार्गवगार्त्समदेति ॥ त्रयो वा भार्गव ॥ शौनहोत्र ॥ गार्त्समदेति ॥ शौनहोत्रेत्यस्य स्था
ने शौनकेति केचित् ॥ यस्कादीनां चतुर्णां स्वस्वगणांतरित्वात् परस्परं वैश्वैश्च सह विवाहो भवत्येव ॥ द्वित्रिप्रवरसाम्या
भावात् ॥ तदुक्तं स्मृत्यर्थसारे ॥ यस्कामित्रयुवो वैन्याः शुनकाः प्रवरैक्यतः ॥ स्वस्वांतरित्वाभरणां सर्वे विवदेयुः परा
वरैः ॥ द्विणामविवादः पञ्चांतरयादिणां मित्रयूनां विवाद एवेत्यन्ये ॥ चतुर्विधशौनक+ प्रवरैक्यतः स्वगणांतरित्वेति संब
धाः ॥ मित्रयूनां पाक्षिकद्वित्रिप्रवरसाम्यात्रिप्रवरैर्वत्सादिभिः सहाविवाद इति केचित् ॥ तल्लक्षणात्+ ॥ प्रवरसा
म्याभावादिति केचित् ॥ वृद्धास्तु ॥ एकागणस्थत्वाद्गोत्रत्वाभावेऽप्यविवाद एव ॥ एतेषामविवाद इति कात्यायना
दिभिः सर्वेषामविवादाभिधानात् ॥ स्वगणांतरित्वेति स्मृत्यर्थसारोक्तेत्याहुः ॥ क्वचित्त्वधिकं गणद्वयमुक्तं ॥ वेदवि १६५
श्वज्योतिषां त्रयः भार्गववैदवैश्वज्योतिषेति ॥ शाठकामाठराणां त्रयः भार्गवशाठरमाठरेति ॥ अनयोः परस्परं

+कानांपरस्परं विवाहः एव ॥ ५

पूर्वैश्च विवादः ॥ इति भृगवः ॥ आंगिरसास्त्रिविधाः ॥ गौतमाः ॥ भारद्वाजाः ॥ केवलाश्च ॥ गौतमांगिरसः सप्त ॥ आयास्याः
शारद्वताः कौमंडाः दीर्घतमसः कारेणुपालयः वालयः वामदेवाः औशनसाश्च ॥ आयास्याः औशिवेधाः ॥ मूढरथाः ॥
सत्यकयः ॥ स्वैदहाः ॥ कौमारवत्साः ॥ तोंडदर्भिः ॥ देवकिः ॥ सात्यमुग्रिः ॥ कौवाह्याः ॥ वौम्याः ॥ नौकरिः ॥ स्वैतेषकिः
सत्यकयः ॥ कीलालयः ॥ कारुणयः ॥ कांटोरयः ॥ काश्विवाजः ॥ साक्षीकः ॥ पार्थिवाः १६ इत्यायास्याः ॥ तेषां त्रयः ॥ आंगिरसा
यास्यगौतमेति ॥ अथ शारद्वताः ॥ अभिजिताः रौहिण्याः ॥ क्षीरकरंभाः ॥ सौमुचयः ॥ सौयामुनाः ॥ औपविंदवः ॥ र
द्रगणाः गणयो भाबण्याः क्षौलेयाः ॥ नैकरयः ॥ करमोगिण्याः ॥ सैंधवागतवाः सांगराः सौमिनयः ॥ पौम्पिंडयः ॥ भाग
+ गोत्राः १ लोः ॥ कुंडवाः ॥ कारोंगैः ॥ काशावारयो मांधर्थीः इववीरोहितायनाः ॥ अंगारकाः ॥ कोलायनाः ॥ कास्तोर्प्ययोश्च
रुणथः पार्थिवाः मोददायनाः स्कंदाः सरावाः कौटिल्याः ॥ वासमूलयो वासुपुष्पयो वासस्तेवयो वासचूपयः का
चासयः ॥ श्यावारषयः ॥ करेलयः ॥ उतथ्याः ॥ वोधयोनगाः ॥ सुगोमान्यः क्षीरवष्टिकयो रादूकर्णयः सौपुत्रयः
॥ सामलोमकयः पौष्कंजितयो भागशाश्वडांवकाः सुतपाः सुरेषिणः ॥ रौहिणायनः कौष्टावनयः ॥ अरुणामनम
नयः ॥ सौदायनयः ॥ कासोरवः ॥ कौशल्याः ॥ रौहिणेयाः ॥ काराथनयः मूलयः वासवः पुष्पवंतः पाविकाः ॥ रैव
याः ॥ औपमन्याः ॥ छैटिकाः ॥ शौनरयः ॥ शायपः ॥ खरिकाः ॥ नैकषयः ॥ तौदेयाः ॥ वाल्वौक्षाः ॥ इत्येते शारद्वताः
॥ तेषां त्रयः ॥ आंगिरसः ॥ गौतम ॥ शारद्वतेति ॥ कौमंडाः ॥ मामंथरेषाणाः ॥ मासुराक्षाः ॥ काष्ठरेखयः औजा
यनाः ॥ वोजायनाः काक्षीवताः ॥ औशिजाः ॥ मासुरेखयो ॥ वाशयः १० इति कौमंडाः ॥ तेषां पंच ॥ आंगिरसौतथ्य
॥ काक्षीवत ॥ गौतम ॥ कौमंडेति ॥ दीर्घतमसां पंच ॥ आंगिरसौ ॥ तथ्य ॥ काक्षीवत ॥ गौतम ॥ दीर्घतमसेति ॥ त्र

Indira Gandhi National
Centre for the Arts

नं२

यो वाऽऽंगिरसौतथ्य॥दीर्घतमसेतिकारेणुपालयोवास्तव्याः॥श्वेतीयाः॥पौलिष्टाः॥औदजायनाः॥माधुक्षारः॥अ
जगंधाः७इतिकारेणुपालयः॥तेषांत्रय॥आंगिरसगौतमकारेणुपालेति॥वामदेवांमेत्रयः॥आंगिरस॥वाम
१८६ देव्य॥गौतमेति॥आंत्ययोर्वात्ययो वा आंगिरसांवामदेव्यबार्हदुक्थेतिवा औशनसाः॥दिरुपाः॥प्रज्ञास्ताः॥सुरु
पाक्षाः मदोदराः॥विकंदताः॥सुबुध्याः॥निदताः एणदार इत्यौशनसाः॥तेषांत्रयः॥आंगिरसगौतमौ॥शनसेति
॥क्वचिदन्येप्यष्टोउक्ताः॥औतथ्यानांत्रयः॥आंगिरसौतथ्य॥गौतमेति॥औशिजानांत्रयः॥आंगिरसौशि
जकाक्षीवतेति॥आयास्योशिजानांपंच॥आंगिरसायास्यौशिजगौतमकाक्षीवतेति॥रहूगणानांत्रयः॥आं
गिसराहूगणगौतमेति॥सोमराजानांत्रयः॥आंगिरस॥सोमराज्य॥गौतमेति॥बृहदुक्थानांत्रयः॥आंगिरस
बार्हदुक्थगौतमेति॥कांक्षीवतांपंच आंगिरसौतथ्यगौतमौशिजकाक्षीवतेति॥रायुवानांत्रयः॥आंगिरस॥रा
पुव॥गौतमेति॥एषांसर्वेषांगौतमांगिरसांपरस्परमविवाहः॥गौतमस्यक्षियमाणसत्तयावानुवृत्ते: सगौतैत्वात् २७
॥प्रायेणद्वित्रिप्रवरसाम्याच्च॥इतिगौतमाः॥अथभरद्वाजाः॥तेचत्वारः॥भरद्वाजाः॥कपयः॥गर्गाः॥रौक्षाय
णाश्च॥भरद्वाजाः क्षाम्यायणाः॥मेगडाः॥दवाश्वः॥इद्रदत्ताः॥षाषंडायोवादलज्ञाः॥वात्सोगाः॥वसीतायनाः॥
तैदेहाः॥आग्लाः॥औहाः॥श्वरयः॥पारिणङ्याः॥केशखेयाः॥ग्रौंकयः॥ऊरूढाः॥खारीग्रीवयः॥औपसयो॥व ११
यो॥द्विवेदाः॥अग्निवेशाः॥शठाः॥गौरिवायनाः॥खिलकाः॥स्तलकर्णाः ऋक्षाः॥माणमिंघाः॥कद्दादकाः॥स्वा
ज्वलायाः॥वेलाः॥खोरडाः॥देवयो॥नरुंडयाः॥नङ्गादयः॥सोरमराः॥श्रुंगाः॥देवमतयः॥इषुमताः॥औदमेय १८६
यः॥प्रवाहणेयाः॥कल्माषाः॥राजस्तवयः॥संयोपकृतयः॥पराद्रयोः॥वलनोकयाः॥रुद्रांगयथाः॥शाल

ह्लयो॥वेदवेलाः॥नत्यायनाः॥नत्याः॥शाललयः॥शार्दूलयः॥काङ्कलः वाष्कलाः॥सैद्यकेयाः॥कौडायनाः॥कौडिन्याः
॥ब्रह्मस्तंभाः॥राजस्तंभाः॥अग्निस्तंभाः॥वायुस्तंभाः॥सूर्यस्तंभाः॥सोमस्तंभाः॥विष्णुस्तंभाः॥यमस्तंभाः॥इंद्रस्तंभाः॥आ
पस्तंभाः॥येचान्येस्तंभशब्दांतास्तेपि॥आरणाः॥सिंधवाः॥कौमुदगंधयः॥शिखायनाः॥मात्रेयायणाः॥नामाण्याः॥
कुल्माः॥कौकाक्षयः॥तैतुदयाः॥दार्भयः॥शामेयाः॥मत्स्यक्राथाः॥कारुणायनाः॥कारुपथयः॥कारिषायणाः॥का
वल्याः॥वालिशायनः॥सौटयः॥वाराद्रयः॥बिविपयः॥शिलायलयः॥पैलाः॥शौलंकायनयः॥जैमलायनयः॥सा
हकयो॥लाभायनयः॥आपस्तंबयोधौताचकयो॥जैत्यश्रीणयो॥वाह्मगद्धयः॥मदाकयः॥स्वारयीवयो॥वाज्ञव
ष्टयः॥प्रवादयः॥दशादीकपः॥तूर्णकर्णयः॥कौचयः॥देवगारयः॥हारिकर्णयः॥सपौलयः॥सौगेयाः॥मा
लोद्राः॥खगखलायनाः॥सौविष्टाः॥हालोद्राः॥सात्यमुग्रयो॥लेखायनाः॥कारुणायनाः॥चेलाः॥रुद्वाः॥किका
यनाः॥वालललज्ञाः॥गौरिवाः॥सौपथ्या॥सौभरा॥सौबुद्धयो॥धौरकुकुलिकाः॥विकाराः॥कुपिपाः॥मालाह्लाः॥श्र
पथ्याः॥निद्रांगवथाः॥शैखेयाः॥माधुकवर्याः॥कांडन्याः॥औवेयाः॥मैथुनमतयः॥कौरुलेत्रयाः॥रवारणाद
यः॥देवस्थानयः॥शालुद्रयो॥गोरवपिंगलयो॥गांयोदयो॥अविकारयीवयो॥अयंवकयो॥माषायणाः॥
शाक्काः॥काजाः सौविश्वाः॥कामुकायनाः॥सिंधवः॥सारावयः॥वाद्रयः॥सामस्तंवयः॥सोमस्तंवयः॥ब्रह्म
स्तंवयः॥आश्वलायनयो॥मार्कंडयो॥कुक्काः॥सोमयः १६०॥इतिभरद्वाजाः॥तेषांत्रयः॥आंगिरस॥बार्ह
स्पत्य॥भारद्वाजेतिकूपयः॥स्वास्तितरयोर्बिंदवोदंडिनो॥दिव्यशाकयः॥पतंजलयो॥भूपासिनः॥तेरंघयः

क

Indira Gandhi National
Centre for the Arts

॥चैतकय:॥ऊर्ध्वी:॥स्ता राजकौशिन:॥कालसिन:॥कण्वा:॥करीतय:॥कन्यायना:॥आमावाश्यायना:॥का
१६७ त्यायना:॥कपेतरा:॥स्विदतरा:॥जलसिंचय:॥कुसीदरय:॥सौजटय:॥सारवय:॥सल्लय:॥दण्या:॥सावस्था
यना:॥१६ इतिकपय:॥तेषांत्रय:॥आंगिरसा:॥महीयवो॥रुक्षयेति॥आंगिरसा॥महीयवो॥रुक्षयसेत्याश्व मे
लायनपाठ:॥केचित्वंगिरसबार्हस्पत्यभारद्वाजेति॥आंगिरस॥बार्हस्पत्य॥काप्येति॥पक्षद्वयमाहु:॥गर्गा:
॥सांभरायणा:॥सखीनयो:॥माधरायणा:॥वादुलयो॥आश्वकृतो॥आश्वविंदव:॥कौश्वकय:॥सौयामुना:॥आग्नि
नाहयो॥होत्रापवय:॥सत्यापचया॥वात्स्यातरायणा:सांभारा:वत्सचतुरायणा:॥काण्वायना:॥सांख्यायना:॥का
नायना:॥केवलायना:॥कौंडायना:॥भारमता:॥पैडंपगा:॥पेल्वकायना:॥विश्वापवकायना:॥कौलिन:॥मधुरा
हा:॥सांपरिवारा:॥वालाकय:॥शांलायनय:॥साहनयो॥आधुरावहा:॥ऐंद्रालय:॥लोपकृत:॥नालकृतो॥वांस
यना:॥नारायणा:॥श्यामायना:॥रामिनो॥गांगिन:॥कारिण:॥आस्पिन:॥क्रौडिन:॥रावारता:॥नालविद:॥औ
पमर्कटा:॥कार्षायना:॥कौंजवय:॥शालंकायना:॥कोलाश्वा:॥श्यामा॥५० इतिगर्गा:॥तेषांपंच॥आंगिरस॥बा त्र ४
र्हस्पत्यभारद्वाज॥सैन्य॥गार्ग्येति॥त्रीन्वेतिकचित्पाठ:॥त्रयोवा॥आंगिरस॥सैन्य॥गार्ग्येति॥अत्ययोर्व्यत्ययोवा १६७
भारद्वाज॥गार्ग्यसैन्येतिवा॥तित्तिर:॥कापिभुवय:॥खंडिताइत्येषां गर्गाणां त्रय:॥आंगिरस॥सैन्य॥गार्गेति॥आं
गिरस॥तैतिर॥कपिभुवेतिवा॥रौक्षायणा:॥कपिला:॥रावला:॥शिकिला:॥चिभिंडय:॥वौशुमा:॥अग्निजिह्वा:
॥कण्वासुता:१ इतिऋक्षा:॥तेषांपंच॥आंगिरस॥बार्हस्पत्य॥भारद्वाजवांदन॥मानवसेति॥त्रयोवा॥आंगिरस

॥वांदनमातवचसेति॥आत्मभुवांपंच॥आंगिरसबार्हस्पत्यभारद्वाज॥मंत्रवरात्मभुवेति॥अयंगण:कचित्॥ए
षांभरद्वाजांगिरसांपरस्परमविवाह:॥क्रियमाणत्यासतयावाभरद्वाजानुहृत:॥सगोत्रत्वात्॥प्रायेणद्वित्रिप्रवरसाम्या
च्च इतिभरद्वाजा:॥केवलांगिरस:षट्॥हरिता:॥कुत्सा:॥कण्वा:॥रथीतरा:॥विष्णुवृद्धा:॥मुद्गलाश्च॥हरिता:॥खद
र्भय:॥सौभागा:॥नैष्यगवा:॥मत्तायवा:॥चोदरा:॥महोदरा:॥नैमिश्रयो॥मिश्रोदका:॥करीषव:॥कौलय:॥कौलय:
पौलय:॥पौटलय:॥पौटला:॥मत्स्या:॥मांतवो॥मांडकारय:॥खांडायना:॥मौंडमालय:॥गवेरणयो॥मत्स्यमाल
यो॥गारणगारयो॥भद्रगारय:॥कुत्साहंसा:॥हस्तिवायसा:॥पैंगला:॥पिंगा:॥पालाशिनो॥दादेला:॥हस्तिन:॥कौ
मारहारिता:॥इला:३२ इतिहरिता:॥तेषांत्रय:॥आंगिरससांवरीषयौवनाश्वेतिवा॥कुत्सानांत्रय:॥आंगिरसमां
धात्रकौत्सेति॥काण्वा:॥औपमर्कटायना:॥वाष्कला:॥पौलाहस्तिनो॥मौंजिभाजय:मौंजिगंधा:॥विजिवाजय:॥व
जभ्रवस:॥भारुंडा:॥भरुडारमणा:॥सणमर्कटा:गर्दभा:॥प्राकासरा:॥शाकटायना:॥गोदायना:॥शानायना:॥राम
पणा:॥शौवेरिणो॥नारिणा:॥आर्यादयश्चतुर:॥स्यामायन: २१ इतिकण्वा:॥तेषांत्रय:॥आंगिरसाजमीढकाण्वेति
॥आंगिरसघोर॥काण्वेतिवा॥रथीतरा:॥हस्तिदा:॥सिकाद्वायना:॥नैतिरक्षय:॥भैलय:॥भिलांभयना:॥सांवह्वा:॥ हा:६
ह्नवाहा:॥हेमगवा॥वेरुघा:॥विरूपा:॥अगुष्टा:॥अष्टादंष्ट्रा:॥एषदश्वा:१५ इत्येतेरथीतरा:॥तेषांचत्रय:॥आंगिरस॥
वैरूप॥राथीतरेति॥आंगिरस॥वैरूप॥पार्ष्वदश्वेतिवा॥अष्टादंष्ट्र वैरूपपार्षदश्वेति वा॥अंत्ययोर्व्यत्ययोवा॥विष्णुवृ
द्धा॥शठा:॥मरणा:॥मद्रणा:॥भद्रणा:॥भद्रय:॥पीदरायणा:॥वात्सप्रायणा:॥सात्यकय:सात्यकायन:॥नैतुधा:॥स्तुला:
॥भारुण्पा:॥वेहोटा:॥देवस्थानय:॥हात्रिणा:॥छात्रिणा:॥होत्रिणा:॥पुत्रिणा:॥जनरणा:॥वज्रिणा:॥कर्तणा:॥सांब
रायणा:॥औपमीतय:॥औपगवय:॥२५ इत्येतेविष्णुवृद्धा:॥तेषांत्रय:॥आंगिरस॥पौरुकुत्स॥त्रासदस्येति॥मुद्गला:॥

Indira Gandhi National
Centre for the Arts

सात्यमुग्रयो॥ हिरण्यस्तंबयो॥ हिस्तजिह्वा॥ दिवजिह्वा॥ आलवाली॥ तिगु॥ विडालदयः॥ आस्यादयः॥ सूनयः॥ छत्रद
१६८ याः॥ तारणाः कार्यमासिताः॥ हिरण्याक्षाः॥ दीर्घजंघाः॥ हिरण्यगर्भाः॥ भिंदयः १९ इति मुद्गलाः॥ तेषां त्र्यः आंगिरसमार्म्याश्व
मौद्गल्येति॥ आद्यस्तार्क्ष्य इति वा॥ आंगिरसा ताविगो द्गल्येति वा॥ एषां केवलांगिरसां स्वस्वगणांहित्वा परस्परं पूर्वैरंगिरोभि
श्च विवाद एव॥ सगोत्रत्वाभावाद्विप्रवरसाम्याभावाञ्च॥ हरितकुत्सयोस्त्वविवादः॥ पाक्षिकद्विप्रवरसाम्यात्॥ हरित
कुत्स॰ पिंग॰ शंख॰ दर्भ॰ भैम॰ गवानामिसाम्बुलायनेन सर्वप्रवरसाम्यो स्केरित्याहुः॥ इति केवलांगिरसः॥ अथात्रयः तेच
त्वारः॥ अत्रयः॥ गविष्ठिराः॥ वाद्भूतकाः॥ मुद्गलाश्च॥ अत्रयो भूरयः॥ छांदयः॥ छांदोगेयाः॥ यौष्पिकाः॥ मौहलयः॥ सौ
पालगलाः॥ भूतणविंदयः॥ भार्गतपः॥ मालरुचः॥ व्यालयः॥ सांवच्यानयः॥ कामयीनयो दाक्षायः॥ स्तैदेहाः॥ माथितपाः
॥ औद्दालकयो॥ द्रोणभावाः॥ गौरियीवयाः॥ माविष्ठिराः॥ शौश्रुपालाः॥ कृष्णात्रेयाः॥ गौरात्रेयाः॥ गोपवनाः॥ कालाप
वयाः॥ नीलायनाः॥ औनंगयो॥ मानंगयो॥ दौरंगयः॥ सौरंगयः॥ पौरंगयः॥ पुष्पयः॥ सौपुष्पयः॥ सौकेतायनाः॥
भारद्वाजायनाः॥ इंद्रातिथयः॥ शांखारयः॥ आद्रायनाः॥ पवनाश्वश्च॥ किकिदिवयः॥ शौनककर्णयोः॥ सोमतपः॥ गौर
ग्रीवः॥ कैरंजयः॥ जैत्रायणाः श्वकपः॥ वादुतंत्राः॥ वादुमित्राः॥ जानुकपः॥ पनेतनाः भागमादनाः॥ सांखेयाः सार
यणाः सौक्रचराः॥ अर्यपथ्यः॥ गोपन्याः॥ कालजिह्वाः॥ उद्गग्रीवयो॥ वेडालयः॥ शाकलायनाः॥ गोणीपुत्राः॥ वलदाः
॥ भगपादाः॥ अर्घ्यायणाः॥ बादरायणाः॥ मांगलाः॥ वादुदंतयः॥ भागलेयो॥ रुणात्रेयाः॥ ज्ञात्रेयाः शौखयः॥ करायु
णाः॥ नीशायनाः॥ दर्भाः॥ वृषादुलाः॥ वामरथ्याः॥ वैश्वानकपाः॥ शौघूलकाः निकला ६४ इत्यत्रयः॥ आद्यात्रय इति
केचित्॥ तेषां चत्रयः॥ आत्रेयार्चनानस श्यावाश्वेति॥ गविष्ठिराः॥ दक्षयोभलंदनाः और्णनाभयाः चंद्रादेयाः वैजवा १६८
पयः॥ मौंजकेशाः॥ पूर्वातिथयः॥ श्यामपुष्पयः॥ शिलंदलयः॥ ब्रह्मपुष्पयो॥ व्याघ्रपुष्पयः॥ सोपुष्पयः॥ कार्ष्णशीर्ष

- स्यार

काहिरण्यपुष्पयः॥ कालासयः॥ कालशीर्षयः॥ फलयः॥ वलयः॥ घृतयः॥ पार्ष्णयः॥ कुदुकपाः॥ मैत्राण्याः॥ शिरीषकाः २१
इति गविष्ठिरास्तेषां त्र्ययः॥ आत्रेयार्चनानस॥ गाविष्ठिरेति॥ आत्रेय॥ गाविष्ठिर॥ पौर्वातिथेयेति वाद्भूतकानां त्र्यः॥ आ
त्रेयार्चनानस॥ वाद्भूतकेति॥ मुद्गलाः॥ शालिसंधयः॥ अर्णवाः॥ वौधाक्षाः॥ वैतवादः॥ शीरीषयः॥ शालिमता॰ गौरिताः
कौरकराः॥ वाजवाताः १० इति मुद्गलाः॥ पूर्वातिथय इति केचिद् तेत्रयः॥ आत्रेयार्चनानस पौर्वातिथेति॥ कविलन्पंचाम्राताः
॥ अतिथयः॥ वामरथ्याः॥ सुमंगलाः॥ वीजवायाः॥ धनंजयाश्च॥ आद्यचतुर्णां आत्रेयार्चनानसातिथेति॥ आत्रेयार्चनान
स॥ गाविष्ठिरेति वा॥ सुमंगलानामत्रिः सुमंगलश्यावाश्वेति वा॥ धनंजयानां आत्रेयार्चनानस॥ धानंजयेति॥ वालेयाः
॥ हालेयाः॥ कौंडेयाः॥ कौशाम्रेयाः॥ वामरथ्याः॥ गोपवनाः॥ इत्यत्रेः पुत्रिकापुत्रास्तेषां त्र्यः॥ आत्रेय वामरथ्य
पौत्रिकेति॥ अत्रीणां सर्वेषामविवादः॥ सगोत्रत्वात्॥ सप्रवरत्वाञ्च॥ इत्यत्रयः॥ अथ विश्वामित्रास्ते दश॥ कुशिका
॥ लोहिताः॥ रौक्षकाः॥ कामकायनाः॥ अजाः॥ कताः॥ धनंजयाः॥ अघमर्षणाः॥ पूरणाः इंद्रकौशिका इति॥ कु
शिकाः॥ पार्णजंघाः॥ वारक्याः॥ औदलयो॥ माणयो हृदद ग्नयः आलवयः आघदयः आपघष्याः कामतकाः व
द्धकथाः चिकिताः॥ कामकायनाः॥ शालंकायनाः॥ कात्यायनाः॥ लौकाः गौराः सौगंतव्यायमद्वताः आनभिम्लाः
तारकायणाः चौवलाः जावालयो याज्ञवल्क्याः वितंडा उवलुयाः सौश्रुतयाः॥ औपगहनयः उदंबरयः नाष्ट्याः श्याम
याः चैत्रेयाः तालोचतराः मयूराः चौवलाः जावालयो याज्ञ सौमत्याः चित्रतवयाः स्याततायनाः मनवः तैतवः मांतवः
यज्ञाः न्यत्वराक्षाः वाभ्रव्याः कलायाः॥ कुत्सरयो देवराताः अलकयः उलूकाः वाभ्रवाः शालाः विशालाः कालवचाः॥ सै
धवायनाः सौरधयः॥ कारीषयः संसत्याः अंलोप्याः पार्यौदरयः हरयः पउलयो गालवाः॥ वैकृतपोवतंडाः चलश

माधुछंदसाष्टकेतिवा॥ द्वौवा॥ विश्वामित्राष्टकौतरोहकाः स्वोदला॥ रेनणाः इति रोहकाः॥ रेवणावातेषां २

कचः॥ रणामायनाः॥ कालाः वालखिल्याः पांजयः सौमेयाः॥ आश्वलायनाः॥ आवाहाः उलूखलाः जैमिनयः सांतयः औषे
१६६ याः साह्यः २६ इति कुशिकास्तेषां त्र्यः वैश्वामित्र देवरातोदलेति॰ लोहिताः हडकायाः चाक्रवर्णायनाः॥ वासकायोष्ट
काः ६ इति लोहिताः रोहिता इति केचित्॥ अष्टकावा॰ तेषां त्र्यः वैश्वामित्राष्टकलोहितेति अस्ययो र्व्यस्ययोर्वा॰ वैश्वामि
त्र रोसरैवणेति॰ वैश्वामित्रगाथिनरैवणेतिवा॥ कामकायनाः॥ देवश्रवसाः देवतरसाः श्रीमताः श्रीमकायनाः॥ इति
कामकायनाः॥ श्रीमतावातेषां त्र्यः वैश्वामित्र देवश्रवसदेवतरसेति॥ अजाः मार्गमित्राः माधुछंदसाः इत्यजास्तेषां त्र्यः
वैश्वामित्र माधुछंदसाज्येति कताः औडुंबरयः शैशिरयः तैकायनाः स्तौकायनयः॥ तार्क्ष्यायनयः कात्यायनयः करीराम
योचालकयोः शालंकायनाः मौंजकायनाः गांगायनयः॥ कालयो वेदायनयो गोदायनयो मोदायनयोः वेदायनयो वैन
यनयो रामणयो रातकयो मौंजायनयः २२ इति कतास्तेषां त्र्यः॥ वैश्वामित्र कात्यात्कीलेति॥ धनंजयाः पार्थिवाः माधु पार्थिवा
मंदकाः बंधुलाः याणिलाः चैत्रेयाः परिकुरयः ७ इति धनंजयास्तेषां त्र्यः वैश्वामित्र माधुछंदसधानंजय्येति॥ वैश्वामि
त्र माधुछंदसाघमर्षणेतिवा॥ अघमर्षणानां त्र्यः॥ वैश्वामित्राघमर्षणकौशिकेति॥ पूरणावारिधापयंतास्तु तेषां द्वौ वैश्वा
मित्रपौरणेति॰ वैश्वामित्र देवरातपौरणेति वा॥ इंद्रकौशिकानां द्वौ॰ वैश्वामित्रेंद्रकौशिकेति केचिदन्येष्वेकादशाशौ
काः॥ आश्मरथ्याः सादुलाः गाथिथनाः॥ वैणवाः हिरण्यरेतसः॥ सुवर्णरेतसः॥ कपोतरेतसः॥ शालंकायनाः घृत
कौशिकाः इत्याश्मरथ्याः॥ कुशिकाइतिकेचित्॥ अजाइत्यन्ये तेषां त्र्यः वैश्वामित्राश्मरथ्यवाधुलेति॥ सादुलाः मादुलाः १६६
कादुलाः कागुलाः औमिलाः औदलाः॥ शातातपाः कामलायनाः॥ सातवयः जातवयः १२ इति सादुलास्तेषां त्र्यः वैश्वा
मित्र सादुलेति॥ गाथिनाः॥ औदालकयः॥ उदवासाः रौक्थकाः अज्योहर्ष्याः रेणुकाः इति गाथिनाः॥ रेणव इति केचित्

॥ हिरण्यरेतसां द्वौ॥ वैश्वामित्र हैरण्यरेतसेति॰ सुवर्णरेतसां द्वौ वैश्वामित्र सौवर्णरेतसेति॥ कपोतरेतसां वै
श्वामित्र कापोतरेतसेति॥ कायनाः शालाक्षाः लोहिताक्षाः लोहितजह्नवः इत्येते शालंकायनाः॥ कौशिका
वा॰ तेषां त्र्यः वैश्वामित्र शालंकायनकौशिकेति॥ घृतकौशिकानां द्वौ वैश्वामित्र घृतकौशिकेति॰ कथकाः॰
कथकाः॥ आघूघयाः उदूणवा ४ इति कथकास्तेषां त्र्यः॥ वैश्वामित्र माधुछंदसरौहिणेति विश्वामित्रगणा
नां परस्परमविवादः॥ सगोत्रत्वात्सप्रवरत्वात्॥ इति विश्वामित्राः॥ अथ कश्यपाः॥ तेत्र्यः॥ निध्रुवाः॥ रेभाः
शांडिलाश्च उध्रुवाः॥ कश्यपाः॥ अष्टांगिरयोः॥ मंवराः॥ रोतिशायनाः॥ आग्रन्याः॥ वैशिपाः॥ धूम्रा धूम्राय
णाः॥ सौप्याः॥ धम्यायणाः॥ स्वैवहक्षाः॥ नाग्रायणाः॥ वैश्वकपः॥ प्राचर्षाः॥ दूह्नीगाः॥ आतपीः॥ पाचाय
निकाः॥ मेषांतकपः॥ सागसयो॥ माघसरावयः॥ वार्यकपः॥ सैंधवायः॥ वार्यकपः॥ सैधवयः॥ सायस्पाः॥ आ
सुरायणाः छागव्याः॥ सौनयः॥ स्थौलनेकेशायः॥ वार्यकयः॥ औपव्याः॥ लाक्षापणाः॥ क्रौष्टवो॥ जीवनयः॥
स्वाध्यायणाः॥ रौहितायनाः॥ नकुभाः॥ पिंगाक्षयः॥ औडुलयः॥ आरयणाः॥ पौलयो वैकर्णयः॥ कौषितके
यः धूमलकायनाः॥ सुराः॥ गौरिवायनाः॥ मदाचत्रेयाः॥ पैंगीनस्याः॥ पानस्याः॥ विषगणाः॥ ईह्नमाणयो
॥ भालंदनो॥ शांखमित्रेयाः॥ हरित्याजाः॥ मात्स्याः॥ रमणायः॥ साविश्रवसो॥ वैशपायनाः॥ खैरकयः॥
कासलपः॥ उल्कायनयो॥ नाजेलायनाः॥ कासकायनाः॥ देवाः॥ होतारः॥ सुचयः॥ खरेभाः॥ अयस्थूणाः
॥ भागुरयः॥ पार्थिकायाः॥ गोमयनाः॥ हिरण्यबाधाः॥ अग्रयो॥ देवयः॥ सौर्याः॥ मुसलाः॥ आविश्रेण्या॥ उद
ली मंत्रिता॥ वैकर्णेय॥ स्थूलविंदवः॥ आग्रायणाः॥ मौषकाः ततिकायनाः॥ औपघ्नतिमाः॥ साराहरेयाः

Indira Gandhi National
Centre for the Arts

॥ केरंजाः चेकेताः मानत्य॥ स्वेकपो॥ नौवनाः॥ चेत्रगाः॥ आहूगायकादेवपाताः सोमयागाः॥ त्रातुदयः॥ का
चायनाः॥ चक्रधर्मिणः॥ महाचक्रधर्मिणः॥ श्रेयपणाः॥ दाक्षेरयः॥ दाक्षपाणयो॥ दास्तयो॥ दासयो॥ वात्स्यपा
२०० णयो॥ दास्तलायणाः॥ आश्वेरातायनाः॥ कौसीरकाः खगोदाः॥ अग्निशर्मायणाः॥ कैकसेयाः॥ काश्यदायनाः
॥ नैमनयाः॥ विदायनाः॥ दस्याः॥ सानुश्रुताः॥ दरीतायनाः॥ मार्गगाः॥ सोमनुवो॥ तानराधाः॥ स्यामाः॥ यज्ञाः॥ व
भ्रवो॥ वाजिवाहायनाः॥ वाहूकायनाः॥ नामनयाः॥ गोष्ठायनाः वात्स्यायनाः॥ वाष्टायनाः॥ नागत्रिरसः॥
शोकपाः॥ ज्ञानदस्तयो॥ प्रातिश्रवाः॥ प्रातिथेयाः॥ कौजालयः॥ कांडवायनः॥ पैलमैलयः॥ श्वायणाः॥ कौ
षीतकाः॥ मारीचाः॥ कामेयाः॥ नकयो॥ वलणावमिश्रयः॥ ६०॥ इति निध्रुवाः॥ तेषां त्रयः॥ काश्यपावत्सार
रैभेति॥ शांडिलाः॥ कौहलाः॥ पायकाः॥ वापिकाः॥ औदमेघाः॥ सौदोनवाः॥ सावचसाः॥ कारेयाः॥ कौ
कांगयः॥ तैक्षिमादयः॥ महोदकयः॥ कौशयः॥ मौंजायनाः॥ माणवराः॥ खार्वनायन्याः॥ गांगायनाः॥ वा
त्सभालयो॥ गोभिलाः॥ वेदायनाः॥ वात्स्यायनाः॥ वहूदरयो॥ नागुरयः॥ खादंतीमुखाः॥ हिरण्यबाहवः॥ नै
ददाः॥ गोमूत्राः॥ वाक्यशाराः॥ ज्ञानंधरयो॥ यन्वंतरयो॥ एकखंडाः॥ गर्दभीमुखाः॥ अजावेराः॥ स्तणविं
दवः॥ कोकिलाः॥ पैप्पलादयो॥ जलंधराः॥ गोशिलाः॥ शातुगायनाः॥ जीमाः॥ पिप्पलाः॥ शंजाः॥ केशिलाः
॥ मुंजमयूराः॥ कौवलयः॥ कौरंडरजाः॥ उत्तराः॥ सुजातपूराः॥ चेरलाः॥ सुकेतवः॥ कुहकाः॥ वृद्धपिं २००
डाः॥ हेपुटाः॥ वटायनाः॥ महाकौरलयः॥ कुहलाः॥ मंदलाः॥ मंगलाः॥ धवलाः॥ केशताः॥ पर्वताः॥ मुं
जांजलयः॥ परिवारिणः॥ ६२॥ इति शांडिलाः॥ तेषां त्रयः॥ काश्यपावत्सारशांडिल्येति॥ आत्स्यानेदेवलो

वा॥ असितो वा॥ काश्यपासितदेवलेति वा॥ अंत्ययोर्व्यत्ययो वा॥ शांडिल्यासितदेवलेति वा॥ शांडिल्येति कचित्स्या
त्॥ असितदेवलशांडिल्येति नवदेव॥ द्वौ वा॥ देवलासितेति॥ कश्यपानां परस्परमविवाहः॥ कश्यपस्यावि
यमाणतया नानुवृत्तेः॥ सगोत्रत्वात्सप्रवरत्वाच्च॥ इति कश्यपाः॥ अथ वसिष्ठाः तेचत्वारः॥ वसिष्ठाः कुंडिनाः॥
उपमन्यवः॥ पराशराश्च॥ वसिष्ठाः॥ वैतालवयुः रकायः॥ सारवलाः॥ गोशिश्रवसाः॥ आश्वलायनाः॥ कपिंज
लाः॥ सौविद्धाः॥ व्याघ्रपादाः॥ वाह्लकायनयो॥ गायनयो॥ नयाव्याः जातूकर्ण्याः॥ रौधामयाः॥ कौभोजयः
॥ कौलायनाः॥ सुवाहारिताः॥ कांडश्द्धयः॥ सोपवत्सायनाः॥ आलंभायनाः लोमायन्याः॥ स्वस्त्वाकर्षिताः॥ पावि
एकायनाः॥ पार्णवल्काः॥ देवनाः॥ गोरथ्याः॥ विश्वायनाः॥ वाहकयय॥ अवंकितपो॥ वस्वयाजय॥ पूतिमाषा
॥ समवेलाः॥ औपवनाः॥ वेस्मवाः॥ मात्वलायनाः॥ औडुलोमाः॥ गोपायनाः॥ धोवयो॥ पालिसयाः॥ पालिसु
याः॥ वाग्रथच॥ आपः॥ स्थूणाः॥ ब्रह्मपुरेयाः॥ स्वस्तिकाः॥ पांडुलयो॥ गोभिलयो॥ मालोदवयः॥ ब्रह्मवल्याः॥ श्वे
नयः॥ पोदिश्रवसो॥ याज्ञवल्क्याः॥ रावणयो॥ मौलयः॥ कौलयः॥ औपलोमाः॥ मिथोवलयो॥ श्वंडालयो॥ गो
डिलयो॥ मोलोदयः॥ स्पासुनाम्याः॥ सुपाचयः॥ दासथ्याः॥ शालिसयाः॥ आर्जवारूर्य॥ इति वसिष्ठाः॥ तेषामे
कः॥ वासिष्ठ इति त्रयो वा॥ वासिष्ठेंद्रप्रमदाभरद्वस्विति॥ कुंडिनाः॥ लौहितायनाः॥ गुग्गुलयो॥ आश्वस्या
नेकणयः॥ औपवस्याः॥ आश्मरथ्याः॥ वाहवाः॥ क्रौक्रोल्याः॥ सांगतिनः॥ कापटवः॥ पैटकाः॥ नवयामाः॥
हिरण्याक्षायणाः॥ पैप्पलादयः॥ सौगयोहिताः॥ माध्यंदिनाः॥ सोमयज्ञयः॥ सौस्ययो॥ धृतयः॥ त्रैशृंगाः॥
लोमायनाः॥ विधंकषयो॥ मैत्रावरुणाः॥ इति कुंडिनास्तेषां त्रयः॥ वासिष्ठमैत्रावरुणकौंडिन्येति॥ उपमन्य

Indira Gandhi National
Centre for the Arts

वृ:॥ औदलय:॥ मांडलेखय:॥ कापिंजला:॥ जालागता:॥ तपोलोका:॥ त्रैवर्णा:॥ पार्णगिरय:॥ सौदाद्दरा:॥
२०१ मौलालपो॥ महाकण्वायना:॥ वालशिखा:॥ औद्रुहनायना:॥ चलायना:॥ भागवित्त्रायना:॥ कुंडोदरायणा:॥
लाक्ष्मणेया:॥ बाह्लकेयो वार्कय:॥ आलवया:॥ कापिकेशा:॥ शैलालय:॥ शाकधियोदाकायना:॥ वलोवला:
॥ लेवायना:॥ ब्रह्मचर्या:॥ शाकोदया:॥ सरावणा:॥ कण्वायना:॥ कालाक्षा:॥ दशेरका:॥ कुम्भा:॥ तरायणा:॥ पाले
कायना:॥ उज्ञाहा:॥ कौरव्या:॥ औधिनोमानेय:॥ ब्रह्मबलयो माशरावस्या:॥ सांख्यायना:॥ गोरथा:॥ सुहाकाश्य
मयो॥ राक्षेया:॥ औपलयो॥ गोपोदतय:॥ कौमारा कौडोदरय:॥ चक्रदंमेय:॥ कारपुरय:॥ कौलमय:॥ व्याघ्रायणा:
+ त१ ॥ रौक्षदेमेयो॥ नाद्वलयो वाद्वुलय:॥ कालपायना:॥ भागुरायणा:॥ शांकथ्या:॥ मुंचकायना:॥ पाथश्रवस:॥ माराय
णा:॥ पादकायना:॥ स्कामायना:॥ धातुद्वयो भागदय:॥ कौरकृत॥ कशानया॰ ७० इत्युपमन्युवसेषांत्रय:॥ मुंचुका
यना:॥ पादकायना:॥ वासिष्ठेंद्रप्रमदाभरद्वस्विति॥ आभरद्वसव्येतिबृचित्प्राव:॥ वासिष्ठभरद्वाजेंद्रप्रमदेतिवा
॥ आघयोर्मल्ययोद्ध॥ पराशरा: कांडूशाया॥ वाजयो वाजिमंतयोभैमतायना:॥ गोवालय:॥ प्रागेदया:॥ वैकलय:॥ त्र
त्नय:॥ कौकुचाद्यो दार्यश्चय: कल्या: पनयो गोपय:॥ स्थ्रातयो वारुणयो भातुक्यो:॥ वांजरय:॥ क्रोष्टुया:॥ कौमतय:
॥ कृष्णाजिना:॥ कापिसुखा:॥ स्वाध्यायनय:॥ श्वेतपूपय: पौष्करसादय:॥ गार्ग्यादय:॥ तारेया:॥ श्रौतुद्वया:॥ सद्वोल
यो॥ जेनया:॥ यार्थया:॥ कारुजायना:॥ कार्ष्णोष्या:॥ शौकयो॥ वाष्यायना:॥ कपिश्रोता:॥ स्कंभिन्या:॥ मंडिका: शान
यातया:॥ पक्विका॰ वाधिका:॥ तिलयूपय:॥ स्वाल्वायना:॥ ज्ञौमयो॥ दर्यावय:॥ शिवय: इषीकहस्ता: ४० इतिपराशरा: २०१
॥ तेषांत्रय:॥ वासिष्ठशाक्त्यपाराशर्येति॥ एषां वसिष्ठानां परस्परमविवाद:॥ सगोत्रत्वात् इति वसिष्ठा:॥ अथागस्त्या: ते

फ३

दश॥ आगस्त्य:॥ इध्मवाहा:॥ सांभवाहा:॥ सोमवाहा:॥ यज्ञवाहा:॥ दर्भवाहा:॥ सारवाहा: पूर्णमासा:॥ पारणिन:॥ हिमो
दका:॥ पाणिकाश्च॥ आगस्त्यय:॥ करंभय:॥ कौशल्या:॥ सुमेधस:॥ सौमयो भुवो॥ गाधरायणा:॥ पुलस्त्यय:॥ पुलहा:॥ क्र
+ टा:३ तव:॥ कार्णायः॥ मदिंड्रा: ११ इत्यगस्त्य:॥ तेषांत्रय:॥ आगस्त्य:॥ माहेंद्रा:॥ मायोभुवेति॥ इध्मवाहा:॥ विशालाघा:॥
स्फालायना:॥ औपददनय:॥ कल्माषा:॥ दंडयो॥ लावणयो॥ लम्मारदंडयो॥ वैरणयो॥ मुद्गोदरय:॥ सैवपथय:॥ चा
लिकान्ययप्पत्यातपा:॥ मौंजिलय:॥ पार्थुद्दता:॥ हारियीवी॥ रोहिण्या॥ मोसलय:॥ सेवरा:॥ साभरायणा:॥ केकर्णाय
ना:॥ मार्गपथ्या:॥ आचार्या:॥ शालंकायनै:॥ उपकल्पकायनयो॥ वारिणयो॥ वास्पायनयो॥ जैमिनयो॥ लाक्षाय:
॥ साकाक्षयस्तंडयो॥ लाड्यायनयो॥ हरीगयो प्रादुराक्षयो॥ पंडोद्भूता:॥ कुडाक्षय:॥ उपकुला:॥ अर्बुदा:॥ शैवायु
धा:॥ परद्दता:॥ वैस्पोरंदय:॥ औकुला:॥ वैरंडयो॥ गोव्यादयो॥ रामोसोम्पानया:॥ ब्राह्मण्या: पुत्रयो॥ वाशिषायणा:
॥ शारंगरा:॥ फाटावचना:॥ ५२ इतिइध्मवाहास्तेषां त्रय:॥ आगस्त्यदार्ढ्यच्युतेध्मवाहेति॥ दाधैतिवापाव:॥ ए + द्वैं१
कोवा॥ आगस्त्येति॥ सांभवाहानां सांभदाहात्यो पूर्ववित्॥ एवं सोमवाहादीनां चतुर्णां तत्ताभांत्यापूर्वा. वेव॥ पू
र्णमासानां पारणीनां च त्रय:॥ आगस्त्यपौर्णमासपारणेति॥ हिमोदका:॥ अक्रा:॥ त्राक्रा:॥ शुक्रा: हंसाश्वासा:
॥ हेमचर्चय:॥ इतिहिमोदकास्तेषां त्रय:॥ आगस्त्यपैनामकपाणिकेति॥ अगस्तीनां सर्वेषां परस्परमविवाद:॥ सगो
त्रत्वात्सप्रवरत्वाच्च॥ इत्यगस्त्यय:॥ अथद्विगोत्रा:॥ ते॰ त्रय:॥ शौंगशैशिरय:॥ संकृतय:॥ लौगाक्षयश्च॥ तत्रभारद्वा
जानांतु गाढेश्वामित्रस्य शैशिरे क्षेत्रेजात: शौंगशैशिरिनामा तद्गोत्राणां पंच आंगिरस बार्हस्पत्य भारद्वाजशौंगशैशिरेति
॥ अत्योकात्याकिलेतिवा॥ त्र्यो वा॥ आंगिरसकात्याक्कीलेति॥ आद्योभारद्वाजो वा॥ एषां विश्वामित्रभरद्वाजाभ्यां नाद्वैय:॥

+ रौ२ + द्वौचु१ न१

संकृतय:॥पूतिमाषास्तण्डव:॥शंवव:॥मौपंगवा:॥सैपवना:॥जानकय:॥तिरापा:॥रतभ्या:॥ऋषभय:॥चारायणय:॥
सद्योगागेयो लौक्षय:॥तालानागद्योभि ह्मालयो विनीतक:॥तैलप:परिभवा:॥वैयाघ्रपद्या:॥औलातायना:॥वाङ्ग
यणा:॥मलका:॥शालायना:॥आर्षेणा:॥हारिनिवा:॥पौला:॥आग्रय:॥इति संकृतयस्तेषां त्र्यय:॥आंगिरसगौ
२०२ रिवीतसांकृत्येति॥शाक्त्य गौरिवीतसांकृत्येतिवा॥एषां संकृतीनां वासिष्ठत्वं तावदस्ति॥आपस्तंबादिभिर्वसिष्ठगणम
ध्ये पाठात्॥वासिष्ठशाक्तेः पाद्विकवरणाच्च॥आंगिरसत्वमप्यस्ति॥बौधायनेन केवलांगिरेमध्ये पाठात्॥आंगिरसप्र
वराच्च॥तेनैषां सर्वैर्वासिष्ठैरद्वासिष्ठैर्गौरिवीतैश्च सदाविवाद:सगोत्रत्वात्॥किंचित्प्रवरसाम्याच्च॥केवलांगिर
गणैश्चाविवाद एव सगोत्रत्वाभावाद्धित्रिप्रवरसाम्याभावाच्च॥केचित्तु भरद्वाजान्यवित्वापाठात्॥भारद्वाजौंगिरसत्व
माश्रित्य भरद्वाजानां शौंगशैशिरै: सहाविवादमाहु:॥तन्न छुतिरुद्धा:।केवलांगिरसां मध्ये पाठात्॥भरद्वाजस्य सत्तया
+ द्वार नुवृत्ते:कपिवद्रूपकाभावात्॥प्रयोगपारिजाते तु काश्यपैरेषामविवाद इत्युक्तं॥नव्याश्च केचिदाहु:॥तत्र देतु:
चिंत्य:॥लौगाक्षय:॥दार्भायणा:॥पैत्रवादयो देहकाकालेया:कापुत्रय:कलापा:॥कंसपात्रा:॥वालकापनयो:
नित्यपरा:॥दादय:॥आदकयो कौनामय:॥सौतय:॥सैतिकपो ऽपिरराप्तिशायय:पैष्टिकय:॥सौसुप्तिकय:॥सैरं
धिय:॥वीक्षणायो कालकयो राजवादय:॥अनष्टयो भिगुरयो राजवत्रय:॥सैरय:॥खिरोदवादयो राजसवक
पनसौ राजसवय:॥सौरंभय:॥पिंगाक्षेय:॥काकुलय:॥शाकलय:॥[redacted]रावफालय:॥सैकय:॥सोसुधय:॥शारद्व
ता:॥औपपत्यकटा:सोतपा:॥१६ इति लौगाक्षयस्तेषां त्र्यय:॥काश्यपावत्सारवासिष्ठेति॥काश्यपावत्सार २०२
सितेति॥वासिष्ठावत्सारकाश्यपेतिवा॥एते द्वैसिष्ठा:नक्कं काश्यपा:॥एतेषां वसिष्ठकाश्यपाभ्यां संकृतिभिश्चा

विवाद:सगोत्रत्वात्॥केश्चित्सप्रवरत्वादपि॥पारिजातधृतसंग्रहस्मृत्यर्थसारयोस्त्वन्ये षडुक्ता:॥देवरातानां त्र्यय:॥वै
श्वामित्रदेवरातौदलेति॥एषां जमदग्निविश्वामित्राभ्यां अविवाद:॥जमदग्निगणस्यापि विश्वामित्रगणस्य च॥नदेवरा
तगोत्रेणाविवाद:स्यात्परस्परमिति संग्रहोक्ते:बौधायनादिभिर्जामदग्न्येषु देवरातस्यापि पाठितत्वात्॥जामदग्न्य
त्वं चिंत्यमिति केचित्॥अन्ये तु और्वस्यैव महचीकस्य सत्यवत्यां मदायणा:॥जमदग्निस्तपोवीर्योजज्ञे ब्रह्मविदां वर:
मध्यमश्च शुन:शेप:शुन:पुच्छ:कनिष्ठक इत्युक्ता देवैर्दत्त:शुन:शेपो विश्वामित्राय भार्गव:॥देवैर्दत्त:स वै यस्माद्देवरा
तस्ततोभवेदिति हरिवंशे देवरातस्य जमदग्निसंबंधकथनाज्जामदग्न्यत्वमुपपन्नमित्याहु:॥धर्मप्रदीपे तु॥माताम
हे:शुद्धजामदग्न्यैर्देवरातादीनां न विवाद इत्युक्तं॥वस्तुतस्तु हरिवंशश्रीभागवतादौ भार्गवत्वं तावद्देवरातस्य नि:सं
देहमवगम्यते तान्निर्वीहश्च जामदग्न्ये केवलभार्गवान्यतरत्वे नैव वाच्य:॥नच तत्साधको बौधायनादिपाठोस्ति भवति
तु संग्रहगतादेवरातानां जामदग्न्यैरविवादोक्तिर्जामदग्न्यत्वसाधिका सती भार्गवत्वनिवार्ईकरी॥यद्यपि जमदग्नि
श्रोतत्वं मा ज्ञानं जामदग्न्यत्वसाधकं तथापि जमदग्नेर्जामदग्न्यविदेषु मत्स्यपुराणपाठात्सिद्धं जामदग्न्यत्वं तदनुजदे
वैरातस्यापि जामदग्न्यत्वसाधकं नह्येकस्मादृषेरुत्पन्नयो:भिन्नगोत्रप्रवरत्वसंभव:॥नच विदांतर्गतजमदग्नेर्देव
रातज्येष्ठा॥भेदे मानाभाव:॥भार्गवत्वदिषु मतस्य च श्रीहदेवत्तात्वे जनकगोत्रसंबंधानिवृत्त्यर्थं विवादस्तु जनकगो
त्राथा:निषिद्ध एव स्वस्य च जनकगोत्रसंबंधाभावेन तस्या:स्वसगोत्रत्वाभावेपि पितृसगोत्रत्वात् असगोत्राच
यापितु:इत्यत्र पितृशब्दाणस्पेदमेवप्रयोजनमिति स्मृतिचंद्रिकादौ स्फुटमिति संक्षेप:॥सर्वेषां वह्यामुष्यायणानां गो
त्रद्वयसंबंधिप्रवरेणात्र सक्तौ व्यवस्थामादाश्वलायन:तेषामुभयत:प्रवृणीत एकमितरतो द्वावितरतो द्वौवेतरतस्त्री

Indira Gandhi National
Centre for the Arts

नितरतो नहि चतुर्णां प्रवरोऽस्ति न पंचानामपि प्रवराणां आंगिरसवार्हस्पत्यभारद्वाजवैश्वामित्रकात्याक्षीलेति ॥ विशे
षांतरं कात्यायनलौगाक्षीऊ चतुःपूर्वः प्रवरउत्पादपितुरुत्तरः प्रतिगृहीतुरिति अत एव न चतुरो वृणीत इति निषेधो न
202 नित्यानुवादादिति ॥ उक्तं च पारिजाते संग्रहे द्व्यामुष्यायणकाये च दत्तकक्रीतकादयः गोत्रद्वयेप्यनुद्वाह्याः शांगशै
शिरयोरयथेति ॥ तथा नारायणवृत्तौ दत्तक्रीतादीनां जनकपालकयोर्गोत्रनिषेधः शौंगशैशिरग्रहणस्य प्रदर्शना
र्थत्वादिति यथा चाक्रियाभ्युपगमात् क्षेत्रे वीजिने पुत्रो दीयते ॥ तस्येह भागिनौ दृष्टौ वीजी क्षेत्रिक एव च फलं त्वनभिसंधा
य क्षेत्रिणा वीति नातथा ॥ अत्र त्यक्षेत्रिणमर्थो वीजाद्यो निर्वलीयसीति मनूक्तेः क्षेत्रजस्याभिसंधिनैव द्व्यामुष्याय
णत्वं तथा दत्तकादिष्वपीत्यत्र मानमस्ति ॥ सर्वेषां तत्वे तूक्तग्रंथा एवेत्यलं ॥ इति द्विगोत्राः ॥ अथ क्षत्रियवैश्यानां क्षत्रि
याणां मनुगोत्रं मानवैलपौरूरवसेति प्रवराः ॥ वैश्यानां भलंदनगोत्रं भालंदनवात्सप्रमाकिलेति प्रवराः ॥ यद्यपुरो
हितप्रवरा एव तेषामिति पक्षद्वयं सूत्रकारैरुक्तं ॥ मिताक्षरादयस्त्वंत्यपक्षमेव स्वीचक्रिरे तत्र हेतुः मन्वादौ आग
स्त्याष्टमसप्तर्षिपरत्वरूपगोत्रलक्षणाभावात् ॥ प्रवरमंजरीकारस्तु तयोरेकरूपगोत्रप्रवरत्वे सर्वेषां परस्प
रमविवादप्रसंग इति ॥ हेतुमाह ॥ तस्मात्पुरोहितगोत्रप्रवरा वेदेति राजर्षिवरणस्य चाभिषिक्तविषयत्वं राज्ञाभि
प्रायः नक्षत्रियाणामपि तितद्गोत्रेऽन्यत्र च तच्छूद्रे न पुरोहितपरामर्शः तस्यैव मुख्यगोत्रसंभवाच्छास्त्रांतरसंवादल
भाच्चेति सर्वथैवासिद्धमेतत् विवादे क्षत्रियवैश्यानां पौरोहित्यप्रवरैः क्वप्रयुक्ता एवानिषेध इति वदन् वस्तुतस्तु
पौरोहित्यान् राजविशान् ॥ राजन्यवैश्या राज्ञां सर्वेषां मानवोऽत संज्ञाये इति सूत्रं दृष्ट्वा प्रथमभागो येन मिताक्षराको 203
रगोलिखितः सकथमेवं वदेत् यद्यपि प्रातिस्विकगोत्राभावात्प्रवराभावः तथापि पुरोहितगोत्रप्रवरा वेदितव्या

चिति तस्यैव सूत्रस्य वाक्यशेषे प्रातिस्विकप्रवरदर्शनात् अतो लक्षिणां स्त्रियमुद्वहेदिति विवादाधिकारात्तन्निर्णी
योगिनां पौरोहित्यान्यप्रवराणामभावस्तदभिप्रेत इति गम्यते तथा च स्मृत्यर्थसारे गुरोः सगोत्रप्रवरा नोद्वाह्यास्तत्र विड्ज
रिति कर्मणि तु वरणादौ भवतु विकल्पः उक्तसूत्रस्य कर्माधिकारे प्रवृत्तेः सोपि व्यवस्थितः येषां कुले यादृशं वरणं भाग
तं तथैव कर्तुमुचितमिति विशेषव्यवस्थादर्शनात् ॥ अभिषिक्तराज्ञस्तु पौरोहित्यानां राजऋषिभिः समुच्चयः क्षत्रि
यवैश्ययोः पौरोहित्यान् राजऋषीन्वेति सत्याषाढसूत्रव्याख्यावसरे शाबरस्वामिना यथोक्तं वाशब्दः समुच्चये कुतः रा
जन्येऽतिज्ञापज्ञार्थं तद्गोत्रपरिणयनप्रतिषेधार्थमिति गतश्रीप्रदर्शनार्थं वचसीव राजन्यशब्दोऽभिषिक्तपरः अ
तिशाहस्थनपंचातिवृणीते इत्यत्र प्रसिद्धपंचाधिकनिषेधप्राप्तिप्रसवार्थः समुच्चये सतदवरूपंभावात् उक्तं चैतेनैव
प्रवराध्यायस्यास्या राजर्षयो मानवैलपौरवसेति सूत्रस्य व्याख्यावसरेपि उक्तं समुच्चयांतर्गतेति ॥ अथ गोत्राज्ञाने ॥
यउपनेताचार्यस्तद्गोत्रप्रवरैरेव कर्माणि विवाहादि होच ॥ अथासंप्रज्ञातबंधुमाचार्यामुष्यायणमनुब्रवीताचा
र्यप्रवरं वृणीतेति बोधायनवचनात् ॥ आचार्यगोत्राज्ञाने तु ॥ आचार्यगोत्रप्रवरानभिज्ञस्तु द्विजः स्वयं ॥ दत्त्वात्मानं
तु कस्मैचित्तद्गोत्रप्रवरो भवेदिति ॥ यत्तु गोत्रस्यत्वपरिज्ञाने काश्यपं गोत्रमिष्यते इति तदाचार्यगोत्रज्ञाने सत्येव विवाहादि
रिक्तविषयमिति दिक् ॥ अथ मातृगोत्रनिर्णयः ॥ मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ॥ समानप्रवरां चैव त्यक्त्वा चांद्राय
णं चरेदिति मातृगोत्राया विवाहो निषिद्धः ॥ यद्यप्येकगोत्रत्वं सदृशगोत्रत्वं चेति द्विविधं सगोत्रत्वमुक्तं तथापि मातु
र्गोत्रे कथमेव वर्ज्यं मातुर्गोत्रं यस्यास्तामिति व्याख्याने न तस्यैव प्रतीतेः मातुश्च गोत्रद्वयं प्राग्विवाहात्पितृगोत्रं ऊर्ध्वं भर्तृ
गोत्रं ॥ स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे एकत्वं सागता भर्तुः पिंडे गोत्रे च सूतक इति वचनात् ॥ पितुर्गोत्रस्यैवोत्पत्तिद

Indira Gandhi National
Centre for the Arts

शायामनुद्दत्यास्य गोत्रत्वेनैवानिषेधः तेन परिशेषात् मातृगोत्रपदेन मातामहगोत्रनिषेधः तस्य स्वोत्पत्तिदशायामनुवर्तमानस्य
२०४ गोत्रत्वप्रयोजकत्वाभावात्॥ अत एव पुत्रिकायां गांधर्वविवाहोढायां च दानाभावे न पितृगोत्रसंबंधस्यानिवृत्तेः स्वोत्पत्तिदशा
यामनुवर्त्यात्तस्य स्वगोत्रत्वादेवानिषेधः आसुरादिविवाहोढायां तु पितृगोत्रसंबंधनिवृत्तावपि भूतपूर्वगत्या मातामहगोत्रस्ये
श्री वमातृगोत्रत्वेन निषेधः परिशेषात् एवं च पुत्रिकागांधर्वादिविवाहोढासुतानां सर्वेषां मातृगोत्रं वर्ज्यं आसुरादिविवाहोढासुतानां
सर्वेषां मातृगोत्रं न वर्ज्यं किंतु माध्यंदिनीयानामिति सत्याषाढोक्तः शिष्टाचारोप्येवमेव॥ केचित्त्वस्य वचनस्य निर्मूलत्वात्स
र्वेषां मातृगोत्रवर्जनं युक्तमिति॥ युक्तं तु शिष्टाचारसदृक्कृतवचनान्माध्यंदिनानामेव वर्जनं निर्मूलत्ववचनं तु प्रामाणिका
नां नयुक्तं पराक्रांतं चात्र सूरिभिरित्युपरम्यते॥ कृत्स्नक्ष्मातलवर्तिपंडितजनालंकारचूडामणिर्गोदातीरजनिर्गुणोच्च
पखनिर्नाम्नापदे वोयुरणीः तत्सूनोरिह जीवदेवकृतिनः सद्धर्मशास्त्रे कृतौ गोत्राणां प्रवरैः सहैयमगमन्निर्णीतिरीतिरि
शार्पणम्॥१॥ इति गोत्रप्रवरनिर्णयः॥ एवं भार्यात्वप्रतिबंधकानि सापिंड्यसगोत्रत्वसप्रवरत्वानि निरूपितानि॥ यथा
हविवाहकसंग्रहस्येव तन्मानत्वादित्युक्तं॥ धनंजयानां विश्वामित्रमाधुच्छंदसधानंजयेति॥ एषामत्रिविश्वामित्राभ्यामविवादः
॥ जातूकर्ण्यानां वासिष्ठात्रेयजातूकर्ण्येति॥ एषामत्रिवासिष्ठाभ्यामविवादः॥ वामरथ्यादीनां पूर्वोक्तानामत्रिपुत्रिकापुत्रा
णां॥ अत्रिवासिष्ठाभ्यामविवादः॥ अत्रिविश्वामित्राभ्यामिति केचित्॥ कपिलानां पंच॥ आंगिरसबार्हस्पत्यभारद्वाजवां
दनमातवचसेति॥ एषां विश्वामित्रभरद्वाजाभ्यामविवादः॥ तत्र कपिलस्य विश्वामित्रसंबंधे मानाभावः॥ वैश्वामित्रदे २०४
वरातं प्रकृत्य तस्यैते कापिलेयबाभ्रवा इति एतरेयब्राह्मणगतकापिलेनकैलिंगविषयामानत्वा॥ कपिलानां वैश्वामित्रत्वा
भावे कापिलानां वैश्वामित्रत्वानुपपत्तेः॥ कतानां त्रयः वैश्वामित्रकात्यात्कीलेति॥ एषां विश्वामित्रभरद्वाजाभ्यामविवादः

॥ एवमिदानींतनानामपि दत्तकादीनां द्वयोरपि पित्रोः समगोत्रेर विवादः॥ यथाह प्रवरमंजरीकारः॥ एवं पुत्रिकापुत्रदत्तकृ
त्रादीनामपि द्वयोरपि गोत्रयोरविवाह इत्युक्तं मनुवचनं गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुतः॥ गोत्ररिक्थानुगः पिंडो
व्यपैति ददतः स्वधा इति॥ तद्दत्तकादेर्जीवतः आर्षेयवरणाभिवादाश्रित्रीयपत्र विज्ञानेश्वरः॥ सपिंडासु समानगोत्रासु सम
नप्रवरासु भार्यात्वमेव नोत्पद्यते उत्पन्नेपि दृष्टविरोध इति०॥ इदमुपलक्षणं॥ भार्यात्वोत्पत्तावपि अदृष्टदोषांतरप्रयोजका
निसत्वान्यानि० यथाह नारदः॥ प्रत्युद्वाहो नैव कार्यो नैकस्मिन्दुहितृद्वयं• नचैकजन्ययोः पुंसोरेकजन्ये तु कन्यके इति॥ स्व
कन्या यस्य पुत्राय दत्ता तत्कन्यायाः स्वपुत्रेण परिणयनं प्रत्युद्वाहः॥ अत्रोत्तरार्धगतनिषेधात् पारिजाते स्मृत्यंतरे० एकोद
रीकरतलग्रहणं यदि स्यादेकोदरस्य वरयोः कलनाशनं च॥ एकाह्निके तु विधवा भवतीह कन्या नवांतरे तु शुभदं पृथु
श्रोलरोध इति॰ विवाहस्त्वेकजातानामेकस्मिन्नुदये कुले नाशकरोत्येकवर्षे स्यादिकाविधवातयोरिति॥ उदयो लग्नमि
तिपारिजाते॥ गर्गः॥ भ्रात्रोर्युगे स्वसृयुगे भ्रातृस्वसृयुगे तथा॰ नजातु मंगलं कुर्यादेकस्मिन्मंडपेहनि॥ पुत्रीपरिणयादूर्ध्वं या
वद्दिनचतुष्टयं॥ पुत्रं तस्मै कुर्वीत नोद्वाहमिति सूरयः इति॥ एतद्वचनद्वयं भिन्नमातृकविषयमिति पारिजाते० ज्योतिर्नि
बंधे वं० सामान्यप्रत्ययमपि एकोदरप्रसूतानामेकस्मिन्वत्सरे यदि० विवाहो नैव कुर्वीत कुर्वंति मुनयोन्यथेति सारावली
वचनेन समानोदरप्रसूतविषयनिषेधस्य प्राप्तत्वात्तद्भिन्नविषयं भवतीति तदाशयः॥ उद्वाह्य पुत्रीं न पिता विदध्यात्सुतस्य कृत
रत्वोद्वहनं द्विजातु॰ यावच्चतुर्थीदिनमत्र सर्वं समाप्य चान्योद्वहनं विदध्यादिति कश्यपदिवचाप्येवं भिन्नोदरविषयं॥ अत्र
ति चतुर्थीदिन इत्यर्थः॥ यत्तु ज्योतिर्निबंधे मेधातिथिः पृथक्मातृजयोः कार्यो विवाहस्त्वेकवासरे॰ एकस्मिन्मंडपे कार्यः
पृथग्वेदिकयोस्तथा पुष्पपट्टिकयोः कार्यं दर्शनं न शिरस्थयोः॥ भगिनीभ्यामुभाभ्यां च यावत्सप्तपदी भवेदिति॥ तत्कृत

भेदाभिप्रायं॥ कार्यइति कर्मत्रयस्य द्वाभ्यां त्रिभिरित्यन्वयसंभवात्॥ उदाहृतगर्गवाक्ययोः कपर्दिवाक्ये चैककर्तारं प्रति
निषेधोज्ञाप्यते॥ कुर्यात् कुर्वीत॥ नपितापि दद्यादिति त्वादेस्तथैव प्रतीतेः॥ अतश्च द्वाभ्यां कर्तृभ्याम् एकस्मिन्नपि लग्ने एकस्मि
२०५ न्नपि गृहे भिन्नोदरयोः विवादः कार्यः भिन्नकर्तृकत्वेनैव मंडपप्रतिष्ठादिभेदः प्रतीयते॥ एककर्तृत्वे तु दिनचतुष्टयेन पूर्वं
विवाहं समाप्योत्तरं कुर्यात् अतिसंकटे त्वेकस्मिन्नपि दिने मंडपदेवताप्रतिष्ठापभेदेपि गृहभेदेन वेति व्यवस्था बोध्या॥ व
क्ष्यमाणवसिष्ठवाक्योक्त राद्धस्यापि भिन्नोदरसाधारणत्वाच्चात्॥ मदनरत्ने नारदः॥ मातृयज्ञक्रियापूर्वं ज्येष्ठं कृत्वा तु मंगलं॰
अतुत्रयं पुनर्यावन्न कुर्यात्कनिष्ठमंगलं॥ एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः॥ नसमानक्रियां कुर्यान्मातृभेदे विधीय
त इति॰ अतुत्रयस्य मध्ये चेदून्याहस्य प्रवेशनं॰ तदाह्येकोदरस्यापि विवादस्तु प्रशस्यते॰ अत्रत्यतु त्वादेर्नविवादभि
न्नं एकोदरविषयं मंगलद्वयं अद्वभेदेपि न भवतीति ज्ञाप्यते॰ तत्रैवाभिहितस्तु पुत्रोपनयदूनार्धषण्मासाभ्यंतरे त
था॥ पुत्रोद्वाहं न कुर्वीत विवाहव्रतबंधनं॥ यमयोस्तु एकस्मिन्वत्सरे चैववासरे मंडपे तथा॥ कर्तव्यं मंगलं स्वसोर्भ्रात्रोर्य
मलजातयोरिति॥ तथा मदनरत्ने वसिष्ठः द्विशोभनं त्वेकगृहेपिने ष्टं मंतु पश्चान्नवभिर्दिनैस्तु॰ आवश्यकं शोभनमु
त्सुकोवाद्वारेथवाचार्यविभेदतोवेति॥ एकोदरप्रसूतानां नाग्निकार्यत्रयं भवेत्॥ भिन्नोदरप्रसूतानां नेति शातात
पोब्रवीदिति शातातपग्रहणेन भिन्नोदरविषयनिषेधस्यानित्यता ज्ञाप्यते॥ गृह्यपरिशिष्टे अविरुद्धसंबंधामुपयच्छेत
विरुद्धसंबंधो यथा॥ भार्यास्वसुर्दुहिता पितृव्यपत्नीस्वसा चेति॥ इत्यमहं॥ अथ विवाहकालः आश्वलायनः॥ उद
गयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः सर्वकालमेके विवाहमिति॥ कल्याणनक्ष २०५
त्रे ज्योतिःशास्त्राविरुद्धमिति वृत्तिकृत्॥ पुण्ये नक्षत्रे दारान्कुर्वीतेति छंदोगसूत्रे नक्षत्रग्रहणात्तिथ्याद्यपेक्षा यान क्षत्रभा

व्ययकमिति तद्भाष्ये॥ विवाहो दिवा कार्यः रात्रावपि केचित्कुर्वंति तत्र कारणं न विद्म इति जयंतः॥ हेमाद्रौ तु देवलः॥ रा
हुदर्शने संक्रांतौ विवाहात्ययरोद्धिषु॥ स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु चेति॥ वृद्धवसिष्ठः ग्रहणोद्वाहसंक्रांति
यात्रादौ प्रसवेषु च॥ दाने नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यत इति रात्रावपि कन्यादानमुक्तं॥ अन्यत्रापि सुमंतुः॥ ग्रहणो
द्वाहसंक्रांतियात्रार्तिप्रसवेषु च॥ श्रवणे चेतिहासस्य रात्रौ दानप्रशस्यतेति॥ निर्णयामृते॥ अर्कादिन्न भिपुत्राणां दि
नेषु कलहाविये तिदिनग्रहणाद्रात्रौ विवाहे न दोष इति उक्तमिति रात्रावपि विवाहसिद्धः॥ मदनरत्ने॰ नारदः॥ युग्मेब्दे जु
न्मतः स्त्रीणां प्रीतिदं पाणिपीडनं॥ एतत्पुंसामयुग्मे द्वेव्यत्यये नाशकृत्तयोरिति॥ पारिजाते यमः॥ दद्याद्गुणवते कन्यां न
ग्निकामविशंकित इति॥ अस्यामवस्थायां शंकाप्रसक्तिं वदन् अष्टमवर्षपर्यंतं ततो गर्भपंचमप्रभृतिः कन्याविवाहेउ
चितः कालः॥ स्त्रीणामुपनयनस्थाने नापन्नो विवाह इति तद्व॥ चतवयो वस्थायां विवाहस्योचितत्वात्॥ अतस्तत्र
विवाहे शंकाने तिदर्शयति॥ षडब्दोर्ध्वं रंतु प्रशस्ततरः कालः॥ षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः॥ सोमो भुंक्ते
ततस्तद्वद्गंधर्वश्च तथानल इति ज्योतिर्निबंधोदाहृतवचनात्॥ हेमाद्रौ वात्स्यः॥ माघे मासि भवेद्धूवा कन्या सौभाग्यसं
युता॥ फाल्गुनोढा भवेत्साध्वी वैशाखे पुत्रिणी भवेत्॥ धर्मयुक्ता भवेज्ज्येष्ठे धनिनी कार्तिके भवेत्॥ देवपूजारता नित्यं
मासे स्यात्सौमदेवतेति॥ धनिनी स्यात्तते त्रेण धनसंपद्वती॥ निस्वामितिभर्त्रादिशुश्रूषाव्याहतिः मचिता॥ सोमदेवतो
मार्गशीर्षः॥ अत एव मदनरत्ने नारदः॥ माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः॥ मध्यमः कार्तिको मार्गशीर्षो
वै निंदिताः परे इति॥ यत्तु तत्रैव नरहरिवचनं माघफाल्गुनवैशाखज्येष्ठाषाढमार्गका याः षडेते पूजिता मासास्वतुर्वर्णप्र
नित्यशः इति॥ अत्र विहितप्रतिषिद्धानामाषाढादीनां देशभेदेन व्यवस्थेति मदनरत्ने॥ वसिष्ठस्तु पौषेपि कुर्यान्मकरस्थिते

Indira Gandhi National
Centre for the Arts

कन्यैत्रे नवे मेष गतौ यदा स्यात्॥ तत्रास्त माषाढके तं विवाहं वदंति गर्गा मिथुनस्थिते र्के इति॥ यद्यपि ज्येष्ठमास्याद्य गर्भस्य
शुभं वर्ज्यस्त्रिया अपीति निषेधोस्ति तथापि वधूवरयोरन्यतरज्येष्ठत्वे न दोषः॥ ज्येष्ठस्य ज्येष्ठकन्याया विवाहो न प्रशस्यते
२०६ ॥ द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकज्येष्ठं सुखावहं॥ ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसम्मतमिति सिद्धिरोक्तेः॥ तथा कृत्तिकास्थरवे
रतिक्रमेपि न दोष॥ कृत्तिकास्थरविं त्यक्त्वा ज्येष्ठे ज्येष्ठस्य कारयेदिति॥ [redacted] दीक्षेः॥ यत्तु सार्वकालत्ववचनं तदापद्
राघधर्म्यविवाहविषयमिति मदनरत्ने॥ आश्वलायनस्तु त्रयाणि माघ्यकर्णी रोतु प्रत्यासत्तु काला या विवाहविषयमित्य ज्येष्ठे
चतुः॥ सर्वे मासा विवाहस्य शुचितपस्तपस्य वर्ज्यमिति त्युक्तेः॥ इति बौधायनः॥ इति मासाः॥ अथ तिथयः॥ नारदः
॥ प्रतिपद्दुःखजननी द्वितीया प्रीतिवर्द्धनी॥ सौभाग्यदा तृतीया स्याच्चतुर्थी चार्थनाशिनी॥ पंचम्यां सुखवृत्ता निषष्ठी
विघ्नप्रदायिनी॥ विद्याशीलसुखाप्तिः स्यात्सप्तम्यामफलाष्टमी॥ नवमी शोकफलदा आनंदो दशमीदिने॥ सुखदैकाद
शी ज्ञेया सफला द्वादशी स्मृता॥ मानपुत्रौ त्रयोदश्यां चतुर्दश्यां तु दोषदे॥ फलं वदुविधं पंचदश्यां चैवं विशेषतः॥ पं
चदश्यौ पौर्णमासी॥ विवाहमारभ्य चतुर्थीमध्ये श्राद्धादि नेदर्शादिनेयादि स्यात्॥ ये ये प्रमाज्ञोति तदा शुक्लज्याजीवे त्यपि
श्वेदन प्रयत्नात्स्यात् इति ज्योतिर्निबंधवचसामाया विवाहमावनां दर्शवा निषेधे न तत्र सुतरां विवाहनिषेधसिद्धेः॥ श्रा
द्धलघुत्वेदिनमिति विवाहमध्ये श्राद्धस्यैव निषेधः न तु तद्वहितततिथिमात्रस्य॥ वृत्ते विवाहे परतस्तु कुर्याच्छ्राद्धं स्व
धाग्निर्न तु दूषयेतमिति शास्त्रोत्तरस्यानिर्विषयत्वापातात्॥ दर्शादिनमिति स्वरूपेण तिथिनिषेधः तथा सत्येव द्रव्य
ग्रहणस्य सार्थकत्वात्॥ प्रेतश्राद्धसपिंडीकरणानुमासिकानां तु विवाहादिनिमित्तकवृद्धिपूर्वकालप्रमीतविषयाणां प्रा
प्तकालानां कालेनुष्टाने नाप्राप्तकालानामपकृष्यानुष्टाने न च प्रेतस्य चतुःपुरुषपर्यंतं सपिंडानां वृद्धिश्राद्धविशिष्टस्य २०६
त्कर्मस्वधिकारः॥ प्रेतकर्माण्यनिर्वर्त्य वरेन्नाभ्युदयक्रियां॥ आचतुर्थं ततः पुंसि पंचमे शुभदं भवेदिति मेधातिथिवचना

त्॥ अत एव प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथा॥ अपकृष्यापि कुर्वीत कर्तुं नांदीमुखं द्विज इति हेमाद्रिलिखितशाट्या
यनिवचसोपि तावत्सपिंडाविषयत्वं प्राप्तकालप्रेतकर्मणां यावतः पुरुषान्प्रति नांदीमुखानुरोधेनावश्यकर्तव्यता विहि
तातान्प्रत्येवापकर्षविधावपि ज्ञाद्रः सामंजस्यात्॥ सपिंडीकरणस्य सत्यपि प्रेतश्राद्धत्वे आहिताग्न्यादिविषयत्वेन व्यव
स्थापितत्रिपक्षादिकालबाधे नाप्यपकर्षसिध्यर्थं पृथग्ग्रहणं॥ एवं च सपिंडीकरणादर्वागपकृष्यकृतान्यपि पुनरप्यप
कृष्य तेहच्छुतरनिषेधनादिति स्मृत्यंतरमपि तावत्पुरुषविषयमेव पुनरपीत्युक्तेः तान्प्रत्येव संभवात्॥ यद्यपि केचि
दभियुक्ता नांदीश्राद्धनिमित्तोयमपकर्षोऽसपिंडीकृतानां तत्र देवतात्वासंभवात्॥ अतः स्वपितृदेवस्य नांदीश्राद्धांगके संस्का
र्यपितृदेवत्यतदंगके चोपनयनादौ शास्त्रनियुक्तेन पुंसा स्वपितुः संस्कार्यपितुर्वा सपिंडीकरणोपस्थितौ विहितकाला
गप्रतीक्षा श्राद्धैः सह्यापकृष्य सपिंडीकरणं कार्यमिति विधीयते न तु सपिंडकर्तृकनांदीश्राद्धानुरोधेन नांदीश्राद्धासंब
द्धदेवत्यसपिंडीकरणस्याप्यपकर्षः शास्त्रार्थ इत्याहुः॥ तथापि नेत्थं स्त्रीकर्तुमुचितं मेधातिथिवचनविरोधात् संस्कार्य
पित्राद्युद्देश्य नांदीश्राद्धांगकोपनयनाच्चतुर्थपुरुषादूर्ध्वमपि संभाव्यते असपिंडीकृतानां च देवतात्वासंभवस्तत्रापि स
म इति कथं नापकर्षः॥ अतश्चाचतुर्थमित्यनुपपन्नमिति तिथयः॥ अथ नक्षत्राणि॥ कात्यायनः॥ उदगयन आपूर्यमा
णपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयादिति उपक्रम्य त्रिषूत्तरादिषु स्वातौ मृगशिरसि रोहिण्यां वेति॥ उत्तरा हस्तश्चित्रा इति
त्रीणि॥ तथा उत्तराषाढा श्रवणा धनिष्ठा इति त्रीणि॥ उत्तरा प्रोष्ठपदा रेवत्यश्विन्य इति त्रीणि॥ इति व्याचष्ट हरिहरः॥ यद्य
प्याश्वलायनेन विवाहकालनियममुक्त्वा अयं कुलकन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाह इत्युक्तेः विवाहस्य दार्थदानरूप
पुण्यनक्षत्रादिनियमः प्रतीयते तथापि कात्यायनेन पाणिग्रहणे नियमविधानात्तदंतं कर्म मुहूर्ते कार्यम्॥ अत एव पारि

Indira Gandhi National
Centre for the Arts

जातेबृहस्पतिरप्यन्यनक्षत्रविधिंवदन्नाह॥सौम्यपैतृकहस्ताश्वमैत्रमूलाश्विवायवः॥श्रीग्युनराणिपौष्णंचरोहिणीचशु
भप्रदा॥अन्ताश्वसर्वावर्ज्याःस्युस्ताराःपाणिग्रहेसदेति॥हेमाद्राविपि॥हस्तोत्तराणिवायव्यंमैत्रंमूलंचरेवती॥रोहिणी
२०७ सौम्यपित्र्यंचशुभंपाणिग्रहेसदेति॥विद्धितेष्वपिग्रहविद्धोषाक्रमणेननक्षत्रेषुनिषेधंतदपवादंचपाह॥हरिजातेपारिव्रद
स्यातिवसिष्ठाकृचतुः॥वत्सरेणतदर्धेनतस्यापपर्वेनयांतिये॥मंदज्ञीवकुजेदं०धाराश्रयःपूर्वजंगुणमिति॥राहुकेत
विमुक्तंयद्गृहचक्रनिपीडितं॥वत्सरार्द्धेनशुद्धंतग्रहयुक्तयुतंचभमिति॥यास्मिन्नोस्तमयंयांतियद्गास्तङ्गत्रिमासतः
॥शुद्धत्वमुपयातीतिवज्रिन्यक्षासनोदितमितिच॥चंद्रशुक्रसमायोगाद्गुदूनिशुभतामियुः॥ग्रहमुक्तेतुनक्षत्रेतदेव
यदिचंद्रमाः॥तयोर्मध्येक्रूरेस्मीडांदोषान्यवान्यपोहतीतिच॥इतिनक्षत्राणि॥अथवासरादि॥नृसिंहः॥बुधशुक्रे
दुज्जीवानांवारेषुशुभदंभवेत्॥शुभानांमंत्रकंश्रेष्ठंवर्गादिवादकइति॥मदनरत्नेगर्गः॥चंद्रताराबलंमुख्यंदं
पत्योःपाणिपीडनेमुख्यंगुरुबलंबध्वावरस्यचरवेर्वलं॥विवाहेमुख्यकालेतयोर्वलाभेपूजाकार्या॥विवाहेवलमावर्य
दंपत्योर्गुरुसूर्ययोःचेत्पूजांयत्नतःकुर्यात्तदुर्वाप्रदत्तयोरितितत्रैवनारदवचनात्॥चेदित्यस्पवर्लिस्त्रान्वयः॥गुरुपू
जाप्रकारः॥उपनयनप्रकरणएवोक्तइतिनेहोच्यते॥रवेरपिपूजायद्वमरवरीसाद्रष्टव्या॥उक्तानुक्तकालसंग्रहार्थःश्लो
कः॥श्रीधरीये॥अर्केकर्ककन्याघटधनुर्मुक्तेमृगेमंत्रिणिस्फीतज्योतिषिशीतरोचिषिभवोद्विक्तेविरिक्तेतिथौ॥रोहिणु
त्तररेवतीपितृमरुन्मित्रेंदुहस्ताःसुरेष्वाराकौर्कजवासरादिरहितेषूद्वाहकर्मारभेदिति॥मंत्रीगुरुः॥स्फीतज्योतिषौस्यस्यमध्य
माणन्यायेनोत्रयतोन्वयः॥नतुमंत्रिणोरनेनविशेषणेनास्तबाल्यादिनिषिध्यतेशीतरोचिश्चंद्रः॥भवोद्विक्तइतितद्विशेषणं २०७
नतुन्मूपक्षविधिःपूर्वविशेषणेनतत्रापिवक्ष्यादिःप्राशस्त्यं॥अनेनैवकृष्णपक्षनिषेधस्तत्रापिपंचम्यंतस्यनानिषेधप्रति

इतिचज्ञाप्यतेतत्रस्फीतज्योतिष्टोङ्कंद्रस्यपूर्वोदाहृत॥शास्त्रांतरच्चाविरिक्तइतिउक्तविहितकालेपिरिक्तानिषे
धः॥पितरोमघा॥मरुतःस्वाती॥मित्रोनुराधा॥इंदुर्मृगः॥आसुरंमूलं॥आरोभौमः॥अर्कजःशनिः॥आदिशब्दे
नविष्टिव्यतिपातवैधृत्यादिनिषेधाः॥संग्रहे॥सिंहस्थेमकरस्थेगुरौनिषेधप्रतिप्रसवव्यवस्थाचसंव
त्सरकृत्यकौस्तुभेवाहस्यसवत्सरदीधितौ॥इष्टव्या॥जन्ममासादेर्निषेधप्रतिप्रसवयोर्व्यवस्थोपनय
नाधिकारएवोक्तेतिनेहोच्यते॥एवंक्षयपक्षक्षयमासक्षयसंवत्सराणामपिविवाहेनिषेधः॥तत्रक्षयपक्ष
चंडेश्वरीये॥त्रयोदशदिनेपक्षेविवाहादिनकारयेत्॥गर्गादिमुनयःप्राहुःकृतेमृत्युस्तदाभवेत्॥मृत्युर्वि
वाहेदंपत्योः॥आदिपदोपात्तचौलादौशिशोः॥ज्योतिर्निबंधेउपनयनंपरिणयनंवेश्मारंभादिपुण्यकर्मा
णि॥याश्चाद्विक्षयपक्षेकुर्यान्नजिज्ञीविषुःपुरुषः॥मदनरत्ने॥पक्षस्यमध्येद्वितिथीपतेतांतदाभवेद्रौरव
कालयोगः॥पक्षेविनष्टेसकलंविनष्टमित्याहुराचार्यवराःसमस्ताः॥त्रयोदशादिनेपक्षेनूनंसंहरतेजग
त्॥अपिवर्षसहस्रेणकालयोगःप्रकीर्तितः॥इतितत्रपक्षस्यचांद्रदिनात्मकतिथिसमूहात्मकत्वात्पक्ष
पदसमभिव्याहारवशान्नदिनपदंचांद्रविनपरं॥दिनेशादशीनंदिनमितिचप्रसिद्धेस्तद्दृद्धितसाणतिथ्योरदि
नत्वमभिप्रेत्यतद्वदवृद्धिष्टत्रयोदशतिथ्यात्मकानिदिनानियस्मिन्नितिव्युत्पत्त्यात्रयोदशादिनत्वंपक्षस्य
बोध्यं॥एवंचपक्षांतर्गतयोःकयोरपितिथ्योःक्षयेणतत्प्रसंगेपिपक्षस्यमध्येद्वितिथीपतेतामितिवचनप
ठइतिसप्तम्यप्रयोगेसामध्यपदप्रयोगेणआरंभसमाप्तित्वेनाभिप्रेतेप्रतिपत्त्संचदर्शौनक्षयंयत्रगच्छतः॥त
द्भिन्नयोःकयोश्चितिथ्योःक्षयेणसपक्षोनिंद्यत्वेनाभिप्रेतइतिगम्यतेनचप्रतिपच्चैदाक्षयेद्वितीयामारभ्यवि

Indira Gandhi National
Centre for the Arts

त्रोप्यपक्षस्यापि संग्रह इति कृत्वा बुधा एव विचारं कुर्वंतु॥ अत एव भीष्मपर्वणि उत्पातप्रदर्शनेन युद्धं निवारयिष्यतो व्या
२०८ सस्य धृतराष्ट्रं प्रत्युक्तिः॥ खरा गोषु प्रजायंते इत्यादि चतुर्दशीं पंचदशीं भूतपूर्वां च षोडशीं॥ इमां तु नाभिजानेहममा
वास्यां त्रयोदशीमिति॥ एकतिथिरूपा षोडशी तन्मध्ये एव चतुर्दशी क्षयवृद्ध्यभावे पंचदशीममावास्यां पूर्वं भूता माभि
जाने इमां युद्धकाले सन्निहितां तिथिद्वयक्षयेण त्रयोदशीं पूर्वकाले भूतां नाभिजाने एवमहानुत्पात इत्याशयः॥ ए
वं च पूर्वार्द्धे चतुर्दश्यादेः प्रतिपंक्तिरूपितत्वात् तस्याय पाव त्रयोदशीत्वमपि प्रतिपन्निरूपितं॥ तच्च तद्वैव घटते य
दि प्रतिपत्पंचदशीरूपोक्षयः॥ अस्ति च मौसले पि भगवदुक्तिः त्रयोदशी पंचदशी कृतेयं राहुणा पुरा॥ तदा च भारते
युद्धे प्राप्ताचार्य बंधक्षयायन इति॥ अत्रापि या पंचदशी सा त्रयोदशीति प्रकृता मावास्याविषयो तयोर्निरूपके
स्यावरूपं भावात् प्रतिपत्पंचदशीभिन्नयोरेव तिथ्योः क्षयेण क्षयपक्षो नान्यथेति सिद्धं॥ इति पक्षनिर्णयः॥ तथा दै
यमासोपि निषिद्धः॥ काम्यादिष्वखिलेषु कर्मसु परित्याज्यो ह्ययाख्योत्तरासंक्रांतीरिति दीपिकोक्तेः॥ तन्निर्णयश्च
वांद्राद्दकौस्तुभे उक्त इति नेहोच्यते॥ तथा क्षयसंवत्सरो निषिद्धः॥ विवाहादानुवृत्तो मदनरत्ने लल्लः॥ अतिचारग
तो जीवस्तं राशिं नैति चेद्यदि॥ लुप्तः संवत्सरो ज्ञेयः सर्वकर्मबहिष्कृत इति॥ पूर्वराशिं त्रोषमतिक्रम्य राश्यंतर
संचारोतिचारः तं प्राप्तो गुरुः पुनस्तं राशिं यदि नैति तदा लुप्तः संवत्सरः सर्वधर्मबहिष्कृतो ज्ञेय इत्याशयः॥ एवं
च पूर्वनिमित्ते सत्यपि संवत्सरक्षयः पाक्षिक इत्युक्तं भवति॥ तथा च विवृतं तेनैव यदातिचारं सुरराजमंत्री करो २०८
ति गो वृश्चिकमीनसंस्थः॥ नायात्यसौ यद्यपि पूर्वराशिं शुभाय पाणिग्रहणं वसिष्ठः॥ वृषे मेषे मीनकुंभे पतीचारगो
गुरुः॥ न तत्र कालोपः स्यादित्याह गालवो मुनिरिति॥ इति क्षयसंवत्सरनिर्णयः॥ यश्च माधवीयादौ आरंभ

— श्च विवाहस्य माता यदि रजस्वला॥ निवृत्तिस्तस्य कर्तव्या सद्वत्वशंकेति वोदनादिति निषेधस्तन्निमित्तरजोदर्शनस्य
नांदीश्राद्धोत्तरमसत्त्वे ततः पूर्वोपस्थावसि मुहूर्तांतरालाभे कूष्मांडजपादिना विवाहसंभवोप्युपनयनाधिकारण
वोक्तो नुसंधेयः॥ रजोदर्शनादिसंभावनायां नांदीश्राद्धस्यापकृष्टो नुष्ठानेप्यवधिः प्रयोगरत्ने॥ एकविंशत्यहर्यज्ञे
विवाहे दश वासराः॥ त्रिषट् चौलोपनयने नांदीश्राद्धं विधीयत इति॥ एवं नांदीश्राद्धोत्तरं सूतकेपि मातृविवाहप्रतिबंधः
विवाहव्रतयज्ञेषु श्राद्धे होमेर्चने जपे॥ आरब्धे सूतकं न स्यादनारब्धे तु सूतकं॥ आरंभो वरणं यज्ञे संकल्पो व्रतसत्र
योः॥ नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रियेति विष्णूक्तेः॥ मुहूर्तांतरालाभे सामग्र्यां च कृतायां सत्यां किंनोप्यधिक
रोपाय मादपारिजाते विष्णुः॥ अनाश्च विष्णुव्यर्थं कूष्मांडैर्जुहुयाद्घृतं॥ गां दद्यात् पंचगव्याशी ततः शुध्यति सूतिकी ति
॥ ततः शुध्यतीति पुनरुक्तिर्विवाहाद्युपयोगिपाकपरिवेषणादावपि शुद्धिज्ञापनार्था॥ गां पयस्विनीं दद्यात्॥ संकटे
समनुप्राप्ते सूतके समुपस्थिते॥ कूष्मांडीभिर्घृतं हुत्वा गां च दद्यात्पयस्विनीं॥ चूडोपनयनोद्वाहप्रतिष्ठादिकमाच
रेत॥ यदेव सूतकप्राप्तिस्तदेवाभ्युदयक्रियेति संग्रहोक्तेः॥ एवं शुद्धिपूर्वकं विवाहाद्यनुष्ठाने॥ तदंगत्वेन संकल्पि
तान्नभोजनेन दोष इति बृहस्पतिनोक्तेः॥ विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके॥ पूर्वसंकल्पितान्नेषु न दोषः परि
कीर्तित इति॥ मृतसूतकमध्ये विवाहाद्यनुष्ठाने उक्तशुद्धिपूर्वकमारब्धे इत्यर्थः॥ नांदीश्राद्धोत्तरं सूतकादौ विवा
हारंभोत्तरमपि संकल्पितान्ने विशेषः॥ बृहत्त्रिंशन्मते॥ पूर्वार्द्धं पूर्ववत्॥ परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमै
रिति॥ विवाहादिमतेष्वसूतकादिप्राप्तावित्यर्थः॥ पूर्वसंकल्पितान्ने भोजनसमये सूतकादौ दातृदोषस्तत्रैव
॥ भुंजानेषु तु विप्रेषु त्वंतरा मृतसूतके॥ अन्यगेहोदकाचांताः सर्वे ते शुचयः स्मृता इति॥ भोक्तृभिर्भुंजतोपस्याज्प
पकृष्टः सूतकी निर्मोक्तव्य इत्याशयः॥ कन्यायास्तु रजोदर्शने तु विवाहात्पूर्वं जाते विवाहयोग्यतासिध्यर्थमुपायमा

Indira Gandhi National
Centre for the Arts

श्वलायनः॥ पिता स्वल्पस्वपुत्र्यास्तु गुणाय देयदाधितः सुधीः॥ दानावधि ऽगृहे यत्नात्सालयेत्त्वरजोवती॥ दद्यान्तद्गुणं स्वगाः शक्तः कन्यापिता यदि॥ दानं तस्यैका पियत्नेन दानेतस्या यथाविधि॥ दद्याद्वात्रेऽलंकरणं धनं मतिस्वः सदाज्ञियं
॥ तस्मात्तीर्ततु संख्येषु वराय प्रतिपादयेत्॥ उपोष्यत्रिदिनं कन्या रात्रौ पीत्वा गवां पयः॥ अदृष्टरजसे दद्यात्कन्यायै रत्नभू
षणं॥ तामुद्वहन्वरश्चापि कूष्मांडैर्जुयाद्द्विजइति॥ तस्याः कन्यायै दाने कर्त्तव्ये यथा विधि सुवर्णशृंगादि गोदानविधि
नेत्यर्थः॥ वरायेति उक्तप्रकारेणायमात्मनेन दाता कन्यादाने योग्यो भवतीत्यर्थः॥ उपोष्यतिश्लोकेन दृष्टरजस्का कन्या
उपवासत्रयांते गव्यपयः पानपूर्वकं अदृष्टरजसे कुमार्ये सरत्नभूषणदानेन विवाहयोग्यता भवते॥ तामुद्वहन्नि
ति वरस्य कूष्मांडहोमेन तद्वाहयोग्यतेति बोध्यं॥ होमकाले रजोदर्शने तु यज्ञपार्श्वः॥ विवाहे वितते यज्ञे होम
काल उपस्थिते॥ कन्यामृतुमतीं दृष्ट्वा कथं कुर्वंति याज्ञिकाः॥ स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि॥ युंजा
नामाहुतिं कृत्वा ततस्तंत्रं प्रवर्तयेदिति॥ युंजानेति मंत्रस्तैत्तिरीयशाखायां प्रसिद्धः॥ यदा तु दात्रभावेन रजोद
र्शनं ततः स्वयं वरं वरयेत्॥ सत्यपि वा रजसि कंचित्कालं जीवत्स्वपि दातृषु॥ तान्प्रतीक्ष्य स्वयं वरं वरयेत् तदाप्यु
क्तो मातृनुमनुः॥ त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती॥ सती ऊर्ध्वं तु कालादेतस्माद्विंदेत सदृशं पतिं॥ अदीयमाना
भर्त्तारमधिगच्छेद्यदि स्वयं॥ नैनः किंचिदवाप्नोति न च यं साधिगच्छतीति॥ अदीयमाना दात्रभावात्दात्रोपेक्षणा
द्वेति मंतव्यं सायं भर्त्तारमधिगच्छतीति व्याख्यातं माधवेन॥ अथ प्रतिकूलविधि॥ कल्पमहीये वधूवरार्थे घटिते
सुनिश्चिते वरस्य गेहेप्यथ कन्यकाया॥ म्रियेत कश्चिमनुजोऽथ नारी तदा न कुर्युः खलु मंडनं ते॥ वाड्निश्चयेकृते प २०६.
श्चात्पितरौ निधनं गतौ॥ तयोस्तु प्रतिकूलं स्यान्नान्येषां तु कदाचन॥ इति वसिष्ठः॥ वरवध्वोः पिता माता पितृव्यश्च
सहोदरः॥ एतेषां प्रतिकूलं स्यान्नान्यदा विघ्नप्रदं भवेत्॥ पिता पितामहश्चैव माता चैव पितामही॥ पितृव्यस्त्री सुतो भ्रा

ता भगिनी चाविवाहिता॥ एभिरेव विभिन्नैश्च प्रतिकूलं बुधैः स्मृतं॥ अन्यैरपि विपन्नैस्तु केचिदूचुर्न तद्भवेत्॥ मांडव्यः
॥ वाग्दानानंतरं माता पिता भ्राता विपद्यते॥ विवाहो नैव कर्त्तव्यः स्ववंशादि तमिच्छता॥ अथ संकटे प्रतिप्रकारम
हमेधातिथिः॥ वाग्दानानंतरं यत्र कुलयोः कस्यचिन्मृतिः॥ तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत्॥ पुरुष
त्रयपर्यंतं प्रतिकूलं स्वगोत्रिणां॥ प्रवेशातिगमौ तद्वत्तथा मुंडनमंडने॥ प्रेतकार्याण्येपि निवर्त्यं चरेत्तु दयत्रि
यां॥ आचतुर्थं ततः पुंसि पंचमे शुभदं भवेत्॥ स्मृतिरत्नावल्यां पितुरब्दमिदाशौचं तदर्द्धं मातुरेव च॥ मासत्रयं तु
भार्यायास्तदर्द्धं भ्रातृपुत्रयोः॥ अन्येषां तु सपिंडानामाशौचं माससंमितं॥ दत्तदं ते शांतिकं कृत्वा ततो लग्नं विधी
यते॥ ज्योतिःप्रकाशे॥ प्रतिकूलेपि कर्त्तव्यो विवाहो मासमंतरा॥ शांतिं विधाय गां दत्वा वाग्दानादिषु न रितिः प्र
तिकूले न कर्त्तव्यं लग्नं यावद्वत्सरत्रयं॥ प्रतिकूलेपि कर्त्तव्यं केप्याहुर्बहुसंभवे॥ प्रतिकूले सपिंडस्य मासमेकं वि
वर्जयेत्॥ विवाहस्तु ततः पश्चात्त्रयोरेव विधीयते॥ ज्योतिःसारसागरे॥ दुर्भिक्षे राष्ट्रभंगे च पित्रोर्वा प्राणसंशये
॥ प्रौढायामपि कन्यायां नानुकूलं प्रतीक्ष्यते॥ अन्यत्रापि॥ दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च॥ उदासीनस्थित ६
स्यापि प्रतिकूलं न विद्यते॥ संकटे समनुप्राप्ते याज्ञवल्क्येन योगिना॥ शांतिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेत्
॥ अकृत्वा शांतिकं यस्तु निविद्धे सति दारुणे॥ प्रकरोति शुभं कर्म विघ्नस्तस्य पदे पदे॥ इति वसिष्ठः॥ प्रतिकूले तु
संप्राप्ते विवाहं नैव कारयेत्॥ अतेदोषविनाशाय कुर्याच्छांतिमिमां शुभां॥ श्रियेजात इति श्रियं॥ इदं विष्णुरि
ति विष्णुं॥ गौरीर्मिमायेति गौरीं॥ अवकमिति अवकं॥ परं मृत्यो इति यमं॥ पूजयित्वा तिलाज्यं च दद्याद्दश्चोत्तरं श
तं॥ भूः स्वाहा मर्त्युं तु नरूपतां स्नुषायै सुवर्द्धतां स्वाहा॥ ततो मंसमाप्याथ गोद्वयं दक्षिणां भवेत्॥ स्मृतिचंद्रिकायां

Indira Gandhi National
Centre for the Arts

कृते वाग्दिःश्वये पश्चान्मृतः मर्त्यस्य गोत्रिणः॥ तदा न गतं कार्यं नारीवैधव्यदं ध्रुवमिति॥ वाग्दानानंतरं यत्र कुल
योः कस्यचिन्मृतिः॥ तदोद्वाहो नैव कार्यः स्ववंशस्य दोषत इति॥ अत्र यद्यपि म्रियेत कश्चिदिति मृत्युर्भवति क
२१० स्यचिदिति चाविशेषेणोक्तं तथापि पितामहादीनामपि च मातामहादीनामपि मरणस्य प्रतिकूलदोषनिमित्तत्वे
न क्वचिदकीर्तनाद्विवाहितायाः भगिन्या इवाविवाहितायाः मरणस्य तथात्वानुक्तेर्मेधातिथिवाक्ये स्वगोत्रिण
मिति चंद्रिकावाक्ये मर्त्यस्य गोत्रिण इति च कीर्तनात् व— वरस्य गोत्रस्य पिंडेषु त्रिपुरुषांतर्गते मर्त्ये मृते प्र
तिकूलदोष इति मंतव्यं॥ स्त्रीवरस्य द्वितीयादिविवाहसमये पूर्वोढासुतस्यापूर्वोघ्नः॥ एतल्लोकोपलक्ष
णं॥ एवं पितृव्यग्रहणं तत्पुत्रस्य॥ एवं च वरमारभ्य जनकादिपुरुषाजन्यत्रिपुरुषीकूटस्थमारभ्य संतानश्रे
ण्य च त्रिपुरुषात्र बोद्धव्या॥ वधूवरयोः समालग्नेदेतन्मरणे किंचित्कालं प्रतीक्षैव विवाह इति तदा न कुर्यु
त्यादिना द्वेधोच्यते॥ तयोस्तु प्रतिकूलं स्यादिति कालप्रतीक्षा शांतिर्वा सप्समाधेयो दोषो द्वयोर्युगपन्मर
णजन्य इत्यर्थः॥ अत एवोक्तं नान्येषां तु कदाचनेति॥ अन्येषां सपिंडानां तयोरप्येकैकमरणजन्यस्तु समाधेय इ
त्याशयः॥ वृद्धवसिष्ठवाक्ये चतुर्णां मरणस्य महाविघ्नकरत्वकथनं तत्र प्रतीक्षासहिता केवला वा वि[illegible]ना
यकशांतिरिति कथनार्थं॥ अत एव सद्भिर्वाक्यशेषे शांत्यकरणे पदे पद इति विघ्नस्य महत्त्वं प्रदर्शितं॥ एभि
रेव पितृव्यैरिति कालप्रतीक्षासहितायाः श्रीपूजनादिशांतेर्निमित्तमेतन्मरणमेवेत्याशयः॥ अत एव वाक्ये नैव
कर्तव्यो निमित्तानंतरमिति आम्नेयं॥ एवं वृद्धवसिष्ठवाक्यमपि॥ प्रतीक्षा च सामान्यतः संवत्सरमृतुत्रयं मास २१०
मात्रं वेति पक्षत्रयं मेधातिथिवाक्यसहितस्मृत्यंतरवाक्याद्बोद्धव्यं॥ रत्नावलीयवाक्ये तु आशौचशब्देन प्रतिकू

लकृतं विवाहानधिकारमात्रं प्रतीक्षातात्पर्यकं बोद्धव्यं॥ तत्र पितुर्मरणे अब्दप्रतीक्षया मात्रादिमरणनिमित्तत
दर्धादिप्रतीक्षायास्तुल्यत्वेनोक्तत्वात्पितुर्मरणे संकटतारतम्येन पक्षत्रयं॥ मातुर्मरणे तदर्धमासमात्रं वेति भ्रा
तृमरणे पुत्रमरणे च सार्द्धमासं मासमात्रं वेति पक्षद्वयं पितामहादिसपिंडांतरमरणे तु मासमेव प्रतीक्षेति
व्यवस्था यदि गुणवत्तरमातृमरणे ऋतुत्रयप्रतीक्षया यजनः परितोषः तदा संवत्सरप्रतीक्षापि कार्या॥ एवं गुण
वत्तरभार्यादिमरणे ऋतुत्रयप्रतीक्षापीत्याशयेन तयोरपि पक्षयोः॥ सामान्यविध्युपपत्तिः॥ पितृमातृपितृव्यसो
दराणां चतुर्णां मरणे उक्तव्यवस्थया प्रतीक्षांते विनायकशांतिः॥ अन्यमरणे तदंते शांत्यंतरं यदात्यतिसं
कटवशे न सर्वत्र निमित्ते मासादिकप्रतीक्षाया असंभवः॥ तदा तन्मध्येपि किंचित्कालं प्रतीक्ष्योक्तव्यवस्था
पान्यतरां शांतिं कृत्वा गां दत्वा पुनर्दानं चरेदिति ज्योतिःप्रकाशवाक्यकृतो विशेषः॥ न तु क्वचिदपि प्रतिकूलपूर्व
शौचादिनिमित्ते न निष्टत्वाशौचस्यापि सद्यो विवाहपदे प्रवृत्तिरुचिता यथा सगोत्रसापिंडेषु पुरुषत्रयपर्यंतमेव
प्रतिकूलस्य निषेधनिमित्तत्वं एवं प्रवेशमुंडनयोर्निर्गममंडननिषेधनिमित्तत्वमपि तेष्वेव तावत्पर्यंतमेवे
ति पुरुषत्रये इति मेधातिथिवाक्यार्थः॥ प्रेतकर्माणीत्यंतरवाक्ये तु यद्यपि आ चतुर्थमिति संख्यावरस्योपादा
नात्प्रेतकर्मानिर्वृत्ते निर्निमित्तस्य अभ्युदयनिषेधस्य वच्चोमितिकस्योपादानात्पूर्ववाक्याद्दल्पं तन्निन्मविषय
त्वास्फुटेव प्रतीयते तथापि स्वगोत्राणामा चतुर्थमिति आतुर्यं गलभ्यार्थसिद्धेः तदनंतरपाक्ष॥ प्रेतकर्माणीति च
प्रेतोद्देशेन विहितानि कर्माणि उच्यंते न तु प्रेतशब्दोद्देशाविशिष्टानि॥ ते सपिंडीकरणोत्तरमासिकानामपि संग्रहः

Indira Gandhi National
Centre for the Arts

॥तेषांमुत्पत्तिवेलायां प्रेतोद्देशेनाविहितानामपि तदूर्ध्वोद्देशाद्दत्तपुनराहत्तेर्वाचनिकत्वात्॥ अतएव कात्याय
नः॥ निर्वर्त्य वृद्धितंत्रं तु मासिकानि न तंत्रयेत्॥ अयातयामं मरणं न भवेत्पुनरस्यत्विति वृद्धिकर्मोत्तरं मासिका
२११ नुष्ठाने मृतस्य मरणं अयातयामं भवेत् तच्च मांगलिकर्मोत्तरमापद्यमानमनुचितमिति भावः॥ शाट्यायनि
रपि॥ सपिंडीकरणादर्वाग् अपकृष्य कृतान्यपि॥ पुनरप्यपकृष्यंते वृध्युत्तरनिषेधनादिति॥ एवं च मृतमरण
स्यारोपितत्वेन तन्निषेधं वदता नारोपितत्वेन त्वापादकानां सपिंडीकरणं तानामभ्युदयिकोत्तरमनु
ष्ठानमतिदुष्टमिति ज्ञाप्यते॥ मासिकसाहचर्याद्देवच सपिंडीकारणं तानामनुष्ठानमपि नात्र नांदीश्राद्धवै
वतात्वसिध्यर्थमुक्तमासिकानां तदर्थतायाबाधितत्वात्॥ अनिर्वर्त्येति यद्यपि प्रेतकर्मभिः सहाभ्युदय
क्रियायामंग—त्वात्परपर्यायाः समानः कर्तृकप्रतीयते तथापि तद सति कर्त्रंतरे मुख्यं संतितु प्रेतकर्मसु प्रयो
जककर्तृतामादायोपपादनीयं॥ इत्थमेव द्विवर्षोऽलाबुपस्तीर्य आताभ्यामस्थानो वाद्दिलजिनावपतीति
सूत्रे हृतिकदादिभिस्तदुपपाद्यते विवाहहोमे उपस्तरणस्य वरकर्तृकत्वं लाजावापस्य भ्रात्रादिकर्तृत्वं वि
हितं तस्य यानार्थं तु तस्मिन्लाजहोमस्यापि वरकर्तृकत्वमिति वदद्भिः॥ एवं नांदीश्राद्धदेवतात्वसिध्यर्थं सपिं
डीकरणापकर्षपरत्वेन पराभिमतवचनेपि समानकर्तृत्वमित्थमेव स्वीकार्यं॥ तथा शाट्यायनिः॥ प्रेतश्राद्धा
निसर्वाणि सपिंडीकरणं तथा॥ अपकृष्यापि कुर्वीत कर्ता नांदीमुखं ततइति॥ तथा लघुहारीतोपि॥ भ्राताभ्रा २११
तपुत्रो वा सपिंडः शिष्य एव वा॥ सहपिंडक्रियां कृत्वा कुर्यादभ्युदयं ततइति॥ मृतस्य कन्यादानेदितस्य ज्येष्ठ कनि

ष्ठो भ्रातरो अधिकारिणो कन्यायाः पितृपितामहभ्रात्रभावात्संभवतः॥ पितापितामहो भ्राता सकुल्यो जननी तथा
॥ कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परइति याज्ञवल्क्यवचनात्॥ पितापितामहो तस्य सपिंडीकरणे तु कनिष्ठ
स्यैवाधिकार्ये न ज्येष्ठस्य लपुत्रस्यापि तादृशान्नानुजस्य तथाग्रजः॥ अपित्तोदेन कुर्यातां सपिंडीकरणं विनेति सपिं
डीकरणस्य तं प्रतिविशिष्य निषेधात्॥ न चेदं शास्त्रं शास्त्रांतरागतका नियमकर्तृनियमयोर्बाधं कर्तुमीष्टे॥ श्रा
द्धकर्मणयुभयविधाने वाक्यभेदात्॥ अतो ज्येष्ठस्य सपिंडीकरणे प्रयोजककर्तृत्वं कनिष्ठस्य मुख्यकर्तृतामंगी
त्ये वोक्तवचनयोः समानकर्तृकत्वमुपपादनीयं॥ एवं चानयोर्वचनयोर्देवतात्वसिद्धिप्रयोजनासंकीर्तनाद्विधे
यार्थे क्याद्यमूले क्याद्यमूले—लाघवानुरोधेन प्रेतकर्मापनिर्वर्त्येत्यस्मिन्हीयप्रयोगोदाहृतत्वनार्थपरत्वं स्वी
कर्तुमुचितं॥ यदिपरं मातामहसपिंडीकरणापकर्षोऽसगोत्रविषयो नैवं सिध्येतिदितेयानस्वीक्रियते श्रीमद्भि
र्मास्वीकुर्वंतु न तु स्वकृतेतद्वाक्यव्याख्यावशेनानेकाभियुक्तोद्घाहतस्य सकलदाक्षिणात्यप्रभृत्यनेकशिष्टाचार
संवादिनः प्रेतकर्मापानिर्वर्त्येति वचसो निर्मूलत्वमर्थांतरकल्पनं वोक्तशिष्टाचारस्याप्रामाण्यकल्पनं प्रमाणी
कर्तुमुचितं॥ आस्तां वचनकथा॥ अस्ति तावदाप्याभिन्नशिष्टानां सपिंडदादप्रभृति पुनर्मासिकांते प्रेतकर्मोपावे मां
गलिककर्मानारंभाचारः सपिंडेषु संमताच तत्सत्ताश्रीमतामपि तन्मूलं नविद्म इति वदतां॥ जनपदधर्मा ग्रा
मधर्माश्च तान्विवाहे प्रतीयादितिवत् गृह्यसूत्रकारैरितराचाराणामादरं वदद्भिरस्येवाचारस्यानादरः कृतइ
तिकथमिवनिर्धारितं॥ एवं च नांदीश्राद्धदेवतात्वयोग्यस्यापि सपिंडीकरणापकर्षो मांगलिककर्मानुरोधेन सिद्धः

॥ तथाहि॥ पितामहे अकृतसपिंडने सति पितरि मृते औचित्येन तयोः सपिंडीकरणानंतरं पितुः सपिंडीकरणं कर्तव्यतायां
प्राप्तायामपि पदार्थानुष्ठाने न पितुः सपिंडीकरणकालातिक्रमो भवति तदापि न्यायतः कालक्रमेणैव तथैव कर्तव्यतायां प्रा
२१२ प्तायां न च नेनाकृतसपिंडीकरणाभ्यामपि ताभ्यां पितुः सपिंडीकरणं कर्तव्यं तयाविहितं॥ यथाह कात्यायनः॥ असंस्कृतौ
न संस्कार्यौ पूर्वौ पौत्रप्रपौत्रकैः॥ पितरं तत्र संस्कुर्यादिति कात्यायनोब्रवीत्॥ पापिष्ठमपि शुद्धेन शुद्धं पापकृता पिवा॥ पित
महे न पितरं संस्कुर्यादिति निश्चय इति॥ असंस्कृतौ अकृतसपिंडीकरणौ॥ पूर्वौ पितामहप्रपितामहौ॥ पापिष्ठं अकृतस
पिंडं पितरं॥ शुद्धेन कृतसपिंडेन पापकृता अकृतसापिंडेन वापितामहेन सह शुद्धं निवृत्तप्रेतावस्थां कुर्यादित्यर्थः॥
एवं कृते दर्शश्राद्धं पितादिरश्माभ्यां तासह कर्तव्यपि सपिते नैवोक्तं॥ पितुः सपिंडं तां कृत्वा कुर्यान्मासानुमासिकमिति॥ एवं च द
र्शश्राद्धविकृतित्वान्नांदीश्राद्धे पितादिरश्मयोर्देवतात्वसंभवेपि मांगलिकविवाहाद्यनुरोधे न तयोः सपिंडीकरणं कृतेपि मं
गलिकं कर्म कार्यं तयोः चतुःपुरुषांतर्गतत्वात्॥ अत एव शुभागम एव सपिंडीकरणापकर्षनिमित्तत्वेन कालादर्शेप
ते॥ एकादशेह्नि त्रिपक्षे वा त्रिमासि षण्मासि वा॥ पक्षे चैकादशे वाह्नि संपूर्णे वा शुभागमे॥ सपिंडीकरणं प्रेत्य मध्ये कालाः प्रकी
र्तिताः॥ साग्नेः कर्तुर्भुजानां वा द्योभ्येतौ साग्नेर्वनंतरः॥ अनग्नेस्तु द्वितीयाद्याः सप्त कालाः प्रकीर्तिता इति॥ अनंतरास्वि
पक्षाद्यति॥ शुभस्य विवाहादेरागमे उपस्थिते सतीति च तत्रैव व्याख्यातं॥ मूलवाक्ये दाहरणं चेत्युक्तं॥ महाभागतं ॥२१२
॥ सपिंडीकरणं कुर्यात्॥ यजमानस्त्व नग्निमान्नि तु पञ्चम्य॥ एकादशेपि वामासि मंगले स्याडुपस्थित इति॥ अत्र च
शुभमंगलशब्दाभ्यां विवाहोद्येवोक्तमिति प्रतीते नांदीश्राद्धं प्रतीतिर्नतरांतद्देवतात्वस्येति कृतबुद्धय एवं विदांकु

दा१

र्वंतु॥ न च शुभमंगलशब्दौ अंगभूतनांदीश्राद्धलक्षकौ प्रधानवाचिनः स्वांगलक्षकता अन्याय्यत्वादद्दष्टत्वा
च शाखे तेनुवक्तुं शाखायां निवाके नांदीमुखग्रहणं विवाहाद्यारंभपरं सपिंडीकरणान्तमपकृष्य विवाहाद्यारंभं कुर्वीत
त्यर्थः॥ मूलश्रुतिकल्पनालंघवात् चरुं निर्वपेत् पशुमालभेत पूतिकानभिषुणुयान् अंतरा यश्चे तद्दत्वादौ अंगवा
चिनः शब्दस्य प्रधानलक्षकतायादृष्टत्वाच्चांनांदीश्राद्धं विवाहादावितिनांदीश्राद्धस्य तदारंभत्वे न प्रसिध्य॥ सत्यपि दे
वतात्वसिध्यर्थापकर्षस्य शास्त्रार्थत्वेमाता मत्वा॥ सपिंडीकरणस्य नापकर्षः॥ तस्या नांदीश्राद्धदेवतात्वाभावात् दे
वतात्वसिध्यर्थापकर्षस्य शास्त्रार्थत्वे माता मत्वा॥ सपिंडीकरणस्य नापकर्षः॥ तस्या नांदीश्राद्धदेवतात्वाभावात् दे
कृतिभूत पार्वणएवशब्दस्य सूत्र भूत्स परिशिष्टेषु निर्गुणपित्रादीनां देवतात्वावगमेन सपत्नीकत्वस्य गुणस्यापि देवतानु
प्रवेशासंभावात् तल्लिंष्टकृते समवद्यति पात्नीवतं गृह्णातीत्यादौ चतुर्थ्याद्यवगत देवतात्वस्य गुणस्य गुणिनं प्रतिनि
सापेक्षत्वाद्विभवति मांत्रकर्णिकगुणिनो स्यादेर्देवतानुप्रवेशः॥ न भवति च यद ग्नये चेति चतुर्थ्यावगतदेवतात्वस्य
गुणिनो गुणिनं प्रतिनित्यसापेक्षत्वाभावे न गुणस्य ज्योतिष्ठादेस्तदनुप्रवेश इति प्रसिसिद्धं॥ यत्तु नयो भित्त्वा : दृथ
ग्दद्यादवसानदिनादृतो स्वभर्तृ पिंडमात्राभ्यस्तृप्तिरासां यतः स्मृतेति वचनात्॥ सपत्नीका नांदेवतात्वमिति तद्वि
स्मयकरं॥ तद्धितादिरहितस्यार्थवादस्य हृस्य तेर्वाणतदनंय— कारा इति वद्देवतायामप्रामाण्यात्॥ ये च त्वामत्रा
न्विति पिंडदानमंत्रेणान्येषामनुचराणामित्र पत्न्या अपि प्राप्तस्यांशलाभस्य तदालंबनत्वसंभवाच्च॥ यद्यपि दाक्षिणा
त्याचारवशेन सपत्नीकत्वविशिष्टपित्रुद्देशः पार्वणश्राद्धे प्रामाणिकस्तथापि शब्दस्य तेवक्तुं यथा प्रस्तरयागस्योद्देशे
नेष्टदेवतासंस्कारस्य देवेभ्य आज्यपेभ्य इत्युद्देशेपि प्रयाजादिदेवतानां समिदादीनामेव देवतात्वं देवाज्यपत्वगुणेस
कीर्तनमदृष्टार्थमिति॥ उचितं चैतत्॥ माहं इयदेहं इस्या देवतात्ववत् सपत्नीकपितृदेवत्वे श्राद्धे केवलानामदेवतात्वे

Indira Gandhi National
Centre for the Arts

नजीवन्मातृकमृतपितृकस्य मातामहश्राद्धाननुष्ठानापत्तेः॥ अदृष्टार्थगुणं तत्पादेयं विदायापि संभवति नित्यानुष्ठानं॥ अ
स्तु वादेवतानुप्रवेशोप्यस्य तथापि कालादर्शे मासिकदार्शिकयोर्भेदानुष्ठानसिद्धेर्देवताभेदप्रदर्शनावसरे पितृ
२१२ पितामहयोरुभयोरुभयोरन्यतरस्य वा मृतभार्यात्वे सपत्नीकदेवतात्वकथनाज्जीवन्मातृकेर्मृतपितृकैः केवल
पित्राद्युद्देशपकश्राद्धानुष्ठानान्मृतोभयेष्वसपत्नीकतदुद्देशेनैव तदनुष्ठानाच्च मातृणां देवतात्वयोग्यतादन्याय
मेव सपत्नीकानां देवतात्वमिति स्वीकर्तव्यं॥ ततश्च मृतपितृकेण दर्शान्तरमृतादितामिमात्रस्यैव प्रतीक्षा कुर्वता
यथा केवलपित्राद्युद्देशेन दर्शश्राद्धमनुष्ठेयं तथा मातामह्या और्ध्वदैहिकाभावेपि केवलमातामहाद्युद्देशेन तस्यां
जीवन्त्यामिव नांदीश्राद्धं संभवान्न तदनुरोधेनापि मातामह्या और्ध्वदैहिकापकर्षऔर्ध्वदैहिकप्रतीक्षा वोचितेति सि
द्धं॥ न च मृतयावस्थाविभावंगतया सपत्नमातामह्या सपत्नीकत्वगुणसंभवे किमिति केवलानां देवतात्वमिति शं
॥ अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरं तथा॥ अत्र मातुः पृथक्श्राद्धमन्यत्र पतिना सहेति शातातपस्मृतौ॥ स्वेन भर्त्रा स
मं श्राद्धं माता भुङ्क्ते सुधासमं॥ पितामही च स्वेनैव तिथापि नामही स्वेनैव वृद्धस्पतिस्मृतौ च श्रुतस्य मात्रादिशब्दस्य सपत्न
मात्रादिषु गौणत्वान्मुख्ये संभवति गौणत्वस्यान्याय्यत्वादमावास्याश्राद्धादौ सपत्नमात्रादेर्देवतानुप्रवेशाभावस्य श्रा २१३
द्धहेमाद्रिणोक्तत्वात्॥ इत्यलमतिप्रसंगेन॥ अथ विवाहभेदाः॥ तत्र मनुतद्देशापूर्वकं तत्क्रमेणलक्षमाह॥ ब्राह्मो ए ३
देवस्तथैवार्षः प्राजापत्यस्तथासुरः॥ गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमः॥ आच्छाद्य चार्चयित्वा च श्रु
तशीलवते स्वयं॥ आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः॥ यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते॥ अ
लंकृत्य सुतादानं दैवं धर्मं प्रचक्षते॥ एकं गोमिथुनं द्वे वा वरादादाय धर्मतः॥ कन्याप्रदानं विधिवदार्षो

धर्मः स उच्यते॥ सहोभौ चरतां धर्ममिति वाचानुभाष्य तु॥ कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥ अत्र वि
ज्ञोषं पारिजाते भगवान्॥ अन्येष्वपि विवाहेषु धर्मस्य चरणं सह॥ यद्यप्युक्तं तथाप्यत्र विशेषोक्तिर्यदाश्रमात
॥ आश्रमांतरसंप्राप्तिनिषेधार्थेति गम्यते॥ न चात्र तस्यां जीवन्त्यां विवाहस्य परियदः॥ आश्रमांतरयोगो वा मृत
यां भवतस्तु तावितिति॥ अत्रान्ये तु पूर्वादावनग्निसाध्येषु साहित्यनियमार्थो सेति॥ ज्ञातिभ्यो द्रविणं दत्वा कन्याया
श्च स्वशक्तितः॥ कन्याप्रदानं स्वाच्छंद्यादासुरो धर्म उच्यते॥ इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च॥ गांधर्वः स
तु विज्ञेयो मैथुन्यः कामसंभवः॥ हत्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं गृहात्॥ प्रसह्य कन्याहरणं राक्षसो विधिरु
च्यते॥ सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति॥ स पापिष्ठो विवाहानां पैशाचः प्रथितोष्टमः॥ आर्षे गोमिथुना
दानं च कन्यादर्णं न तु तावता कन्याविक्रयेणानित्यत्वमिस्यापि मनुवोक्तं॥ आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृ
षैव तदित्युपक्रम्य अर्दणं तत्कुमारीणामानृशंस्यं हि केवलमिति तद्गोमिथुनं आनृशंस्यं अभिनंदितं॥ कि
तु तत्कुमारीणामर्हणं पूजनमित्येवमाचारमदनरत्ने व्याख्यातं॥ एषां व्यवस्थामाह मनुः॥ षडानुपूर्व्या विप्रस्य
क्षत्रस्य धर्म्यान्धर्मा चतुरोऽवरान्॥ विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यान राक्षसान्॥ तत्र ब्राह्मादीन् गांधर्वांता
न् ब्राह्मणस्य धर्म्यान् धर्मो धनपेतान्विद्यात् क्षत्रस्य आसुरगांधर्वराक्षसपैशाचान् वैश्यशूद्रो राक्षसवर्जिता
न् आसुरगांधर्वपैशाचानिति व्याख्यातं मदनपारिजाते॥ एष्वपि प्राशस्त्यव्यवस्थामाह मनुः॥ चत्वारो ब्राह्म
णाद्याः प्रशस्ता गांधर्वराक्षसौ॥ राजन्यस्य तथासुरो वैश्यशूद्रेचात्यस्तु गर्हित इति॥ नारायणवृत्तिकारस्त्वाद्या
पूर्वेषु चतुर्षु पूर्वः पूर्वः प्रशस्तः॥ उत्तरेषूत्तरोत्तरः पापीयान् तत्र पूर्वौ ब्राह्मणस्य इतरयोः प्रतिग्रहाभावात्॥ अ

Indira Gandhi National Centre for the Arts

त्विन्यभावाच्च॥ गांधर्वः क्षत्रियस्य पुराणेषु दृष्टत्वात्॥ राक्षसश्च तस्यैव युद्धसंयोगात्॥ आसुरस्तु वैश्यस्य
२१५ धनसंयोगात्॥ इतरे त्रयोऽनियता इति॥ त्रय आर्षप्राजापत्यपैशाचाः॥ अत्राद्येमनुवास्येषु स्यां धर्म्यत्वं भा
र्यात्वजनकत्वं॥ द्वितीये त्वासुरादेः सत्यपि भार्यात्वजनकत्वे प्रत्यवायजनकत्वमप्याशङ्क्य॥ यद्यपि इति कारण
त्रयोऽनियता इति तुल्यवदभिधानेऽप्युक्तं तथापि पैशाचे प्रत्यवायाधिक्यं॥ पापिष्ठत्वाद्युक्तेस्तदाशयत्वात्॥
इष्टिकृतां च स्पष्टत्वकथनात्॥ विवाहांतरसंभवे प्रत्यवायमंगीकृत्यापि प्रवृत्तक्षत्रियादिं जातिरत्त स्यभार्या
त्वजनकत्वाभ्युपगमात्॥ यथाह माधवः॥ अत्य विवाहालाभे क्षत्रियादीनां पैशाचमप्यनुजानाति वत्सः सर्वोपा
येरसाध्या स्यात्सुकन्या पुरुषस्य या॥ चौर्येणापि विवाहेन सा विवाह्या रहः स्थितेति॥ चौर्येणानीतापि विवाह
होमाभावे ततोऽपहृत्यान्यस्मै देयेति माधवीये वसिष्ठः॥ बलादपहृता कन्या मंत्रैर्यदि न संस्कृता॥ अन्यस्मै विधि
वद्देया यथा कन्या तथैव सेति॥ अस्ति च गांधर्वादिषु चतुर्ष्वपि परिग्रहोत्तरं होमविधिर्गृह्यपरिशिष्टे॥ गांध
र्वासुरपैशाचा विवाहा राक्षसश्च यः॥ पूर्वं परिग्रहस्तेषां पश्चाद्धोमो विधीयते इति॥ मंत्रैर्यदि न संस्कृतेति सप्तम
पदातिक्रमेण मंत्रालाभे त्वा विवक्षिता॥ तत्र च भार्यत्वोपत्तेरिति माधवः॥ धर्म्यविवाहफलं॥ दुष्टविवाहजनि
ता प्रत्यवायफलं चाह मनुः॥ दश पूर्वान्परान्वंश्यानात्मानं चैकविंशकं॥ ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः
पितृन्॥ दैवोढायाः सुतश्चैव सप्त सप्त परावरान्॥ आर्षोढायसुतस्त्रींस्त्रीन् षट् षट् कायोढजः सुतः॥ ब्राह्मादिषु २१४
विवाहेषु नपूर्वशः॥ ब्रह्मवर्चस्विनः पुत्रा जायंते शिष्टसंमताः॥ इतरेषु विशिष्टेषु नृशंसानृतवादिनः॥ जायंते दुर्वि
वाहेषु ब्रह्मधर्मद्विषः सुता इति॥ ब्राह्मादिविवाहेषु वाग्दानोत्तरमग्निर्दानोत्तरं वा वरमरणे वासिष्ठः॥ अद्भिर्वाचा च

मे३

दत्तायां॥ म्रियतोर्ध्वं वरो यदि॥ न च मंत्रोपनीता स्यात्कुमारी पितुरेव सेति॥ वाग्दानोत्तरं देशांतरगमने तु अपरार्के
नारदः॥ प्रतिगृह्य तु यः कन्यां वरो देशांतरं व्रजेत्॥ त्रीन् ऋतून्समतिक्रम्य कन्यान्यं वरयेद्वरमिति॥ एतच्च कन्यायै शु
ल्कदानाभावे॥ शुल्कदाने तु कात्यायनः॥ प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा॥ धार्या सा वर्षमेकं तु देयान्यस्मै वि
धानत इति॥ वर्षोत्तरमिति शेषः॥ यत्तु वसिष्ठः॥ कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः॥ देवराय प्रदातव्या य
दि कन्यानुमन्यत इति तद्युगांतरीयक्षेत्रजोत्पत्त्यनुमतिविषयं॥ अनेकेभ्यो वाग्दानेऽपि चंद्रिकायां॥ अनेकेभ्यो
हि दत्तायामनूढायां तथैव च॥ पूर्वागतश्च सर्वेषां लभेताद्यवरस्तु तां॥ पश्चाद्वरणयुक्तं तस्याः प्रतिलभेत स
इति॥ सर्वेषां तुल्यत्वे आद्यवरणवलभेत तां तल्लाभासंभवे निर्णये इतरेषां मध्ये य एव पूर्वागतः स एव लभेतेत्यर्थः
॥ आद्यस्य दोषवत्त्वे परस्य गुणवत्त्वे च परस्मै देया॥ कुलशीलविहीनस्य पश्चाद्धि पतितस्य च॥ अपस्मारिविध
र्मस्य रोगिणां वेषधारिणां॥ दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव चेति॥ वसिष्ठोक्तेः॥ दत्तामपि हरेत्पूर्वां श्रेयां
श्चेद्वर आव्रजेदिति याज्ञवल्क्योक्तेः॥ अपश्चाद्दानोत्तरं पतितस्येत्यर्थः॥ वरस्य दोषाभावे वाग्दत्तामपहरन् दं
ड्यः॥ कन्यायाश्चापस्मारादिमहादोषसत्त्वे तमनाख्याय प्रयच्छन् दंड्य इत्यप्याह याज्ञवल्क्यः॥ सकृत्प्रदीयते क
न्या हरंस्तां चोरदंडभागिति॥ अनाख्याय ददद्दोषं दंड्य उत्तमसाहसमिति च॥ दोषमनाख्यायेत्यन्वयः॥ उत्तमसा
हसं तेनैवोक्तं साशीतिपणसहस्रो दंड उत्तमसाहस इति॥ अधर्म्येषु विवाहेषु भोजनादिनिषेधस्तदतिक्रम
प्रायश्चित्तं चोक्तं पारिजाते त्रिकांडमंडने॥ अधर्म्येषु विवाहेषु तांबूलमनुमोदनं॥ भोजनं वाहनं चैव वर्जयेत्स

Indira Gandhi National
Centre for the Arts

र्थयाद्विजः॥आसुरे तूपवासः स्यात् गांधर्वे च त्रिरात्रकं॥ राक्षसे चैव पैशाचे वरेच्चांद्रायणं तथेति॥ इति वि
२१५ वाहाष्टकगतविशेषनिर्णयः॥ अथ परिवेत्रादिनिर्णयः॥ तल्लक्षणं मनुः॥ दाराग्निहोत्रसंयोगं कुरुते योग्रजेस्थि
ते॥ परिवेत्ता स विज्ञेयः परिवित्तस्तु पूर्वज इति॥ स्मृत्यंतरे॥ ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेनुजा॥ या सा
ग्रेदिधिषुर्ज्ञेया पूर्वा तु दिधिषुः स्मृतेति॥ परिवेत्रादिस्वरूपकथनपूर्वकं तत्प्रायश्चित्तं हारीतः॥ ज्येष्ठे नि
विष्टे कनीयान् निर्विशमानः परिवेत्ता भवति पूर्वः परिवित्तिः परिवेदिनी कन्या परिदायी दाता परियष्टा या
जकः॥ ते सर्वे पतिताः संवत्सरं प्राजापत्येन कृच्छ्रेण पावयेयुरिति॥ एतत् अकामतः पित्राद्यनुज्ञातो द्वादशा
ब्दं॥ कामतः पित्रादिदत्तो ह्यादेतु मानवत्रैमासिकं॥ अज्ञानतः पित्राद्यदत्तो ह्यादे यज्ञवल्क्योक्तं व्रतचतुष्ट
॥ उपपातकशुद्धिः स्यादेवं चांद्रायणेन वा॥ पयसा वापि मासेन पराकेणाथवा पुनरिति॥ एवमिति गोवध
प्रायश्चित्तातिदेशः॥ अज्ञानतः पित्रादिदत्तो ह्यादेतु यमः॥ कृच्छ्रो द्वयोः परिवेद्ये कन्यायाः कृच्छ्र एव तु॥ अ
तिकृच्छ्रं चरेद्दाता होता चांद्रायणं चरेदिति प्रायश्चित्तं तत्त्वतः॥ परिविदनः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै
दत्त्वा पुनर्विविशेत तां चैवोपयच्छेदिति परिविदानं इति परिवेत्तुरेव संज्ञा॥ तस्मै ज्येष्ठाय जायां च यां हृतवान्
तां वा निवेद्य पुनरुद्वहेत् कामं सा तदुक्तं तामेवेति भ्राचष्ट विज्ञानेश्वरः॥ तथा ग्रेदिधिषुपत्यादेः प्रविविक्तौ चं २१५
वसिष्ठः॥ अग्रेदिधिषुपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत तां चैवोपयच्छेत् दिधिषुपतिः॥ कृच्छ्रातिकृच्छ्रौ च
रित्वा तस्मै पुनर्निविशेतेति॥ चरित्वा ज्येष्ठायामन्येनोढायां पश्चा— मेवोद्वहेत॥ तस्मै कनीयस्याः पूर्वं वोढे ज्येष्ठां

दत्त्वा अन्यमुद्वहेतेति व्याख्यातं पारिजाते॥ अग्निहोत्रधर्मेषु न दोषः परिविंदत इति॥ परपुत्रादत्तकादयः इति पारिजा
तः॥ सोदर्यविषये पितामहः कात्यायनः॥ देशांतरस्थान् क्लीबांश्च तथा कुब्जवामनानपि॥ वेश्यातिसक्तपतितशूद्रतु
ल्यातिरोगिणः॥ जडमूकांधबधिरकुब्जवामनखेलकान्॥ अतिवृद्धानभार्यांश्च कृषिसक्तान् नृपस्य च॥ धनवृद्धिप्र
सक्तांश्च कामतः कारिणस्तथा॥ कुहकोन्मत्तचौरांश्च परिविंदन्न दुष्यतीति॥ खेलकोभग्नपादद्वयः॥ अनाश्रमे नै
ष्ठिकब्रह्मचारिणः॥ कामतः कारिणो विवाहादिइच्छया निवृत्त इति व्याख्यातं पारिजाते॥ देशांतरगतज्येष्ठसोद
रविषये प्रतीक्षावधिमाह वसिष्ठः॥ अष्टौ द्वादश वा वर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्तीभ
वतीति॥ द्वादशेति मुख्यः पक्षः॥ द्वादशैव तु वर्षाणि श्रेयान् धर्मार्थयोगतः॥ न्याय्यः प्रतीक्षितुं भ्राता श्रूयमाणः
पुनः पुनरिति॥ अत्राप्यपवादं कार्ष्णाजिनिः॥ उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीबरूपवान्॥ राजयक्ष्मामया
वी च न न्याय्यः स्यात् प्रतीक्षितुमिति॥ कन्याविषयेप्युक्तदोषापवादं गर्गः॥ एकमातृप्रसूतानां कन्यानां परिवे
दने॥ दोषः स्यात् सर्ववर्णेषु न दोषो भिन्नमातृस्थिति॥ वृद्धमनुः॥ विवाहे नधिकारेण ज्येष्ठकन्या स्थिता यदा॥ तदनु
ज्ञां विना चापि कनिष्ठामुद्वहेन्नदेति॥ आपत्स्वर्वपरिवेदनोक्तमनुसंधेयमिति पारिजातः॥ इति परिवेत्रादिनिर्णयः
अथ मंडपादिनिर्माणं॥ ॥वसिष्ठः॥ षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितं॥ मंडपं तोरणैर्युक्तं तत्र वेदिं प्रकल्प
येत्॥ अष्टहस्तं तु रचयेन्मंडपं वा द्विषट्करमिति॥ अन्यत्र तु॥ मंगलेषु च सर्वेषु मंडपो ग्रहमानतः॥ कार्यः षोडश
हस्तो वा न्यूनहस्तो दशावधिः॥ स्तंभैश्चतुर्भिर्बाह्यवेदीमध्ये प्रतिष्ठितेति॥ पारिजाते नारदः॥ हस्तोच्छ्रितां चतुर्दि

Indira Gandhi National
Centre for the Arts

२१६ स्तेः चतुरस्रां समंततः॥स्तंभैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनि॥समां चैव चतुर्दिक्षु सोपानैरतिशोभितां॥प्रागुद
क्प्रवणां रंभास्तंभैर्हंसशुकादिभिः॥विचित्रवर्णांकितैः कुंभैर्विदिक्षु तोरणांकुरैः॥शृंगारपुष्पनिर्मितकैर्वर्णकैः स
मलंकृतां॥विप्राशीर्वचनैः पुण्यस्त्रीभिर्दीयमनोरमां वादित्रगीतनृत्याद्यैर्हृदयानंदिनीं शुभां॥एवंविधामारुह्य
ह्येन्मिथुनं साग्निवेदिकामिति॥गृह्यमानत इति महति गृहे महान्मंडपः॥न्यूनेन्यून इत्यर्थः॥दशावधिरिति न्यूनता
यां दशसंख्यावधिरित्यर्थः॥अतो वसिष्ठोक्तो हस्तपक्षोऽत्यंतापद्विषयः॥साग्निवेदिकामिति दंपत्योरारोहण
स्य पूर्वं होमोपयोगिनाम स्यादीनां मुकल्पनं कार्यमित्याशयः॥कल्पनहीयेपक्षांतरं॥कन्याहस्तैः सप्तभिः पंचभि
र्वा कार्या वेदिः कूर्मपृष्ठोन्नतामना॥हर्म्ये रम्ये निर्गमाद्वामभागे जायापत्योरासिषेक्तव्ययुक्ता॥विवाहस्य च दिने
वेदिः कार्या समंडपेति॥तत्रैव विशेषांतरं॥नव त्रिषष्ठे नववारकः शुभो नैव वर्णकेनैव विवाहमंडप इति॥
नवारको ऽंकुरार्पण इति नत्रैव माख्यातवर्णकैनैव अनुकल्पतया मंडपनिर्माणमपि न च मादिदिनेन का
र्यं मुख्यकल्पे न तन्निर्मितातु तेषु दिनेषु सुतरां न कार्यमिति तदाशयः॥विविवाहार्थो मंडपो वर्णकेनैव
क्रियमाणो न शुभोऽन्यार्थस्तु वर्णकेनैव क्रियमाणो विशुभ इत्यन्ये॥अथ कन्याया जन्मकालीनग्रहादिसूचि
तवैधव्यपरिहारोपायः कर्मविपाके॥आस्तरणं साधुमामंत्र्य संपूज्य विधिवार्हणैः॥तस्मै दद्याद्विधानेन विष्णोर्मू
र्तिं चतुर्भुजां॥शुद्धवर्णसुवर्णेन निर्मितां शास्त्रपार्थ वाकृतां॥रुचिरां निर्मितां शंखगदाचक्राब्जसंयुतां॥क्षौमे नां वा
ससी पीते कुमुदोत्पलमालिनीं॥सदक्षिणां सतां दद्यान्मंत्रमेतमुदीरयेत॥यन्मया प्राचि जन्मनि घ्नंत्यापतिसमाग २१६

म॥विषोपविषशस्त्राद्यैर्हतो वातिविरक्तया॥प्राप्नुवंत्या महाघोरं यशः सौख्यं धनापहं॥वैधव्याद्यतिदुःख
खौघं तन्नाशाय सुखाप्तये॥बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनूं॥सौवर्णीं निर्मितां शक्त्या तुभ्यं
संप्रददे द्विजेति॥अनवाद्याद्धमस्मीति त्रिवारं प्रजपेत्ततः॥एवमस्त्विति तेनोक्तं गृहीत्वा संप्रदं विप्रा
दिति॥सुवर्णशब्दो जातीवाची॥परिमाणं तु पलतदर्धतदर्धान्यततररूपं दानपरिभाषोक्तं ग्राह्यं॥अथ प्र
योगः॥स्नानाचमने कृत्वा कन्या देशकालौ संकीर्त्य वैधव्यहरं महाविष्णुप्रतिमादानं करिष्य इति संकल्प्य
गणेशपूजनस्वस्तिवाचने कृत्वाचार्यवरणं कृत्वा यथाशक्ति तं पूज्य तद्धस्तेन पुत्तारणं षोडशोपचारैः
पूजनं च कारयेत वस्त्रार्पणसमये पीते वाससी दापनीये पुष्पार्पणे कुमुदोत्पलमाला॥पूजांते देवं कन्याप्र
साम्यमंत्रं पठित्वा ब्राह्मणाय दद्यात ततः सुवर्णपरिमितं यथाशक्ति वाहे महदक्षिणां दत्वा अनवाद्याद्धमस्मी
ति त्रिर्वदेत॥एवमस्त्विति ब्राह्मणो वदेत्॥ततो यथाशक्ति ब्राह्मणान् भोजयित्वा दृष्योपासवेदिति॥इति वै
धव्यहरप्रतिमादानविधिः॥अथवा वैधव्यपरिहाराय कुंभविवाहः कार्यः॥यथोक्तं तत्रैव॥विवाहा
त्पूर्वकाले च चंद्रतारावलान्विते॥विवाहोक्तेन तथा लग्ने कन्यां कुंभेन चोद्वहेत॥सूत्रेण वेष्टयेत्पश्चाद्दश
तंतुविधानतः॥कुंभमालंकृतं देहं तयोरेकांतमंदिरे॥ततः कुंभं च तिः सार्यप्रभज्य सलिलाशये॥ततो

Indira Gandhi National
Centre for the Arts

भिषेचनं कुर्यात् पंचपल्लववारिभिरिति॥ आसमंतादनपुष्पादिभिरलंकृतं कुंभं कन्यादेहं च वेष्टयेदिति
२१७ न्वयः॥ तदुभयसंवेधिनिमंदिर इति॥ विवाहकर्त्ता पित्रादिकन्यायावेधव्यदूर कुंभविवाहं करिष्य इति
संकल्प्य गणेशपूजादि नांदीश्राद्धं कृत्वा वरुणविष्णुप्रतिमयोरग्न्युत्तारणं कृत्वा मही द्यौरिति विधिना
कुंभस्थापनवरुणपूजनेविधाय तत्र स्थापितविष्णुप्रतिमयो विष्णो रावाहनादिषोडशोपचारैः पूजां
विधाय प्रार्थयेत्॥ वरुणांगस्वरूपाय जीवनानां समाश्रय॥ पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु
॥ देहि विष्णो वरं देव कन्यां पालय दुःखत इति॥ ततो विष्णुरूपिणे॥ कुंभाय इमां कन्यां श्रीरूपिणीं सम
र्पयामीति सर्वपरित्वेत्यादिमंत्रेरधस्तादुपरिष्टाच्च मंत्रावृत्त्या कुंभं कन्यां च परिवेष्टतत: कुंभं निःसार्य
सलिलाशये प्रभंज पित्वा पंचपल्लवैः शुद्धतलेन समुद्रज्येष्ठा इत्यादिमंत्रैः कन्यामभिषिच्य ब्राह्मणान्भो
जयेदिति: कुंभविवाहप्रयोगः॥ अथ वरस्य जन्मकालीनग्रहसूचितमृतभार्यत्वपरिहारोपायः॥ महार्ण
वे जप्येष्ट आतर्यन्नटेतु येनुजो हृहतिस्वयं॥ सभवेन्मृतपत्नीक उष्मान्वरसमुद्भवात्॥ प्राजापत्यत्रयं कु
र्यादैदं वत्रयमेव च॥ तामग्निमिति चाज्येन वरुणाष्टोत्तरायुतं॥ जुहुयाद्भोजयेद्विप्रानेवं पापात्प्रमुच्यते २१७
इति॥ अस्यार्थः मृतभार्यत्वनिवृत्तये प्राजापत्यत्रयं चांद्रायणत्रययोराहृतिः॥ तामग्निमिति जातवेदस इत्यनुवा

कोलक्ष्यते॥ अस्यानुवाकस्य याज्ञिकी देवताउपनिषदऋषयः॥ दुर्गाग्निविरूपवो यथायोगं देवता॥ अनुष्टु
प्छंदः॥ अष्टोत्तरयुतहोमस्यार्द्धचरुणार्द्धमाज्येन प्रथमं चरोः पश्चादाज्यस्य क्रमेन विवक्षितः॥ प्रत्यंचं चहो
मः अग्निस्थापनादिचरुश्रोक्तमार्गेणेति महार्णवे॥ प्रायश्चित्तविधिना प्राजापत्यचांद्रायणानि कृत्वा मृत
भार्यत्वपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं चर्वाज्ययुतहोमं करिष्य इति संकल्प्य अग्निस्थापनाघन्वाधाना
न्त कुर्यात् चक्षुषी आज्येनेत्यंते दुर्गाग्निविष्णून् अष्टोत्तरायुतसंख्याभिश्चर्वाज्य॥ द्रुतिभिः शेषेण स्विष्टकृत
मित्यादि॥ प्रतिदेवतं तूष्णीं चतुः कृत्वो निर्वापः प्रोक्षणं च॥ त्यागकाले अष्टोत्तरसंख्याहुतिपर्याप्तं चर्वाज्यद्र
व्यं यथामंत्रलिंगं दुर्गायै अग्नये विष्णवे च न मम इति त्यागः॥ स्विष्टकृदादिहोमशेषं समाप्य दश ब्राह्मणान्
भोजयेदिति अयुमहोमप्रयोगः॥ यद्वा कस्यापि ब्राह्मणस्य विवाहं कुर्यादित्यपि महार्णवः॥ अथ ताडनाग
दस्याचिर्तेर्मृतपुत्रहरं॥ महार्णवे॥ बालघाती च पुरुषा मृतवत्सः प्रजायते॥ ब्राह्मणोद्वाहनं चैव कर्तव्यं
ते न श्यति॥ श्रवणं हरिवंशस्य कर्तव्यं च यथाविधि॥ महारुद्रजपं चैव कारयेच्च यथाविधि॥ जुहुया
च्च दशांशेन दूर्वामाज्यपरिप्लुतं॥ एकादशस्वर्णनिष्काः प्रदातव्याश्च दक्षिणा॥ एकादशापर्णं श्चैव दद्याद्वि
त्तानुसारतः॥ अन्येभ्योपि यथाशक्ति द्विजेभ्यो दक्षिणां दिशेत॥ स्नापयेदंपती पश्चान्मंत्रैर्वारुणदैव

Indira Gandhi National
Centre for the Arts

२१८ ते:॥आचार्याय प्रदेयानि वस्त्रालंकरणानि चेति॥ब्राह्मणो ह्यादनं दारिवंशाश्रवणं रुद्रजपश्चेति त्रीण्यपि नि
रपेक्षाणि शक्त्या च्चेदपेक्षपाचश्यस्ताविसमस्तानियोज्यानि॥पशुर्गौः॥वारुणमंत्राः कस्य नूनमित्यादयः॥प
वमानः सुवर्जन इत्यादयश्च ग्राह्या इति महार्णवः॥अथ दारिवंशाश्रवणविधिस्तदुक्त एवोच्यते॥दंपत्योरनु
कूलसुदिने विनायकशांतिं विनायकपूजां वा स्वशाखानुसारेण विधाय स्वस्तिवाचनं कुर्यात् ततो दीर्घाय
पुत्रकामनया दारिवंशाश्रवणं करिष्यावहे करिष्य इति वा संकल्पः॥उभयोर्दंपत्योः कर्तृत्वे प्रथमः संकल्पः
एकस्य कर्तृत्वे द्वितीयः ततो विभवानुसारेण कृताध्ययनसंपन्नं ब्राह्मणं वस्त्रमुद्रिकाकुंडलतांबूलादिभिः
संपूज्य एभिश्चंदनतांबूलादिभिर्दारिवंशाश्रवणे श्रावयितारं त्वामहं वृणे इति करणं कुर्यात्॥ततः प्रतिदि
नं त्रायंतामित्यादि वैदिकमंत्रैः सुरास्त्वेत्यादि पौराणमंत्रैश्च सुस्नातौ स्वलंकृतौ दंपती तदेकचित्तौ शृणुयातां वा शु५
चयिता च प्रतिदिनं नारायणं नमस्कृत्येत्यादि पठित्वा नारायणाय नमो नाराय नमो नरोत्तमाय नमो देव्यै स
रस्वत्यै नमो व्यासाय नमो गुरुभ्यो नम इत्युक्त्वा वाचयेत् श्रोता प्रतिदिनमाचार्यं पुस्तकं च पूजयेत्॥अंते स्व
लंकृतां गां पयस्विनीं सवत्सां सुवर्णशृंगीं रौप्यखुरां ताम्रपृष्ठीं कांस्यदोहनवस्त्रयुतां गोदानविधिना वाच २१८
काय दत्वा वाचकसंतोषावद परिमाणं हेमदक्षिणां दत्वा न्यूनं पूर्णमस्त्विति वाचयेत्॥गोदानविधिः कार्त्ति

ककृत्ये भिहितः॥विनायकशांतिः उपनयनप्रकरणेभिहिता इति मृतपुत्रत्वहरं॥अथ कन्यादानप्रशं
सा॥संवर्त्तः अलंकृत्य तु यः कन्यां भूषणाच्छादनादिभिः॥दत्वा स्वर्गमवाप्नोति पूज्यते वासवादिभिः॥कूपदश्चाश्वमे
धी च प्राणदाता भयेषु च॥समयांतिरथाएषां त्रयो वै नात्र संशय इति॥सालंकारकन्यदाता कूपदः॥स्वलंकृत्य
लंकृतां कन्यां यो परदाति स कूपद इत्यभिधानात्॥वह्निपुराणे॥कृत्वा कन्याप्रदानं च पितरः सपितामहाः॥
विमुक्ताः सर्वपापेभ्यो ब्रह्मलोकं व्रजंति ते इति॥अथ तद्विधिर्दृष्टपरिशिष्टे॥दातरमभिकृत्य वरं विधिवदर्चि
तमभिषेचयेत्॥अथ दक्षिणतः पुरोधाः उदङ्मुख उपविश्य मध्ये प्रागग्रोदगग्रान्दर्भानास्तीर्य तैजसमापोपूर्णक
लशं निधाय व्रीहियवानामपिंग्यादिभिरलंकृत्य दूर्वापल्लवैर्मुखमवस्तीर्य शिग्नाभिरग्निरभिमंत्र्य ताभिर
द्भिः प्रयोजयेदथ दाता पुण्याहादीन् वाचयित्वाशिषो वा आपः संतु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु दीर्घमायुर
स्तु शांतिः पुष्टिस्तुष्टिश्चास्तु तिथिकरणमुहूर्त्तनक्षत्रसंपदस्त्विति कन्या भार्यादिसमेतः कन्यां प्रगृह्य वत्सगोत्रो २१९
द्भवाममुष्यप्रपौत्रीममुष्यपौत्रीममुष्यपुत्रीं सुशीला नाम्नीं कन्यां वशिष्ठगोत्रोद्भवायामुष्यप्रपौत्रायामु
ष्यपौत्रायामुष्यपुत्राय श्रुतशीलनाम्ने तस्मै वराय संप्रददे कन्यां प्रतिगृह्णातु भवानिति ब्रुवन् वरस्य पाणौ द्वि
णमुपधाय कलशोदकधारामासिंचेन्नमसा प्रजापतिः प्रीयतामिति ब्रूयादथ वरः पुण्याहाशिषो वाचयित्वा

Indira Gandhi National Centre for the Arts

दक्षिणां गौं कन्यामभिमृश्य कइदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिगृहीता कामं समुद्रमा
२१६ विश कामेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददात्विति जपित्वा प्राजापतिमनुस्मृत्य धर्म प्रजासिद्ध्यर्थं क
न्यां प्रतिगृह्णामीति प्रब्रूयादेवं त्रिः प्रस्तुतेः पुरोधादात् वरो प्रत्यतस्य द्विस्तु रुद्रः संति पूर्वारिति ति स्वोजापित्वे तद्
सत्यं समृद्धमस्त्विति ब्रूयादिति ॥ अथ वाग्दानादि प्रयोगः ॥ विवाह नक्षत्रयुते शुद्दिने वरस्य पित्रादिः सुहृद्भिः
सह कन्यागृहं गत्वा आसने प्रत्यङ्मुख उपविशेत् ॥ ततो वृद्धः कश्चित्कन्यायाः पित्रादिं प्रति ब्रूयात् अस्य
पुत्रो वा रोसित दर्थं भवत्कन्यां याचितं सुहृद्भिः समं द्रायमागतः भवद्भिः स्वीयैः सह विचार्य कन्याप्रदाना
र्थमनुज्ञा एतेभ्यो देयेति ततः कन्यापिता मान्यजनाज्ञां गृहीत्वानुज्ञां दद्यात् ॥ ततः कन्यायाः पुरोहितो दिर्दैव
वाचमिति आनयपूर्वकं चतुरस्रपीठे शुक्लवस्त्रावृते तां प्राङ्मुखीमुपवेशयेत् कन्याया उत्तरं तत्पित्रा
दिः प्राङ्मुख उपविशेत् ॥ वरपिता तु कन्या दक्षिणतः उदङ्मुख ॥ उभावाचम्य स्तु मुखस्थेत्यादि देशकालकी
र्तनांते वरपिता कन्याप्रजनं करिष्ये तदंगत्वेन गणपतिपूजनं वरुणपूजनं च करिष्य इति कन्यापिता का रि
~~ष्य इत्येवं सं~~ गवाग्दानं करिष्य इति संकल्पं कुर्यात् तदविकीर्षायां गणपतिपूजनं वरुणपूजनं च कारि २१६
ष्य इत्येवं संकल्प्य उभौ गणेश वरुणयोः पूजां कुरुतः ॥ ततो वरपित्रादिः कन्याया अंजलिं सकुंकुमचंदनेनानु

ष्य इत्येवं संकल्प्य

लिप्य मान्येभ्यो दर्शयेत् ॥ सर्वे महालक्ष्मीरेति ब्रूयुः ॥ ततो गौरी र्मिमायेति कन्यां चंदनेनाभ्यर्च्य स्वपक्षीय सुवासिन्यानी
रांजनं कारयेत् श्रिये जात इति ॥ वस्त्राभरणं च युवं वस्त्राणीति ॥ भूषणानि हिरण्यरूप इति आयुष्यमिति च ततः कन्या
ये गुडादि निवेदनं तत्पाणौ फलार्पणं च कुर्यात् याः फलिनी आर्वाची सुभगे इति ॥ ततः कन्यापिता वरपितरं स्वस्थाने
उपवेश्य स्वयं तस्थाने उदङ्मुख उपविशेत् ॥ ततो वरपितरं तन्मान्यैः सह गंधादिना पूजयेत् ॥ तथा वरपिता कन्यापि
तरं तन्मान्यैः सह पूजयेत् ॥ ततः कन्यापितेत्थं कन्यावाग्दानं कुर्यात् ॥ पंचफलानि कुंकुमाक्षतान्यादाय एतत्प्रवरा
न्विते तद्गोत्रोत्पन्नाय एतच्छर्मणे एतत्प्रवरान्विते तद्गोत्रोत्पन्नायेतच्छर्मणः प्रपौत्राय एतच्छर्मणः पौत्राय एतच्छर्म
णः पुत्राय एतच्छर्मणे श्रीधररूपिणे कन्यार्थिने एतत्प्रवरान्विते तद्गोत्रोत्पन्नां एतच्छर्मणः प्रपौत्रीमेतच्छ
र्मणः पौत्रीमेतच्छर्मणो मम पुत्रीमेतन्नाम्नीं कन्यां श्रीरूपिणीं वरार्थिने ज्योतिर्विदादिष्टे मुहूर्ते दास्ये तदस्तु
मित्रावरुणा गृह्णावै ॥ वरपितुर्वस्त्रप्रांते बध्वा ग्रंथिं चंदनलिप्तं कुर्यात् ॥ पितामह कर्तृके वाग्दाने मम प्रपौ
त्रीमिति पाठः एवं सकुल्यत्वेन प्रपितामहकर्तृके मम प्रपौत्रीमिति एवं भ्रात्रादिकर्तृके ममेति नेव पाठः ॥ ततो
व्यंगे पतिते उक्ली वेदशादोष विवर्जिते ॥ इमां कन्यां प्रदास्यामि देवाग्नि द्विजसंधाविति वाग्दानकर्तोक्ते वरस्य २१६
पित्रादिः पंचफलानि पूर्ववदादाय एतद्गोत्रोत्पन्न वरविषये भवं नो निश्चिंता इति कन्यापित्रादेर्वस्त्रप्रांते पूर्व
वद्बध्नीयात् तदस्तु गृह्णावै कन्यापित्रादिर्वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता त्वया ॥ कन्यावलोकनविधो निश्चिं

Indira Gandhi National
Centre for the Arts

तस्त्वं सुखी भवेति वदेत्॥ भ्रात्रादिं प्रति तस्य च यथार्थं भ्रातार्थं शिष्यार्थं मित्रार्थं वरार्थमित्यूह्यं॥ ततः सर्वे ब्राह्म
२२० णाः द्विरुः एवं तु॥ समिद्धस्य श्रयमाणः॥ वनस्पते रुद्रं ददुर्देवानां॥ अस्यापि वसुमतः॥ घृतादुल्लुसं तदस्तु यद्वीवेरिति
कन्याशिरस्यक्षतप्रक्षेपेणाशीर्दानं कुर्युः ततः इन्द्राणीं पूजयित्वा तत्प्रार्थनं कुमार्या कार्यं देवेन्द्राणि नमस्तुभ्यमिति वाक्य
नं॥ ततः सुमुहूर्ते वधूवरयोर्हरिद्रातैलारोपणं यथाचारं कार्यं॥ रजकी तैलमादाय कन्यकामभिषिंचति॥ निर्णयाः प्र
थमेभागे नागवल्लीदलेनत्विति ज्योतिर्निबंधोक्तमप्याचारानुसारेणास्त्री कार्यं॥ वध्वां तदारोपणोत्तरं तच्छेषेण ह
रिद्रादिना वरस्य स्नानं कारणीयमित्याचारः॥ अथ विवाहदिने तत्पूर्वदिने वा स्वस्तिवाचनादि तत्र परिशिष्टे सुस्ना
तालंकृतो वरः स्वस्तिवाचयित्वेत्युपक्रम्य वधूगृहं प्रति चरस्य गमनमुक्तं इदमेव शास्त्रमवलंब्य पारिजाते
मम देवपितृऋणापाकरणहेतुभूतधर्मप्रजोत्पादनद्वारा श्रीपरमेश्वरप्रीत्यर्थं कन्याप्रतिग्रहणं कर्तुं तदंगभू
तं स्वस्तिवाचनं करिष्य इति संकल्पपूर्वकं वरकर्तृकस्वस्तिवाचनमुक्त्वा ततो विधिवत् पित्रा नांदीश्राद्धं कार
येदित्युक्तं अन्ये तु वधूगृहगमनारंभे स्वस्तिवाचनांतरं परिशिष्टे विधीयते भगवतात्थैव स्मरणात्॥ विवा
हप्रकृत्यस्यैतेन युक्तं तत्रास्पुदपि कं श्राद्धं कुर्यात् स्वस्ति रुवाचयेत्॥ अपरे तु कृतस्नातो घृतधौतो वरह २२०
यः॥ भूषितो गंधमाल्याद्यैर्वंदिताभीष्टदेवतः॥ ब्राह्मणान् भोजयित्वा तैः कृतपुण्याहवाचनः॥ यानार्ह्यानमा
रुह्य याया चैव वधूगृहमिति॥ अतः प्रथमं स्वस्तिवाचनं पित्रादिकर्तृकमेवेत्याहु॥ तदनुसारेण प्रयोगः संस्कार्य

+ णश्च सह कृताभ्यंगस्नातोऽहतवासाः शुभासने प्राङ्मुख उपविश्य स्वदक्षिणतः पत्नीं तदग्रतः संस्कार्यं + १
स्य पित्रादिः पत्न्या संस्कार्येण चोपविश्य देशकालौ संकीर्त्य समास्य पुत्रस्य देवपितृऋणापाकरणहेतुधर्मप्रजोत्पादन
सिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहाख्यसंस्कारकर्म करिष्ये तदंगत्वेन स्वस्तिवाचनं मातृकापूजनं नांदीश्राद्धं
नंदिन्यादिमंडपदेवताप्रतिष्ठापनं च करिष्ये तदादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं करिष्य इति पुत्रविवाहे सं
कल्पं कुर्यात् कन्याविवाहे तु ममास्याः कन्यायाः भर्त्रा सह धर्मप्रजोत्पादनद्वयपरिग्रहेषु अधिकारसिद्धिद्वारा श्रीप
रमेश्वरप्रीत्यर्थं विवाहाख्यं संसारकर्म करिष्ये इति विशेषः॥ शेषं पूर्ववत्॥ भ्रातृपितृव्यादिस्तु ममास्य भ्रातु
रिति भगिन्या इति वा भ्रातुः सुतस्येति वा भ्रातुः कन्याया इति चोहेन संकल्पं कुर्यात्॥ मातृकापूजनांते जीवत्पितृ
मातृमातामहः पितास्वपित्राद्युद्देशकं पार्वणत्रयं कुर्यात्॥ मातर्येव जीवंत्यां तत्पार्वणलोपः॥ मातामह एव
जीवति तत्पार्वणलोपः॥ तदा पार्वणद्वयेनैव नांदीश्राद्धसिद्धिः॥ मातृमातामहजीवने पितृपार्वणेनैव तत्सि
द्धिः॥ अजीवत्पितृपितामहो जीवत्पितामहः पितृपितामहतत्पितॄनुद्दिश्य पितृपार्वणं कुर्यात्॥ पितः पितुः पि
तामह प्रपितामहौ च नांदीमुखा इदं वः पाद्यमिति प्रयोगः॥ एवं प्रपितामहमात्रजीवने पितृपितामहतत्पि
तामहानुद्दिश्य तत्कुर्यात्॥ पितृपितामहौ पितुः प्रपितामहश्च नांदीमुखा इति॥ पितामहप्रपितामहयोरुभ
योर्जीवने पितरं पितामहस्य पितामहं प्रपितामहौ चोद्दिश्य तत्कुर्यात्॥ पितुः पितामहस्य पितामह प्रपितामहौ च
नांदीमुखा इति॥ एवमजीवन्मातृकस्य पितामही मात्रजीवने मातः पितुः पितामही प्रपितामह्यौ च नांदीमुखा इति

Indira Gandhi National Centre for the Arts

मातृपार्वणे प्रयोगः॥ प्रपितामहीमात्र जीवने मातृपितामह्यौ पितुः प्रपितामही च नांदीमुखा इति॥ पितामही प्रपिता
२२९ मह्यौ जीवने मातः पितामहस्य पितामही प्रपितामह्यौ च नांदीमुखा इति॥ इदं च पितामही प्रपितामही सपत्न्यो
र्न तयोर्देवतात्वासंभवे ताभ्यां सदैव पार्वणं कार्यं॥ एवं मातामह पार्वणे मुख्य मातामह्यादिषु जीवतीषु तत्सपत्
नि: सपत्नीकत्व गुणोपपत्तिः न तु सपत्नमात्रा मातृपार्वणनिर्वाहः परिशिष्टविरोधात्॥ एवमजीवन्मातामहस्य
मातुः पिताः महजीवने मातामहतत्पितामह प्रपितामहौ च नांदीमुखा इति मातुः प्रपितामहजीवने मातुः पितामह
हौ मातामहस्य प्रपितामहश्च नांदीमुखा इति॥ तयोरुभयोर्जीवने मातामह पितामह प्रपितामहौ चेति प्रयोगः
॥ अथ जीवत्पितृकः अजीवन्मातृमातामहश्च मातृमातामहपार्वणद्वयमेव सुतसंस्कारारंभे कुर्यात्॥ तस्याम
पि जीवत्यां मातामह पार्वणमेव कुर्यात्॥ मातामह एव जीवति मातृपार्वणमेव देवरादि तं कुर्यात्॥ त्रिष्वपि जीव
त्सु पितुः॥ पित्रादीनुद्दिश्य पार्वणत्रयं कुर्यात् बाधक परिशिष्टा प्रवृत्तौ विष्णुस्मृतेर्नि:शंक प्रवृत्तेः॥ एवं स्वस्य द्वितीया
दिविवाहांगत्वे न नांदीश्राद्धं कुर्वन् अजीवत्पितृको जीवत्पितृकस्तु पितुः पित्रादीनुद्दिश्य पार्वणत्रयं कुर्यात् पितुः
पितृ पितामह प्रपितामहा नांदीमुखा इति॥ पितुर्मातृ पितामही प्रपितामह्यः नांदीमु इति पितुर्मातामह मातुः २२९
पितामह मातुः प्रपितामह इति च प्रयोगः॥ जीवत्पितृ पितामहस्तु पितामहस्य पित्रादीनुद्दिश्य कुर्यात्॥ तदोक्त वा
क्येषु पितुरित्यस्य स्थाने पितामहस्य निर्देशः त्रयाणां जीवने तु पितृपार्वणलोपः सुतसंस्कार इव स्वीयमातृप

द्दिश्य पार्वणद्वयेनैव श्राद्धसिद्धिः॥ नित्यवन्नांदीश्राद्धविधिनैव लोपशास्त्र सह कृतेतत्त्राणात्॥ एवं प्रथमविवाहे पि
कर्तृतरामावे पारिजातोक्तरीत्या वरएव नांदीश्राद्धं कुर्वन्नजीवत्पितृकः स्वपित्रादीनुद्दिश्य॥ जीवत्पितृकादिस्तु पि
तुः पितामहस्य वा पित्रादीनुद्दिश्य पार्वणत्रयं कुर्यात्॥ तत्राजीवत्पितृकस्य नस्वस्येति संबंध कीर्त्तनं॥ स संबं
धिकत्व माहिम्ने व पित्रादिषु विशेषसिद्धेः अदृष्टार्थ तत्कीर्तनस्य नांदीश्राद्धे निषेधात्॥ अत एव परिकीपपित्राद्युद्देश्य
का नांदीश्राद्ध विशेषलाभार्थस्य पितुरित्यादेः संबंध संकीर्त्तनस्य न विषेधः॥ यदा तु पितृव्य मातुलादिः कन्याविवा
हं कुमारस्योपनयनमुपनीतस्य प्रथमविवाहं वा कुर्यात्॥ तदसंस्कार्यस्याजीवत्पितृकत्वे तत्पित्रादीनुद्दिश्य पार्व
णत्रयं कुर्यात्॥ सोदरज्येष्ठभ्रातुः प्रयोगे न विशेषः॥ तदीय पित्रादीनां संस्कार्य पित्रादिभिरभेदात्॥ सापत्नज्येष्ठ
स्तु मातृपार्वणे संस्कार्यस्य मातृपितामही प्रपितामही इति प्रयोगं कुर्यात्॥ पितृव्यादिस्तु सर्वपार्वणेषु संस्कार्य
स्येति सविशेषण प्रयोगं कुर्यात्॥ संस्कार्यस्यनीवत्पितृ ननिमिकत्वे संस्कार्यस्य पितुः पित्रादीनुद्दिश्य पार्वणत्रयं
कुर्यात् तस्य जीवत्पितृकत्वे तदीयमात्रादीन् तदीयमामहादींश्च द्दिश्य पार्वणद्वयं कुर्यात्॥ मात्रादिजीवतो विशेषः
पूर्ववद्बोध्यः॥ मुख्यस्य यथा प्राप्त कार्ये मुख्य कर्तृणां प्रवृत्तौ चित्यात्॥ एवमात्मीयत्वसुवर्णेन परकीयां तु कन्यकां
॥ धर्मेण विधिना दातुः समगोत्रोपि युज्यते इति स्कांद वचनात्॥ अनाथां कन्यकां दत्त्वा सहस्रो वाधिके वरो द्विगुण
पलमाप्नोति कन्यादाने यदीरितम् इति विष्णुधर्मोत्तर वाचन्म ह्याके नापि हेतुना कन्यां दानुमशक्नुवतां दानाधिक

Indira Gandhi National Centre for the Arts

रणात्वं कन्यादानं कुर्वित्विति प्रार्थनाद्याय: परकीयकन्यां दातुमिच्छति सोपि संस्कार्यकन्याया: पित्रादीनुद्दिश्यपतस्याजी
२२२ वपित्त कस्त्वे तदीयथामात्रानुद्देश्यक पार्वणानुष्ठानं यथासंभवं कुर्यात्॥दत्तकन्यायास्तु विवाहं कुर्वन् प्रतिग्रहीतास्व
पित्रादीनुद्दिश्यैव पितृवन्नांदीश्राद्धं कुर्यात्॥दत्तकन्याया संभवत्वाकाचनिराकृता दत्तकानिर्णये॥ तत्तकापुत्रस्तु
तिलधवीजिरिक्थ: तदा भोपि तरो पितामहो पपितामहोवो द्देश्यकुर्यात्॥एवं मातृपार्वणे मातामह पार्वणे च बो
ध्यं॥यदि तु बीजिरिक्थग्रहणेधिकार्थतरसंभवादो त्ररिक्थे जनपितुर्न भजेद् द्वित्रिम: सुत इति शास्त्राद् दलधतद्रिक्थ
स्तदा प्रतिगृहीतृकुलसंबद्धपित्राद्युद्देश्यकमेव कुर्यात्॥पिंडदो रिक्थहारी च पूर्वभावे पर: पर इति पिंडदानरिक्थ
ग्रहणसहचर्यस्योक्तत्वात्॥एवं चानेकसंस्कार्यविषयानेकसंस्काराणां सहानुष्ठाने यत्र न निषिद्धं नदंग नांदी
श्राद्धीयदेवतानामभेदश्चतत्रगणशः क्रियमाणानामेकस्या मातृपूजनं॥वृद्धिश्राद्धं च तंत्रं स्यात् होमस्तु स्यात्
पृथक् पृथगिति स्मृत्यर्थसारवचनानुसारितंत्रानुष्ठानं बोद्धव्यमिति नांदीश्राद्धे देवतानिर्णय:॥प्रदेयस्यान्नादे
परोक्षत्वे इदमन्नमिति प्रयोग: परोक्षत्वे दास्यमानमिति अन्नासंभवे आममिति तच्चतुर्गुणं द्विगुणं समं वा॥आम
संभवे हिरण्यमिति वा हिरण्यासंभवे॥पर्याप्तान्न निष्क्रयीभूतं द्रव्यमिति वा इति द्रव्यनिर्णय:॥परकीयपित्रा
द्युद्देशे के पितुर्माता पितामही चेति श्लोकपाठ:॥लुप्तपार्वणसंबंधि श्लोकलोपश्च पूर्वोक्तोनुसंधेय: इति नांदी २२२
श्राद्धं॥पूर्ववन्मंडपदेवताप्रतिष्ठापनं ब्राह्मणसुवासिनीभोजनसंकल्पं श्रेयसीदानसंकल्पं च कृत्वा॥विष्टरंद

धिमधुपाद्यादिपात्राणि वरस्य वस्त्रयज्ञोपवीतालंकारान् वरायदक्षिणाभोजनपात्राणि जलपात्रं त्रिसूत्रीं क्षीरं मांग
लिकजीरकादिद्रव्यइध्माबर्हि: आज्यं ताजा: हष्टदुपलेउदकुंभं आम्रादिपल्लवा: प्रणीतादिपात्राणि गौरीहरपूजोप
योगिप्रतिमादिकं न्यायपितिकल्पयते॥विष्टरलक्षणं परिशिष्टे: पंचाशताभवेद्ब्रह्मा तदर्धेन तु विष्टर:॥ऊर्ध्वकेशोभवे
त् ब्रह्मालंबकेशस्तु विष्टर:॥दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टर इति केशा अग्राणि निर्माणकाले तद्वद्वत्त्वादि॥पं
चविंशतिदर्भाणां वेण्यग्रेग्रंथिविष्टरइत्यन्यत्र लक्षणविधि: संग्रहे॥लग्नादि मातृकापूज्या पूज्या गौरीहरान्विता॥प
द्वे वा तदलाभे तु सहस्रे तंडुलान्विते॥पंचजंकारपित्रात्तु तत्र गौरीहरौ यजेत्॥कलशौ: कलशे: कार्यापिधानोतरश्म
णिका॥दिशां चतुर्षु कोणेषु स्थापयेत्तंडुलोपरि॥प्रतिमां फलहे प्राप्तुं कुर्याद्गौरीहरौ यत:॥यत: यस्यां प्रतिमायां उ
मो मिमिलितावित्याशय:॥पलद्वयेण रौप्येण कुर्यान्नंदिनमग्रत:॥अशक्तस्तु तदर्द्धेन पादेन शक्तितोपवा॥अला
भे कुंकुमाषेस्तु लेखयित्वात्र पूजयेत्॥ध्यात्वा मंत्रेण देवौ द्वौ भक्त्या संपूजयेत्सुधीरिति॥ध्यानमंत्रस्तंत्रेव सिं
हासनस्थां देवेशीं सर्वालंकारसंयुतां॥पीतां वरधरं देवं चन्द्रार्द्धकृतशेखरं॥करेणाध:सुधापूर्णकलशांदक्षि
णेन तु॥वरदं चाभयं वामे नाम्लिब्य चतत्तु प्रियां॥एवं ध्यात्वा पूज्य गौरीपुण्यभाजस्तथा स्त्रिय:॥कन्यां समुद्देपश्च
दिति॥पूजामंत्रस्तत्रैव गौरीहर महेशान सर्वमंगलदायक पूजां गृहाण देवेश सर्वदा मंगलं कुर्विति॥कन्यादेव
प्रमाणेन सविंशतितंतुभि:॥वर्तिकां दीपयेत् पश्चात् घृतसंपातितं तवे॥भोजनीया ब्राह्मणाश्च सुवासिन्य: सपूजि
ता:॥दशाष्ट पंचयुग्मं वा हिरण्येनाथ तोषयेदिति॥तथा॥व्रतांते मंडपे स्थाप्यमंचकं सोपधानकं॥चतुःकोणे

Indira Gandhi National Centre for the Arts

तु मङ्गाचस्पस्थाप्यमाङ्गप्रभातत इति॥ अतीलग्नादिने कन्या पितोक्तविधगौरीहरमूर्त्तिकात्यायनीमहाल
२२३ क्ष्मीशचीप्रतिमाभिः सहाग्नि तारेण संस्कृत्य कोणचतुष्टयस्थापितकलशाश्रेणीनांमध्ये उपलायुक्तहषदिस
त्रितायांपीठेवस्त्रेवातंदुलैः पंकजंकारयित्वातत्र गौरीहरौयुक्तध्यानपूर्वकं उक्तमंत्रेणपूजयित्वा प्रतिम
त्रयेदेवतात्रयंयथाविभवंसंपूज्य कन्यासहधरणम्प्रदीपंप्रज्वालयित्वाब्राह्मणान् सुवासिनीश्च भोजयेद्दक्षि
णांचदद्यादिति॥ अथ कन्यादातावरगृहंगतः॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्य करिष्यमाणकन्या
विवाहांगत्वेन वरस्यसीमांतपूजनंकरिष्य इति संकल्प्यगणेशवरुणपूजनेकृत्वाअस्मिन् राष्ट्रेश्रियमिति
पत्नीप्रक्षिप्तजलेन तदीयदक्षिणवामपादौप्रक्षाल्याचम्य गंधपुष्पनीराजनवस्त्रैर्यथासंभवंसंपूज्य यथाचा
रंदुग्धादिप्राशनंकारयेत्॥ ततो वरो देवताः पित्रादिमान्यांश्च प्रणम्य स्वस्तिनो मिमीतामिति कनिक्रदज्जनि
वि च ब्राह्मणैः सह पवन्पदातिर्वाहनारूढो वा वधूगृहं गत्वा सुवासिनीभिर्यथाचारं पूर्णकुंभनीराजनादि
नाकृतमंगलः वधूगृहे प्रविशेत् ततो वरपिता गणेशवरुणौसंपूज्य कन्यांपूजयेत्पूर्ववत् याः फलिनीरिति
मंत्राभ्यां फलैस्तांबूलैश्च यथाचारं पूजयेत्॥ ब्राह्मणाः द्विरुएवतीत्यादिमंत्रैः पूर्ववदाशिषो दद्युः पूर्वं वाग्दानं
नकृतं चेत्फलपूजानंतरं कर्त्तव्यं॥ अथ मधुपर्कः॥ परिशिष्टेवरस्यागमावेक्षणात्गृहसूत्रेचोदितः॥ मधु
पर्कः प्रदातव्यो अन्यशाखेविदातरीति॥ दध्यलाभेपयोजलंपयोवामधुसंस्पृष्टमन्नाचेउदकमितिधर्मप्रश्नात् २२३
प्रतिनिधिः॥ सर्पिर्मधलाभेतदभावेगुडः॥ कन्यादातादेशकालसंकीर्त्तनांतेगृहागतंस्नातकंवरंमधुपर्केणार्ह

यिष्ये इति संकल्पयेत्॥ द्वितीयविवाहार्थमागमनेलुप्तास्नातकमितिपदलोपः दाताविष्टरोविष्टरः प्रतिगृह्यता
मिति विष्टरंदद्यात्॥ वरः प्रतिगृह्णामीतिदक्षिणहस्तप्रतिगृह्य अहंवर्ष्मसस्यवामदेवोविष्टरोनुष्टुप् आसनकरणे
वि० अहंवर्ष्मसजातानांविद्युतामिवसूर्यः॥ इदंतमधितिष्ठामियोमाकश्चाभिदासतीतिततो वरो लौकिकजलेन
चामेत्स्वगृह्यगतस्यप्रथमंचरणक्षालनंकुर्वन्दातापिगंधाक्षतपुष्पयुक्तं पाद्यपात्रेजलमादायपाद्यं ३ प्रति
उ विष्टर एव दातापाद्यंदद्यात्पादयोः परः प्रतिःमीति॥ अस्मिन्राष्ट्र इतिदातापत्नीप्रक्षिप्तजलेनदक्षिणस्नातनपूर्वंप्रतिगृहीतु
स्नालयेत् पादौक्षालयेत्॥ अर्घपात्रेगंधाक्षतपुष्पफलयुतंजलंदाता अर्घमहस्तप्रतिगृह्यतामितिनिवेदितमंजलिनापरोगृ
प्राङ्मुख ह्णीयात्प्रतिगृह्णामीतिपात्रांतरस्थंशुद्धजलंदाता आचमनीयमा ३ प्रतिगृह्यतामितिदत्तं दक्षिणहस्तेनप्रतिगृ
६ ह्य वामेतत्पात्रं निधायतज्जलत्रीयांश्वापरोमृतोस्तरणमसीतिपिबेत् अथ मधुपर्कमानीयमानं अघसारि
कापिधानंवरोअवेक्षतेमित्रस्यत्वाचक्षुषाप्रतीक्षे इतिदाता मधुपर्को ३ प्रतितां॥ वरो देवस्यत्वामीसं[illegible]लिनाप्रति
गृह्य तस्यमेवतचेनावेक्षतेमधुताइतितचस्यराहुगणोगोतमोविश्वेदेवागायत्रीमधुपर्कावेक्षणे विनियोगः
ॐ मधुवाताः माध्वीर्गावोभवंतुन इति सव्यदस्तस्थापितेमधुपर्कपात्रेंगुष्ठोपकनिष्ठिकाभ्यांमधुपर्कंप्रदक्षिणं
त्रिरालोड्य वसवस्त्वागायत्रेणछंदसाभक्षयंत्विति पुरस्तान्निमार्ष्टि रुद्रास्त्वात्रैष्टुभेनेतिदक्षिणस्यां आदित्यास्त्वाजा
गतेनेतिप्रतीच्यां विश्वेत्वादेवा आनुष्टुभेनेति उदीच्यामालोडनसंजातांगुलिलेपस्पेवहद्कुचतुष्टयेप्यपनयनंनेतु
पुनयहणं॥ ताभ्यामेव मध्यात्त्रिगृहीत्वाभूतेभ्यस्त्वेतिविराडन्तेनत्रिरूर्ध्वं क्षिपेत्॥ भूमौपात्रनिधानं॥ भूतेभ्यस्त्वेतिमं

Indira Gandhi National
Centre for the Arts

२२४ वतः ॥ त्रिरुद्दृत्य त्रिरुत्क्षिप्यान्यो पात्रं निधाय चेति कारिकोक्तेः ॥ यद्वा सकृद्गृहीतस्यैवात्रिः समंत्रक उत्क्षेपः ॥ ततो म
ध्याच्च किंचन ॥ आदायभूतेभ्यस्त्वेति मंत्रमुक्त्वा त्रिरुत्क्षिपेदिति ॥ मंत्रस्योत्क्षेपणस्यापि त्रिरभ्यासं समाचरेदिति
भगवत्स्मृतेः इति स्वरसादपीदृशार्थप्रतीतेः ॥ ततो विराजो दोहोसीति मधुपर्कैकदेशं प्रथमं प्राश्नीयात् ॥ विराजो दो
हमशीयेति द्वितीयं ॥ मयि दोहः पद्यायै विराज इति तृतीयं ॥ स्वयं गृहीतस्यापरेण वा दत्ते पात्रे स्थितस्य प्राशनत्रयमेतत्
॥ यद्वा मधुपर्कोपरि भागात्स्तोकं त्रयेभूतेभ्यस्त्वेति मंत्रावृत्त्या त्रिरादाय यथाक्रमं मंत्रत्रयेण प्राश्नीयात् अयं प्रकारो
यं यकारे वेरनादृतेपि स्वरसामिद्धो न्यायसिद्धश्च ॥ निमाष्टीत्यनुषंगाभावात् उदगृहीत्यत्र गृह्णातेः प्रक्षेपणार्थ
त्वकल्पनाभावाच्च प्रथमद्वितीयादिपदानां सार्थकत्वलाभाच्च दृष्टरूपस्योपयोगस्य मार्णसंस्कारस्याल्लाभाच्च ॥
मधुपर्कशेषं उत्तरत उपविष्टाय ब्राह्मणाय दद्यात् अप्सु वा प्रक्षिपेत् तृतीयप्राशनकाले सर्वं वा प्राश्नीयात् आ
चाचमनीयशेषार्द्धं अमृतापिधानमसीति प्राक्प्रलौकिकजलेनाचामेत् ॥ सर्वं तदादाय सत्यं यशः श्रीर्मयि श्रीः श्र
यतामिति प्राक्प्रलौकिकेनद्विराचामेत् ॥ दाता गौर्गौर्गौः प्रतिगृह्यतामिति गां निष्क्रयं वा दद्यात् ॥ वरो माता रुद्राण
मित्यस्य भार्गवो जमदग्निर्गौस्त्रिष्टुप् उत्सर्जने वि ॥ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः २२४
॥ प्रनु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॐ मुत्सृजतेति उत्सृजेत् ॥ अत्र जपंतः ॥ गोः प्रतिनिधि
त्वेन छाग आलभ्यते उत्सर्जनपक्षेपि छागएवनिवेदनीय इति अत्रापि मते छागस्य प्रतिनिधित्वान्निष्क्रय इव न
वारेषु श्रीदिशब्द इव गोर्गौरिति माता रुद्राणामिति चाविकृतं भवति गवि मन सिद्धतायां च्छात्रिंशत्पणात्मकानि च्छ

यवच्छागे मनसिद्ध ते पणाष्टकात्मको निष्क्रयो देयः ॥ ततः कर्त्तव्यमाद भगवान्दाताथ गंधमाल्यादौर्विदितो भ्य
र्चयेद्वरं ॥ पश्चात्तेन सहायातांस्तद्वन्नपि पूजयेदिति ॥ वृद्धहा आहुः गंधमाल्यवस्त्रयुगोपवीतयुगाभरणादि
भिर्यथाविभवं पूजयेदिति ॥ विधित इतिपदात् आदिभिरिति बहुवचनाच्च भोजनात्पूर्वं धूपदीपोत्तरं तां
बूलदक्षिणे अपि दातुमुचिते ॥ नामासौ मधुपर्को भवतीति सूत्रात् उत्सर्जनपक्षे अन्येन मांसेन भोजनदानमि
ति वृत्तिकृज्जयंतादिभिरभिधानाच्च मांसप्रतिनिषिद्धत्वेन माषविशोभ्यन्नं देयः विनायककल्पादौ माषप्रतिनि
धित्वेन तस्यैवमदर्शिवादिभिरभिधानाच्च ॥ इत्याश्वलायनोक्तो मधुपर्कः ॥ अथापस्तंबोक्तः ॥ दाता कूर्चं ददाति वरः
राष्ट्रभृदस्याचार्यासंदी मात्वद्योषं तस्मिन्नुपविशति ॥ आपः पाद्या इत्युदकं प्रयच्छति ॥ आपः पादावनेजनीर्द्वि
षंतं निर्दहंतु मे ॥ अस्मिन्कुले ब्रह्मवर्चस्यसानि यइति पाद्यमवेक्षते ॥ यजमानस्तेनोदकेन वरस्य पादौ प्रक्षा
ल्यमति ॥ ब्राह्मणो दक्षिणं पूर्वं वरः प्रक्षालयितारमुपस्पृश्यमयि महो मयि यशो मयींद्रियं वीर्यं ॥ आत्मानं प्र
त्यभिमृश्य आप उपस्पृश्य पुष्पगंधादियुक्तमर्घ्यमानयेन्निधाय कूर्चाभ्यां परिगृह्य दाणीया आपः इति प्रयच्छ
ति ॥ आमागन्यशसा सं सृज वर्चसा सं सृज पयसा तेजसा च ॥ तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनां ॥ अभिमंत्र्य
विराजो दोहोसि विराजो दोहमशीय मम पद्याय विराजः अंजलावेकदेशमानीयमाने जपति समुद्रं वः प्रहिणो
मिस्वां योनिमपिगच्छत ॥ अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पयः ॥ शेषं पुरस्तान्निनीयमानं ॥ केचिदस्मि
न्काले भोजनांते वा पूज्याय वस्त्रालंकरणादि दातव्यं अन्यथायं पूजित एव न स्यादिसुदर्शनः ॥ दधि मधु संसृ

Indira Gandhi National
Centre for the Arts

२२५ ष्टं को रोन व वर्षं त्र्य सामद ता र्थाय सा पिधा पकूर्चाभ्यां परिगृह्य मधुपर्कइत्यादवरो मधुपर्कं प्रति गृह्य पिधा
नमपनीय त्र प्येविधायेयश्रोसि यसोपश्रोसि ब्रह्मणोदीप्तिरसि तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनां ॥ आम
गंन्निति चद्वाभ्या मपिमंत्र्यते ॥ दाता ॥ आचमनीया आप: ॥ आवेदपति वरस्तदेकदेशापि वति अमृतोपस्त
रणमसि ततः अपआचम्य इत्यं सुदर्शनः ॥ यन्मधुनो मधव्यं परमम्नाद्यं वीर्यं ॥ तेनाहं मधुनो मधव्येन परमे
णान्नाद्येन वीर्येण परमोन्नादो मधव्योसानि ॥ इति त्रिः प्राश्य सह्रुन्मंत्रेणद्विस्तूष्णीं प्राश्य हस्तौ प्रक्षाल्य आम
पिधानमसि पूर्वश्रोथं पिवति पुनराचामति शेषमनुकं प्यायब्रह्मचारिणे प्रयच्छति ॥ आस्मिन् काले वस्त्रा
लंकरणादिभिरलंकृतस्य गौरेत्स्फक्तो ॥ वरः यज्ञो वर्द्धतां यज्ञस्य वृद्धिमनु वर्द्ध पवितिरस्य पचितं मा कुर्व पाचि
तो हं मनुष्येषु भूयासं गौर्धेनुभव्या माता रुद्राणां दुहिता वसूनां स्वसादित्यानां मम तस्य नाभिः प्रणुवोचं चि
कितुषेजनाय मा गामनागामदितिं वधिष्ट ॥ पिवतूदकं तृणान्यत्तु ॥ उपांशुक्त्वा ओमुत्सृजत उच्चैरियं गौरुत्सर्ग
पक्षेपि भोत्तुरेवेति सुदर्शनः ॥ सिद्धमन्नं भूतमित्युक्ते ॥ भूतं सा विराट् तन्मआक्षापितस्यते श्रीयेतन्म ऊर्जयः
पउपांशूक्त्वा ओं कल्पयत उच्चैर्ब्रूयात् ॥ एवं वरस्य मधुपर्कं कृत्वा तात्पित्रादेर्मधुपर्कं कार्यं आपस्तंब शाखि २२५
ना ॥ विवाहे गौर्गृहे च गौस्तया वरमतिथिवदर्हयेद्योस्यापचितस्तमितरयेत्यापस्तंबीयगृह्यसूत्रात् विवा
हस्तोनेगोः सन्निधायगृहशालायामन्या ॥ पूर्वयोस्तर्गद्वारे स्यापचितस्याग्भूतो यायुक्तेन मधुपर्केण वधूं सभ्य
पूजयेत ॥ योस्य वरस्य पित्रादिः संबंधी लोके चापचितो विद्यादिना ॥ यद्वारेस्यापचितः पूज्यः तमितरयापूर्व
वर

वदंगभूतया युक्तेन मधुपर्केण वरमभिपूजयेत् ॥ एतन्मधुपर्कद्वयमपि विवाहांगमित्युदाहृतसूत्रव्याख्या
वसरे सुदर्शनोक्तेश्च ॥ यत्र तु चाग्निमिति विधिनाग्निं प्रति स्थाप्य कन्याशालायां गत्वा वरो यथार्हं यथावि
धि मधुपर्कं गृह्णाति एवं वराचितोपीति प्रदेशांतरे तदुक्तेश्च ॥ यथार्हमिति एतौ सांगशाखाध्यायिनो चेद
क्षिणार्थाधिक गवासहैताभ्यां मधुपर्कोदेयः ॥ अन्यथा केवलइति गोमधुपर्कौ वेदाध्याय इति धर्मप्रश्न
व्याख्यावसरे गां च दक्षिणामिमिउज्वलोक्तेः दक्षिणार्थ गोराधिक्यं प्रकृत्य वरापचितस्नातकमधुपर्के
षु उक्तव्यवस्थायाः सुदर्शनेताप्युक्तेश्च आश्वलायनशाखिना तु गंधादिना तत्पित्रादेः पूजनं कार्यः अनं
तरोदाहृतप्रयोगवद्वचनात् अथ कन्यादानं मदनरत्ने रुद्रस्कंदः वरगोत्रं समुच्चार्य प्रपितामहपूर्वकं ॥
नाम संकीर्तयेद्विद्वान्कन्यायाश्चैवमेव हि ॥ तिष्ठत्पूर्वामुखो दाता वरः प्रत्यङ्मुखो भवेत् ॥ मधुपर्कादहेणो
कन्यां तस्मै दद्यात्सदक्षिणामिति ॥ तत्रैव बृहद्यम्शिष्टः ॥ नामगोत्रे समुच्चार्य संप्रदानस्य चात्मनः
॥ संप्रदेयं प्रयच्छति कन्यादाने तु पुंत्रयमिति ॥ पुंत्रयकीर्तनं च प्रपितामहपूर्वकं ॥ नाम संकीर्तयेदि
ति वचनात् ॥ अत्र नांदीमुखे तत्पूर्वक विधिर्यच्छाखायां तद्विषय इति तत्रैव दानपरिभाषायां तत्रैव ष
ट्त्रिंशन्मते नाम गोत्रे समुच्चार्य प्राङ्मुखो देय कीर्तनात् उदङ्मुखाय विप्राय दद्यात्तत्स्वस्ति वाच
येदिति देयस्य सदैवताकस्य कीर्तनानंतरं ददानीत्यन्वयः अयं दिङ्नियमो न कन्यादाने प्राक्प्र
त्ययं गास्यतो ग्राह्ये दातग्राहकयोः स्थितिवचनादित्यपि तत्रैवोक्तं ॥ प्रतियहे विज्ञो वस्तत्रैवोक्तो विष्णु

Indira Gandhi National
Centre for the Arts

धर्मोत्तरो प्रतिग्रहीता सावित्रं सर्वत्रैवानुकीर्तयेत् ॥ ततस्तु कीर्त्तयेत्साईं ऊं बेदवेत्ता० समापयेतनः प
श्चात्कामस्तुत्वा प्रतिग्रहं० तदंते कीर्तयेत्स्वस्ति प्रतिग्रहविधिस्त्वयमिति ॥ सावित्रं यजुर्वेदे देवस्येति ॥ य
२२६ जुःशाखिविषयस्तद्विधिः ॥ कन्यायादेवताविशेषो विष्णुधर्मोत्तरे० कन्यादासस्तथादासी प्राजाप
त्याप्रकीर्तिता ॥ इति ॥ कन्यादाने तु न पठेद्व्यासेन तु पृथक्पृथक् ॥ प्रतिग्रहं द्विजश्रेष्ठ तत्रैवांतमवेतिव
इति ॥ सुवर्णादिद्रव्याणां द्विजस्य च संबंधघटितं प्रतिग्रहमंत्रं पठेदेवेत्यर्थः ॥ अथ तत्प्रयोगः ॥ तत्र
हेमाद्रिस्थं दानवाक्यमुदाजहार: अद्यामुकसगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रायामुकस
गोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रायामुकसगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रायामुकसगो
त्रायामुकप्रवरायामुकप्रवरशर्मणे वरायामुकसगोत्रस्यामुकशर्मणः प्रपौत्रीममुकसगोत्रस्यामुकप्रव
रस्यामुकशर्मणः पुत्रीममुकसगोत्रामुकप्रवरायमुकाभिधामिमां कन्यां सालंकारां प्रजापतिदै
वताममुककामस्त्वमहं संप्रददे इति संमतं चेद्दशदानवाक्यं मदनरत्ने तु पितृवरप्रपितामहनाम
कीर्त्तनावसरे गोत्रोच्चारणं प्रदर्शयता अनेन तथैव दर्शिता पितामहादिनामोच्चारणावसरे पितृउच्चारणा
कर्त्तव्यतासूचनात् ॥ किं मत्रमूलमिमिति चेत्तु उभाभ्यामुदाहृतमृष्यशृंगवाक्यं वरगोत्रं समुच्चार्य प्रपि २२६
तामहपूर्वकं नामसंकीर्त्तयेद्विद्वान्कन्यायाश्चैवमेव हीति० न चात्र वरविशेषणत्वेनैव गोत्रोच्चारणं
विहितं प्रपितामहादिविशेषणत्वेनेति शक्यं० दानसामान्यविषयेन वृद्धवशिष्ठवचनेनैव कन्या

दाने पितृस्यादरः ततः प्रपितामहपूर्वकं नामोच्चारणे प्रत्येकं वरगोत्रोच्चारणांगत्वेन विधीयत इति निबंध
कृतां रभिप्रेतं ॥ तथान्योपि विशेषो मदनरत्ने प्रोक्तः प्रजापतिदेवतामित्यंते श्वश्रूप्य ब्रह्मलोककामस्तुभ्य
महं प्रतिपादयामीति वरहस्ते कुशाक्षतजलानि कन्याकरेण सह दत्वा कन्यां कनकसंपन्नामिति मंत्रं पठे
दिति ततो दक्षिणादानमुक्तं० हेमाद्रिदक्षिणादानोक्तं गौरीकन्यामिति दानमंत्रोच्चारणमाह तत्र मूलमुदाहृ
तमृष्यशृंगवाक्यशेषः ॥ मधुपर्कार्चितायेनां तस्मै दद्यात्सदक्षिणां ॥ उदपात्रं ततो गृह्य मंत्रेणानेन दापयेत्
॥ अथ गृह्यपरिशिष्टानुसारी पारिजातोक्तदानप्रकार उच्यते ॥ दानदेशे पुरो धाव वरयोर्दक्षिणत उदङ्मु
खउपविश्य वधूवरयोर्मध्यदेशे प्रागग्रोदगग्रान्दर्भान्नास्तीर्य तेषु तैजसं पूर्णकलशं निधाय व्रीहियवै
र्गंधादिभिरलंकृत्य दूर्वापल्लवैर्मुखमवच्छाद्य लिंगाभिरद्भिर्यथोद्दिष्टाभिर्दिग्भिरभिमंत्रयेत् अ
युद्दाता पुण्याहं भवंतो ब्रुवंत्विति पुण्याहं स्वस्त्यृद्धिवाक्यत्रयं ब्राह्मणद्वारा वाचयित्वा शिवा आपः
संत्विति शिवाः प्रमुजभार्यासमेतपवित्रपाणिः प्राणानायम्य देशकालौ संकीर्त्य मम समस्तपितृणां
वाप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं कन्यादानमहं करिष्य इति संकल्प्य वरं कन्यां च यथाशास्त्रमलंक
त्य वरदक्षिणे हिरण्यं निधाय पूर्वार्चितकलशोदकमादाय कन्यां दत्त्वा भ्यां संप्रगृह्य कन्यां कनकसंपन्ना
मिति मंत्रोपविश्याक्षतगोत्रोत्पन्नाममुष्य मम कन्यां सुशीलनाम्नीं श्रीरूपिणीं प्रजापतिदैवतां वासिष्ठगो
त्रोत्पन्नायामुष्य प्रपौत्रायामुष्य पौत्रायामुष्य पुत्राय सुशीलनाम्ने श्रीधररूपिणे वराय तुभ्यं मम समस्त

Indira Gandhi National
Centre for the Arts

पितॄणां निरयात् सानंदं वासिष्ठा राध्यै परमेश्वरप्रीतिकामः प्रजाः सृजत्स्व कर्मभ्यः संप्रददे प्रतिगृह्णातु भवा
२२७ निति ब्रुवं वरस्य पाणावुदकं निषिच्य प्रजापतिः प्रीयतामिति मनसा स्मरन्नो स्वस्ति तु उक्त्वा गौरीं कन्यामिति
मंत्रद्वयेन प्रार्थयेत् अथ वरः पुण्याहमित्यादि दद्यात् वदुक्त्वा कन्या दक्षिणांसमभिमृश्य कइदमिति मंत्रं प
ठेत् ॥ प्रजापतिमनुस्मृत्य धर्मप्रजासिद्ध्यर्थं कन्यां प्रतिगृह्णामीति ब्रूयात् इति ॥ कारिकायां कन्यादानस्येत्थं वि
धिरुक्तः वरेणैव वृतां कन्यां तत्पिता प्रददाति तां ॥ पुत्रायास्य प्रपौत्रायैनम् अस्यामुकगोत्रिणे ॥ अस्या अमुक
गोत्रीयायाः पुत्रीयौ त्रियस्य नप्त्रिका ॥ श्रीरूपेयं मया दत्ता तुभ्यं श्रीधररूपिणे ॥ इत्युक्त्वोदकपूर्वां तां दद्यात् स्वस्ति
पदं पठन् ॥ वरोथ प्रतिगृह्णीयात् स्वस्त्युक्त्वा इदं मंत्रतः इति ॥ शौनकीये पितृपालिप्यतयोलिख्य स्थंडिलेऽग्निं नि
धाय च ॥ पश्चादग्नेः प्रतिष्ठाप्य पेषणीमस्मनिर्मिता ॥ प्रागुत्तरेऽग्नेः संस्थाप्य पूर्णकुंभमथो वरः ॥ उत्थाय प्राङ्मु
खः स्थित्वा प्रत्युगुत्तरतोऽनलात् ॥ तदानीमाल्पनादतं नूतनवसनद्वयं ॥ वासित्वाचात्र सलिलां भूषितां कं
सुमादिभिः प्रत्यङ्मुखः प्राङ्मुखीं तां स्थितु गमात्मसमीपतः ॥ कन्यां कामात्मनः गृह्णाति दत्तां पित्रादिभिर्वरः
॥ कन्यादानप्रकारश्च पूर्वं चरितउच्यते ॥ तद्यथा गार्ग्यगोत्राय परमेश्वरशर्मणे ॥ आत्रेयगोत्रप्रभवां पार्वतीं
प्रददाम्यहं ॥ कन्यां सदत्त्व कर्मभ्यः करोति प्रतिपादनं ॥ ततो मंगलसूत्रं बध्यायन्निष्टांच देवतां ॥ बध्याकंग २२७.
देशे स्यात् भूषणानि च शक्तितः ॥ कन्यकां प्रतिगृह्यैव वरः पूर्ववदासने ॥ तत्रैवोपविशेत् पश्चात् तां वधूं मामं
तुलादिकां ॥ स्वजनः परिगृह्याग्नेरुत्तरेण वरस्य तु ॥ पश्चिमेन यथानीत्वा तस्मिन्नेव वरासने ॥ वरस्य दक्षि

णे पार्श्वे प्राङ्मुखीमुपवेशयेत् ॥ समाधाय पुरस्तंत्रमन्वाधानादिकं कृमादित्यादि ॥ अत्राग्निप्रतिष्ठानोत्तरं
अन्वाधानात् पूर्वं कन्यादानमिति प्रतीयते ॥ जयंतस्वाह ॥ आज्यसंस्कारांतं कृत्वा परिहीतधौताभिनववासोयुगल
माच्छां नामलं कृतामभिहितस्वस्त्ययनां कुमारीमग्निसमीपमानयंति ॥ ततो वरोपि प्राङ्मुखस्थित्वोदकपूर्वं
कन्यां प्रतिगृह्य तस्मिन्नेवासनउपविशति तां चाग्नेरुत्तरत एव नीत्वा वरस्य बहिः प्रतिपाद्य तस्मिन्नेवासने द
क्षिणत उपविशति केचिदस्यांतरं गत्वं वर्णयंति अथवा पूर्वमेवोदकपूर्वां कन्यां प्रतिगृह्य तामात्मनः समीपे
कृत्वा दक्षिणत उपवेशयोपत्लेपनादिप्रक्रमते इति ॥ केचिदित्यनेन संस्कार्यत्वेन भार्याया अंतरंगत्वात् कुरस्मो मे
ध्यमार्गेणसीमंत इव नयनुपक्षास्त्वते ॥ अत्र ग्रंथानां विरोधे किमुचितमित्यपेक्षायां पारिजाते उक्तं कारि
काग्रह्यपरिशिष्टविरोधे परिशिष्टोक्तमेवानुसंधेयं ॥ आचार्येणोक्तत्वात् तथैव लौकिकं वाक्यस्मृतिवाक्ये
परित्यजेदिति वचनाच्च तेतिनथा गृह्यपरिशिष्टकार शौनकयोर्विरोधे परिशिष्टोक्तमेवानुसंधेयं ॥ आचार्येणो
क्तवचनत्वादिति च ॥ एवं च देमाद्यादिनिबंधोदाहृतस्मृतिविरोधे गृह्यपरिशिष्टोक्तमेव सुतरामुचितमाश्व
लायनशाखिनां बहुकल्पं वास्त्व रह्योक्तमिति शास्त्रात् स्मृतीनां शाखांतरविषयत्वसंभावाच्च ॥ आश्वलायनशा
खिकुलेषु सर्वशिष्टैः प्रपितामहादिपुरुषेषु प्रत्येकं गोत्रादि संकीर्तनस्यानादृतत्वाच्च ॥ तान् विवाहे प्रतीयादि
ति गृह्यविरुद्धकुलधर्माणामपि संग्रहार्थमिति वृत्तिकृतोक्तत्वात् ॥ तदनुसारि कुलधर्माणां सुतरां संग्राह्यत्वात्
॥ एवं च देमाद्याद्युदाहृतं प्रतिपुरुषं गोत्रादि कीर्तनं बहुचान्यशाखिविषयं ॥ अत एव हारिहरेण हेमाद्यनुसा

Indira Gandhi National Centre for the Arts

२२८ सारेणपुरुषं गोत्रादिसंकीर्त्तनमुक्त्वैमेवदानप्रयोगं कृत्वा द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णातु इति वरः प्रतिगृह्य को दा
दिति कामस्तुतिं पठेदित्युक्त्वा सुवर्णगोमिथुनं दक्षिणां गां दद्यादित्युक्तं॥ प्रत्यङ्मुखेन वरेण प्राङ्मुख्या कन्यायाः
स्वीकारश्च शौनकोक्तः आश्वलायनगृह्यखिलेन्त्र वङ्कच विषयः कारिकायास्तु पुरुषे पतामेव तात्पर्यं वपित्रा
दिकमे वृद्धप्रताविरोधात्॥ एवं सत्यपि कुलयथा नानादेशाचारानुसरणमेवोक्तं परितो यथाचारमपि प्रये
गोलिख्यते हस्तान्तरं लविदाय पश्चे कं प्रस्थमितं तंडुलराशी पूर्वापरौ विधाय पूर्वस्मिन् प्रत्यङ्मुखं वरमपरस्मिन्
प्राङ्मुखीं कन्यामवस्थाप्य तयोर्मध्ये कुंकुमादिकृतस्वस्तिकां॥ कितमंतः पटमुदग्दशं धारयेयुः कन्यावरयोः पित्रा
दिज्योतिर्विदो वस्त्रादिना पूजां विधाय तदत्ताः सपूगीफलाः कुंकुमाक्षताः कन्यावरयोरंजलौ दद्यात्॥ तावुभौ य
थाचारं तद्धारणं कुर्वतो स्वस्तिकालोनकसमाहितचक्षुर्मनसौ स्वस्वेष्टदेवतामभुष्येन मङ्गले वं ध्यायंतौ तिष्ठतु
ज्योतिर्विदां मङ्गलपद्यपाठान्ते तदेव लग्नमितिपठित्वा सुमुहूर्त्तमस्तु ओं प्रतिष्ठेत्युक्ते अंतःपटमुत्तरतोऽपसा
रयेयुः॥ ततः कन्यावरौ परस्परं शिरसो रक्षतप्रक्षेपपरस्परेक्षणे च कुर्यातां वरः आभ्रातघ्नी० बृहस्पते॥ इंद्राप
त्र श्रीलक्ष्मंतामस्ये सवितुः सवेति नपन्चीक्षते तया वीक्ष्यमाणोऽघोरचक्षुरिति जपेत्॥ अथ तस्याभ्रुवो र्मध्ये दर्भा
ग्रेण ॐ भूर्भुवः स्वरितिपरिमृज्य दर्भं निरस्य उपस्पृशेत्॥ अथ वेदिकैः पठ्यमाणब्राह्मणखंडवाक्यांते कन्यापूर्वं
कं ताभ्यामक्षतारोपणं कार्यं तत्र रुकुचवाद्य मितिखंडद्वयं॥ उक्तमा प्रतिष्ठा॥ यज्ञावांचोरतता नुदेताइमद्य २२८
द्यौः ४ धारयं धाश्यंनिति त्रासति ५ दक्षिणा अनुदद्दिरण्यकश्रियावासीनः ७ साम्राज्यं भौज्यं ८ एतानि वाक्यानि

दक्षिणा अग्निस्पृशा स्थाने वाग्वा इति खंडं केचित्पठंति अनक्ष राः स्त्रजवः संत्विति विपर्यासेन प्राङ्मुखं व
रं प्रत्यङ्मुखी कन्यां कृत्वा दाता वरदत्तवस्त्रादिरहितां सदेया हृत वस्त्रालंकारमात्रयुतां अलंकारन्नकन
कयुक्तहस्तो वरपूजां वशिष्ठचंदनालिसहस्तः च रणां कन्यां इत्थं दद्यात्॥ वधूवरयोर्दक्षिणतः स्वदक्षिण
स्थितपत्नीसहितउदङ्मुखः पीठेऽपविश्य वद्धशिख आचम्य कुशहस्तः प्राणानायम्य देशकालकीर्त्तनांते अ
मुकप्रवरान्वितामुकगोत्रोऽमुकशर्माहं मम समस्तपितॄणां निरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानक
ल्पोक्तफलावाप्तये अनेन वरेण अस्यां कन्यायामुत्पादयिष्यमाणसंतत्या द्वादशावरान् द्वादशपरान्पुरुषान्
पवित्रीकर्तुं आत्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्य इति कुशाक्षत
युतजलप्रक्षेपेण संकल्प्य सपत्नीकउत्पादयोर्दं इमुखएव कन्यां संप्रगृह्य कन्यां कनकसंपन्नां कनकाभरणैर्युतां
॥ दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥ विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः॥ इमां कन्यां प्रदास्यामि
पितॄणां तारणाय चेति पठित्वा नवकांस्यपात्रस्थकन्यांजलेरुपरि ववाञ्जलिं निधाय तत्र दक्षिणोहस्ते यथाश
क्ति हिरण्यं निधाय स्वदक्षिणस्थितपत्न्यानृतनपात्रस्थि मानुछिष्ठशुद्धोदकधारामविछिन्नां क्रियमाणां सहि
रण्येतद्धस्ते क्षिपन्वदेत् ब्राह्मणेः सह वदेत् कन्या तारयतु पुण्यं वर्द्धतां शांतिः पुष्टिस्तुष्टिश्चास्तु पुण्याहं भवंतो० स्वस्ति०
ऋद्धिं० श्रीरस्त्विति॥ एतद्वाक्यचतुष्टयाते ओं पुण्याहमित्याद्युत्तराणि ब्राह्मणाः पठेयुः अमुकप्रवरामुकगोत्राम
कशर्माहं ममत्पमस्तोत्यादि— तयइत्यंतमुक्त्वा अमुकप्रवरोपेतामुकगोत्रायऽमुकशर्मणः प्रपौत्राय अमुकश

Indira Gandhi National Centre for the Arts

र्मणः पौत्राय अमुकशर्मणः पुत्राय अमुकशर्मणे श्रीधररूपिणे वराय कन्यार्थिने अमुकप्रवरामुकगो
२२९ त्रामुकशर्मणः प्रपौत्रीं अमुकशर्मणः पौत्रीं अमुकशर्मणो मम पुत्रीं अमुकनाम्नीं कन्यां श्रीरूपिणीं वरार्थिनीं
प्रजापतिदैवत्यां प्रजासृजनत्वकर्मभ्यः तुभ्यमहं संप्रदद इति सहिरण्यदक्षसाक्षितजलं विक्षिपेत्॥ प्रजापतिः
प्रीयतामिति ध्यात्वा कन्यां प्रतिगृह्णातु भवानिति वदेत्॥ वरः ओं स्वस्ति इत्युक्त्वा कन्यायां दक्षिणासमभिमृ
शेत्॥ क इदं पृथिवी प्रतिगृह्णात्विति त्रिर्वदेत्॥ अथ धर्मप्रजासिध्यर्थं प्रतिगृह्णामीति वदेत्॥ ततो दाता गौ
रीं कन्यामिमां विप्र यथाशक्ति विभूषितां॥ गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय॥ कन्ये ममाग्रतो भूयाः क
न्ये मे देवि पार्श्वयोः॥ कन्ये मे पृष्ठतो भूयात्त्वद्दानान्मोक्षमाप्नुयां॥ मम वंशकुले जाता पालिता वत्सराष्टकं॥ तु
भ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्द्धनीति॥ धर्मे चार्थे च कामे च नातिचरितव्या त्वयेयमिति॥ नातिचरामीति
वरः॥ दातोपविश्य कृतस्य कन्यादानफलप्रतिष्ठासिध्यर्थमिदं सुवर्णमग्निदैवतं दक्षिणात्वेन संप्रददे इति दद्या ८
त्। ओं स्वस्ति वरः॥ ततः कृतार्थ जलपात्रं भोजनपात्रं तदुपपात्रे च संप्रददइति॥ दानपात्रेषु कांस्यादिजाति
भेदेन मंत्रभेदा अग्रे द्रष्टव्याः॥ औरस इत्थं पित्रा दानं कार्यं पितामहस्तु दानं कुर्वन् पौत्रीमित्यतः पूर्वं मम
ति वदेत्॥ पुत्रीमित्यतः पूर्वं न वदेत्॥ भ्रात्रादिदानं कुर्वन् पुरुषत्रयं संकीर्तनमेव कुर्यात् न ममेति क्वापि व
देत्॥ कुल्यत्वेन प्रपितामहः कुर्वन् प्रपौत्रीमित्यतः पूर्वं ममेति वदेत् नोत्तरत्र जननी दानं चेत् कुर्यात्॥ गोत्रा २२९
मुकनाम्नदमिति विकारः भर्तृगोत्रमेवेत्थं वदेत्॥ नमो त्रोपन्नेति पितृमंत्रेनैव वदेत्॥ पुत्रिका गांधर्वा

दिविवाहोढा च पितृगोत्रमेव वदेत्॥ पुंत्रयसंकीर्तने ममेति न वदेच्च॥ मातामहमातुलादिः संबंधी असंबंधी
वा यः कश्चिद्गोत्रान्तरीयः कन्यादानं कुर्वन् स्वगोत्रं स्वविशेषणत्वेन संकीर्त्य अमुकशर्मणः मम समस्तपितृणा
मिति कन्यापितृनामषष्ठ्यंतमुक्त्वा कन्याविशेषणत्वेन तदीयप्रवरगोत्रकीर्तनमेव कुर्यात्॥ मम वंशकुले ज
तेति श्लोके तिममेत्यस्य स्थाने कन्यापितृनामैव वदेच्च कुलशब्दस्य पितृप्रवरगोत्रकी व्याघ्रपरत्वेनैव साफल्यात्
॥ अत एव पिता दद्यात् स्वयं कन्यां भ्राता वानुमते पितुः मातामहो मातुलश्च सकुल्या बांधवस्तथा॥ माता त्वभावे
सर्वेषां प्रकृतौ यदि वर्तते॥ तस्यामप्रकृतिस्थायां दद्युः कन्यां सजातय इति नारदवाक्यव्याख्याने मदनपारिजा
ते॥ यथाप्यत्र भ्रात्रनंतरं सकुल्यात् पूर्वं मातामहमातुलयोः संकीर्तनमौरसकन्याविषये पुत्रिकाविषये च वेदित
व्यमिति तत्रैवोक्तं॥ तथापि पुत्रिकाविषयमेवैतत्॥ औरसकन्यायाश्च यो रत्नक्रमस्य बलवत्त्वात्॥ अ
त एव नारदवाक्ये भ्रातुः पूर्वं पितामहोपसंहारः॥ पुत्रिकाकरणं च कलौ नोचितं तत्कौरसेतरेषां तु पुत्रत्वेन प
रिग्रह इति कतिवर्जेषु पाठात्॥ यदि दत्तकः औरसकन्यादानं कुर्यात् प्रतिगृहीतो येन तद्गोत्रमेव स्वस्य कन्यायाश्च
विशेषणत्वेन वदेत्॥ प्रतिगृहीतुः पितुरनंतरं च प्रपितामहस्थाने पितामहस्थाने वदेत्॥ दत्तककन्यादाने पि
स्वगोत्रकन्याविशेषणत्वेन संकीर्तनं॥ श्लोके जातेत्यस्य दत्तेत्येवमूहः॥ एवं दत्तकवराय कन्यादाने सर्येण च
प्रतिगृहीतः तदीयगोत्रस्यात्तत्कुलगतपुरुषाणामेव वरविशेषणत्वेन संकीर्तनं बोद्धव्यं॥ अथ कन्यादानांग
त्वेन गवादिदानं यं कुर्यात् संकल्पपूर्वकं तत्तन्मंत्रेण तत्तद्दानं कुर्यात्॥ यज्ञसाधनभूताया विश्वस्याघप्रणाशि

Indira Gandhi National
Centre for the Arts

नी॥विश्वरूपधरो देवः प्रीयतामनया गवेति गोदानं॥सर्वस्यापश्रयीभूमिर्वराहेण समुद्धृता॥अनंतसस्यफल
२३० दा अतः शांतिं प्रयच्छ मे भूमे॥इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता॥दासकर्मकरी ग्राह्या यथेष्टं भद्रमस्तु
ते एतस्यां॥अभूत्वं ग्राय नं नित्यं यत्नो नां प्रियमुन्नतिसौभाग्यदेहि मेति संज्ञया दानेन लकेशावां ग्राह्याः हिर
ण्यगर्भसंभूतं सौवर्णं चांगुलीयकं॥सर्वप्रदं प्रयच्छामि प्रीणातु कमलापतिः॥अंगुलीयकस्य॥क्षीरोदमथ
ने पूर्वमुद्धृतं कुंडलद्वयं॥श्रिया सह समुद्भूतं ददे श्रीः प्रीयतामिति कुंडलयोः॥महार्णवसमुत्पन्न उच्चैःश्रवस
पुत्रक॥मायाह्यं विप्रमुख्याय दत्तः शांतिं प्रयच्छ मे॥अश्वस्य॥रजतं सर्वभूतानां पितॄणां परमं हितं॥शिवनेत्रोद्भ
वं यस्मा दत्तः शांतिं प्रयच्छ मे रजतस्य॥सुप्रतीक गजेंद्र त्वं रमस्त्वत्ताभिषेजित॥इंद्र वाहनं शाश्वत् सर्वदेवैश्च
पूजितं॥दानेनानेन दत्तेन मम शांतिं प्रयच्छ मे गजस्य॥इदं यद्ब्राह्मणत्वं स वर्णोपस्कर संयुतं॥तव विप्र प्रसादेन
ममस्त्वभिमतं फलं॥इंद्रादिलोकपालानां पौराज्य महिषीशुभा॥महिषासुरस्य जननी सा स्तु मे सर्वकामदा॥महि
ष्याः॥परापवाद पैशून्यादभक्ष्यस्य च भक्षणात्॥उत्पन्नपापं दानेन ताम्रपात्रस्य नश्यतु॥ताम्रपात्रस्य जलसंबंधि
नः॥यानि पापानि काम्यानि कामोत्थानि कृतानि च॥कांस्यपात्रप्रदानेन तानि नश्यंतु मे सदेति॥कांस्यपात्रस्य भो
जनार्थस्य॥अगम्यागमनं चैव परदाराभिमर्शनं॥रौप्यपात्रप्रदानेन तानि नश्यंतु मे सदेति रौप्यपात्रस्य॥ज
न्मजन्म सहस्रेषु यत्कृतं पातकं मया॥स्वर्णपात्रप्रदानेन शांतिं तस्यास्तु मे सदा॥स्वर्णपात्रस्य॥पूरितं पूगपूगै २३०
र्नानागवल्लीदलान्वितं॥पूर्णेन चूर्णपात्रेण कर्पूरपिटकेन च॥सपूगखंडनं दिव्यं गंधर्वाप्सरसां प्रियं॥करकल्पं

नि रातं कंत्व प्रसादात् कुरुष्व मा॥करंकस्य॥कांचनं दत्तवलयं रूपकांतिसुखप्रदं॥विभूषणं प्रदास्यामि
विभूषयतु मां सदा॥वलयस्य॥सर्वविद्याश्रय ज्ञानकारणं ललिताक्षराः॥पुस्तकं संप्रयच्छामि प्रिया भवतु
भारती॥पुस्तकस्य॥यमेत्वद्दृष्टरूपेण जगदानंदकारक॥लक्ष्मीभूर्ध्वरधिष्ठानमतः शांतिं प्रयच्छ मे॥वृषस्य॥एवं
दानं कृत्वा कुक्ष्यभिमर्शनं पक्षे॥यत्कक्षीवां संवननो विश्वेदेवा अनुष्टुप्॥कुक्ष्यभिमर्शने विनियोगः॥यत्कक्षी
वां संवननमिति मंत्रेण कन्या दक्षिणकुक्षिमभिमृशेत्॥अथ कांस्यपात्रे कलशजलमासिच्य अनाधृष्टमित्यने
नाभिमंत्र्य सकुशदूर्वाया औदुंबर्या दध्या शाखया वा वधूवरौ मा भिषिंचेत्॥आ नः प्रजामिति चतसृणां सूर्या सावि
त्री देवता आद्याः जगती द्वितीया त्रिष्टुप् अंते द्वे अनुष्टुभौ अभिषेके विनियोगः॥आ नः प्रजां इमां त्वमिंद्रः सम्रा
ज्ञी॥समंजंतु॥समुद्रज्येष्ठा इति चतसृणां वसिष्ठ आपस्त्रिष्टुप् अभिषेकः आपो हि ष्ठेति तिसृणां सिंधुद्वीप
आपो गायत्री॥अभिषेक एवमभिषिच्य अथ ऐशानीमारभ्य दुग्धा कंसूत्रं वधूवरयोः कंठदेशे चतुर्वारं
पंचवारं वा प्रदक्षिणं परिवेष्ट्य गिर्वणो गिरः॥तान्वो महो दशावनिभ्यः इते सो मोदो हरी॥वृषा वो अंशुः॥
अजुषध्वमिति तैर्मंत्रैर्वेष्टयित्वा कंठदेशस्थं अधो निष्कास्य कटिदेशस्थमुपरि निष्कास्य जुर्णादारिजा ग्रंथ्
च बध्वा कंठदेशस्थं सूत्रं वधूवा मद्दस्ते वरो वध्नीयात्॥नीललोहितमित्यनेन मंत्रेण तथा कटिदेशस्थसूत्रं
वर दक्षिणहस्तप्रकोष्ठे बंधनं कुर्यात्॥विश्वेत्ता ते इत्यनेन मंत्रेण ऊर्णासु केशपक्षयोर्बद्धे भवत इति सूत्रात्॥
पक्षौ विहितस्य अग्रे विश्वेभिः स्वनी कद्दवैरिति मंत्रेण वरो दक्षिणोत्तरकेशपक्षयोः॥मंत्रा हस्तरूपणादर्शावध

याद्य॥ इदं हस्तामहत्तान्नेतोमिति ॥ अक्षतारोपणं॥ तत्रायं क्रमः तेजसेन पात्रेण क्षीरमानीय घृतमासिच्य पात्रांत
रेणाच्छादितं शुक्लाः शालीतंडुलानादाय वरः प्रक्षालितपाणिः प्रक्षालितवध्वंजलौ क्षीरं घृतं पाणिनाद्धिरुपस्ती
२३१ र्य द्विवारं तंडुलानोप्य द्विवारं तेनैवाभिघारयेत्॥ एवं वरांजलौ अन्येन पूरितेन तातदंजलौ सुवर्णं निधाय
वरांजलिं कन्यांजल्युपरि निधाय कन्याता रयतु इत्यादि मुहूर्तं नक्षत्रं संपदस्तु इत्यंतं पवित्वा कन्यांजलिस्थि
तानक्षतान् वरमूर्द्धन्यारोपयेत्॥ भगो मे कामः समृध्यतामिति वरः स्वांजलिस्थितान् अक्षतान् शिरसि क्षि
पेत् यज्ञो मे काम॥ समृध्यतामिति एवं पुनः द्विवारं कुर्यात्॥ तत्र श्रियो मे कामः समृध्यतामिति वधूः धर्मो मे कामः स
मृध्यतामिति वरः इति द्वितीये कुर्यात्॥ प्रजा मे कामः समृध्यतां वधूः यशो मे कामः समृध्यतां वरः इति तृतीये कुर्यात्॥
तूष्णीं चतुर्थं कुर्यात् सप्तवारं कुर्यादिति केचित् अन्ये तु अक्षतारोपणे मंत्रां तेच्छंति एवं अक्षतारोपणं कृत्वा वरस्व
शेखरपुष्पमादाय क्षीरघृते नाल्याय कन्याललाटे तिलकं कुर्यात् सापि पूर्वोक्तं तिलकं वरस्य कुर्यात् मालां वरस्य कं
ठे निदध्यात् ततो कन्या कंठे वरो मालां निदध्यात्॥ ततो वधूवरौ प्राङ्मुखावुपविश्य अष्टपुत्री संज्ञकं च वस्त्रद्वयं
सकंचुकं मांगल्यतंतुः युक्तं नीरांजनपुरस्सरं सुवासिनीभिः समर्प्य वरः मांगल्यतंतुनानेन मम जीवनहेतुना
॥ कंठे बध्नामि सुभगे सा जीव शरदां शतमिति मंत्रेण कंठे बध्वा कुलदेवतां च स्मृत्वा आयुष्यमिति सूक्तेन भूष
णैर्भूषयेत्॥ ततः विवाहव्रतनिर्विघ्नतासिध्यर्थं गणपतिपूजनं करिष्ये गणानां त्वा आत्तन इंद्र ज्येष्ठं मंतमिति मं
त्रद्वयेन हरिद्राखंड पूगीफलद्रुकादि निधाय षोडशोपचारैः संपूज्य पुनः पूर्वोक्तमंत्राभ्यां वस्त्रप्रांते बध्वा उत्त २३१

रीयांतो परस्परं बध्नीयात्॥ ततो वधूवरौ सह लक्ष्मीशचीपार्वतीप्रणमेत षोडशोपचारैश्च पूजयेत्॥ ततो देशका
लकीर्तनांते विवाहव्रतं करिष्ये च द्वे संकल्प्य ततः प्रथमादिवसे रोहिणी सोमो मृत्वा दाक्षायणीमावादिभिः पूजये
त् ततो वधूमंगलद्रव्यपरिपूर्णानि वायनानि देवतात्रयोद्देशेन सुवासिनीभ्यो दद्यात्॥ ततो द्विजेराशीर्देया॥ मंदं कु
र्णाभिर्इ विणोदा॥ सविता पश्चात् नवो नवो उशादिवि॥ दक्षिणावता इति पठेयुः॥ ततो वधूवरो पूर्वोक्तलग्न
वेदिमंत्रपापणगच्छ तां वरस्वयमाने सउपविश्य पश्चिमभागेण नियमितवाचं वधूमानीय तद्दक्षिणतउपवे
श्य प्राणानायम्य देशकालो संकीर्त्य प्रतिगृहीतायामस्यां वध्वां भार्यात्वसिद्धये विवाहहोमं करिष्ये इति संक
ल्प्य स्थंडिलोपलेपनाद्यग्निप्रतिष्ठापनांतं कर्म कृत्वा प्रत्यगग्नेर्दृषदं सोपलां प्रतिष्ठाप्य प्रागुदीच्यां उदकुंभ आ
न्य राशेः उपरि निधाय पल्लवै रपिधाय धायगंधपुष्पैरलंकृत्य उदगग्नेः सप्ततंडुलराशीनुपकल्प्य समिद्द्वय
मादाय देशकालो संकीर्त्य अस्मिन् विवाहहोमे देवतापरिग्रहार्थमित्यादि आघारावाज्यभागौ त्वंतमुक्त्वा त्रिरग्निं
पवमानं अग्निं प्रजापतिं चाज्येनार्यमणमग्निं वरुणमग्निं पूषणमग्निं प्रजापतिं च लाजद्रव्येण शेषेण स्विष्ट
कृतमित्यादि आज्य ध्रिश्रयणं तं पूर्ववत् कृत्वा आज्यं लाजैः सह पर्यग्नि कृत्वा आज्योत्पवनादि स्रुक्स्रुवं अ
जलिं संमार्गीते हविरासादनाभ्यर्चनपूर्वकमाघारौ तं कृत्वा वधाराज्य अन्नआयूंषीति त्रिभिः पूर्ववत् होम

Indira Gandhi National
Centre for the Arts

२३२ स्यागौक्षत्वा त्वमर्यमेतिमंत्रस्य वसुश्रुत ऋषिः॥ अग्निर्देवता त्रिष्टुप्छंदः॥ आज्यहोमे वि०॥ ॐ त्वमर्यमा
भवसि यत्कनीनां नाम स्वधावन्गुह्यं बिभर्षि॥ अंजंति मित्रं सुधितं न गोभिर्यद्दंपती समनसा कृणोषि स्वाहा
॥ अग्नय इदं० प्रजापते न त्वदेतानि इति पंचभिराज्याहुत्वा प्रत्यङ्मुखस्तिष्ठन् प्राङ्मुखा वध्वा उत्तानाद्
स्तांगुष्ठादि यदेत्राम वाङ्मुखेन करेण गृह्णामि ते इति मंत्रस्य सूर्या सावित्री ऋषिर्देवता च त्रिष्टुप्छंदः॥ अस्या
वध्वाः पाणिग्रहणे वि०॥ ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः॥ भगो अर्यमा सविता
पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवा इति मंत्रेण गृहीत्वा वध्वा करौ प्रत्यङ्मुख्या अंजलिकारइत्वास्तुवेणाज्
मादाय स्तीर्य वधूभ्राता भ्रातृस्थानीयेन वा तिष्ठता सूर्यस्थानान्लाजान् मुष्टिपरितान् द्विरोप्य स्वयं
पात्रस्थानभिघार्य अंजलिस्थानप्यभिघार्य अर्यमणमिति मंत्रस्य वामदेव ऋषिः॥ अर्यमाग्निर्देवता अनुष्टुप्
छंदः प्रधानलाजहोमे वि०॥ अर्यमणं नु देवं कन्या अग्निमयक्षत। स इमां देवो अर्यमा प्रेतो मुंचातु नामुतः स्वा
हा॥ अर्यम्णे अग्नय इदं॥ इति मंत्रमुक्त्वा विच्छिन्नांजलिनांगुल्यग्रैर्हावयेत्॥ ततो दृषदमुपलां च वर्जयित्वा
कुंभसहितमग्निं अमोहमस्मि सा त्वं सा त्वमस्यमोहं द्यौरहं पृथिवी त्वं सामाहमृक् त्वं तावेहि विवहावहै प्र २३२
जां प्रजनयावहै संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेम शरदः शतमिति मंत्रेण अग्रे स्वयं गच्छन् वध्वा सह प्र

दक्षिणीकृत्य तां प्राङ्मुखीं इममश्मानमारोहाश्मेव त्वं स्थिरा भव। सहस्व पृतनायतोऽभितिष्ठ पृतन्यत इति मंत्रे
ण द्वाभ्यामपि पादाभ्यां दृषदमारोप्य आरोहेममश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेनेति कात्यायनः पुनः पूर्ववत्
तदंजलिमुपस्तीर्य लाजावदानं द्विः कारयित्वाभिघार्य वरुणमिति मंत्रस्य वामदेव ऋषिः वरुणो देवता अ
नुष्टुप्छंदः प्रधानलाजहोमे वि० वरुणं नु देवं कन्या अग्निमयक्षत॥ स इमां देवो वरुणः प्रेतो मुंचातु नामुतः
स्वाहा वरुणायाग्नय इदं न मम इति मंत्रेण पूर्ववत् हावयित्वा पुनस्तेनैव मंत्रेण वध्वा सह प्रदक्षिणीकृत्याश्म
नमारोप्य पुनर्लाजावदानं पूर्ववत् कारयित्वा पूषणमिति मंत्रस्य वामदेव ऋषिः पूषाग्निर्देवतानुष्टुप्छंदः
॥ ला०॥ ॐ पूषणं नु देवं कन्या अग्निमयक्षत॥ स इमां देवः पूषा प्रेतो मुंचातु नामुतः स्वाहा॥ पूष्णे अग्नय इदं
न मम इति मंत्रमुक्त्वा हावयित्वा पुनर्मंत्रेण प्रदक्षिणीकृत्याश्मानमारोप्य स्वयं प्रजापतये स्वाहेति स्मरन्
अवशिष्टान् लाजान् आत्माभिमुखं सूर्यकोणेन वनिरवशी— तथैव हावयेत्॥ ततो वधूं परिगृह्याग्नेरुद
क् सप्ततंडुलराशिष्वपि इष एकपदी भव सा मामनुव्रता भव पुत्रान्विंदावहै बहूंस्ते संतु जरदष्टय इति
प्रथमराशिं ऊर्जे द्विपदी भवेत्यादिना द्वितीयं राशिं रायस्पोषाय त्रिपदी भवेत्यादिना तृतीयं राशिं मायोभ
वाय चतुष्पदी भवेत्यादिना चतुर्थं राशिं प्रजाभ्यः पंचपदी भवेत्यादिना पंचमं राशिं॥ ऋतुभ्यः षट्पदी नाषष्ठं
राशिं॥ सखा सप्तपदी भवेत्यादिना सप्तमं राशिं प्रत्यगादितः क्रमेणाक्रमय्य तस्याः शिरसा त्वशिरः संयो

Indira Gandhi National
Centre for the Arts

२३२ ज्यकलशोदकमादायप्रथममाप्लाविरःपश्चाद्वधूशिरःपूर्वोक्तशांतिरस्त्वित्यादिपंचदशमंत्रैरभिषिच्यपू
र्ववद्वासित्वाज्येनास्विष्टकृदादिहोमशेषंसमाप्यपूर्ववद्ध्रोतरीयांतोतत्स्मीवसुस्पराश्रौधुवमरुंधतींसप्तऋ
षीश्चवध्वासहदृष्ट्वाजीवपत्नीप्रजांविदेयेतिमंत्रंपत्न्यावाचयेत्ततोवधूर्वाचंविसृजेत्॥एतदादिविवाहा
ग्निंरक्षेदितिविवाहहोमः॥ततःसायंसंध्यामुपास्यविवाहाग्निंप्रज्वाल्यप्राणानायम्यदेशकालौसंकीर्त्यअ
स्मिन्विवाहाग्नौयथोक्तकालेश्रीपरमेश्वरप्रीत्यर्थंयावज्जीवमुपासनंकरिष्येइतिसंकल्प्यऔपासनंकुर्यात्॥
तत्रायंक्रमः॥शुद्धेदेशेचतुर्विंशत्यंगुलप्रमाणंषोडशंवाचंचतुरस्रंप्रत्येकंचतुरंगुलोत्सेधंमेखलात्रययु
क्तंआयतनंनिर्माययगोमयेनोपलिप्योल्लिख्यतत्रयथालाभंसिकतापद्मपत्रादिसंस्तारान्निक्षिप्यतत्रगृह्या
ग्निंपूर्ववत्प्रतिष्ठाप्यविवाहदिनस्यसायंकालादारभ्यऔपासनंकुर्यात्॥तदित्थंयजमानःकृतसंध्यावंदनः
आचम्याग्नेःपश्चिमतउपविश्यप्राणानायम्यदेशकालौसंकीर्त्यपरमेश्वरप्रीत्यर्थंऔपासनंकरिष्येइतिसंक
ल्प्यास्तमानात्पूर्वकालेप्रज्वालिताग्नौचत्वारिशृंगेतिमंत्रेणयज्ञपुरुषमूर्तिंध्यात्वासोदकेनपाणिनासमंतं
प्रदक्षिणंपुनःपुनरुदकमादायत्रिःपरिसमूह्यपरिस्तीर्यत्रिरुदकमादायत्रिभिःपर्युक्ष्यहोमीयद्रव्यंप्रक्षाल्यपा
त्रेनिक्षिप्यतत्पात्रमग्नेरुत्तरतोनिधायज्वलताद्दर्भेणावज्वाल्यप्रोक्ष्यतेनैवदर्भेणज्वलताग्निःपर्यग्निकृत्वाग २३२
दुल्मुकंनिरस्यअग्नेःपश्चिमतःकुशानास्तीर्यतत्रसमिधासहदर्विंनिधायविधायविश्वानिनइत्यादिऋग्भ्यां

धांदिभिरग्निमभ्यर्च्यदक्षिणंजान्वाच्यतत्समिधंतस्मिन्अग्नौप्रक्षिप्यापउपस्पृश्यसमिधिप्रदीप्तायांसत्यांवि
धूमेप्रज्वालितेग्नौज्ञातसंख्याकान्प्रस्तधान्यस्यचतुःषष्टितमभागरूपान्वातंडुलादक्षिणहस्तेनादायसव्यपाणि
हृदिनिधायअंगुल्युत्तरपार्श्वेनसंमिश्रमूलतोध्यंगुलप्रदेशेअग्नयेस्वाहेतिहुत्वाअग्नयइदंनममेत्युक्त्वातस्याआ
हुतेरैशानदेशेपूर्वाहुतेर्भूयसींआहुतिंप्रजापतिपदंचतुर्थंतमनसाध्यायन्स्वाहेत्युच्चार्यपूर्वाहुत्यसंसृष्टांहु
त्वापूर्ववदुपविश्यपरिस्तरणंविसृज्यपरिसमूह्यपर्युक्षणंकृत्वाअग्नआयूंषिइतिमंत्रत्रयस्यशतंवैखानसा
ऋषयःपवमानोदेवतागायत्रीछंदःअग्न्युपस्थानेविनि०अग्नआयूंषिपवसआसुवोर्जमिषंचनः॥आरेबाध
स्वदुच्छुनां॥अग्निर्ऋषिःपवमानःपांचजन्यःपुरोहितः॥तमीमहेमहागयं॥अग्नेपवस्वस्वपाअस्मेवर्चःसुवी
र्यं॥दधद्रयिंमयिपोषं॥अग्नेत्वंन्नइतिप्रजापतेनत्वदितितंतुतन्वन्नितिस्यदेवऋषिःअग्निर्देवताजगतीछं
दःविनियोगमुक्त्वाॐतंतुंतन्वन्रजसोभानुमन्विहिज्योतिष्मतःपथोरक्षधियाकृतान्॥अनुल्बणंवयतजोगु
वामनुर्भवजनयादैव्यंजनं॥हिरण्यगर्भइत्यस्य~~गर्भहिरण्यगर्भ~~हिरण्यगर्भऋषिःप्रजापतिर्देवतात्रिष्टुप्विनि०
पूर्ववत्हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत्॥सदाधारपृथिवींद्यामुतेमांकस्मैदेवायह
विषेम॥एतैर्मंत्रैर्वायव्यदेशेप्रह्वीभूतःकृतांजलिःस्थित्वाग्निमीक्षमाणःउपस्थायपुनरुपविश्यन्यूनाति
रिक्तपरिहारार्थंविष्णुंस्मृत्वानेनहोमेनभगवान्श्रीपरमेश्वरःप्रीयतामित्युच्चारयेत्॥एवंप्रातरुदया

Indira Gandhi National
Centre for the Arts

स्रुवं अग्निं। प्रादुःकरणं कृत्वा होमकाले पूर्वांगानि कृत्वा पूर्वसंकल्पित प्रातरुपासनं करिष्ये इत्युक्त्वा सूर्या
२३४ य स्वाहेति पूर्ववदन्येनैव प्रथमाहुतिं हुत्वा सायंकाले द्वितीयाहुतिवदत्रापि आहुतिं हुत्वा परिसमूहनादि
कं कृत्वोपस्थानं कुर्यात्॥ तत्रायं क्रमः सूर्यो नः चक्षुः सूर्यो देवता गायत्री छंदः॥ सूर्योपस्थाने ॐ सूर्यो नो
दिवस्पातु वातो अंतरिक्षात्॥ अग्निर्नः पार्थिवेभ्यः॥ उदुत्यं चित्रं देवानां॥ नमो मित्रस्येति सूर्याभितपा ऋषिः
सूर्यो देवता जगती छंदः उपस्थाने विः॥ ॐ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत॥ दूरेदृशे देवजा
ताय केतवे दिवस्पुत्राय सूर्याय शंसत॥ एतैश्चतुर्भिर्मंत्रैः पूर्वोक्त प्राजापत्यैश्चोपस्थाय आचमेत्॥ इत्यौपासनं
॥ स्वमंदिरं गच्छन् वधूयानमारोहयेत्॥ पूषा त्वेतस्य सूर्या सावित्री ऋषिः देवता च त्रिष्टुप् छंदः॥ यानारो
हणे विनि: ॐ पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्रवहतां रथेन। गृहान् गच्छ गृहपत्नी यथासो वशिनी
त्वं विदथमावदासि इति गृहं गच्छन् त्वाश्वशुरगृहे पुनस्त्रि श्यादि संकीर्य ममाग्नेर्गृह्याग्नि त्वसिद्धि द्वारा परमेश्व
रप्रीत्यर्थं गृहप्रवेशाख्यं होमं करिष्ये तत्र देवतापरिग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा सूर्यासावि
त्री चतुर्वारमुक्त्वा आज्येनत्रोषेण स्विष्टकृतमित्युक्त्वा न्वाधानप्रभृति अग्नेः स्वदक्षिणदेशे प्राग्रीवमुत्तरलोमानडुहं च
र्मास्तीर्य तस्मिन् वधूमुपवेश्य पात्रासादनादि अलंकरणपर्यंतं कृत्वा तया न्वारब्धः सन्निध्माधानादि आज्य २३४
भागांतं कृत्वा आ नः प्रजामिति चतसृणां सूर्या सावित्री ऋषिः सूर्या सावित्री देवता प्रथमा जगती द्वितीया त्रि

ष्टुप् अंत्ये द्वे अनुष्टुभौ छंदः आज्यहोमे वि:॥ आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा अदुर्मंग
लीः पतिलोकमाविश शं नो भव द्विपदे शं चतुष्पदे स्वाहा सूर्यासावित्र्या॥ अघोरचक्षुरपतिघ्न्येधि शिवा पशु
भ्यः सुमनाः सुवर्चाः॥ वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे स्वाहा सूर्यायै सावित्र्यै॥ इमां त्व
मिंद्र मीढ्वः सुपुत्रां सुभगां कृणु दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि स्वाहा॥ सम्राज्ञी श्वशुरे भव सम्रा
ज्ञी श्वश्र्वां भव॥ ननांदरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु स्वाहा सूर्यायै सावित्र्यै इदं न मम इति च तत्सभिरा
ज्याहुतीर्हुत्वा समंजंतु विश्वेदेवाः समापो हृदयानि नौ॥ सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ॥ हुतशिष्टा
ज्येन स्वं स्व वध्वाश्च हृदये अंत्वा हस्तं प्रक्षाल्य स्विष्टकृदादि होमशेषं समाप्य पतिपुत्रवतीभिः सुवासिनीभि
नीराजितो ब्राह्मणेभ्य आशीर्भिः गृहीत्वा वध्वा सह अभिनंदन्नासीत् स्विष्टकृदादि होमशेषं समाप्य पतिपुत्र इति ततो द्वि
तीयादि वधूवरौ अश्वसरोगंधर्वो भूत्वा महादेवी ततीयादि स्वाहाग्नी भूत्वा कादिकां चतुर्थादि मानवो भूत्वा
करीमावाहुना दिभिः संपूजयेतां॥ एवं चतुर्षु दिवसेषु स्वदेहदान सहित बहु ब्राह्मण भोजन वेदोक्ताशीर्वा
दपूर्वकमत्ता चरणं कुर्यातां॥ ततस्त्रिरात्रं वधूवरौ ब्रह्मचारिणौ अलंकुर्वीणौ अधःशायिनौ अक्षारालव
णाशिनौ भूत्वा तिष्ठेयातां ततो वरो व्रतचरणांते विवाहकाले वध्वा परिहितं वस्त्रं सत्येनोत्तभितानूरिति सू
क्तेन तदर्थविदे ब्राह्मणाय दत्वा व्रतसंपूर्त्यर्थं ब्राह्मणान् भोजयित्वा ओं स्वस्तीति तानुक्त्वा पुनरोंस्वस्तीति ते

Indira Gandhi National Centre for the Arts

वार्चयेत्॥ अयं गृह्यपरिशिष्टमते नविवाहप्रयोगः॥ अथैरिणीदानप्रयोगः॥ वधूपिता चतुर्थदिने प्राणानायम्य
२३५ तिथ्यादि संकीर्त्य मम उमामहेश्वरलक्ष्मीनारायणप्रीतिद्वारा सकलकामनासिध्यर्थं कन्यादानस्य संपूर्णफलावा
प्त्यर्थं ऐरिणीपूजनं वरमात्रे ऐरिणीदानं च करिष्ये तदंगतया गणपतिपूजनं च करिष्ये ऐरिणि त्वमुमादेवि
महेशो गिरिजापतिः॥ अतस्त्वां पूजयिष्यामि ऐरिणि सर्वकामदा मिति मंत्रेण षोडशोपचारैरभ्यर्च्य ऐरिणी
दानं वरमात्रे कुर्यात्॥ तत्र मंत्रः॥ महाद्रुममयं पात्रं नानापक्वान्नसंयुतं॥ सवस्त्रफलतांबूलदंपतीवंशव
र्द्धनं॥ सदक्षिणं सदीपं च धूपैः षोडशभिर्वृतं॥ वरमात्रे प्रयच्छामि कन्यादानस्य सिद्धये॥ ऐरिण्याख्यं वंशपात्रं
पक्वान्नैः परिपूरितं॥ करकै रुद्रसंख्याकैः सुवर्णपरिपूरितैः॥ एतावद्दैरिणीरूपं कर्त्तव्यं किल सूरिभिः॥ वं
शो वंशकरः श्रेष्ठो वंशो वंशसमुद्भवः॥ अनेन वंशदानेन श्रीशो ऋद्धिं करोतु मे॥ वंशपात्रमिदं पुण्यं वंश
जातसमुद्भवं॥ वंशानामुत्तमं दानं अतः शांतिं प्रयच्छ मे॥ अनेन वंशपात्रदानेन श्रीलक्ष्मीनारायणः प्रीय
तां॥ वंशपात्राणि सर्वाणि मया संपादितानि वै॥ उमाकांताय दास्यामि मम वंशाभिवृद्धये॥ वंशवृद्धिकरं दा
नं सौभाग्यादिसमन्वितं॥ वस्त्रेणाच्छादितं चैव फलहेमसमन्वितं॥ सर्वपापक्षयकरं नानाद्रव्यैस्तु पूरितं॥
दानानामुत्तमं मतः शांतिं प्रयच्छ मे॥ इति वंशदानं कृत्वा ततः कन्यां वरमातुरुत्संगयोरुपवेश्य वरमातरं प्रा २३५
र्थयेत्॥ अष्टवर्षा इयं कन्या पालिता पुत्रवन्मया॥ इदानीं तव पुत्राय दत्ता स्नेहेन पाल्यतां॥ वधूमात्रादिः न

सहसुवासिनीभ्यः यथाचारं कंचुकी क्षुद्रशूर्पवायनानि दद्यात् यथाचारं ज्ञेयं॥ अथ द्विभार्याग्निसंयोगप्र
योगः शौनकः॥ अथास्यो गृह्ययोर्योगि सपत्नीभेदजातयोः॥ सदाधिकारसिध्यर्थमहं वक्ष्यामि शौनकः
॥ पृथक्स्थंडिलयोरग्नी समाधाय यथाविधि॥ तत्र कृत्वाज्यभागांतमन्वाधानादिकं ततः॥ पूर्वपत्न्यग्नौ जु
हुयात्तयान्वारब्ध आहुतीः॥ अग्निमीले पुरोहितं सूक्तेन नवकेन न च॥ समिध्येनं सुमारोप्य अयं ते योनिरि
त्यृचा॥ प्रत्यवरोह्य तस्य नया कनिष्ठाग्नौ निधाय च॥ आज्यभागांतमत्रापि कृत्वा रभ्य तदादितः॥ समन्वारभ्य
एताभ्यां पत्नीभ्यां जुहुयात् घृतं॥ चतुर्गृहीतमेताभिरामिर्ऋग्भिर्यथाक्रमं॥ अग्नावग्निश्चरति॥ अग्निनाग्निः
समिध्यते॥ अस्तीदमिति सप्तभिः पाहि नो अग्न एकया ततः स्विष्टकृदारभ्य होमशेषं समापयेत्॥ गोयुग्मं द
क्षिणां दद्यात्॥ श्रोत्रियायाहिताग्नये॥ पत्न्योरेकापि मृता दद्यात्तेनैव तां पुनः॥ आदधीतान्यया सार्द्धमा
धानविधिनागृहीति॥ अथ प्रयोगः॥ देशकालौ संकीर्त्य मम द्वाभ्यां भार्याभ्यां सहनिष्पन्नगृह्याग्न्योः॥ ताभ्यां
सहाधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं संसर्गं करिष्ये इति संकल्प्य गणेशपूजनं स्वस्तिवाचनं कृत्वा द
गपर्गस्थंडिलयोर्गृह्याग्नी प्रतिष्ठाप्य प्रथमेग्नौ ज्येष्ठपत्न्यान्वारब्धोन्वाधानं कुर्यात् अग्निद्वयसंसर्गार्थं प्रथमा
ग्निहोमकर्मणि देवतापरिग्रहार्थमन्वाधानं करिष्ये चक्षुषी आज्येनेत्यंते अग्निं नवभिः राज्याहुतिभिः शेषेण स्व
दिवर्पात्रासादनादि आज्यभागांते अग्निमीले इति नवर्चानां मधुच्छंदा अग्निर्गायत्री अग्निद्वयसंसर्गार्थे प्रथ

Indira Gandhi National
Centre for the Arts

भुयंतेयोनिर्त्रृत्वियोयतोजातोअरोचथाः॥ तंजानंनग्नआसीदाथानोवर्धयागिरः॥

माग्नोप्रधानाज्यहोमेविनियोगः स्वाहां तनवाग्निः स्रुवेणनवाहुती र्जुहुयात् अग्न्ययद्दं ततः स्विष्टकृदादिहो
२३६ मशेषं समाप्याथं तेयोनिरितितमाग्निंसामिधिसमारोप्यप्रत्यवरोहे तिद्वितीयाग्नितप्रत्यवरोहाग्न्यामन्वा
न्वारब्धअन्वाधानांतंकुर्यात् अग्निद्वयसंसर्गार्थं प्रथमसंसृष्टद्वितीयाग्नौ विहितहोमेदेवतापरिग्रहा
र्थमन्वाधानं करिष्येचक्षुषी आज्येनत्यंते अग्निप्रधानं षड्वारमाज्येनशेषेणस्विष्टकृतमित्यादिपात्रासाद
नेप्रोक्षणीकुशान् दर्वी स्रुवौ प्रणीताज्यपात्रेइध्माबर्हिषाइतिपात्राष्टकमासाद्याज्यसंस्कारांतेकुशैर्दर्वीस्तुवयोः
संमार्गआज्यनागांतेदर्भा चतुर्गृहीतमाज्यंगृहीत्वापत्नी हस्तान्वारब्धाजुहुयात्॥ अग्नावग्निरित्यस्यहिरण्यग
र्भाग्निरष्टी अग्निद्वयसंसर्गार्थे संसृष्टौ प्रधानाज्यहोमेविनियोगः॥ अग्नावग्निश्चरतिप्रविष्टऋषीणांपुत्रोअ
धिराजएषः तस्मै जुहोमिहविषाघृतेनमादेवानां मोमुदन्भागधेयंमोअस्माकंमोमुदन्भागधेयंस्वाहा॥ अग्नय
इदं त्रिष्टुपंचहोमेषु चतुर्गृहीतग्रहणे विनियोगस्त्यागश्च पूर्ववत् अग्निनाग्निर्मेधातिथिः काण्वोग्निर्गायत्री अ
ग्निनाग्निः सामिध्यतेकविर्गृहपतिर्युवा॥ हव्यवाड्जुह्वास्यः स्वाहा॥ अस्तीदमितितिसृणांविश्वामित्रोग्निरनु
ष्टुप् अंत्येत्रिष्टुप् अंत्ये मौ अस्तीदमधिमंथनमस्तिप्रजननंकृतं॥ एतांविश्पलीमाभराग्निंमंथामपूर्वथास्वा
हा॥ अरण्योर्निहितोजातवेदा गर्भइवसुधितोगर्भिणीषु॥ दिवेदिवईड्योजागृवद्भिर्हविष्मद्भिर्मनुष्येभिर २३६
ग्निः स्वाहा॥ उत्तानायामवभराचिकित्वान्सद्यः प्रवीतावृषणंजजांअरुषस्तूपोरुशदस्यपाजइलायास्पुत्रो
वयुनेजनिष्टस्वाहा॥ ... हजातः दःपुनर्सां देवायाहव्यं हतंजातन्॥ ... आपुष्टिंरयिमस्मः कुधेह्यथाभवयजमानायशंयोः॥

वयुनेजनिष्टस्वाहा॥ पाहिनः प्रगायोग्निर्ईहती॥ पाहिनो अग्नएकयापाह्युतद्वितीयया॥ पाहिगीर्भि
स्तिसृभिरूर्जांपतेपाहिचतसृभिर्वसोस्वाहा॥ सर्वत्रस्वाहासमकालाहुतिः॥ ततः स्विष्टकृदादि॥ होमशेषंसमा
प्य श्रोत्रियायाहिताग्नयेगोयुग्मंदद्यात्॥ ब्राह्मणान्भोजयेत् इतिद्विभार्याग्निसंसर्गः॥ अथार्कविवाहप्रयो
गः॥ कर्ताआदित्यवारेहस्तर्क्षेवाशनैश्चरेवान्यस्मिन्शुभदिनेवाग्रामात्प्राच्यांउदीच्यांवापुष्पफलसं
युतं अर्कंपरीक्ष्य अर्ककन्यादातारं आचार्यंपरिकल्प्यस्नात्वालंकृतवासाः॥ रक्तगंधादिभूषितः अर्क
संनिधिमागत्यस्वस्तिवाचनंकृत्वाहिरण्येननांदीश्राद्धंकृत्वा अष्टवर्गान्पूजयेत् दातामधुपर्केणयज्ञो
पवीतसहस्तकर्णादिभूषणैः उष्णीषगंधमाल्यादिभिश्चवरंपूजयेत् वरः स्वशाखोक्तप्रकारेणमधुप
र्कंसमाचरेत्॥ अर्कपुरस्तिष्ठेत् त्रिकोणकवासिनंसमाश्चच्छायापासहितोवेर॥ तृतीयोद्वाहजंदोषंनि
वारयसुखंकुरु॥ इतिसूर्यंसंप्रार्थ्यछायासहितंरवितंत्राध्यारोप्य अर्कलिंगैरक्तपिच्छवस्त्रमाल्यगंधै
स्तन्मंत्रैः संपूज्यश्वेतवस्त्रेणकार्पाससतंतुभिश्चसंवेष्ट्यगुडोदाननिवेद्यताम्बूलंसमर्पयेदिति॥ ततो
प्रीतिममकराचेयंमयासृष्टापुरातनी॥ अर्ककाब्रह्मणासृष्टाह्यस्मान्संप्रातिरक्षतु इतिमंत्रेणअर्कं
प्रदक्षिणीकृत्य॥ पुनः नमस्तेमंगलेदेविनम— विन्दुराग्नजे॥ त्राहिमांकृपयादेविपत्नीत्वंमइहागता
॥ अर्कत्वंब्रह्मणासृष्टः सर्वप्राणिहिताय च॥ वृक्षाणामादिभूतस्त्वदेवानांप्रीतिवर्द्धनः॥ तृतीयोद्वाहजंपापं
मृत्युंचाशुविनाशय इतिमंत्रेणप्रदक्षिणीकुर्यात्॥ ततः कन्यादानपर्यंतंविधिंकृत्वाकन्यादाताप्रादित्यस्

Indira Gandhi National
Centre for the Arts

२३८ प्रपौत्रीं सवितुः पौत्रीं अर्कस्य पुत्रीं काश्यपगोत्रां अर्ककन्यामिमां विप्र यथाशक्ति विभूषितां ॥ गोत्र
प्रशर्मणे तुभ्यं दत्तां विप्र समाश्रय इति मंत्रेण दद्यात् ॥ अजल्पन्नत कर्माणि कृतकंकणपूर्वकं ॥ यावत्संची
कृतसूत्रं तावदर्कं प्रवेष्टयेत् स्वशाखोक्तेन मंत्रेण गायत्र्या वाथ वाचयेत ॥ पंचीकृत्य पुनस्सूत्रं स्कंधे कृति
पलतः वृद्धत्सामेति मंत्रेण सूत्ररक्षां प्रकल्पयेत ॥ अर्कस्य पूर्वपश्चिमदक्षिणोत्तर आग्नेयादिचतुष्टये शुभकुं
भानष्टौ निधाय प्रति कुंभं वस्त्रसूत्राभ्यां वेष्टयेत ॥ गंधद्वारेत्युक्त्वा शीतलजलैस्तान् कुंभानापूर्य प्रति कुं
नाममंत्रेण मदाविष्णुं पाद्यादिनैवेद्यांतं पूजयेत् किंस्विदुत्तरदिग्भागे अकन्यार्यायान्वारब्धो वरः प्राणाना
यम्य अस्याः सम्यक्कुंभार्यात्वासिध्यर्थं पाणिग्रहहोमं करिष्ये तदंगस्थंडिलोल्लेखनादि आघारांतं तंत्रं
कृत्वा संगोभिरित्यस्य आंगिरा ऋषिः बृहस्पतिर्देवता त्रिष्टुप् छंदः आज्यहोमे विनियोगः ॥ संगोभिरांगि
रसो नक्षमाणो भग इवेदर्यमणं निनाय ॥ जनेमित्रो न दंपती अनक्ति बृहस्पते वाजयाशूरिवाजौ स्वाहा ॥
बृहस्पतय इदं ॥ यस्मै त्वा कामकामायेत्यस्य विमदेव ऋषिः अग्निर्देवता त्रिष्टुप् छंदः आज्यलस्मै त्वा का
मकामाय वयं सम्राड् जामहे । तमस्मभ्यं कामं दत्त्वाय थेदं घृतं पिवद्ग्ना अग्नये इदं ॥ ततो व्यस्तसमस्ताभि
र्व्याहृतिभिश्च हुत्वा होमशेषं समाप्य प्रदक्षिणीकृत्वा मया कृतमिदं कर्मस्थावरेषु जरायुणा ॥ अर्कोप
त्यानि नो देहि तत्सर्वं क्षंतुमर्हसि इत्युक्त्वा शांतिसूक्तानि पठित्वा गोयुग्मं श्रोत्रियाचार्याय दत्त्वा इतरे २३७
भ्यो पिविप्रेभ्यो यथाशक्ति दक्षिणां दत्त्वा वस्त्राणि तत्कान्यानि धारयेत ॥ तस्कानि गुरवे दद्यात् चतुर्थ

दिवसानंतरं होममग्निं च विसृज्य पुण्याहं वाचयित्वा मानुषीं विधिना उद्वहेत ॥ इत्यर्कविवाहप्रयो
गः ॥ अथाग्निसंसर्गदोषप्रायश्चित्तप्रयोगः ॥ स्वगृह्याग्निरन्यगृह्याग्निना संसृष्टश्चेदग्निं विभज्य उभौ स
मिधि समारोपणं कुर्यात् ततः प्रत्यवरोहणं कृत्वा पूर्वहोमान् प्राणानायम्य तिथ्यादिकं संकीर्त्य
सामिद्धयमादाय अस्मिन्नन्वाहितोग्नौ इत्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा अत्र प्रधानं अग्नये विवि
चये चरुं चरुशेषेण स्विष्टकृतमित्यादि पूर्णपात्रं निधानांतं कृत्वा पवित्रवति शूर्पे अग्नये विविचयेत्वा
जुष्टं निर्वपामीति चतुरो मुष्टीन् निरूप्य प्रोक्षणाद्याज्यभागांतं कृत्वा अग्नये विविचये स्वाहेति उद्दे
त्यागो कृत्वा स्विष्टकृदादि होमशेषं समापयेत ॥ अनुपक्रांतदर्शपूर्णमासश्चेत् पूर्ववद्होजं संस्कृत्य
स्रुवेण द्वादशवारं स्रुचि गृहीत्वा अग्नये विविचये विविचये स्वाहेति स्रुचैव हुत्वा काले होमं चरेत
॥ पश्चाद्धोता अग्नये पथिकृते जुहुयात ॥ शवाग्निना संसृष्टश्चेदग्नये विविचये स्वाहेति जुहुयात् पू
र्ववद् येनासंसृष्टश्चेदग्नये संसर्गी य जुहुयात ॥ अथ स्थालीपाकप्रयोगः ॥ यजमानः ॥ अथाधानदिने
स्त्रिया सह स्नात्वा कृत्य नित्यक्रियो विधिवत्स्नातो रोपासनं कृत्वा प्राणानायम्य देशकालौ संकीर्त्य मम
उपात्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं पूर्णमासस्थालीपाके नं चत्वारिशृंगा वामदेवोग्निस्त्रिष्टु
प् ॥ मूर्तिध्याने विनियोगः ॥ चत्वारिशृंगात्रयोसमहस्तचंतुश्शृगः स्वपत्नि होदि॰ सत्र देवतापरि
ग्रहार्थं अन्वाधानं करिष्ये इति संकल्प्य समिद्वयं गृहीत्वा अस्मिन्नन्वाहिते अग्नौ जातवेदसमग्निमि

Indira Gandhi National
Centre for the Arts

स्मृ
२३८

ध्येनप्रजायतिंप्रजापतिंआघारावाज्येनअग्नीषोमौचक्षुषीआज्येनेत्युक्त्वाअत्रप्रधानंअग्निंअ
ग्नीषोमौचरुद्रव्येणाग्नीषेणस्विष्टकृतिंप्रजापउध्मसंनहनेनरुद्रंअयासमग्निंदेवान्विष्णुं०अ
ग्निं०वायुं०सूर्यं०प्रजापतिंएताःप्रायश्चित्तदेवताःआज्येनज्ञाताज्ञातदोषनिबर्हणाग्निंघृत्रिवारम
ग्निमाज्येनेत्युक्त्वामादितिदोषपरिहारार्थमरुतआज्येनएवसांसंमिद्धयमग्नावाधायइध्मावर्हिषो
संनहनंकुर्यात्॥तत्रायंक्रमः॥प्रादेशमात्रान्षडत्रिंशद्दर्भानादायमध्यादक्षिणेनसमस्यपुनरन्यांर
ज्जुंपूर्ववत्कृत्वाप्रादक्षिण्येनाभिवृतंसमस्यअग्नेःदक्षिणाग्रंपृथिकृत्वातारज्जुंउदगग्रांवित
स्ततत्रप्रदेशमात्रान्मुष्टिपरिमितान्दर्भान्निधायतयारज्ज्वातान्दर्भान्द्विरावेष्ट्यतद्रज्ज्वग्रेण
तद्रज्जुमूलंसलदावेष्ट्यतद्रज्ज्वग्रंग्रन्थेःपूर्वमाविष्टिरज्ज्वाअधस्तान्नियअन्येदर्भैःसदआयत
नान्पश्चाद्गाग्नेरुपरिनिदध्यात्॥ततःपूर्ववदन्यांत्रिवृतांरज्जुंकृत्वाउदगग्रांवितत्यतत्रपलाशश
खादिरादिप्रत्यतमयज्ञीयवृक्षद्विप्रदेशप्रमाणपंचदशसमिदात्मकेध्मंप्रागग्रंनिधायतयारज्ज्वातंस
कृदावेष्ट्यआयतनपश्चादग्नेरुपरिनिधायतत्त्वउभौस्वशरीरंगंधादिभिरलंकृत्यतद्दिवसेकल
दंक्रयंअनृतंप्रदासंबहुभाषणंनृत्यगीतवादित्रव्यसनंपर्यंकशयनंदंतधावनंदध्यन्नंकुलियस २३८
कुकोद्रवचणकमसूरक्षारलवणंमधुमांसमाषपरान्नंएतानिवर्जयित्वाघृतमिश्रदधि
ध्यान्नंदिवैवसकृद्भुंजीयाताम्॥ततोयजमानः॥सायंहोमंकृत्वाअग्नेःसकाशादष्टांगुलीपरिमितेदे

परिसमुह्यप्राच्यामुदगग्रैःदक्षिणस्यांप्रागग्रैःप्रतीच्यामुदगग्रैःउदीच्यांप्रागग्रैर्दर्भैःपरिस्तृणीयात्॥पूर्वप
श्चिम [illegible] परिस्तरणमूलयोरुपरिदक्षिणपरिस्तरणं॥पूर्वपश्चिमपरिस्तरणाग्रयोरधस्तादुप
रिस्तरणंएवमग्निंपरिस्तीर्यपर्युक्ष्यब्रह्मचारीभूत्वाधःशयीत॥ततःपरेद्युःप्रातर्होमानंतरंअग्नेर्दक्षिणतः
ब्रह्मासनार्थंअग्नेरुत्तरतःपात्रासादनंदर्भान्प्रागग्रानास्तीर्यअग्नेरीशान्यांनीमारभ्यपूर्ववत्परिमृज्य
अग्नेरुत्तरतःपूर्वमास्तीर्णदर्भेषुचरुस्थालीप्रोक्षणपात्रंदर्वीस्रुवंप्रणीतापात्रं॥आज्यपात्रंइध्मंबर्हिः
शूर्पंकृष्णाजिनंउलूखलंमुसलंचइत्येतानिपात्राणिद्वंद्वशउदक्पवर्गप्राक्संस्थान्यग्निलेष्वासादयेत
॥ततःप्रोक्षणपात्रंउत्तानीकृत्यप्रादेशमात्रेपवित्रेनिधायशुद्धाभिरद्भिःपूरयित्वाअंगुष्ठानामिकाभ्यांतेप
वित्रेउदगग्रेअसंस्पृष्टेगृहीत्वात्रिरुत्पूयपात्राण्युत्तानानिकृत्वेध्मंविस्रस्यसर्वाणिपात्राणित्रिःप्रोक्ष
येत॥ततःईशानदिगवस्थितंविप्रंअस्मिन्कर्मणिब्रह्माणंत्वांवृणेइतितस्यपाणिंपाणिनागृहीत्वावृणु
यात्॥ब्रह्मावृतोस्मीत्युक्त्वाप्राङ्मुखोयज्ञोपवीत्याचम्यसव्यस्तपाण्यंगुष्ठोभूत्वाग्रेणाग्निंपूरीत्याग्नेर्दक्षि
णतउदङ्मुखःस्थित्वापूर्वमासनार्थनिहितदर्भेषुदक्षिणभागस्थितमेकंदर्भंअंगुष्ठानामिकाभ्यांगृ
हीत्वानिरस्तःपरावसुरितिमंत्रेणनैरृत्यांनिरस्यअपउपस्पृश्यइदमहमर्वावसोःसदनेसीदामीत्युक्त्वाउद
ङ्मुखःवामोरूपरिदक्षिणपादंसंस्थाप्योपविश्ययजमानेनगंधादिभिरर्चितःसन्ॐबृहस्पतिर्ब्रह्मासदने
आशिष्यतेबृहस्पतेयज्ञंगोपायसयज्ञंपाहिसयज्ञपतिंपाहिसइमांपाहीतिजपित्वायज्ञावेक्षणेरतोभूया

Indira Gandhi National
Centre for the Arts

तु॥ ततो यजमानः पश्चात्प्रणीता॥ पात्रं निधाय तत्र पवित्रे निधाय पूर्ववमुत्पूताभिरद्भिः पूरयित्वा गंधपुष्पा
२३९ दिकं तत्र निक्षिप्य आह ब्रह्मन्नपः प्रणेष्यामीति ब्रह्मा ओंभूर्भुवःस्वः बृहस्पतिप्रसूतो उपांशु जपित्वा उच्चैराह ओं
प्रणयेति यजमानस्तत्पात्रं मुखसममुद्धृत्य अग्नेरुत्तरतः दर्भेषु निधाय ते पवित्रे गृहीत्वा तत्पात्रं अन्यद
र्भैराच्छाद्य अग्नेः पश्चाच्छूर्पं निधाय शूर्पे पवित्रे निधाय परिश्रयेत्वा जुष्टं निर्वपामीति मंत्रावृत्त्या चतु
रो मुष्टीन्निःसृप्य अग्नीषोमाभ्यां त्वा जुष्टं निर्वपामीति तत्रैव निरूप्य ते पवित्रे त्रिरूप्य ब्रीहीणामुपरि नि
धाय उत्पूताभिरद्भिर्निर्वापसंख्यया प्रोक्ष्य प्राग्ग्रीवे ऊर्ध्वलोम्नि कृष्णाजिने उलूखलं निधाय उलूखले निमु
प्ते ब्रीहीन्तान्मुसलेन पत्न्या पयानाम्ना त्रिः फलीकृत्य त्रिः प्रक्षाल्य विदधम वादिगतं चुकश्कृतं पचेत॥ तत
स्ते पवित्रे आज्यपात्रे निधाय तत्पात्रं पुरतः संस्थाप्य आज्यमासिच्य अग्नेरुत्तरतः स्थितानंगारान्नूनस
ना सह अग्नेरुदग्ग्नेरक् परिस्तरणाद्बहिर्निरू— आज्यस्थालीमधिश्रित्य ज्वलता दर्भोल्मुकेनावज्वल्
य अंगुष्ठपर्वमात्रप्रक्षालितदर्भाग्रद्वयमाज्ये निधाय पुनर्ज्वलतासेनेव दर्भोल्मुकेन चरुणा सहाज्यं त्रिः
पर्यग्निकृत्वा तदुल्मुकमपास्यापः स्पृष्ट्वाज्यस्थालीं सुविकर्षनिवचउदगुद्वास्यांगारान्प्रत्यूह्यापः स्पृ
ष्ट्वा तत्र स्थितमेवाज्यं सवितुः इत्यस्य हिरण्यस्तूप ऋषिः सविता देवता पुरउष्णिक् छंदः॥ आज्योत्पवने वि ॥२३९
निः ॐ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति मंत्रेणैकवारं द्विस्तूष्णीं पवित्राभ्यां
प्रोक्ष्य ते पवित्रे अद्भिः॥ प्रोक्षणीपात्रस्याग्नेः पश्चात्परिस्तरणाद्बहिरासनाग्रे स्रुवं प्रोक्ष्य सुवि वहिः सन्नहनार

जं उदगग्रां वितत्य तद्बहिः प्राणाग्रमुदयवर्गं निविडमास्तीर्य तत्राज्यपात्रं विधाय दक्षिणहस्तेन दर्विस्रुवौ गृ
हीत्वा सव्येन कांश्चिद्दर्भानाधाय सहैवाग्नौ प्रताप्य दर्वीं निधाय सव्यहस्ते स्रुवं गृहीत्वा दक्षिणेन पाणिना दर्भाग्रैः स्रुवं
बिलं प्रागादक्षिणेन प्रा— दिं प्रागपवर्गं त्रिः संमृज्य स्रुवबाह्यतो दर्भाग्रैरुपस्पृश्य तिलदृष्टं त्रिः समृज्य दर्भमू
लैः स्रुवदंडाधरस्तात् बिलपृष्ठादारभ्य यावदुपरि बिलं मावत्— संमृज्य अद्भिः प्रोक्ष्य स्रुवं निष्टप्य आज्यस्थाल्या
उत्तरतः दर्भसंस्तीर्णे निधायाथः स्पृष्ट्वानेनैव दर्भैः दर्वीं दर्तद्दत संमृज्य तां स्रुवस्योत्तरतो निधाय दर्भान
द्भिः प्रोक्ष्याग्नावनुप्रहरेत्॥ ततः श्रातं चरुं स्रुवं गृहीत्वाज्येनाभिघार्य चरुस्थालीमुदगुद्वास्य अस्या
ज्ययोर्मध्ये नीत्वाज्यदक्षिणे बर्हिषि स्वंतमासाद्य पुनश्चरुमभिघार्य चरोरुद्धरणाय चर्वाज्ययोर्मध्ये पा
त्रांतरं निधाय गंधाक्षतपुष्पैरग्निमर्चयेत् विश्वानि न इत्यनयोः वसुश्रुत ऋषिः अग्निर्देवता॥ त्रिष्टुप्
छंदः॥ अग्न्यर्चने विनियोगः ॐ विश्वानि नो दुर्गहा जातवेदः सिंधुं न नावा दुरितानि पर्षि॥ अग्ने अत्रि
वन्नमसा गृणानो ऽस्माकं बोध्यविता तनूनां॥ यस्त्वा हृदा कीरिणा मन्यमानो मर्त्यं मर्त्यो जोहवीमि जा
तवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमस्यामिति ऋग्भ्यां प्रतिपादं प्रतिदिशं यामारभ्याभ्यर्चय
स्वेत्वं सुकृतेति उपस्थाय आत्मानं चालंकृत्य हस्तप्रशस्त उध्मबंधनरज्जुं तत्रैव निधाय दक्षिणपाणिने
ध्ममभिघार्य मूलमध्ययोर्मध्यभागं गृहीत्वा अयंतइध्मोत्यस्य वामदेव ऋषिः जातवेदाग्निस्त्रिष्टुप्छंदः इ
ध्महोमे विं ॐ अयंत इध्म आत्मा जातवेदस्तेनध्यस्व वर्धस्व चेद्ध वर्द्धय चास्मान्प्रजाय पशुभिर्ब्रह्मवर्चसेन

Indira Gandhi National Centre for the Arts

घेन सामिधयस्वाहेती ध्मं हुत्वा जातवेदसे अपेदं न मम मेस्तु दित्यजेत्॥ अथ स्रुवेणाज्यं गृहीत्वा परिस्तरणालोनि
त्वा वायव्यकोणमारभ्य मेयीपर्यंतं प्रजापतये इति मनसा स्मरन् स्वाहेत्याघार्य आविच्छेदेनाज्यं वेनाज्यधा
२४० रादीसम्मोइध्मदारुणो परिस्रावयन् लून्दु हुत्वा पुनराज्यं गृहीत्वा परिस्तरणामनैऋत्यकोणतो नीत्वा नैऋती मा
रभ्येशाना पर्यंतं तथैव हुत्वा उ इंद्राय प्रजापतये इदं न मम मे स्वाहेत्या गोकृत्वा स्रुवेणाज्यमादाय अग्नये स्वाहे
त्यग्ने उत्तरपार्श्वपूर्वभागे हुत्वा पुनराज्यं गृहीत्वा सोमाय स्वाहेति अग्ने दक्षिणपार्श्वे तत्समयदेशे हुत्वा यथा
देवतमुद्देशत्यागो कृत्वा वपूर्वनिहितपात्रांतरे दधक्रुचंस्थ इदमग्नये इदमग्नीषोमाभ्यामिति च रुभाग द्व
यमुत्तरसंस्थमभिमृश्य स्रुवेणादर्व्यामुपस्तीर्य प्रथम प्रधानदेवता चरोमध्यादंगुष्ठपर्वमात्रं तिरश्चीनाभिरंगुष्ठमध्यमा
नामिकाभिरुदगयाभिर्नखसंस्पर्शं मेकृत्वावदाय दर्व्या मीप्यततः पूर्वभागे प्रागग्रामिः तथैवावदाय दर्व्या मोप्यस्था
लीस्थं हविरभिघार्य पश्चाद्दर्वीस्थित मभिघार्य विधूमाल्पज्वालांगारे मेत्र अग्नये स्वाहेति आज्यभागयो र्मध्ये प्रा
कृदेशोवादर्व्याः पार्श्वेनाह्लादयनिव हुत्वा अग्नये इदं न मेस्तु त्कापूर्ववदुत्तरद्ध विषोवदाय अग्नीषोमाभ्यां स्वाहेति
पूर्वाहुतेः प्राक् हुत्वा अग्नीषोमाभ्यामिदं न ममेत्यक्त्वा दर्व्यामुपस्तीर्य प्रथमद्ध विष उत्तरार्द्धात्पूर्ववदानतो
भूयो नूचीनाभिरेवावदायेदर्व्या मोप्य पुनर्द्वितीयद्धविषतथैवावदाय स्थालीस्थमनभिर्यदार्वीस्थं द्विरभिघार्य २४०
यदस्येत्यस्य हिरण्यगर्भऋषिः॥ अग्निः स्विष्टकृद्देवता अतिधृती छंदः स्विष्टकृद्धोमे विनियोगः यदस्य कर्मणोत्यरी
रिचं यद्वा न्यूनमिहाकरं अग्निष्टत् स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु मे अग्नये स्विष्टकृते सुहुतहुते स
हु

विच मे पृथिव्याः सप्तधामभिः स्वाहा देवेभ्य इदं॥ इदं विष्णुरित्यस्य मेधातिथिऋषिः॥ विष्णुर्देवता गायत्री छंदः आ॰ इदं+७
र्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्समर्धय स्वाहेत्यग्नेरैशान्यां दिशि जुहुयात्॥ अथ स्विष्टकृत
इदं पंचावत्तीतु प्रधानहोमे मध्यात्पूर्वार्द्धात् पश्चार्द्धात् त्रिवारं मवद्यति स्विष्टकृति उत्तरार्द्धात् सकृदेव द्विरवद्यति इ
तरत्समानं ततः अग्नये रुत्तरतः स्थितामिध्मवं धनी रज्जुं विस्रस्य रुद्राय पशुपतये स्वाहा इति हुत्वा रुद्राय इदं न मम मे कृ
त्वाय: स्पृष्ट्वा स्रुवेणाज्यमादाय अयाश्चाग्ने रित्यस्य वामदेव ऋषिः अयाल्लग्निर्देवता पङ्क्ती छंदः प्रायश्चित्तहोमे ॐ अ
याश्चाग्नेस्यनभिशस्तिश्च सत्यमित्त्वमया असि अयासा वयसाकृतो यासन्हव्यमूहिषे यानो धेहि भेषजं स्वाहा अ
ग्नये अयस इदं- अतो देवा इत्यस्य मेधातिथिऋषिः देवा देवता गायत्री छंदः॥ ॐ प्रा॰ ॐ अतो देवा अवंतु नो यतो विष्णु
र्विचक्रमे त्रेधा निदधे पदं समूलमस्य पांसुरे स्वाहा विष्णव इदं॥ व्याहृतीनां व्यस्तसमस्तानां विश्वामित्र जमदग्नि
भरद्वाज प्रजापतय: ऋषय:॥ अग्निर्वायुसूर्यप्रजापतये देवता॥ गायत्र्युष्णिगनुष्टुप् बृहतीति क्रमाच्छंदांसि प्रा॰
ॐ भूः स्वाहा अग्नये॰ ॐ भुवः स्वाहा वायवे इदं॰ ॐ स्वः स्वाहा सूर्याय इदं॥ ॐ भूर्भुवः स्वः स्वाहा॰ प्रजापतय इति सप्ताज्याहुती
र्जुहुयात्॥ ततो ब्रह्माग्नेश्च योयच्छेद्रो स्थित्वा एतास्सहुत्वा मंत्रविपर्यासादितियत निमित्ते प्रायश्चित्तं यद्धोदेवा इत्य
स्याभितपात्तु ऋषिः॥ मरुतो देवता त्रिष्टुप् छंदः॥ प्रा॰ ॐ यद्वो देवा अतिपातयानि वाचा प्रयुती देवहेलनं अरायो अस्मां
अभिदुच्छुनायते न्यत्रा स्मिन्मरुतस्तान्निधेतन स्वाहा मरुद्भ्य इदं न मम॥ अनाज्ञातमितिवि
यस्य हिरण्यगर्भऋषिः॥ अग्निर्देवता अनुष्टुप् छंदः प्रा॰ अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु अग्ने तदस्य कल्प
यत्वं हि वेत्थ यथातथं स्वाहा॥ अग्नये ॐ पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः अग्ने॰ अग्नये अयासाकत्रेसस्य कि

Indira Gandhi National
Centre for the Arts

धाकशीमि हिरण्ययो वेतसो मध्य आसां समुद्रः स्रवंति सरितो न धेना अंतर्हृदा मनसा पूयमानाः॥ एते अर्षंत्यूर्मयो + ८
तऋषिः अग्निर्देवता त्रिष्टुप्छंदः॥ आ॰ ॐ यस्याकृत्रामनसा दीनदक्षान यज्ञस्य मन्वते मर्त्यासः अग्निष्टद्धोता क्रतु
२४१ विद्विजानयत् यजिष्ठो देवा ऋतुशो यजाति स्वाहा॥ अग्नये॰ इ समुद्रादूर्मिरित्येकादशर्चस्य वामदेव ऋषिः आ
पो देवता त्रिष्टुप्छंदः॥ अस्या जगती पूर्णाहुतौ विनियोः ॐ समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमान
ट्॥ घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामा नमोभि
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृंगोवमीद्गौर एतत्॥ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रि
धा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविंदन्॥ इं
द्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः॥ एता अर्षंति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे॥ घृतस्य
धारा अग्निं घृतस्य मृगा इव क्षिपणोरीषमाणाः॥ सिंधोरिव प्राध्वने शूघनासो वातप्रमियः पतयंति यह्वाः॥ घृतस्य
धारा अरुषो न वाजी काष्ठा भिंदन्नूर्मिभिः॥ यत्र सोमः सूयते यत्र सोमः सयते यत्र यज्ञो घृतस्य धारा अभि तत्पवंते
अभ्यर्षत सुष्टुतिं गव्यमाजिं अस्मासु भद्रा द्रविणानि धत्त इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवंते धा
मंते विश्वं भुवनमधिश्रितमंतः समुद्रे हृद्यन्तरायुषि॥ अपामनीके समिथे य आभृतः तमश्याम मधुमंतं त ऊर्मिं
स्वाहा॥ परिमिता धारा संततां दर्व्यग्रेण सा यत्नो घं हुत्वा अग्न इदं इत्युक्त्वा॥ निवि॰ ज्योतिषत्स्य प्रजानो गृहपत ऋषिः॥ अ २४१
ग्निर्देवता त्रिष्टुप्छंदः॥ होमे वि॰ विज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा प्रादेवीर्मायाः सहते दुरेवाः शि
शीते शृंगे रक्षसे विनिक्षे इत्यनेनावशिष्टं सर्वं हुत्वा अग्नये इदं इत्युक्त्वा विश्वेभ्यो देवेभ्यः स्वाहा॥ विश्वे॰ इति संस्र

वं हुत्वा तंदुलकणान् सग्रणीतापात्रं आस्तीर्णे बर्हिषि दक्षिणपाणिना निधाय तत्र गंगादिपुण्यनदीः स्मृत्वा
दक्षिणपाणिना स्पृशन्॥ ॐ पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि पूर्णं मे भूयाः सर्वमसि सर्वं मे भूयाः अक्षि
तमसि मा मे क्षेष्ठा इति जपित्वा कुशाग्रैः प्रागादिपंचदिक्षु प्रादक्षिण्येन क्रमेण जलं प्राच्यां दिशि देवा ऋत्वि
जो मार्जयंतां दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां प्रतीच्यां दिशि गृहाः पशवो मार्जयंतां उदीच्यां दिशि आपः
ओषधयो वनस्पतयो ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयंतामिति सुक्त्वा स्वशिरसि कुशाग्रैः अ
पो अस्मान्मातरः इत्यस्य देवश्रवा ऋषिः आपो देवता त्रिष्टुप्छंदः॥ मार्जने त्रिष्टुप्छंदः॥ मार्जने वि॰ आपो अ
स्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरापूत एमि इदमापः प्रवहत्य
पो स्य सिंधुद्वीप ऋषिः॥ आपो देवता अनुष्टुप्छंदः मार्जने वि॰ इदमापः प्रवहत यत्किंच दुरितं मयि यद्वाहम
भिदुद्रोह यद्वा शेप उतानृतं सुमित्रिया न आप ओषधयः संतु एतैर्मंत्रैर्मार्जयित्वा निर्ऋतिदिशि दुर्मि
त्रास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्मस्तं हन्मीति कुशाग्रेभ्यः सिंचेत् ततो यजमानस्य वामपार्श्वे स्थि
तपत्न्यंजलौ प्रणीतापात्रस्थं जलं मा अहं प्रजां परासिचं या नः सयावरी स्थन समुद्रो वो निनयानि स्वं पाथो
अपीथेत्येकश्रुत्या का प्रत्यंजुखं निषिंचेत् तदंजलिस्थजलैः पायनिरसानाय आत्मानं पत्नीं च प्रोक्षेत् पत्नीत
जुनं बर्हिषि निषिंचेत्॥ यजमानः॥ अग्ने वायम्दे ज्योस्थितं म अग्ने त्वन्न इत्यस्य गोपायना लोपायना बं
धुः सुबंधुः श्रुतबंधुरिति ऋषयः॥ अग्निर्देवता विराट्छंदः अग्न्युपस्थाने वि॰ ॐ अग्ने त्वन्नो अंतम उत

त्राता शिवो भवा वरूथ्यः वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः स नो बोधि श्रुधी हवमुरुष्या णो अघाय
तः समस्मात् तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ इच्च मे स्वरश्च मे तत्पुरस्तात् पयःपरिस्तरणं विवि
२४२ स्रुक्पर्युक्ष्य परिषिच्य अलंकृत्य घृतादिद्रव्यं च दक्षिणां दत्वा यस्य स्मृत्येति विष्णोर्पणं कुर्यात् ॥ इति स्थालीपा
कप्रयोगः ॥ अथ पिंडपितृयज्ञः प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं पिंडपितृयज्ञं करि
ष्ये इति संकल्प्याग्निं परिसमूह्य प्राग्दक्षिणाग्रैर्दर्भैः परिस्तीर्य उत्तरतोऽग्नेरीशान्यां वा पश्चाद्दक्षिणाग्रान् दर्भानास्ती
र्य तेषु स्थालीं शूर्पं उलूखलमुसले स्रुवं ध्रुवां कृष्णाजिनं सकृदाच्छिन्नं बर्हिः इध्मं मेक्षणं कमण्डलून् एकैक
शः प्रागग्रदक्षिणापवर्गाणि पात्राणि सादयेत् शूर्पे स्थालीं निक्षिप्य व्रीहिपूर्णां निधाय शूर्पे व्रीहीन् अष्टौ निधा
य दक्षस्थालीस्थान् व्रीहीन् कृष्णाजिनं उलूखलं कृत्वा पत्न्यावघात्य अविवेचं सकृत् फलीकृतान् सकृत् प्रक्षाल्या
ग्नौ चरुं श्रपयेत् ॥ अग्नेरुल्मुकं दक्षिणतः कृत्वा प्रदीप्तं तत्र ये रूपाणि प्रतिमुंचमाना असुराः संतः स्वधया चरंति ॥ प
रापुरो निपुरो ये भरंत्यग्निष्टाँल्लोकात्प्रणुदात्वस्मात् इति मंत्रेण अग्नेराग्नेय्यां दिशि निनयेत् ॥ तस्मादुल्मुकं पू
र्ववद्दर्भैः परिस्तीर्य तस्मादर्वाक् अपहता असुरा रक्षांसि वेदिषद इति मंत्रेण — न लेखामाग्नेयीसंस्थां स्प
ष्टामुल्लिखेत् ॥ तां च लेखां अभ्युक्ष्य पूर्ववत् — दिन सकृदाच्छिन्नं बर्हिषा वस्तीर्य आज्यं कांचित् पात्रे निषिच्य २४२
तेनैव पात्रेण ध्रुवायां निधाय ध्रुवाज्येन यज्ञं चरुं अभिघार्य अग्नेरुत्तरतः तद्दक्षिणतो वा उद्वास्य पुन— घार्या
ग्नेः पश्चिमदेशे आस्तीर्णे बर्हिषि निदध्यात् ॥ ध्रुवाज्ये नाभ्यंजनकशिपूपबर्हणानि चाग्नेर्दक्षिणतः सा

दयित्वाग्निं प्रज्वाल्य प्राचीनावीती भूत्वा न मिध्मं तूष्णीमग्नौ हुत्वा स्रुवेण ध्रुवाज्यं गृहीत्वाज्येन मेक्षणमुपस्त
र्य मेक्षणेन चरुं द्विरवदाय स्रुवेण चरुं अभिघार्य वदानं प्रत्यभिघार्य सोमाय पितृमते स्वधा नम इति मंत्र
मुच्चार्याग्नौ हुत्वा य सोमाय पितृमते इदं न मम इति त्यक्त्वा पुनस्तथैवावदाय अग्नये कव्यवाहनाय स्वधा नम इ
ति मंत्रमुच्चार्याग्नौ हुत्वा अग्नये कव्यवाहनायेदं न मम इति त्यक्त्वा यज्ञोपवीती भूत्वा मेक्षणमग्नौ प्रहृत्य प्राचीना
वीती सन् तां लेखां आदौ मध्ये अंते च शुंधंतां पितरः शुंधंतां पितामहाः शुंधंतां प्रपितामहा इति उदकेन परि
षिच्य तस्यां पितृतीर्थेन एतत्ते अस्मत्पितः अमुकशर्मन् अमुकगोत्र वसुरूप ये च त्वा। मंत्रानु एतत्ते अस्मत्पि
त्रे अमुकशर्मणे अमुकगोत्राय वसुरूपाय अयं पिंडः स्वधा नमः ये च त्वामनु गच्छंति तेभ्यश्च इति पित्रे पिंडं पिता
महयो रायरुद्रादित्यरूपयोः पिंडौ आदिमध्यांतेषु दत्वा पिंडान्तर्त्रतः सकृदत्र पितरो मादयध्वं यथाभागमावृष
यध्वमित्यनुमंत्रयेत् ॥ ततः स्वयाणि पिंड बर्हिमूले निमृज्य सव्यपार्श्वेन आवृत्य यथाशक्ति वायुं नियम्य तथैव य
पर्यावृत्य अमीमदंत पितरो यथाभागमावृषायिषतेति पुनस्तान् अनुमंत्र्य पिंडशिष्टचरोः किंचिदादायावघ्रा
य त्यजेत् ॥ ततो हस्तं प्रक्षाल्य शुंधतामित्यादिमंत्रैः पिंडेषु पितृतीर्थेन जलं निषिंचेत् ॥ ततः पिंडेषु दर्भेण पितृती
र्थेन तैलं अस्मत्पितः अमुकशर्मन् अमुकगोत्र वसुरूप अभ्यंक्ष्वेति एवं पितामहप्रपितामहयोरपि वसुं अं
तं अभ्यंक्ष्वेत्यंतं चोक्त्वा दत्वा तथैव सुवुध्यतानि नामगोत्ररूपाण्युक्त्वा आंक्ष्वेति चोक्त्वा तथैव अंजनं दद्यात् ॥ अ

२४३ —वासः वस्त्रांतं सूत्रं छित्वं दं वापं चात्रा द्वर्याधिकत्वेदातुः स्वप्न को ष्टस्थं लोमं वाएतद्वः पितरो वासो मानो तोन्
त्पितरो पुंन्ध्व मित्यनेन प्रत्येकं पिंडे षु समर्घ पूजयित्वा नमो वः पितरः इषे नमो वः पितरः ऊर्जे नमो वः पितरः शुष्मा
य नमो वः पितरो घोराय नमो वः पितरो जीवाय नमो वः पितरो रसाय स्वधा वः पितरो नमो वः पितरो नम एता
म्यो कं पितर इमा अस्माकं जीवा वो जीवंत इह संतः स्याम मनो न्याहुवाम हे नाराशंसेन सोमेन पितॄणां च मन्मभिः
आनएतु मनः पुनः क्रत्वे दक्षाय जीवसे ज्योक् च सूर्यं दृशे पुनर्नः पितरो मनो ददातु दैव्यो जनः जीवं व्रातं सचेमहि
इत्यनेन पिंडानुपतिष्ठेत्॥ अथ पिंडस्थानात् पितॄन् याम्या दिशं अनुव्रजन् परेतन पितरः सोम्यासो गंभीरेभिः
पथिभिः पूर्विणेभिः दत्वायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छतेत्यनेनोद्वासयेत्॥ अथाग्निं प्रत्येया
त्॥ अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशं ऋध्यामा त ओहैः यदंतरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा
जिहिंसिम॥ अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु दुरिता यानि चकृम करोतु मामनेनसं वारं मे दत्त पितर इ
ति जप्त्वा पिंडानां मध्यमं पिंडं पत्नी॥ आधत्त पितरो गर्भं कुमारं पुष्करस्रजं यथायमरपा असदिति प्राशयेत्॥ अ
प्सु नीतोल्मुके वाऽन्यत्र पिंडौ प्रक्षिपेत्॥ अन्नारुचिमान् महारोगग्रस्तो वा पिंडाः सर्वौ प्राश्नीयात्॥ रोगान्मुक्तिर्भ २४३
तिर्वास्य भवेत्॥ उपयुक्ता वा शिष्टान्नाणां द्विर्वहुत्सर्गः॥ इंद्वाशिक्रमेकंतरेण न सहोत्सृजेत्॥ अथ दर्शप्रयो
गः॥ यजमानः सायंहोमं कृत्वा पूर्ववद्व्रतनियमपरिस्तरणादिकं कृत्वापरेद्युः प्रातर्होमं विधाय प्रणीताप्रणयनं

२४४ स्थालीपाके कृते अग्नये त्वा जुष्टं निर्वपामि इंद्राग्नीभ्यां जुष्टं निर्वपामीति पूर्ववन्निरूप्य व्रीहीणां दिहविदवद
नांतं कृत्वा अग्नये स्वाहा इंद्राग्नीभ्यां स्वाहेति हुत्वा यथादेवतमुद्देशत्यागौ कृत्वा स्विष्टकृदादि होमं तंत्रशेषं स
मापयेत्॥ इति दर्शप्रयोगः॥ इतिश्रीमदनंतदेवसुतापदेवतनयेनानंतदेवेन विरचिते स्मृतिकौस्तुभे सं
स्कारदीधितिः समाप्तिरगमत्॥ संवत् १८३० वर्षे वैसाखवदि पांचै शुकरवार॥ लिखतं स्वामी चेतन
दास पठनार्थं स्यकृष्णाश्रम शुभंभवस्तु कल्याणमस्तु॥ ॥संख्या श्लोक दश सहस्रस्य॥ १०००

२४४

Indira Gandhi National
Centre for the Arts